प्राच्यसाहित्य पुनःप्रकाशनश्रेणि ग्रन्थांक-५

महोपाध्यायमेघविजयगणिविरचित

# दिग्विजयमहाकाव्य

अने

महोपाध्यायमेघविजयगणिविरचित

# देवानन्दमहाकाव्य

-: शुभाशीर्वाद :-

व्याख्यानवाचस्पति तपागच्छाधिपति

परमशासनप्रभावक स्व. पूज्यपादाचार्यदेव श्रीमद्

विजयरामचन्द्रसूरीश्वरजी महाराजा

-: प्रेरक :-

पू. आचार्यदेव श्रीपूर्णचन्द्रसूरीश्वरजी महाराज

पू. आचार्यदेव श्रीमुक्तिप्रभसूरीश्वरजी महाराज

-: पुनःप्रकाशक :-

श्री सिद्धिगिरि चातुर्मास - उपधानतप आराधक समिति

महाराष्ट्र भुवन धर्मशाला, तलेटी रोड,

पालिताणा - (सौराष्ट्र)

प्राच्यसाहित्य पुन:प्रकाशनश्रेणि ग्रन्थांक-५

महोपाध्यायमेघविजयगणिविरचित

# दिग्‌विजयमहाकाव्य

**अने**

महोपाध्यायमेघविजयगणिविरचित

# देवानन्दमहाकाव्य

## -: शुभाशीर्वाद :-

व्याख्यानवाचस्पति तपागच्छाधिपति

**परमशासनप्रभावक स्व. पूज्यपादाचार्यदेव श्रीमद्**

**विजयरामचन्द्रसूरीश्वरजी महाराजा**

## -: सदुपदेशक :-

परमस्वाध्यायप्रेमी प्रवचनप्रभावक स्व. पूज्य

**आचार्यदेव श्रीमद् विजयमुक्तिचन्द्रसूरीश्वरजी पट्टालंकार**

प्रशमरसपयोनिधि पू. आचार्यदेव श्रीमद्

**विजय जयकुंजरसूरीश्वरजी महाराजा**

## -: प्रेरक :-

**पू. आचार्यदेव श्रीपूर्णचन्द्रसूरीश्वरजी महाराज**

**पू. आचार्यदेव श्रीमुक्तिप्रभसूरीश्वरजी महाराज**

## -: पुन:प्रकाशक :-

**श्री सिद्धिगिरि चातुर्मास - उपधानतप आराधक समिति**

महाराष्ट्रभुवन धर्मशाला, तहेटी रोड,

पालिताणा - (सौराष्ट्र)

# ॥ सिंघीजैनग्रन्थमालासंस्थापकप्रशस्तिः ॥

अस्ति बङ्गाभिधे देशे सुप्रसिद्धा मनोरमा । मुर्शिदाबाद इत्याख्या पुरी वैभवशालिनी ॥ १
बहवो निवसन्त्यत्र जैना ऊकेशवंशजाः । धनाढ्या नृपसदृशा धर्मकर्मपरायणाः ॥ २
श्रीडालचन्द इत्यासीत् तेष्वेको बहुभाग्यवान् । साधुवत् सच्चरित्रो यः सिंघीकुलप्रभाकरः ॥ ३
बाल्य एवागतो यश्च कर्तुं व्यापारविस्तृतिम् । कलिकातामहापुर्यां कृतधर्मार्थनिश्चयः ॥ ४
कुशाग्रीयस्वबुद्ध्यैव सद्वृत्त्या च सुनिष्ठया । उपार्ज्य विपुलां लक्ष्मीं कोट्यधिपोऽजनिष्ट सः ॥ ५
तस्य मन्नुकुमारीति सन्नारीकुलमण्डना । अभूत् पतिव्रता पत्नी शीलसौभाग्यभूषणा ॥ ६
श्रीबहादुरसिंहाख्यो गुणवाँस्तनयस्तयोः । अभवत् सुकृती दानी धर्मप्रियश्च धीनिधिः ॥ ७
प्राप्ता पुण्यवता तेन पत्नी तिलकसुन्दरी । यस्याः सौभाग्यचन्द्रेण भासितं तत्कुलाम्बरम् ॥ ८
श्रीमान् राजेन्द्रसिंहोऽस्य ज्येष्ठः पुत्रः सुशिक्षितः । यः सर्वकार्यदक्षत्वात् पितुर्दक्षिणबाहुवत् ॥ ९
नरेन्द्रसिंह इत्याख्यस्तेजस्वी मध्यमः सुतः । सूनुर्वीरेन्द्रसिंहश्च कनिष्ठः सौम्यदर्शनः ॥ १०
सन्ति त्रयोऽपि सत्पुत्रा आप्तभक्तिपरायणाः । विनीताः सरला भव्याः पितुर्मार्गानुगामिनः ॥ ११
अन्येऽपि बहवस्तस्याभवन् स्वस्रादिबान्धवाः । धनैर्जनैः समृद्धः सन् स राजेव व्यराजत ॥ १२

अन्यच्च–

सरस्वत्यां सदासक्तो भूत्वा लक्ष्मीप्रियोऽप्ययम् । तत्राप्यासीत् सदाचारी तच्चित्रं विदुषां खलु ॥ १३
नाहंकारो न दुर्भावो न विलासो न दुर्व्ययः । दृष्टः कदापि तद्गेहे सतां तद् विस्मयास्पदम् ॥ १४
भक्तो गुरुजनानां स विनीतः सज्जनान् प्रति । बन्धुजनेऽनुरक्तोऽभूत् प्रीतः पोष्यगणेष्वपि ॥ १५
देश-कालस्थितिज्ञोऽसौ विद्या-विज्ञानपूजकः । इतिहासादि-साहित्य-संस्कृति-सत्कलाप्रियः ॥ १६
समुन्नत्यै समाजस्य धर्मस्योत्कर्षहेतवे । प्रचाराय च शिक्षाया दत्तं तेन धनं घनम् ॥ १७
गत्वा सभा-समित्यादौ भूत्वाऽध्यक्षपदान्वितः । दत्त्वा दानं यथायोग्यं प्रोत्साहिताश्च कर्मठाः ॥ १८
एवं धनेन देहेन ज्ञानेन शुभनिष्ठया । अकरोत् स यथाशक्ति सत्कर्माणि सदाशयः ॥ १९
अथान्यदा प्रसङ्गेन स्वपितुः स्मृतिहेतवे । कर्तुं किञ्चिद् विशिष्टं स कार्यं मनस्यचिन्तयत् ॥ २०
पूज्यः पिता सदैवासीत् सम्यग्-ज्ञानरुचिः स्वयम् । तस्मात् तज्ज्ञानवृद्ध्यर्थं यतनीयं मयाऽप्यरम् ॥ २१
विचार्यैवं स्वयं चित्ते पुनः प्राप्य सुसम्मतिम् । श्रद्धास्पदस्वमित्राणां विदुषां चापि तादृशाम् ॥ २२
जैनज्ञानप्रसारार्थं स्थाने शान्तिनिकेतने । सिंघीपदाङ्कितं जैनज्ञानपीठमतीष्ठिपत् ॥ २३
श्रीजिनविजयः प्राज्ञो मुनिनाम्ना च विश्रुतः । स्वीकर्तुं प्रार्थितस्तेन तस्याधिष्ठायकं पदम् ॥ २४
तस्य सौजन्य-सौहार्द-स्थैर्यौदार्यादिसद्गुणैः । वशीभूय मुदा येन स्वीकृतं तत्पदं वरम् ॥ २५
कवीन्द्रेण रवीन्द्रेण स्वीयपावनपाणिना । रस-नागाङ्क-चन्द्राब्दे तत्प्रतिष्ठा व्यधीयत ॥ २६
प्रारब्धं मुनिना चापि कार्यं तदुपयोगिकम् । पाठनं ज्ञानलिप्सूनां तथैव ग्रन्थगुम्फनम् ॥ २७
तस्यैव प्रेरणां प्राप्य श्रीसिंघीकुलकेतुना । स्वपितृश्रेयसे चैषा प्रारब्धा ग्रन्थमालिका ॥ २८
उदारचेतसा तेन धर्मशीलेन दानिना । व्ययितं पुष्कलं द्रव्यं तत्तत्कार्यसुसिद्धये ॥ २९
छात्राणां वृत्तिदानेन नैकेषां विदुषां तथा । ज्ञानाभ्यासाय निष्कामसाहाय्यं स प्रदत्तवान् ॥ ३०
जलवातादिकानां तु प्रातिकूल्यादसौ मुनिः । कार्यं त्रिवार्षिकं तत्र समाप्यान्यत्र चास्थितः ॥ ३१
तत्रापि सततं सर्वं साहाय्यं तेन यच्छता । ग्रन्थमालाप्रकाशाय महोत्साहः प्रदर्शितः ॥ ३२
नन्द-निध्यङ्क-चन्द्राब्दे जाता पुनः सुयोजना । ग्रन्थावल्याः स्थिरत्वाय विस्तराय च नूतना ॥ ३३
ततः सुहृत्परामर्शात् सिंघीवंशनभस्वता । भाविद्याभवनायेयं ग्रन्थमाला समर्पिता ॥ ३४
आसीत्तस्य मनोवाञ्छाऽपूर्वा ग्रन्थप्रकाशने । तदर्थं व्ययितं तेन लक्षावधि हि रूप्यकम् ॥ ३५
दुर्विलासाद् विधेर्हन्त ! दौर्भाग्याच्चात्मबन्धूनाम् । स्वल्पेनैवाथ कालेन स्वर्गं स सुकृती ययौ ॥ ३६
इन्दु-ख°-शून्य°-नेत्राब्दे मासे आषाढसञ्ज्ञके । कलिकाताख्यपुर्यां स प्राप्तवान् परमां गतिम् ॥ ३७
पितृभक्तैश्च तत्पुत्रैः प्रेयसे पितुरात्मनः । तथैव प्रपितुः स्मृत्यै प्रकाश्यतेऽधुना पुनः ॥ ३८
इयं ग्रन्थावलिः श्रेष्ठा प्रेष्ठा प्रज्ञावतां प्रथा । भूयाद् भूत्यै सतां सिंघीकुलकीर्तिप्रकाशिका ॥ ३९
विद्वज्जनकृताह्लादा सच्चिदानन्ददा सदा । चिरं नन्दत्वियं लोके श्रीसिंघी ग्रन्थपद्धतिः ॥ ४०

***

# प्रकाशकीय

जिनशासनना महानज्योतिर्धर, सुविशाल सुविहित- मुनिगण गच्छाधिपति, संघस्थविर, संघसन्मार्गदर्शक, संघपरमहितैषी, व्याख्यानवाचस्पति, स्व. पूज्यपाद आचार्यदेव श्रीमद् **विजयरामचन्द्रसूरीश्वरजी** महाराजाना शुभ आशीर्वादथी सिंहगर्जनाना स्वामी, स्व. पूज्यपाद आचार्यदेव श्रीमद् **विजयमुक्तिचन्द्रसूरीश्वरजी महाराजाना** पट्टालंकार, शासनप्रभावक पूज्यपाद आचार्यदेव श्रीमद् **विजयजयकुंजरसूरीश्वरजी महाराजा** तथा तेओना विद्वान शिष्यरत्नो समर्थसाहित्यकार पू. आचार्यदेव श्रीमद् **विजयपूर्णचन्द्रसूरीश्वरजी महाराज** तथा समर्थप्रवचनकार पू. आचार्यदेव श्रीमद् **विजयमुक्तिप्रभसूरीश्वरजी महाराज** आदि ठाणानुं वि.सं: २०४७ नुं चातुर्मास **शा. केशवलाल पुनमचंद परिवार उंबरीवाला** तरफथी सिद्धगिरि महातीर्थे महाराष्ट्रभुवनमां खूब ज जाहोजलाली पूर्वक थयुं. आ प्रभावक चातुर्मासमां ३४० आराधको तथा चातुर्मास दरम्यान **उंबरीवाला शा. केशवलाल पुनमचंद परिवार** आयोजित उपधानतपमां ३४८ आराधको जोडायेल.

उपधानतपना मालारोपण निमित्ते ४० छोडना भव्य उद्यापन साथे भव्य पंचान्हिका महोत्सव एवो सुंदर उजवायो के सर्वे आराधको माटे यादगार बनी रह्यो.

चातुर्मास तथा उपधान दरम्यान अत्रे बिराजमान पू. **बापजी महाराजना** प्रशिष्य पह. प्रशांतमूर्ति आ.देव. श्रीमद् **विजयविबुधप्रभसूरीश्वरजी महाराजाना** आज्ञावर्तिनी पू. **साध्वीजी श्री मदनरेखाश्रीजी** म. तथा पू. **साध्वीजी श्री पद्मरेखाश्रीजी** म. आदि ठाणा अने पू. **साध्वीजी श्री गुणज्ञाश्रीजी**, पू. **साध्वीजीश्री भद्रज्ञाश्रीजी** म. आदि ठाणा तथा स्व. पूज्यपाद गच्छाधिपति आचार्यदेव श्रीमद् **विजयरामचन्द्रसूरश्वरजी महाराजाना** आज्ञावर्तिनी पू. **साध्वीजीश्री दिव्यप्रज्ञाश्रीजी** म. आदि ठाणानी निश्रामां आराधना करनार श्राविका बहेनोनी सूत्रोनी बोलीनी ज्ञानखातानी उपजमांथी आ ग्रंथ प्रकाशित करतां अमे अत्यन्त आनन्द अनुभवीए छीए.

**- श्री सिद्धगिरि चातुर्मास उपधानतप आराधक समिति**
**महाराष्ट्रभुवन, पालिताणा.**

ॐ

# दिग्विजयमहाकाव्य-विषयानुक्रम


| | पृ० |
|---|---|
| १ जम्बूद्वीपवर्णनो नाम प्रथमः सर्गः। | १-१३ |
| २ श्रीभरतवर्णनो नाम द्वितीयः सर्गः। | १४-१९ |
| ३ कथानायकवंशमूलस्य श्रीवीरस्य भगवतो दिग्विजयवर्णनो नाम तृतीयः सर्गः। | २०-२७ |
| ४ कथानायकगुरोर्दिग्विजयवर्णनो नाम चतुर्थः सर्गः। | २८-३६ |
| ५ कथानायकस्य उत्तराशाविजयवर्णनो नाम पञ्चमः सर्गः। | ३७-४८ |
| ६ कथानायकस्य ईशानदिग्विजयवर्णनो नाम षष्ठः सर्गः। | ४९-५४ |
| ७ पश्चिमदिग्विजयो नाम सप्तमः सर्गः। | ५५-६६ |
| ८ श्रीशिवपुरीस्थित-शङ्खेश्वरपार्श्ववर्णनो नाम अष्टमः सर्गः। | ६७-८० |
| ९ प्रस्थानवर्णनो नाम नवमः सर्गः। | ८१-९३ |
| १० नगरवर्णनो नाम दशमः सर्गः। | ९४-१०३ |
| ११ पूर्वदिक्प्रयाणवन-भवन-नगरमार्गवर्णनो नाम एकादशः सर्गः। | १०४-११६ |
| १२ पूर्वपत्तन-विहारनगर-श्रीचिन्तामणि-पार्श्वप्रभुस्तुतिवर्णननामा द्वादशः सर्गः। | ११७-१२५ |
| १३ श्रीतीर्थराजगिरि-श्रीगौतमस्वामि-सुधर्मस्वामिस्तुतिवर्णनो नाम त्रयोदशः सर्गः। | १२६-१३३ |
| १ परिशिष्टम्। | १३४-१४१ |
| २ विशिष्टनामसूचिः। | १४२-१४४ |

# प्रस्तावना

## १. प्रति परिचय

प्रस्तुत "दिग्विजय महाकाव्य" ना संपादनमां मने बे प्रतिओ प्राप्त थई हती. एक प्रति आगराना श्रीविजयधर्म-लक्ष्मी-ज्ञानमंदिरमांथी मुनिराज श्रीविद्याविजयजी महाराज द्वारा अने बीजी पूनाना भांडारकर ईन्स्टिट्यूटमांथी विद्वद्वर्य आचार्य श्रीजिनविजयजी द्वारा मळी हती. ए माटे बंने विद्वानोनो आभार मानुं छुं.

बंने प्रतिओ लगभग शुद्ध हती अने लिपि पण सरस हती. आगरानी प्रतिमां १९ मुं पत्र नहोतुं, जेथी तेटलो भाग में पूनानी प्रति परथी लीधो छे; बाकीनो समग्र पाठ में आगरानी प्रतिने आदर्श राखीने लीधो छे.

आगरानी प्रतिना हांशियामां कठिन शब्दोनां टिप्पणो आपेलां छे; ते ज टिप्पणो दिग्विजय काव्यना कठिन शब्दोना टिप्पणोवाळी एक छ पानानी प्रति मने आगराना ते ज विजयधर्मलक्ष्मीज्ञानमंदिरमांथी मळी हती, तेनी साथे मळतां हतां. यद्यपि तेमां कर्त्तानुं नाम जणाव्युं नथी पण केवल सप्तम सर्गनां टिप्पणोनी अन्ते "इति श्रीदिग्विजयकाव्ये महोपाध्याय-श्रीमेघविजयगणिकृते सप्तमसर्गविवरणम्" आ उल्लेखथी केवल सातमा सर्गनां ज नहीं परन्तु समग्र काव्यनां टिप्पणो ग्रन्थकर्त्तानां पोतानां ज होय एवुं मारुं अनुमान छे. केमके शब्दालंकार जेवा कठिन शब्दोना अर्थो, कर्त्ता सिवाय आटलां स्फुट बीजा न करी शके. वळी 'देवानन्द काव्य'नुं टिप्पण कर्ताए पोते ज रचेलुं छे तेथी आ समग्र टिप्पण पण कर्त्ताए पोते ज रचेलुं हशे; एम मानी में पहेला पृष्ठमां ज "ग्रन्थकारकृतानि टिप्पणानि" ए मथाळा नीचे ज अर्थो आप्या छे. तेनी नीचेनुं टिप्पण जे अंग्रेजी आंकडाओथी "संपादककृतानि टिप्पणानि"ना मथाळा नीचे आप्युं छे, ते मारुं छे. लगभग आठ सर्ग सुधी ज कर्त्तानुं टिप्पण मळी आवे छे. ते पछीना सर्गो पर हशे के केम ते जाणी शकातुं नथी परंतु पाछळना सर्गो सरळ अने तेमां काव्यदृष्टिनुं वर्णन होवाथी तेना पर टिप्पणनी जरूर नथी एम समजीने में पण टिप्पणो आपवानुं मांडी वाळ्युं.

ग्रन्थकारना टिप्पणोमां निर्दिष्ट कोशोनां स्थळो शोधीने तेना अध्याय, कांड आदि आपवा में यावत् शक्य प्रयत्न कर्यो छे अने संपादनमां पण सावधानी राखी छे छतां क्यांई अशुद्धिओ दृष्टिगोचर थाय तो विज्ञ पाठकगण सूचित करवानी कृपा करे एवी आशा राखुं छुं.

कविए पोतानी मोटी कृतिथी लईने यावत् नानी कृतिओमां पण पोतानी प्रशस्ति आपेली छे; ए तेमना समग्र ग्रंथोना अवलोकन परथी मालम पडे छे. ज्यारे आ विस्तृत महाकाव्यनी अंते कविए कंई ज परिचय आप्यो नथी; एथी संभवतः आ काव्य कविनी अपूर्ण कृति हशे. छतां काव्यनो अंत जोतां कंई पण वर्ण्य वस्तु बाकी होय तेम जणातुं नथी. एम कहेवुं अघटित नथी के आ काव्य कविनी अंतिम कृति हशे अने तेथी पोतानो परिचय आपवानुं बाकी रही गयुं लागे छे.

काव्यान्ते एक "परिशिष्ट" आप्युं छे, ते आ कविनी ज कृति छे. तेमां श्रीहीरविजयसूरिथी लईने श्रीविजयप्रभसूरि सुधीनी पट्टावली आपी छे, जेमां श्रीहीरविजयसूरि, श्रीविजयसेनसूरि, श्रीविजयदेवसूरि, श्रीविजयसिंहसूरि अने श्रीविजयप्रभसूरिनां चरित्रोनुं वर्णन गद्यमां आपेलुं छे. आ पट्टावली श्रीधर्मसागर उपाध्याये

रचेली पट्टावलीनी अनपूर्तिरूपे आलेखायेली छे; अने टूंकमां घटनाओनो क्रम सालवार आपवा प्रयत्न करेलो छे. आवी पट्टावली आवा कवित्व दृष्टिए आलेखायेला काव्यमां पूरक बने ए हेतुथी परिशिष्टरूपे आपेली छे.

---

## २. कविनो परिचय

श्रीमेघविजय उपाध्यायनो जन्म, स्थान के गृहस्थावस्थानो परिचय क्यांईथी जाणी शकातो नथी, तेम तेमना श्रमण जीवनमांनी बीजी कोई पण माहिती मळती नथी.

तेओए पोतानी प्रत्येक कृतिओना अंते प्रशस्ति रची छे; जेमां पोतानुं नाम, गुरु श्रीकृपाविजयनुं नाम अने श्रीविजयप्रभसूरि प्रति भक्ति-अतिरेक दर्शावती पंक्तिओ मळी आवे छे. श्रीविजयप्रभसूरिए तेमने उपाध्यायपद आपेलुं तेथी तेमनी प्रति तेओ आ प्रकारे कृतज्ञता दर्शावता, एम जणाई आवे छे.

तेओ साहित्यना प्रखर अभ्यासी महाकवि हता; ए तेमनी अनेक काव्यरचनाओथी जणाई आवे छे. किरात, माघ, नैषध, मेघदूत आदि काव्यना सतत वाचनथी तेमने समस्त काव्यो कंठस्थ हशे, ए तेमनी ते ते काव्योनी समस्यापूर्तिओथी मालम पडी आवे छे. तेओ दर्शन-तत्त्वज्ञानना पंडित हता; ए तेमना 'युक्तिप्रबोध नाटक' परथी जणाई आवे छे. ए नाटकमां तेमणे ते वखतना प्रधानतः दिगंबर मतानुयायी बनारसीदासना सिद्धांतोनुं आवेशपूर्वक खंडन कर्युं छे अने तेथी इतरदर्शनोना खंडनात्मक दृढमार्गने मूकीने जैनदर्शनना नवीनमत संस्थापकनुं युक्तिपूर्वक खंडन करवानो नवीन मार्ग अपनाव्यो छे. व्याकरणमां तेमणे 'हैमकौमुदी' अपर नाम 'चंद्रप्रभा' रचीने श्रीहेमचंद्रसूरिनी 'सिद्धहेमचन्द्रशब्दानुशासन-लघुवृत्ति' ने गोठवी सरळ अने विशद बनावानो प्रयत्न कर्यो छे. ए सिवाय तेमणे एथी नानी 'लघुप्रक्रिया' अने तेथी ये नानी 'हेमशब्दचन्द्रिका' रचीने वैयाकरण तरीकेनी ख्याति उज्ज्वळ बनावी छे. सौथी ध्यान खींचे तेवा तेमना ज्योतिष्विषयक अभ्यासने लगता ग्रंथो छे. जैन आचार्योमांथी श्रीभद्रबाहुए रचेली फळादेश विषयक 'भद्रबाहुसंहिता' अने श्रीकालकाचार्ये रचेली 'कालकसंहिता'नां नामो मळे छे, पण हस्तरेखाना विषयमां 'हस्तसंजीवन' जेवुं स्पष्ट अने विस्तारयुक्त संस्कृतनी विस्तृत टीका साथे बीजा कोईए आलेखेलुं जणातुं नथी. ते सिवाय 'उदयदीपिका', 'वर्षप्रबोध', 'प्रश्नसुंदरी' वगेरे ग्रंथो तो ज्योतिष्ना विशिष्ट अभ्यासी तरीकेनुं तेमनुं अपूर्व कौशल बतावी आपे छे. तेओ अध्यात्मविषयना पण मोटा विद्वान् हता ए तेमना 'मातृकाप्रसाद' अने 'अर्हद्गीता' वगेरे ग्रंथोथी जाणी शकाय छे. तेमनुं 'सप्तसंधान महाकाव्य' तो एक अद्भुत ग्रंथ छे; जेमांथी सात महापुरुषोनां चरित्रो एक ज पद्यमांथी सात अर्थ द्वारा नीकळे छे; ए तेमनो अनेकार्थक शब्दभंडोळ बतावी आपे छे.

तेओ गुजराती भाषाना पण सिद्धहस्त कवि-लेखक छे; ए तेमनी केटलीक गुजराती कृतिओ उपरथी जाणी शकाय छे.

आम तेओ प्रतिभाशाली कवि, स्फुरन्मति दार्शनिक, प्रयोगविशुद्ध वैयाकरण, समयज्ञ ज्योतिषी, आध्यात्मिक आत्मज्ञानी हता; ए तेमना ग्रंथोमांनां तद्विषयक आलेखनो परथी जाणी शकाय छे.

तेओ उपा० यशोविजय अने उपा० विनयविजयना समकालीन विद्वान् हता, छतां एक बीजाये क्यांई कोईनुं नाम उल्लेख्युं नथी; तेथी जैन परंपरामां चाली आवती नाम न उल्लेखवानी रूढिथी जाणी शकाय छे के तेओ पण तेमना जेवा ज समर्थ हता अने तेथी समान सामर्थ्यना कारणे एक बीजाने न उल्लेख्या होय ए स्वाभाविक लागे छे.

मुनिराज श्रीदर्शनविजयजी द्वारा संपादित 'पट्टावलीसमुच्चय' नामना ग्रंथमां मुनिवर्य श्रीचारित्रविजयजी ए आलेखेली पृ० १०९ परनी 'गुरुमाला' मां श्रीमेघविजय उपाध्यायनो परिचय आपेलो छे पण ए परिचय अभ्रान्त नथी; केमके ते समयमां कंईक आगळपाछळ मेघविजय नामना बे विद्वानो थया छे. तेमांथी एक तो श्रीविजयसेनसूरिना हस्तदीक्षित शिष्य हता अने तेओ ठेठ श्रीविजयरत्नसूरि सुधी लगभग सोथीये वधु वर्षो सुधी जीवित रही, छेवट सुधी रचना कर्ये जाय ए संभवित नथी. तेथीं ए मेघविजय तो 'विजयतिलक-सूरिरास' मां जणावेला नंदिविजय वाचकना समानशील सहकारी हता अने जेमने सं० १६५६ मां उपाध्यायपदवी आप्यानुं सूचन 'विजयप्रशस्तिमहाकाव्य' ना पृष्ठ ५९७–९८ मां करायुं छे. पण आ मेघविजय तो ते पछी थयेला श्रीकृपाविजयना शिष्य हता. छतां आ बंने मेघविजयने एक समजी लई तेमां वर्णन करेलुं छे. तेमना शिष्योनुं वंशवृक्ष पण तेमां सूचवेलुं छे ते पण ए ज रीते सेळभेळ नामोनुं बनेलुं होवाथी वास्तविक नथी. छतां श्रीमेघविजयनुं शिष्यमंडळ मोटुं हशे तेमां शक नथी. तेमणे नीचे जणावेला ग्रंथोनी प्रशस्तिमां केटलाक ग्रंथो तो पोताना अमुक अमुक शिष्योने भणवा माटे बनाव्या; एवुं सूचन नामोल्लेखपूर्वक कर्युं छे.

तेमना गुरु श्रीकृपाविजयजीनी 'श्रीविजयप्रभसूरि निर्वाणरास' सिवाय कोई रचना उपलब्ध थई नथी छतां तेओ मोटा कवि हता ए तेमणे ज्यां त्यां करेला उल्लेखोथी जणाई आवे छे. वळी तेओ षट्दर्शनना प्रखरवेत्ता अने साहित्य तेमज सिद्धान्तना पण्डित हता.[1] श्रीकृपाविजयजीना दीक्षा अने शिक्षा गुरु क्रमशः श्रीकमलविजयजी अने श्रीसिद्धिविजयजी हता. ते बन्ने गुरुओए सन्मानक नगरमां लुम्पाकोने हरावी जयश्री प्राप्त करी हती.[2]

तेमना गुरुओनुं वंशवृक्ष आ प्रमाणे छे:—

हीरविजयसूरि
|
कनकविजय
|
शीलविजय
|
कमलविजय — सिद्धिविजय — चारित्रविजय
सिद्धिविजय
|
कृपाविजय
|
मेघविजय

कविना ग्रंथोमां छेल्लामां छेल्लुं सं० १७६० मां रचायेलुं 'सप्तसंधानमहाकाव्य' मळी आवे छे अने 'विजयदेवमाहात्म्यविवरण' जेनी लिपि सं० १७०९ मां थयानी पहेलवहेली रचना साल मळे छे. आम

१ "यः षट्तर्कवितर्ककर्कशमतिः साहित्य-सिद्धान्तवित् प्राणप्रक्षितिपः कृपादिविजयः प्राज्ञो विनेयस्तयोः ।
तत्पादाम्बुजभृङ्गमेघविजयोपाध्यायलब्धाऽऽत्मना ग्रन्थो मेरुमहीधरावधिरयं सिद्धिश्रिये नन्दतात्" ॥ १६ ॥
—युक्तिप्रबोधनाटक, प्रान्तप्रशस्ति ।

२ "आद्यः श्रीकमलादिमश्च विजयस्तस्यानुजन्मा बुधः श्रीसिद्धेर्विजयोऽत्र तौ मम गुरोर्दीक्षाऽनुशिक्षागुरू ।
श्रीसन्मानकनाम्नि धाम्नि महसो द्रागे विजित्य क्षणाल्लुम्पाकेन्द्रगणान् जयश्रियमम् संप्रापतुर्विश्रुताम् ॥ १५ ॥
—युक्तिप्रबोधनाटक, प्रान्तप्रशस्ति ।

तेमनो ५० वर्ष सुधीनो ग्रन्थोनो रचनाकाल तो नोंधायेलो मळे ज छे; पण तेमनी बाल्यावस्था अने छेल्ली वृद्धावस्थानां कुल २०–२५ वर्ष ऊमेरीए तोये ओछामां ओछुं तेओ ८० वर्ष के ते करतां ये वधु जीव्यानुं अनुमान थाय छे.

तेमनी प्रत्येक कृति संशोधित-संपादित थई प्रकाशमां आवे तो तेमना अखंड व्यक्तित्वनी झांखी थई शके छतां तेमना जेटला ग्रन्थो मळी आवे छे तेनी नोंध ज्यां त्यांथी एकत्रित करी अने तेमां शुं विषय आवे छे ते नीचे मुजब विषयवार आपवा प्रयत्न कर्यो छे.

## ३. ग्रन्थकारे रचेला ग्रन्थोनी विषयवार नोंध

### [ काव्यग्रंथो ]

१. **शांतिनाथचरित्र**—तेमां रचनासमय नोंध्यो नथी. आ काव्यमां 'नैषधीय-महाकाव्य' नी समस्या-पूर्ति छे. तेमां सोळमा तीर्थंकर श्रीशांतिनाथ भगवाननुं चरित्र वर्णन छे. वीरविजय मुनि सं० १७१० मां विजयप्रभसूरि बन्या ते पछी आ काव्य रचायुं हशे, केमके तेनी प्रशस्तिमां श्रीविजयप्रभसूरिनुं स्मरण[१] करेलुं छे. आ काव्य 'जैन विविध साहित्य शास्त्रमाला' मां प्रकाशित थयेलुं छे.

२. **देवानन्दमहाकाव्य**—सं० १७२७ मां आ काव्य मारवाडना सादडी नगरमां रचायुं हतुं.[२] आ काव्यमां 'माघकाव्य'नी समस्यापूर्त्ति छे अने श्रीविजयदेवसूरि तेमज श्रीविजयप्रभसूरिनुं चरितवर्णन छे. आ काव्य 'सिंघी जैन ग्रन्थमाला'मां प्रगट थयुं छे.

३. **किरात समस्यापूर्त्ति (?)**—आ काव्यनुं नाम शुं छे ते जाणी शकायुं नथी. पण तेमां 'किरातार्जुनीय-काव्य'नी समस्यापूर्त्ति तो छे ज. एनी एक प्रति आचार्य श्रीविजयेन्द्रसूरि पासे हती जेनी प्रेसकोपी में केटलाये वर्षो अगाऊ तेमने करी आपेली, ए स्मरण उपरथी जणावुं छुं. ते प्रति मने मळी शकी नथी. ते बे एक सर्गात्मक ज हती. संभवतः क्यांई थी तेनी पूरी प्रति पण मळी आवे.

४. **मेघदूतसमस्यालेख**—आमां रचना समय आप्यो नथी. आ काव्य 'मेघदूत' काव्यनी समस्यापूर्त्ति-रूप होई एक पत्र रूपे छे. कविए भाद्रपद पांचम पछी आ पत्र पोताना गच्छाचार्य श्रीविजयप्रभसूरि, जेओ ते समये देवपाटणमां स्थित हता तेमने नवरंगपुर[३]—अवरंगाबादथी लख्यो छे. आ समस्याना अंते कविए लख्युं छे के—विजयदेवसूरिनी भक्तिमाटे माघकाव्यनी समस्यापूर्तिद्वारा अने श्रीविजयप्रभसूरिनी भक्ति माटे मेघदूत काव्यनी समस्यापूर्त्तिरूपे तेमनी प्रशंसा करी छे.[४] आ कथनमां ग्रंथकारे पोतानी बे कृतिओनो अनुक्रम बताव्यो छे तेथी जणाय छे के माघसमस्यापूर्त्ति पछी ज मेघदूतसमस्यापूर्त्ति बनी. एटले सं० १७२७ पछी ज ते रचायुं. आ ग्रंथ 'आत्मानन्दजैनसभा-भावनगर' तरफथी प्रगट थयेलो छे.

---

१ "गच्छाधीश्वरहीरहीरविजयाऽऽम्नाये निकाये श्रियां प्रेष्यः श्रीविजयप्रभाऽऽख्यसुगुरोः श्रीमत्तपाऽऽख्ये गणे ।
शिष्यः प्राज्ञमणेः कृपादिविजयस्याऽऽशास्यमानाग्रणीश्चक्रे वाचकनाममेघविजयः शस्यां समस्यामिमाम्" ॥
—शान्तिनाथचरित्र, प्रतिसर्गप्रान्ते ।

२ "मुनिनयनाश्वेन्दुमिते ( १७२७ ) वर्षे हर्षेण सादडीनगरे । ग्रन्थः पूर्णः समजनि विजयदशम्यामिति श्रेयः" ॥ ८५ ॥
—देवानन्दमहाकाव्य, प्रान्तप्रशस्ति ।

३ "स्वस्तिश्रीमद्भुवनदिनकृद्वीरतीर्थाभिनेतुः प्राप्यादेशं तपगणपतेर्मेघनामा विनेयः ।
ज्येष्ठस्थित्यां पुरमनुसरन् नव्यरङ्गं ससर्ज स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु" ॥ १ ॥
—मेघदूतसमस्यालेख, प्रारम्भ ।

४ "माघकाव्यं देवगुरोर्मेघदूतं प्रभप्रभोः । समस्यार्थं समस्यार्थं निर्ममे मेघपण्डितः" ॥ १११ ॥
—मेघदूतसमस्यालेख, प्रान्तभाग ।

५. सप्तसंधान महाकाव्य–रचना समय सं० १७६०.[1] आ काव्य कर्तानी शक्ति माटे आश्चर्य उत्पन्न करावे तेवुं छे. केमके तेमां एक ज श्लोकमां सात पुरुषोनी कथा कहेवामां आवी छे. ऋषभदेव, शांतिनाथ, नेमिनाथ, पार्श्वनाथ, महावीरस्वामी, रामचंद्र अने कृष्णचंद्र–आ साते महापुरुषोनां जीवन चरित्र आ काव्यना प्रत्येक श्लोकमां वर्णित छे. ग्रन्थ प्रमाण ४४२ श्लोकनुं छे. ग्रंथकार स्वयं लखे छे के, "आचार्य हेमचंद्रसूरिनुं बनावेलुं 'सप्तसंधानकाव्य' हतुं परंतु ते हवे मळतुं न होवाथी में आ नवुं बनाव्युं छे.[2] आ ग्रन्थ "जैन विविध साहित्य शास्त्रमाला"मां प्रगट थयेलो छे अने आचार्य श्रीअमृतसूरिजीए तेना पर टीका बनावी हमणां ज सूरत थी प्रगट करेलो छे.

६. दिग्विजय महाकाव्य–प्रस्तुत महाकाव्य. रचना समय आपेलो नथी. आमां श्रीविजयप्रभसूरिनुं जीवनचरित्र छे. तेर सर्गोनुं आ काव्य ग्रंथकारे बनावेलां काव्योमां सौथी मोटुं छे.

७. लघुत्रिषष्टिशलाकापुरुषचरित्र–हेमचंद्राचार्ये रचेला 'त्रिषष्टिशलाका'ना दशे पर्वोने संक्षेपमां लगभग ५००० श्लोक प्रमाणमां पद्यरूपे आलेख्यो छे.[3] तेमां रचनासमय जणाव्यो नथी. आ ग्रंथ मुद्रित थयो नथी.

८. भविष्यदत्तकथा–पंचमीमाहात्म्य उपर भविष्यदत्तनी कथा, श्रीविजयरत्नसूरि सं० १७५० मां गच्छपति बन्या पछी पद्यरूपे आलेखेली छे.[4] आ ग्रन्थ 'दानदयामृतहिम्मतग्रन्थमाला'मां प्रगट थयो छे.

९. पञ्चाख्यान–पूर्णभद्रे रचेला मूळ पंचाख्यानने गद्यरूपे संस्कृतमां आलेखेलुं छे. आ ग्रन्थ मुद्रित थयो नथी.

१०. विजयदेवमाहात्म्य विवरण–[टीकाग्रंथ.] रचना समय अज्ञात छे. परंतु आ ग्रंथनी लिपि सं० १७०९ मां थई छे,[5] तेथी मालम पडे छे के मूल ग्रंथ एनी पहेलां बन्यो हशे अने विवरण मूळग्रंथनी साथे या पाछळ बन्युं हशे. मूळ ग्रंथ बृहत्खरतरगच्छीय जिनराजसूरिसंतानीय श्रीज्ञानविमलशिष्य पाठक श्रीवल्लभ-उपाध्याये बनाव्यो छे. तेमां मुख्य विषय श्रीविजयदेवसूरिना जीवननुं सविस्तर वर्णन छे. उपाध्याय मेघविजयजीए आ मूळ ग्रंथ पर विवरण कर्युं छे. एटले कठिन शब्दोनो अर्थस्फोट कर्यो छे. आ ग्रन्थ 'जैन-साहित्य संशोधक समिति' तरफथी प्रगट थई चूक्यो छे.

## [न्यायग्रंथ]

११. युक्तिप्रबोध नाटक–(वाणारसीय-दिगम्बरमत-खण्डनमय) आ ग्रन्थ मूल प्राकृत गाथामां

---

१ "वियद्रसमुनीन्दूनां (१७६०) प्रमाणात् परिवत्सरे। कृतोऽयमुद्यमः पूर्वाचार्यचर्याप्रतिष्ठितः"॥
–सप्तसंधानमहाकाव्य, प्रान्तप्रशस्ति।

२ "श्रीहेमचन्द्रसूरीशैः सप्तसंधानमादिमम्। रचितं तदलाभे तु स्वादिदं तुष्टये सताम्"॥
–सप्तसंधानमहाकाव्य, प्रान्तप्रशस्ति।

३ "कृपाविजयनामकवीन्द्राः सान्द्रचान्द्रमहसो यशसा ते। तद्विनेयवाग् विनयाऽऽढ्यो निर्ममे जिनपविंत्रचरित्रम्"॥६०३॥
–लघुत्रिषष्टिशलाकापुरुषचरित्र, प्रान्तप्रशस्ति।

४ "तपागणाम्भोजसहस्रभानुः सूरिर्जयी श्रीविजयप्रभाह्वः।
तत्पट्टदीपः श्रमणावनीपः प्रभासते श्रीविजयादिरत्नः॥ ७६॥
राज्ये तदीये विजयिन्यजस्रं प्राज्ञाः कृपादेर्विजया बभूवुः।
शिष्यो हि मेघाद् विजयस्तदीयोऽन्वभूदुपाध्यायपदप्रतिष्ठाम्॥ ७७॥
व्यरीरचद् धीरगभीरवाचा सुखावबोधाय कथाप्रबन्धम्।
स वाचकः पञ्चमिकातपस्याफलेन भोक्तुं शिवरूपलक्ष्मीम्"॥ ७८॥
–भविष्यदत्तचरित्र, प्रान्तप्रशस्ति।

५ "लिखितोऽयं ग्रन्थः पण्डितश्री५श्रीरङ्गसोमगणि-शिष्यमुनिसोमगणिना सं० १७०९ वर्षे चैत्रमासे कृष्णपक्षे एकादशी-तिथौ बुधे लिखितं राजनगरे श्रीतपागच्छाधिराज-भ० श्रीविजयदेवसूरीश्वरविजय(यि)राज्ये"।
–विजयदेवमाहात्म्य, प्रान्तपुष्पिका।

अने तेना पर स्वोपज्ञ संस्कृत टीका सहित रचेलो छे. तेमां तेमणे मुख्यतः बनारसीदासनी[1] एकान्ती निश्चयनयनी मान्यताने बनारसीमत[2]–अध्यात्ममत जणावी तेनुं आवेशपूर्वक खण्डन कर्युं छे. आ मत सं० १६८० मां नीकळ्यो एम जणाव्युं छे. 'द्रव्य क्रियाओ छे ते कष्टक्रियाओ छे माटे अध्यात्ममां लीन रहेवुं' एवी ते मतनी मान्यतानुं अने दिगम्बरो श्वेताम्बरोथी ८४ बाबतोमां भिन्न पडे छे ते दिगम्बरमततुं पण खण्डन कर्युं छे. आ ग्रन्थनुं प्रमाण ४३०० श्लोकनुं छे.[3] आ ग्रन्थ श्रीविजयरत्नसूरिना राज्यमां सं० १७५० पछी बनावलो छे.[4] आ ग्रंथ रतलाम–ऋषभदेव–केशरीमलपेढी तरफथी प्रगट थयो छे.

१२. **धर्ममञ्जूषा**—आ ग्रन्थनो रचना समय मळी शक्यो नथी. तेमां ढुंढकोना मन्तव्योनुं खण्डन छे. आ ग्रंथ अमुद्रित छे, वडोदरा अने आगरामां तेनी प्रतिओ छे.

## [ व्याकरणग्रंथ ]

१३. **चन्द्रप्रभा ( हैमकौमुदी )**—रचना समय १७५७.[5] आ ग्रंथ व्याकरणनो छे. श्रीहेमचंद्रसूरि रचित 'सिद्धहेमचन्द्रव्याकरण' ने कौमुदीना रूपमां मूकीने प्रस्तुत ग्रंथ बनाव्यो छे. आनी रचना [6]आगरामां थई हती, जेनुं ग्रंथ परिमाण ८००० श्लोकनुं छे.[7] आ ग्रंथ कौमुदी माफक पोताना शिष्य भानुविजय माटे

---

१ "सत्तरमी सदीमां **बनारसीदास** नामना श्रावक हिंदीभाषाना श्रेष्ठ जैन कवि थया. तेओ **आगराना** रहेवासी **श्रीमाली वैश्य** हता. तेमनो जन्म सं. १६४३ मां थयो हतो. तेमना पितानुं नाम **खरगसेन** हतुं. तेमने झवेरातनो वेपार हतो. बनारसीदास **खरतर** गच्छीय मुनि **भानुचंद्र** ( मुनि **अभयधर्म** उपाध्यायना शिष्य ) ना समागममां आवतां धार्मिक क्रियासूत्रो साथे छंद, अलंकार, कोश अने विविध विषयना केटलाक श्लोको कंठस्थ कर्या. तेओए पहेलो शृंगार विषयनो ग्रंथ रच्यो हतो पण सं० १६८० मां तेमनुं भारे परिवर्त्तन थयुं. **आगरामां अर्थमल्लजी** नामना एक अध्यात्मरसिक सज्जन साथे परिचय थतां श्री**रायमल्ल**कृत बालावबोध सहित **दिगम्बराचार्य** श्री**कुंदकुंद**कृत **'समयसार-नाटक'** मननपूर्वक वांचतां कविने सर्वत्र निश्चय नय ज सूझवा लाग्यो. तेमने व्यवहार नय परथी श्रद्धा ज ऊठी गई, तेथी तेमणे **'ज्ञानपचीशी'**, **'अध्यात्मबत्तीसी'**, **'ध्यानबत्तीसी'**, **'शिवमन्दिर'** आदि केवल निश्चय नयने ज पोषती आध्यात्मिक कृतिओ रची. भगवान पर चढेलुं नैवेद्य ( निर्माल्य ) पण तेओ खाता. **चंद्रभाण**, **उदयकरण**, **थानमलजी** आदि मित्रोनी पण ए ज दशा हती. छेवटे तो तेओ चारे जण एक ओरडीमां नग्न बनी पोताने परिग्रह रहित ( दिगंबर मुनि ) मानीने फरता. तेथी श्रावको **बनारसीदासने "खोसरामती"** कहेवा लाग्या. आ एकान्त दशा सं० १६९२ सुधी रही."

—जैन साहित्यनो संक्षिप्त इतिहास, पृ० ५७६–७८

२ "कवि **बनारसीदासना** अनुयायीओमांथी **कुमारपाल** अने **अमरचंद** आदि, जेओ पोताने आध्यात्मिको कहेवडावता हता, तेमनो श्वे० उपा० श्री**यशोविजयजीने आगरामां** साक्षात् परिचय थयो अने ते मतनुं खंडन करवा तेमणे **'अध्यात्ममत खंडन'** मूळ १८ श्लोक पर स्वोपज्ञवृत्ति साथे अने **'अध्यात्म मतपरीक्षा'** नामे प्राकृतना ११८ श्लोको रची ते पर सविस्तर टीका पण रची".

—जैन साहित्यनो संक्षिप्त इतिहास, पृ० ५७८ नुं टिप्पण.

३ "चतुःसहस्रीश्लोकानां शतत्रयसमन्वितम् । प्रमाणमस्य ग्रन्थस्य निर्मितं तत्कृता स्वयम्" ॥ १ ॥

४ "तत्पट्टभूषा महसाऽतिपूषा सुवर्णनैर्मल्यविधानभूषा । विराजते श्री**विजयादिरत्नः** प्रभुः **प्रभा**ध्यापितदेवरत्नः ॥ ४ ॥
तेषां राज्ये मुदाऽकारि वाङ्मयं **युक्तिबोधनम्** । **मेघाद् विजय**संज्ञेन वाचकेन तपस्विना" ॥ ५ ॥

—युक्तिप्रबोधनाटक, प्रान्तप्रशस्ति ।

५ "विजयन्ते ते गुरवः शैलशरर्षीन्दुवत्सरे ( १७५७ ) तेषाम् । आदेशाद् देशपतेः स्थितिः कृता **राजधान्यन्तः**" ॥ ७ ॥

६ "चातुर्मास्यामस्यां नाम्ना श्री**आगरा**वराऽऽख्यायाम् । नानायोगैरुचिते रचिता **चन्द्रप्रभा** सुधिया ॥ ८ ॥

७ "स्वाङ्गे साष्टसहस्रलक्षणधरः कृताभिषेकः सुरैः सेन्द्रैः साष्टसहस्रमानसहितैः कुम्भैश्च वृत्तैः स्तुतः ।
ग्रन्थेऽप्यष्टसहस्रसम्मिततया सल्लक्षणैर्लक्षिते कुर्यात् सोऽभ्युदयं धियां समुदयं वीरस्त्रिलोकीगुरुः" ॥ १४ ॥

बनाव्यो[1] अने सौभाग्यविजय तेमज मेरुविजये तपास्यो हतो.[2] आ ग्रंथ 'मेसाणा—श्रेयस्कर मंडळ' तरफथी प्रगट थयेलो छे.

१४. हैमशब्दचन्द्रिका—आ व्याकरणग्रंथ विद्यार्थीने प्राथमिक प्रवेश माटे बहु ज संक्षेपमां बनावेल छे. आ ग्रन्थ 'कच्छ-पत्री, खेतशी खीयशी'तरफथी प्रगट थयो छे.[3]

१५. हैमशब्दप्रक्रिया—आ व्याकरण ग्रंथ उपर्युक्त चंद्रिकाथी मोटो छे. तेनी प्रति पूनाना भांडारकर ईन्स्टिट्यूटमां छे.

## [ ज्योतिषग्रन्थ ]

१६. वर्षप्रबोध—रचना समय ज्ञात नथी, परंतु ग्रंथनी प्रान्त प्रशस्तिमां श्रीविजयप्रभसूरिना पट्टधर श्रीविजयरत्नसूरिनी शासनधुरामां आ ग्रंथ बनाव्यो एवुं स्वयं ग्रन्थकारे ज लख्युं छे; तेथी प्रतीत थाय छे के आ ग्रंथनी रचना सं० १७३२ मां श्रीविजयरत्नसूरि आचार्य बन्या ते पछी थई; एम नक्की थाय छे.[4] पोताना शिष्य मेरुविजयनुं तेमां स्मरण कर्युं छे. ग्रंथमां तेर अधिकार छे; उत्पातप्रकरण, कर्पूरचक्र, पद्मिनी-चक्रमंडलप्रकरण, सूर्य अने चन्द्रना ग्रहणनुं फल, प्रत्येक मासमां वायुनो विचार, वरसाद लाववाना अने बन्ध करवाना मंत्र-यंत्र, साठ संवत्सरोनां फल, ग्रहोनी राशिओ ऊपर उदय अस्त वा वक्रीनुं फल, अयन मास पक्ष अने दिननो विचार, संक्रान्तिफल, वर्षना राजा मन्त्री आदिनो, वरसादना गर्भनो, विश्वानो, आय-व्ययनो विचार, सर्वतोभद्रचक्र अने वरसाद जाणवाना शकुन आदि विषयोनो समावेश छे. ग्रन्थकारे उक्तग्रन्थनो संबंध 'स्थानाङ्गसूत्र' नामना त्रीजा अंग सूत्र साथे बताव्यो छे. आनुं बीजुं नाम 'मेघमहोदय' पण छे. आ ग्रंथ संस्कृत-प्राकृत बंने भाषामां छे, हिंदी-गुजराती भाषामां अनूदित थई प्रगट थयेल छे.

---

१ "श्रीमेघविजयनाम्नोपाध्यायोऽध्यायतत्परः परमः। चन्द्रचन्द्रप्रभां चक्रे भानुदयबुद्धिवृद्धिकरी ॥ ११ ॥
भट्टोजिनाम्ना भवदीक्षितेन सिद्धान्तयुक्ता वर कौमुदी या।
श्रीसिद्धहेमानुगता व्यधायि सेवाश्रिया भानुविभोदयाय" ॥ १२ ॥

२ "हेमचन्द्रसुगुरोः विनयस्य सिद्धेः शास्त्रार्णवोऽलभत पूर्णदशां रसेन।
दीपोत्सवस्य दिवसे कुशलेन योऽसौ सौभाग्य-मेरुविजयादिभिरीक्ष्यमाणः" ॥ १५ ॥

—चन्द्रप्रभाव्याकरण, पूर्वार्द्धप्रान्तप्रशस्ति।

३ "श्रीविजयप्रभसूरेः प्रेष्यः शिष्यः कृपादिविजयकवेः। श्रीमेघविजयवाचकवरः कृतां चन्द्रिकां चक्रे ॥
प्रौढायाः सरसाभां वृथा विनिर्मान्तु बालस्य। [ भावाः शर्मदा मुग्धाया रूपश्रीः पठनकृतां क्रीडाहेतुः ॥ ]
टीका—श्रीविजयप्रभसूरेरित्यादि स्पष्टम्। श्रीश्च विजयश्च तौ श्रीविजयौ ताभ्यां युक्ता प्रभा बुद्धिस्तेजः प्रतिष्ठा शोभा यस्मिन्, ईदृशः सूरिर्गणपतिस्तस्य सेवकः कृतप्रत्ययानां चन्द्रिकामिव चन्द्रिकां प्रकाशरूपां चक्रे।
प्रौढाया इति हैमबृहद्वृत्तिस्तस्याः। के के भावाः? वचनसूत्रव्यवस्थादयः शर्म सुखं तस्य दायका न सन्ति, सर्वेऽपि सुखदाः सदा अस्या लघुत्वात्। मुग्धायाः वैचित्यकलितायाः क्रीडामात्रप्रवृत्तायाः रूपश्रीः रूपप्रसाधनं सैव पठनकृतां विलोकनकृतां क्रीडाहेतुः" ॥

—हैमशब्दचन्द्रिकाव्याकरण, प्रान्तप्रशस्ति।

४ "श्रीमत्तपागणविभुः प्रसरत्प्रभावः प्रद्योतते विजयतः प्रभनामसूरिः।
तत्पट्टपद्मतरणिर्विजयादिरत्नः स्वामी गणस्य महसा विजितद्युरत्नः ॥
तच्छासने जयति विश्वविभासनेऽभूद् विद्वान् कृपादिविजयो दिविजन्मसेव्यः।
शिष्योऽस्य मेघविजयाऽऽह्वयवाचकोऽसौ ग्रन्थः कृतः सुकृतलाभकृतेऽत्र तेन" ॥

—वर्षप्रबोध, प्रान्तप्रशस्ति।

१७. **रमलशास्त्र**—यद्यपि आ ग्रन्थ मळ्यो नथी परन्तु उपर्युक्त 'मेघमहोदय'मां तेनो उल्लेख आवे छे. आ ग्रन्थ पण पोताना शिष्य मेरुविजय माटे लख्यो हतो.

१८. **हस्तसंजीवन**—आ ग्रन्थना ५२५ श्लोको छे. ते उपर कर्तानी स्वोपज्ञवृत्ति 'रेखाशास्त्र' नामे छे. आ ग्रंथ हस्तरेखाना विषयमां भारतीय ज्योतिषनुं सप्रमाण सुरेख वर्णन पूरुं पाडे छे. तेनुं बीजुं नाम 'सिद्धज्ञान' पण छे. आ ग्रंथ 'मोहनलालजी ग्रंथमाला'मां प्रगट थयो छे.

१९. **उदयदीपिका**—आ ग्रंथमां प्रश्न काढवानी पद्धति माटेनुं विशद वर्णन छे. सं० १७५२ मां श्रावक मदनसिंह माटे प्रश्नोत्तररूपे रचेली छे.[१] आ ग्रन्थ छपायो नथी.

२०. **प्रश्नसुन्दरी**—आ ग्रंथमां पण प्रश्न काढवानी पद्धतिनुं टूंकमां वर्णन छे. आनी प्रशस्तिमां केटलाक ग्रंथोनो रचनाक्रम पण जणाव्यो छे.[२] आ ग्रन्थ प्रगट थयो नथी.

२१. **वीसायंत्रविधि**—आमां वीसायंत्रनी विधिनुं वर्णन छे. जे पद्मावती स्तोत्रना अन्तर्गत काव्य विवरण पर वृत्ति समान छे. तेमां अर्जुन पताका,[३] विजययंत्र वापरवानी विधि छे. आ सिवाय बीजां केटलांक यंत्रो रच्यां होय एम पण जणाय छे. [४]आ ग्रन्थ 'महावीर ग्रन्थमाला'मां प्रगट थयो छे.

---

१ "वन्दाऽर्हन्तं पार्श्वभास्वद्रूपं शङ्खेश्वरस्थितम् । श्रीश्राद्धमदनात् सिंहे धर्मलाभः प्रतन्यते ॥ १ ॥
कृपामूलेऽर्हतां धर्मे श्रीमेघविजयोदयः । गवां रसप्रसारेण भूयाद् जीवनसंपदे ॥ ३ ॥
—उदयदीपिका, प्रारम्भ ।

२ "चर्योऽसौ प्रश्नसुन्दर्या धुर्या माधुर्यशालिनाम् । व्यानकेनीनुकार्या (?) धार्या लार्यादिभिः श्रिये ॥ १ ॥
प्रेष्यस्तपागणपतेर्विजयप्रभाख्यसूरीशितुः कविकृपाविजयस्य शिष्यः ।
चक्रे विचार्य रचनां साऽस्तु नित्या भोगश्रिये समनुयोजितधर्मलाभात् ॥ २ ॥
सूर्याचन्द्रमसौ यावद् यावन्मेरुमहीधरः । श्रीप्रश्नसुन्दरीसिद्ध्यै तावत् त्रिपुरसुन्दरी ॥ ३ ॥
पद्मावती नागलोके मध्यलोके प्रभावती । श्रुतदेवीश्वरी तूर्द्धलोके त्रिपुरसुन्दरी ॥ ४ ॥
तद् मुस्त (?) मेघविजयैः वलकैः ( वाचकैः ) प्रश्नसुन्दरी । विहिता धर्मलाभेन कुरता गकंती ( मक्षतीं ) श्रियाः ॥ ५ ॥
आद्यं सामुद्रिकं नाम्ना द्वितीयं लोकविश्रुतम् । सूक्ष्माक्षरं तृतीयं स्यात् तुर्यं त्रिपुरसुन्दरी ॥ ६ ॥
पद्मावत्यभिधानाम छद्यं प्रकरणं स्मृतम् । पञ्चमं पद्ममेवोच्यं संशोध्याधिकधीधनैः" ॥ ७ ॥
—प्रश्नसुन्दरी, प्रान्तप्रशस्ति ( आचार्य श्रीक्षमाभद्रसूरिपासेथी प्राप्त ) ।

३ "श्रीमेघविजयः प्राप्तोपाध्यायपदविश्रुतः । भूविश्वेत्यादिकाव्यस्य व्याख्यानं चकृवानिदम्" ॥ १ ॥
विजययन्त्रप्रभावे—

४ "एवं शकुनखेटानां स्थानाद् विंशतियन्त्रकम् । निश्चितं मेघविजयश्रिया विभवबृद्धिदम्" ॥ २१ ॥
अर्हंपदेन विंशयन्त्रव्यवस्था—
"प्राचीनानुचानैस्त्रिभागदानादिहैकशेषेऽपि । कृतगुणयन्त्रं रचितं खवाणहयन्त्रं द्वये शेषे" ॥ २ ॥
"तन्मार्गानुगतधियोपाध्यायपदस्थमेघविजयेन । विहरज्जिनयन्त्रमिह स्फुटीकृतं विजयकरम्" ॥ ३ ॥
"रेफस्य व्यञ्जनत्वेनैकोनत्वे पञ्च वा स्थिताः । अर्हंपदाद् विंशयन्त्रं मेघादिविजयोदितम्" ॥ १२ ॥

पद्मावतीस्तवने कथितविंशतियन्त्रप्रतिष्ठा—
"वाचकैर्मेघविजयैर्विंशद्यन्त्रमसूत्रितम् । श्रीवीर-पार्श्वयत्पद्मानुभावादस्तु सिद्धिदम्" ॥

विजययन्त्राष्टमगत्या यवनमतविंशतियन्त्रप्रतिष्ठा—
"देव्या पद्मावत्या भगवत्या स्वप्रकथितयन्त्रस्य । संवादार्थं विवृतं वाचकमेघादिविजयेन" ॥ १० ॥
"तपागच्छेशसूरीशविजयप्रभसेवकः । कृपादिविजयधीराणां शिष्योऽर्हच्छासनश्रिये" ॥ ४९ ॥
—अनुभूतसिद्धविंशादिकल्पसंग्रह ।

## [ अध्यात्म ]

२२. **मातृकाप्रसाद** — रचना समय सं० १७४७. आ ग्रंथ अध्यात्मविषयनो छे. आ ग्रंथमां "ॐ नमः सिद्धम्" वर्णाम्नाय पर विवरण कर्युं छे अने ॐ शब्दनुं रहस्य स्पष्टरूपे बताव्युं छे. प्रस्तुत ग्रंथ धर्मनगर ( धरमपुरी ) मां बनाव्यो एवुं स्वयं ग्रंथकारे ज लख्युं छे.[1]

२३. **ब्रह्मबोध** — आ ग्रन्थ यद्यपि मळ्यो नथी परंतु संभवतः तेमां आध्यात्मिक विषयोनुं वर्णन हशे, एम लागे छे.

२४. **अर्हद्गीता** — आ ग्रंथना ३६ अध्यायो छे अने तेमां जैनदर्शननुं वर्णन स्पष्टरूपे कर्युं छे. आ ग्रंथ "महावीर ग्रन्थ माला"मां प्रगट थयो छे.[2]

वळी तेमणे 'पंचतीर्थस्तुति-सटीक', तेमज 'भक्तामरस्तोत्र' पर टीका रची छे. आ सिवाय कविए अनेक गुजराती कृतिओ—१ जैनधरम दीपक, २ जैन शासनदीपक ३ आहारगवेषणा, ४ श्रीविजयदेवसूरि निर्वाणरास, ५ कृपाविजय निर्वाणरास, ६ चोविश जिन स्तवन, ७ पार्श्वनामस्तोत्र, वगेरे रचेलां मळी आवे छे.

## ३. काव्य परिचय

प्रस्तुत 'दिग्विजय महाकाव्य' सत्तरमी-अढारमी शताब्दिना महान् प्राभाविक अने महावीरस्वामीनी पट्टपरंपराना ६१ मा भट्टारकाचार्य श्रीविजयप्रभसूरिनुं चरितवर्णन आलेखे छे अने प्रासंगिकरूपे तेमना गुरु श्रीविजयदेवसूरिनुं पण चरित वर्णवे छे. यद्यपि श्रीविजयदेवसूरिनुं चरित प्रस्तुत काव्यना कर्त्ता महोपाध्याय श्रीमेघविजय गणिए ज स्वतंत्रपणे आलेखतुं 'देवानन्द महाकाव्य' रच्युं छे; तेमां पण तेमणे श्रीविजयप्रभसूरिनुं वर्णन आपीने पोतानो भक्ति-अतिशय बताव्यो छे. ए सिवाय खरतरगच्छीय उपाध्याय श्रीवल्लभपाठकनुं 'विजयदेवमाहात्म्य' पण तेमनुं चरित विस्तारथी आलेखे छे.

प्रस्तुत काव्य अने उपर्युक्त 'देवानन्दकाव्य'ना अभ्यासथी एम कहेवुं अत्युक्त नहि गणाय के आ बंने काव्यो श्रीविजयदेवसूरि अने श्रीविजयप्रभसूरिना चरितवर्णनमां पूर्वार्द्ध अने उत्तरार्द्धरूपे भाग भजवे छे; केमके 'देवानन्दकाव्य'मां आरंभेलुं श्रीविजयदेवसूरि अने श्रीविजयप्रभसूरिनुं चरित वर्णन 'दिग्विजयकाव्य'मां तेना ज अनुसन्धानरूपे आगळ वधे छे. 'देवानन्दकाव्य' 'माघकाव्य'नी समस्यापूर्त्तिरूपे सात सर्गोमां छे, ज्यारे 'दिग्विजयकाव्य' तेर सर्गोमां स्वतंत्रपणे शब्दालंकार अने अर्थालंकारना कवित्वमय वर्णनथी भरेलुं छे. तेथी आमां प्रस्तुत आचार्यनुं वर्णन बहुज ओछुं छे.

## ४. नामकरण

कविए आ काव्यनुं नाम 'दिग्विजयकाव्य' राख्युं छे, ते नामानुकरणना इतिहास तरफ दृष्टिपात करतां 'शाङ्करदिग्विजय' आदि दिग्विजयान्त काव्यनामोनुं स्मरण करावे छे. 'दिग्विजयकाव्य' एटले दिशाओना विजयनुं वर्णन; एथी श्रीविजयप्रभसूरिए करेला गाम, नगर के शहेरना विहारवर्णनद्वारा भौगोलिक माहिती आपे ए सहेजे समजाय तेवुं छे. कविए उदयपुर, शंखेश्वर, सिरोही, आगरा, बनारस, पटणा अने समेत-

---

१ "ओं नमः सिद्धमित्यादेर्वर्णाम्नायस्य वर्णनम् । चक्रे श्रीमेघविजयोपाध्यायो धर्मसाधनम् ॥
संवत्सरेऽश्ववार्ध्यश्वभूमिते ( १७४७ ) पोष उज्ज्वले । श्रीधर्मनगरे ग्रन्थः पूर्णश्रियमशिश्रियत्" ॥
—मातृकाप्रसाद, प्रान्तप्रशस्ति ।

२ "इतोऽधिकं किञ्चन मातृकाया व्याख्यानमादेशि मया वितत्य । श्रीतत्त्वगीताहितसत्प्रतीताऽध्यायेषु सङ्ख्येयधियोत्तरेषु" ॥
—मातृकाप्रसाद ।

शिखर आदि मोटां मोटां स्थळोनुं वर्णन कर्युं छे, ते हकीकत करतां कवित्वदृष्टिने वधु स्पर्शे छे. तेथी श्रीविजयप्रभसूरिनुं चरित जाणवा माटे अन्तमां आपेल परिशिष्टनो भावानुवाद आप्या पछी काव्यसार नीचे आपवामां आवे छे.

## ५. परिशिष्टनो भावानुवाद

श्रीविजयप्रभसूरि प्रत्यक्ष प्रभावशाळी, प्रतिज्ञाशील, ज्ञानाभ्यासी, ग्रंथसंशोधक, प्रतिभावान्, उपदेश-प्रभावनामां प्रयत्नशील अने क्रियानिष्ठ हता. तेओ दुष्कर तपथी विघ्नोने दूर करता. गच्छने स्मारणा-वारणादि वडे व्यवस्थित राखता अने पोताने आधीन गीतार्थो तेमज संघना अभ्युदय माटे यत्नशील रहेता.

तेमनो जन्म कच्छना मनोहरपुरमां सं० १६७७ ना माहसुदि ११ ना दिवसे थयो हतो. पितानुं नाम शवगण अने मातानुं नाम भानुमती ( भांणी ) हतुं. तेओ वृद्धोपकेशवंशना अने घोषा गोत्रना हता. पोते नव वर्षनी लघु वये एटले सं० १६८६ मां श्रीविजयदेवसूरि पासे दीक्षा लई श्रीवीरविजय नाम धारण कर्युं हतुं. तेमने सं० १७०१ मां पंन्यासपद अने सं० १७१० ना वैशाख सुदि १० ना दिवसे गंधारमां आचार्यपद मळतां तेओ श्रीविजयप्रभसूरि नामे प्रसिद्धि पाम्या.

एक समये परमगुरु तपागच्छाधिराज श्रीविजयदेवसूरि जिनशासननी पट्टपरंपराना प्रवाहने वधारवा "मारा पछी शासनाधीश कोण थशे;" ए प्रकारे सूरिमंत्रवडे ध्यान कर्युं त्यारे वधता तप-जपथी आकर्षित थयेला मंत्राधिष्ठायक देवे ते स्थळे आवीने नमस्कारपूर्वक सूरिने विज्ञप्ति करी के, "हे स्वामिन्! हजी शासनना अधिष्ठातानी दीक्षा ये थई नथी. आपनुं आयुष्य पण लांबुं छे. तेथी आवी चिंता करवाथी शुं? अवसरे सामान्य तपथी मने संभारतां हुं आवीने तरत ज कही जईश." ए प्रमाणे कहीने देव तिरोहित थया.

केटलोक काळ वीत्या पछी पोतानी पाटे जिनशासनना अधिराजनी स्थापनानो अवसर जोई गंधपुर ( गंधार ) मां जईने गुरुए ध्यान कर्युं त्यारे ते ज क्षणे मंत्राधिष्ठायक देवे आवीने निवेदन कर्युं के, "हे स्वामिन्! सौभाग्यनिधान, विद्या-महासागर, त्यागी, उत्कट चारित्रशील, सरळ स्वभावी श्रीवीरविजय ( श्रीविजयप्रभ-सूरि ) महाराजने पट्टे स्थापवा योग्य छे. तेओ केशवनी जेवा त्रण भुवनना उपकारक, पुरुषोत्तमनी जेवा नरकना नाश करनार, अने जगत्ने आनंददायी, शिवनी जेम महाव्रती, कामविजेता अने दक्ष, प्रजा प्रति प्रेमाळ, बृहस्पतिनी जेवा निर्मळबुद्धि तेमज विद्वानोमां श्रेष्ठ छे. एमनी आगळ मानथी ये महिमा अधिक वधशे" आ प्रमाणे कही देव तिरोहित थया.

गांभीर्यसागर गुरुए बहार देववाणीने अनुमोदन आपता शुभ शकुनो जोयां तेथी शासनना अधिनायक माटे संघने विश्वास आप्यो अने दृढचित्ते निर्णय करीने राजनगर ( अमदावाद )थी तरत आवेला रत्ना शाह प्रमुख राजनगरसंघना आग्रहथी खंभात, पाटण, सूरत वगेरे अनेक देश, नगर अने गामोना संघ समक्ष गंधार बंदरे अतिशयवाळी श्रीमहावीरस्वामीनी मूर्त्ति आगळ, मंदिरना प्रांगणमां विक्रमसंवत् १७१० ना वैशाख सुदि १० ने गुरुवारे पुष्यनक्षत्रमां सारा मुहूर्त्ते श्रीविजयदेवसूरिए श्रीवीरविजयने पोतानी पाटे स्थाप्या.

ए समये त्यांना चित्रविचित्र मोटा मोटा मंडपोनी भव्य शोभा निहाळवा मानवमेदनी ऊलटी हती. विविध वाजिंत्रोना नादे आकाश प्रदेशने क्यांई सुधी व्याप्त करी दीधो हतो. धूपादिनी सुगंधे वातावरणने भरी दीधुं हतुं अने ज्यां त्यां हर्ष-प्रमोदभरी वार्तानो झरो वही रह्यो हतो. त्यारे सज्जन शिरोमणि अखइना पुत्र वर्धमाने पोतानी माता साहेबदेवी साथे प्रत्येक घरे रुपिया सहित थाळीनी लांणी करी अने चतुर्विध संघने वस्त्रादि दान वडे उत्सवनी शोभा वधारी.

श्रीगुरुए चिंतवेलुं, इष्ट उपदेशथी निर्णीत करेलुं अने उपाध्याय श्रीकमळविजय गणिनी अनुज्ञापूर्वक आचार्यपद आपीने तेमनुं नाम श्रीविजयप्रभसूरि राख्युं. केमके विजयी, जगतने आराध्य, यशस्वी, प्रभावशाळी एवा भगवाननुं आद्य वर्णोथी 'श्रीविजयप्रभ' एवुं नाम जोडातुं होवाथी ए नाम पाडवामां आव्युं.

ते पछी गुरुए श्रीविजयप्रभसूरि साथे सूरत बंदरे ए चतुर्मास करी, राजनगरमां चतुर्मास कर्युं. संघमां मुख्य (नगरशेठ) शा. सूराना पुत्र शा. धनजीए गुरुने विज्ञप्ति करी वंदन महोत्सव शरू कर्यो. ए महोत्सवमां एकठा थयेला अनेक मनुष्योने रहेवा माटे मोटा मोटा पटमंडपो एवा बांधवामां आव्या हता के तेमां सूर्यना किरणनो संचार थई शके तेम नहोतो. अनेक प्रकारनां धवलगीतो सांभळवामां चित्रनी माफक एकाग्र थयेली मानवमेदनीथी सुशोभित मोटा पटमंडपमां मूकेला सिंहासन पर श्रीविजयप्रभसूरिने स्थापीने गुरु श्रीविजयदेवसूरिए पोतानी समान ज तेमने गणवा-गणाववा माटे आगळ ऊभा रही सारा मुहूर्त्तमां वंदन कर्युं. आ जोई लोकोए आनंद कलरव कर्यो. ते पछी सर्व संघ समक्ष परमगुरुए कह्युं, "जेवो हुं छुं तेवा आ छे माटे समग्र संघे तेमने उपासवा. संसारसागरमां प्रवास करता मानवीओने आ गुरु नौका समा होवाथी तेमने कदापि छोडवा नहि".

ते पछी श्रीविजयप्रभसूरि वंदन महोत्सवथी मणिनी माफक संस्कारशुद्ध थई अधिक तेज-प्रभावथी दीपवा लाग्या. ए समये शा. धनजीए अढार हजार महमूदिकानी प्रभावना करी अने सर्व संघनी परिधापनिका करी. ते पछी एक चतुर्मास अहम्मदपुरमां करीने गुरुनी साथे श्रीविजयप्रभसूरिए श्रीयुगादिदेव (शत्रुंजयतीर्थ)नी यात्रा करीने दीवना रहेवासी भणशाली शा. रायचंद प्रमुख संघ साथे (गिरनार वगेरेनी) यात्रा करीने तेओ सौराष्ट्र-संघना आग्रहथी उन्नतपुर (ऊना) पधार्या.

सं० १७१३ नी अषाढ देवशायी एकादशीना दिवसे प्रातःकाळे श्रीविजयप्रभसूरिए निर्यामना विधि कर्या पछी श्रीविजयदेवसूरि स्वर्गे संचर्या. भगवान महावीरस्वामीना निर्वाणथी जे दुःख गौतम गणधरने थयुं हतुं तेवुं श्रीविजयदेवसूरिना निर्वाणथी श्रीविजयप्रभसूरिने थयुं. केटलाक दिवसो आ दुःखावेगमां वही गया.

जीवन-मरण ए संसारनो स्वभाव छे, एवुं समजी शोक रहित थया त्यारे चतुर्विधसंघना आग्रहथी सं० १७१३ मां सारा मुहूर्त्ते श्रीविजयप्रभसूरिए भट्टारकपद लई गुरुनी पाटने अलंकृत करी. तेज दिवसथी शिवपुरी (सिरोही) प्रदेशमां यतिओना विहारनो बे वर्ष पहेलांथी ज निषेध थयेलो होवाथी त्यांनी वधामणी आवी. ते ज वर्षे दीवना रहेवासी शाह नेमिदासे आठ हजार महमूदिकाना व्ययथी गुरुने साथे लईने शत्रुंजयतीर्थनो मोटो संघ काढ्यो.

ए प्रकारे गुरुए सौराष्ट्रमां दश चतुर्मासो कर्या. तेमना तपःप्रभावथी सं० १७१५—१७ अने २० ना वर्षोमां पडेला त्रण दुष्काळो सौराष्ट्र देशमां प्रसार न पाम्या; केमके जीर्णदुर्ग (जूनागढ) अने गुजरातमां धान्य आव्या ज करतुं. सं० १७२३ ना वर्षे घोघा बंदरे जसू नामनी श्राविकाए भरावेली अनेक जिनप्रतिमाओनी श्रीसूरिए प्रतिष्ठा करी. गुरुनुं माहात्म्य जोई विपक्षीओ तिरस्कार पामता शरमावा लाग्या अने गुरुनो महिमा वधवा लाग्यो.

[ आम भट्टारक बन्या पछी गच्छनो भार वहन करतां उपदेश-प्रभावना उपरांत संघ साथेनी यात्राओ, बिंब प्रतिष्ठाओ योग-उपधान वहन वगेरे धर्म कार्यो अने महोत्सवो कर्या. सोरठ, कच्छ, हालार, मरुधर, मेवात, मालव अने दक्षिणनो जैन संघ तेमनी आज्ञामां हतो. तेमणे आबू, सुवर्णगिरि, शत्रुंजय, गिरनार, शंखेश्वर, वाराणसी अने समेतशिखर सुधीनां तीर्थ स्थळोनी यात्रा करी त्यांना धर्मस्थानोनी तेमज संघनी व्यवस्था

पण करी. आम उग्र विहार करी कच्छदेशमां आव्या त्यारे त्यांना राजाए तेमनुं सन्मान कर्युं. दीवबंदरमां मेघबाई नामनी श्राविकाने गच्छपतिने पधराववानो उत्साह थतां त्यांना संघनो श्रीसूरिने बोलाववानो विचार थयो. आथी मेघबाईए पोतानी वहूओ वगेरे परिवार सहित कच्छ जई आचार्यने विनति करी. आथी सूरि दीव आव्या. अजाहरा पार्श्वनाथ, श्रीविजयहीरसूरिनो थूभ वगेरेने वंदन करीने तेओ ऊना पधार्या. आ उत्सवमां मेघबाईए घणुं द्रव्य खरच्युं. गुरुए दीवमां लागलागट चार चोमासां कर्यां. ते पछी जेतांबाइए शत्रुंजयनो संघ काढ्यो. तेमां श्रीगुरुए संघ साथे पाछा दीव पधारीने नवलख पार्श्वनाथने वंदन कर्या. देश देशना संघपतिओ अने मनुष्योए आवीने पूजा-प्रभावना करी. दीवमां संघपति अभयचंद अने सामा नामना मंत्रीए आग्रहथी गुरुने त्रण चोमासां कराव्यां. गुरुए छठ, अट्ठम, नित्य एकाशन, आयंबिल, नीवी वगेरे तपश्चर्याओ करी. ते पछी गुरु ऊना पधार्या अने त्यां सं० १७४९ ना वैशाख वदि एकादशीने दिने अनशनपूर्वक चउविहार आदरी तेरसने दिने स्वर्गवास पाम्या. परिख जेसंग सुत विजयसंगे तेरखंडी मंडावी तेमां शबने पधराव्युं त्यारे श्रावकोनी ठठ जामी हती. जे स्थळे श्रीहीरविजयसूरि अने विजयदेवसूरिना थूभो हता तेनी नजीकमां ज सुगंधी द्रव्यथी शबनो संस्कार कर्यो. त्यां परिख विजयसंगे श्रीविजयप्रभसूरिनो थूभ कराव्यो. ते पछी श्रीविजयरत्नसूरि पट्टधर थया. [—जुओ, 'श्रीविजयप्रभसूरि-निर्वाणरास'.]

## ६. काव्य सार

सर्ग. १—कविए काव्यारंभमां चोविश श्लोकोमां 'स्वस्तिश्री' थी शरू थता चोविशे तीर्थंकरोनी स्तुति करी छे. पछी श्रीगौतम तथा इन्द्रभूति प्रमुख गणधरोने स्तवीने दुर्जननिंदा, काव्यहेतु, काव्यनाम अने जंबूद्वीपनुं वर्णन—जेमां नदी, पर्वतो अने वनोनुं वर्णन 'संग्रहणी' मुजब आपेलुं छे.

सर्ग. २—भरतक्षेत्रनुं आखुं ये वर्णन 'संग्रहणी' मुजब आलेख्युं छे.

सर्ग. ३—भगवान् महावीरना अतिशयो अने समवसरणमां रहीने भगवाने उपदेश कर्यो तेनुं वर्णन छे.

सर्ग. ४—भगवान् महावीरनी पट्टपरंपरमां थयेला श्रीविजयप्रभसूरि सुधीना पट्टधर आचार्योनुं वर्णन छे, तेमां श्रीविजयदेवसूरि ६० मा भट्टारक थया; तेमनुं चरित वर्णवे छे—

श्रीविजयदेवसूरि भट्टारक थया ते पछी मारवाड, सौराष्ट्र, गूजरात, मेवाड आदि देशोमां विहरतां भव्य प्राणीओने उपदेश आप्यो. ए उपदेशथी धर्म पामेलाओए मोटां मोटां चैत्यो, जीर्णोद्धारो अने प्रतिष्ठाओ करावी.

मेवाडाधीश राणा जगत्सिंहे श्रीदेवसूरिना उपदेशथी उदयसागर अने पीछोला नामनां बे मोटां सरोवरोमां थती जीवहिंसा बंध करी. वळी खंडित जिनमंदिरोनो उद्धार पण ते राजा पासे कराव्यो.

मेवाडथी तेओ विहार करी अमदाबाद आव्या अने पोताना समुदायनो वधी पडेलो भार हळवो करवा तेमना शिष्य श्रीविजयसिंहसूरिने युवराजपदे स्थाप्या. श्रीविजयसिंहसूरिए पण ते समयना उपस्थित कलह-शत्रुओने जीतवा प्रयत्न कर्यो, अने निर्मोह भावे गुरुना हृदयने जीती लीधुं. पोताना समुदायने वारणा-स्मारणादि शिक्षाप्रकारोथी वशमां कर्यो.

पछी देवसूरि त्यांथी विमलगिरिनी यात्राए संघसहित चाल्या. ते संघमां बीजा नगरोना अनेक संघो आवीने मळ्या हता. तेमां अनेक रथ, घोडा, ऊंट अने हाथीओ हता. संघना धनाढ्य श्रावकोए मार्गना प्रत्येक गाम-नगरोमां अंगपूजा माटे अने दानमां सोना-रूपानी पुष्कळ मुद्राओ वापरी, सौराष्ट्रनो पुण्योचित कार्योथी उद्धार कर्यो.

नवानगर (जामनगर) मां देवसूरि चातुर्मास स्थित रह्या. ते समये दक्षिण देशनी चतुरिका नामनी भक्त श्राविका देवसूरिने वांदवा आवी अने तेणे अनेक मूर्तिओनी प्रतिष्ठा करावी तेमज साधर्मिकवात्सल्यथी त्यांना संघने प्रसन्न कर्यो.

चतुरिका जे, देवसूरिनां छेल्लां चार चतुर्मासमां आवीने तेमने दक्षिणमां पधारवा विज्ञप्ति करती हती; तेणे अवसर जोई व्याख्यान समये ज सविनय विनति करी के, गुरुदेव! दक्षिणमां आपना पधारवाथी अनेक प्रकारनां सुकृत-पुण्यकार्यो थवानी आशा छे.

आ प्रकारनी प्रतिदिन विज्ञप्ति करतां श्रीदेवसूरिए चातुर्मास पछी दक्षिण तरफ विहार कर्यो अने दक्षिणना औरंगाबादमां प्रथम चातुर्मास कर्युं. ते पछी बीजापूरमां चातुर्मास कर्युं ज्यां देवचंद्र नामना धनिक श्रावके देवसूरिहस्तक बिंबप्रतिष्ठा करावी. ते पछी देवसूरिए मोटा संघसहित कलिकुंड पार्श्व अने करहेडा पार्श्व नामना तीर्थोनी यात्रा करी बीजापूर तथा बर्हानपुरमां बे चतुर्मास वीताव्यां. पछी तेओ तिलंगदेशमां विचर्या अने तेमणे भाग्यपुरमां यवनपति (कुतुबसाहि)ने उपदेश आपी जिनबिंबनी प्रतिष्ठा करी. पछी तेओ बीजापूर आव्या अने त्यां चतुर्मास कर्युं अने तेमना उपदेशथी प्रभावित थयेला त्यांना पादशाह (इदलसाहि) ए समग्र देशमां गोवधना निषेधनी आज्ञा फरमावी.

त्यां देवचंद्र नामना श्रावके जिनबिंबनी प्रतिष्ठा करावी अने अमरचंद्र नामना मुनिने वाचक पदवी अपावी.

देवसूरि दक्षिणमांथी सीधा गुजरात तरफ आव्या अने श्रीविजयप्रभसूरिने आचार्य बनाव्या. गुरुश्री विजयप्रभसूरि आचार्यश्रेष्ठ देवसूरि साथे सौराष्ट्रमां आव्या अने त्यां ऊनामां देवसूरि अनशन लई देवगत थया.

सर्ग. ५ — ते पछी श्रीविजयप्रभसूरिए भट्टारकरूपे संघसमुदाय पर पोतानी आज्ञानो दोर जमाव्यो अने संघीय व्यवस्थाने बनावी राखवा उग्र विहारो कर्या.

तेओ प्रथम दीव नगरमां आव्या अने त्यांथी नावद्वारा दरियाने वटावी, गाम-नगरोमां उपदेश आपता शत्रुंजय तीर्थे आव्या. अने त्यां घनौघपुर (घोघा) मां चतुर्मास कर्युं. त्यांथी पुनः विमलगिरिनां दर्शन करी तेओ अमदावाद आव्या अने त्यां बे चतुर्मास कर्या. त्यांथी तेओ शंखेश्वर तीर्थ थईने, तेमणे पाटण आवी चतुर्मास कर्युं. त्यांथी पुनः शंखेश्वर थई स्वयहृतिपुर (सिरोही) मां चतुर्मास वीतावी जीवा नामना श्रावकना दृढ आग्रहथी उदयपुरमां पार्श्वजिननी प्रतिष्ठा करवाने अचलगिरि (आबू) गया. त्यांना भीलोना नायके गुरुना उपदेशथी त्रस प्राणीओनो वध न करवानी प्रतिज्ञा करी. त्यांथी तेओ नाहीपूर थईने उदयपुर आव्या. त्यां भव्य समारोहपूर्वक तेमनुं स्वागत थयुं. त्यांना राणाए पोताना सेना-सरंजाम साथे शाहीरीते तेमनुं स्वागत करी श्रीविजयप्रभसूरिने वंदन कर्युं.

सर्ग. ६ — गुरुराज त्यांथी आदि जिनेश्वरना वंदन माटे खडग नामना वागड मंडळमां गया. त्यां वागड भूपतिने प्रतिबोध पमाडी तेओए पाछा उदयपुर आवीने चतुर्मास कर्युं अने त्यांना राणाने जैनधर्ममां दृढानुरागी बनाव्यो.

चतुर्मास वीततां गुरुराजे मेवाडना प्रत्येक गामे विहरतां विरहतां जिनधर्मनो उपदेश कर्यो अने प्रतिष्ठा-महोत्सवो कर्या.

सर्ग. ७ — उदयपुरथी तेओ सादडी (सादडी) आव्या. त्यांथी मेदिनीपुर, नारायणपुर,

संग्रामपुर, माल्यपुर, अने मारवाड आव्या. मारवाडमां तेमणे [सं० १७३२ मां] श्रीविजयरत्नसूरिने आचार्यपदे स्थाप्या.

सर्ग. ८—तेओ सं० १७३७ मां शिवपुरी (सिरोही) आव्या अने त्यांना शंखेश्वर पार्श्वजिनने स्तुतिपूर्वक वंदन कर्युं. (कविए तेनुं वर्णन अत्यंत कवित्वमय वाणीमां करतां आखो सर्ग रोक्यो छे.)

सर्ग. ९—सिरोहीमां वसतां श्रीविजयप्रभसूरि त्यांना संघ अने पोताना शिष्यादि वर्गने उपदेश आपता ज रह्या. त्यांथी तेओ सुवर्णगिरि (जालोर) गया. ते गिरि परनां जिनचैत्योनी लक्ष्मी, पर्वतनी शोभाने वधारती हती. तेना पर रहेता मोटा धनाढ्यो (कोट्याधीशो), कविओ, पंडितो अने त्यां विद्याधरोनी रमणीओ आवती होवाथी ए गिरि स्वर्ग समो दीसे छे. तेनी नीचे जालंधर (जालोर) गाम छे. त्यां पण अनेक जिनविहारो शोभे छे.

त्यांथी तेओ मेदिनीपुर गया अने केटलोक समय त्यां पसार कर्यो.

सर्ग. १०—त्यांथी तेओ विहार करता करता बादशाह जहांगीरना पाटनगर (आगरा) मां आव्या. आगरानी वाटिकाओ, प्राकारो, जिहांनाबाद, बादशाहनो महेल, वेपारीओनी हवेलीओ, उपवनो वगेरेनुं वर्णन कवित्वदृष्टिए करायेलुं छे.

सर्ग. ११—आगरानुं वर्णन, यमुना, गंगा, सरस्वती अने त्रणे नदीओथी बनेली त्रिवेणीनुं वर्णन, पार्श्वनाथना जन्मस्थल वाराणसी नगरी अने त्यां वसता लोको, त्यांनां गृहो, उपवनो वगेरेनुं सुंदर वर्णन छे. त्यांथी पूर्वदेश तरफ विहार करतां पत्तन-पटणा आव्या अने तेना मार्गनुं वर्णन करवामां आव्युं छे.

सर्ग. १२—पटणाना जिनमंदिरो अने नागरिकोनुं वर्णन तेमज बिहार नगरना नागरिको अने त्यांना सुंदर भवनोनुं वर्णन रोचकभरी शैलीए कर्युं छे.

सर्ग. १३—आ सर्गमां सम्मेतशिखरनुं वर्णन छे. बधाये पर्वतोमां आ पर्वत श्रेष्ठ अने पवित्र छे. चोविशे तीर्थंकरो अने गणधरोनुं स्तुतिपूर्वक आ पर्वतनुं माहात्म्य कविए भक्ति-आवेशमां वर्णव्युं छे.

प्रान्ते, साक्षररत्न आचार्य श्रीजिनविजयजी अने विद्वद्वर्य पं० बेचरदासजीए समय समय पर आपवा योग्य सूचनाओ अने प्रेरणाओ न आपी होत तो आ ग्रंथनुं संपादन कार्य आ स्वरूपे भाग्ये ज प्रकाशमां आवी शकत; ए बदल तेमनो आभार मानुं छुं.

अमदावाद
१–९–४४

अंबालाल प्रेमचंद शाह

# परिशिष्टोल्लिखित-भट्टारकानां घटनाक्रमः ।

## १ विजयसेनसूरिः—

सं० १६०४ नारदपुर्यां जन्म ।
सं० १६१३ दीक्षा ।
सं० १६२६ पंन्यासपदम् ।
सं० १६२८ उपाध्यायपदपूर्वकमाचार्यपदम् ।
सं० १६३२ चांपानेरदुर्गेऽर्हत्प्रतिमाशतानां प्रतिष्ठा ।
सं० १६५२ भट्टारकपदम् ।
सं० १६५४ विजयचिन्तामणिपार्श्वबिम्बस्य शकन्दर-पुरे प्रतिष्ठा ।
सं० १६७१ स्वर्गमनम् ।

## २ श्रीविजयदेवसूरिः—

सं० १६३४ ईडरदुर्गे जन्म ।
सं० १६४३ दीक्षा ।
सं० १६५५ पण्डितपदम् ।
सं० १६५६ उपाध्यायपदपूर्वमाचार्यपदम् ।
सं० १६५८ पत्तने गणानुज्ञानन्दिमहोत्सवः ।
सं० १६७१ भट्टारकपदम् ।
सं० १६७३ कतिचिदुपाध्यायैः स्वकीयमतं प्रादुष्कृतम् ।
सं० १६८७ मीरमोजाख्यभूपसमीपे सागरपाक्षिकैः सह वादः ।
सं० १७०५ ईलादुर्गे प्रतिष्ठा कारिता ।
सं० १७१३ ऊनानगरे स्वर्गमनम् ।

## ३ श्रीविजयसिंहसूरिः—

सं० १६४४ जन्म ।
सं० १६५४ दीक्षा ।
सं० १६७२ वाचकपदम् ।
सं० १६८१ सूरिपदम् ।
सं० १६८४ गणानुज्ञानन्दिमहोत्सवः ।
सं० १७०८ नवीनपुरे स्वर्गमनम् ।

## ४ श्रीविजयप्रभसूरिः—

सं० १६७७ मनोहरपुरे जन्म ।
सं० १६८६ दीक्षा ।
सं० १७०१ पंन्यासपदम् ।
सं० १७१० आचार्यपदम् ।
सं० १७१३ भट्टारकपदम् ।
सं० १७१५, सं० १७१७, सं० १७२० सुराष्ट्रदेशे चातुर्मासकम् ।
सं० १७२३ घोघाबन्दिरे असूत्कारिताऽर्हत्प्रतिमानां प्रतिष्ठा कारिता ।

महोपाध्यायश्रीमन्मेघविजयगणिविरचितं

# दिग्विजयमहाकाव्यम् ।

## प्रथमः सर्गः ।

ओँ ऐँ ह्रीँ श्रीँ क्लीँ अर्हं श्रीशङ्खेश्वरपार्श्वपरमेश्वराय
जगदीश्वराय जगदेकवीराय नमः ॥

स्वस्तिश्रीर्नृसुरासुरक्षितिभृतां वाल्लभ्यमभ्यस्यति
यत्पादाम्बुजसेवनापरिचयादुन्नीतपीतद्युतिः ।
तारुण्यातिशये जगत्त्रयजयं रूपेण लब्ध्वा स्वयं
कारुण्याद् भगवान् स नाभितनयः पुष्णातु पुण्योदयम् ॥ १ ॥

### ग्रन्थकारकृतानि टिप्पणानि

श्रीसङ्खेश्वरपार्श्वार्हद्ध्यानोद्बुद्धधिया मया । काव्ये दिग्विजयाह्वाने किञ्चिद् विव्रियतेऽधुना ॥ १ ॥

[१] १ 'स्वस्तिश्रीः' मङ्गललक्ष्मीः सर्वत्र [शुभकार्याऽऽरम्भे] वल्लभा । २ तत्र कवेरुत्प्रेक्षा 'यत्पादाम्बुजसेवनापरिचयात्' अत एव 'उन्नीतपीतद्युति'रिति हेतुरलङ्कारः ।

### संपादककृतानि टिप्पणानि

यत्कीर्तितगुणाम्भोधिबिन्दुस्पर्शप्रसादितः । मादृशोऽप्यल्पमेधः स्यात् किं पुनः स्तुतिकृद् गणी ॥ १ ॥
पूर्वाऽऽचार्यैरनेकैर्यद्गुणाम्भोधिनिमज्जने । कृतेऽपि न गताः पारं तद्गुणाम्भोधये नमः ॥ २ ॥
गुणाम्भोधिं श्रीमद्वीरं प्रणिपत्य च सद्गुरुम् । अम्बालालाऽऽह्वविद्यार्थी कुरुते काव्यटिप्पणम् ॥ ३ ॥

[1] 1 'वाल्लभ्यम्' प्रियताम् । 2 'अभ्यस्यति' अधीते । 3 "पीतद्युतिः' ऋषभदेवप्रभोः सुवर्णकान्तिमत्त्वात् । कमलेऽपि पीतवर्णं रजः स्यात् । 4 'नाभितनयः' नाभिनाम्नः राज्ञः पुत्रः श्रीऋषभदेवप्रभुः ।

स्वस्तिश्रीरिव यस्य मूर्त्तिरमला मूर्त्तेव लोकप्रिया
सेव्या भव्यसुरासुरै[1]र्नवरविप्रौढप्रभाभासुरैः ।
श्रीपद्मासनसंस्थिता करतले लीलाम्बुजालङ्कृता
सोऽस्माकं विजयाय नाम विजयासूनुर्जिनः स्ताद् भुवि ॥ २ ॥

स्वस्तिश्रीविभवाय शंभवविभुर्भूयात् तृतीयोऽर्हतां
यस्य ध्यानविधाननिश्चितधियां सर्वे विधेयाः सुराः ।
आधेयं हृदि नामधेयमनिशं स्वाहाभुजामीश्वरै-
र्ध्येयं निस्तुलरूपधेयमपि च स्यात् पुण्यनैपुण्यतः ॥ ३ ॥

स्वस्तिश्रीसरितां पयोनिधिर[3]धिज्ञानं महाशे(शे)वधिः
सिद्धीनामवधिर्विधिर्विधिऋचां कारुण्यतारुण्यभाक् ।
आद्यः सर्वविदां विदान्तिकधृतिर्ध्यानेऽद्वितीयो गिरि-
र्मेरुर्मे रुचयेऽभिनन्दनविभू [10]रत्नत्रयस्यास्तु सः ॥ ४ ॥

स्वस्तिश्रीरतिकर्मकर्मठमतिर्यो योगभाजां पतिः
[11]सौभाग्यप्रकृतिः [12]कृतिस्तुतिशतैर्व्यावर्ण्यमानाऽऽकृतिः ।
[13]नम्रामर्त्यपतिः प्रतिष्ठितमहालक्ष्मीयशःसंतति-
स्तीर्थेशः सुमतिश्चिरं स जयति ध्यानाधिलीनाऽऽयतिः ॥ ५ ॥

---

[ २ ] १ 'श्रीपद्मासनसंस्थिता करतले' अन्यापि लक्ष्मीः करतले अम्भोजं धत्ते, पद्मासने तिष्ठति इयमपि करतले पद्मरेखयाऽङ्किता ।

[ ३ ] २ 'विधेयाः' विनयस्थाः । 'विधेये विनयस्थः स्याद्' इति [ है० कां० ३ श्लो० ९६ ] ।

[ ४ ] ३ 'अधिज्ञानम्' ज्ञानमधिकृत्य निधिरेव । ४ 'सिद्धीनाम्' अणिमादीनाम् [ 'अणोर्भावोऽणिमा, महानपि भवत्यणुः' । है० कां० २ श्लो० ११६ ] । ५ 'विधिः' ब्रह्मा । ६ 'विधिऋचाम्' विधयः क्रियाऽऽचाररूपास्तल्लक्षणवेदपाठानाम् ।

[ ५ ] ७ 'ध्यानाधिलीनाऽऽयतिः' ध्यानेऽधिलीना स्पष्टीभूता आयतिरुत्तरकालो यस्य सः ।

---

[ 2 ] 1 'नवरविप्रौढप्रभाभासुरैः' नव्यो यः सूर्यस्तद्वत् प्रौढा या प्रभा ताभिः देदीप्यमानैः । 2 'विजयासूनुः' 'विजया' मातुः पुत्रः **अजितनाथ**प्रभुः ।

[ 3 ] 3 'शंभवविभुः' **संभवनाथ**प्रभुः । 'शंभवे संभवोऽपि च' इति [ शब्दरत्नाकरः, कां० १ श्लो० ४ ] 4 'आधेयम्' आधातुं योग्यं स्थेयमिति यावत् । 5 'स्वाहाभुजामीश्वरैः' देवतानामधिपैः इन्द्रैरिति । 6 'निस्तुलरूपधेयम्' निरुपमं रूपधेयं रूपम् 'नामरूपभागाद् धेयः' ७–२–१५८ इति सिद्धहैमसूत्रेण स्वार्थे धेयप्रत्ययः ।

[ 4 ] 7 'महाशेवधिः' महानिधिः 'निधानं तु कुनाभिः शेवधिर्निधिः' इति [ है० कां० २ श्लो० १०६ ] 8 'विदान्तिकधृतिः' विशेषेण दान्तिकानां तपःक्लेशसहां धैर्यम् 'तपःक्लेशसहो दान्तः' इति [ है० कां० २ श्लो० ४७५ ]

9 'अद्वितीयः' श्रेष्ठः । 10 'विभू रत्न' अत्र 'रो रे लुग् दीर्घश्चादिदुतः' १–३–४१ इति सिद्धहैमसूत्रेण रकारलोपः पूर्व–उकारस्य दीर्घश्च । 11 'रत्नत्रयस्य' ज्ञान-दर्शन-चारित्ररूपरत्नत्रयस्य ।

[ 5 ] 12 'सौभाग्यप्रकृतिः' शोभनो भगो रूपं श्रीर्वा यस्य स सुभगस्तस्य भावः सौभाग्यं–सौभाग्या प्रकृतिः स्वभावः यस्य सः ।

२ 'कृति०' विद्वान् । 13 'नम्रामर्त्यपतिः' नम्राः अमर्त्याः देवास्तेषां पतिः ।

स्वस्तिश्रीर्मकराकरात्[1] समुद्भूच्छैवी[2] कथाऽसौ वृथा
किन्तु स्नात्रजदुग्धवार्धिकलिकासंलब्धजन्मा[3] ह्यसौ[4] ।
तद् यस्य क्रमपूजनैर्बहुजनैः सद्यः समासाद्यते
श्रीपद्मप्रभनामधेयभगवान् जीयात् स पद्माऽङ्कितः[5] ॥ ६ ॥

स्वस्तिश्रीर्वसति स्म विस्मयकरप्राज्यप्रभाभाजने
यत्पादद्वितयाम्बुजन्मनि[6] ततस्तत् स्वस्तिकालङ्कृतम् ।
प्राणम्रामरमौलिरत्नरुचिभिश्चित्रीयितं[7] दीव्यति
श्रीमान् सोऽस्तु सुपार्श्वशाश्वतरविर्दोषाभिशोषाय[8] नः ॥ ७ ॥

स्वस्तिश्रीर्निजसोदरं[9] जिनपतेर्यस्यांह्रियुग्मे स्थिरं*
मत्वा पूर्णकलाधरं समुदितस्निग्धाऽऽशया सत्वरम् ।
रेमेऽभ्येत्य ततः प्रणेमुषि[10] जने ह्येषा विशेषाऽऽदरा
श्रीचन्द्रप्रभशम्भुरद्भुततया भाग्योदयायास्तु नः ॥ ८ ॥

स्वस्तिश्रीकरपीडनोत्सवविधौ[11] बद्धावधानः प्रभुः
प्रावीण्याद् धवलं दुकूल[12]मदधा[13]दामूलचूलाऽऽवृतम्[14] ।
गङ्गाभङ्गतरङ्गसङ्गसुभगा तेनैव यस्य द्युतिः
स श्रीमान् सुविधिर्विबोधविधये[15] साहाय्यकर्त्ताऽस्तु नः ॥ ९ ॥

स्वस्तिश्रीः प्रतिलोकमोकसि[16] गुणैः स्वस्यानुरूपं पतिं
मन्येऽन्वेष्टुमिव भ्रमन्त्य[17]नुदिनं संगत्य मुञ्चत्यमुम् ।
अन्तस्तापभृता वृता[18] जिनपतिं यं शीतलत्वं श्रिता
सारस्या[19]न्ननु शीतलः स भगवाँस्तन्या[20]दलं मङ्गलम् ॥ १० ॥

---

[६] १ 'स्वस्तिश्रीः' स्वस्तिश्रीनिवासचिह्नमेतद् येन स्वस्तिकालङ्कारः श्रीवसतौ तद्वैशिष्ट्यात् ।

[6] 1 'मकराकरात्' समुद्रात् । 2 'शैवी कथा' शिवाम्नाया पौराणिकी कथा; यथा चतुर्दशरत्नानां मध्ये लक्ष्मीविशिष्टरत्नस्य जन्म समुद्रादभूदिति । 3 'स्नात्रजदुग्धवार्धिकलिकासंलब्धजन्मा' [ प्रभोः जन्मावसरे स्नानार्थं देवता मेरोः शिखरे प्रभुं नयन्तीति जैनाम्नायस्तस्मात् ] स्नानाद् समुद्भूतो यो वार्धिः समुद्रस्तस्य कलिका वीचयस्ताभ्यः प्राप्तजन्मा । 4 'असौ' लक्ष्मीः । 5 'पद्माऽङ्कितः' पद्मलाञ्छनेन चिह्नितः अथवा लक्ष्मीरेखया युक्तः ।

[7] 6 '°अम्बुजन्मनि' कमले । 7 'प्राणम्रामरमौलिरत्नरुचिभिः' प्रकर्षेण आ समन्तान्नम्राः प्रणताः ये अमरास्तेषां मस्तकेषु यानि रत्नानि तेषां कान्तिभिश्चित्रीयितम् । 'प्राणम°' इत्यत्र "अदुरुपसर्ग°" २-३-७७ इति हैमसूत्रेण णत्वम् ।

8 'दोषाऽभिशोषाय' रात्रीणां पापानां वा नाशाय ।

[8] 9 'निजसोदरं' स्वभ्रातरम् [ चन्द्रोऽपि समुद्रादजनीति प्रसिद्धेः ] 10 'प्राणेमुषि' प्रणामं कर्तरि अत्र "अदुरुपसर्ग°" इत्यनेन णत्वभावः ॥

[9] 11 'करपीडन°' 'करपीडनं' विवाहः । 12 'दुकूलं' 'क्षौमं दुकूलं दुगूलं स्याद्' इति [ है० का० ३ श्लो० ३३३ ] 13 'अदधाद्' 'डुधांग्क्' धारणे च इति धातोः ह्यस्तन्याः रूपम् । 14 'आमूलचूलाऽऽवृतम्' पादाभ्यां आरभ्य मस्तकशिखापर्यन्तं छन्नम् । 15 'विबोधविधये' सम्यग्ज्ञानकर्मणे ।

[10] 16 'ओकसि' गृहे 'ओको निवास आवासो' इति [ है० कां० ४ श्लो०५७ ] 17 'भ्रमन्ती' 'भ्रमू' चलने इति धातोः शतृप्रत्ययत्वात् स्त्रीलिङ्गस्य रूपम् । 18 'वृता' सम्भक्ता । 'वृङ्' सम्भक्तौ 'सम्भक्तिः संसेवा' इति धातोः क्तप्रत्ययस्य रूपम् । 19 'सारस्यात्' सरसस्य भावः सारस्यं तस्मात् । 20 तन्याद् 'तनूयी' विस्तारे इति धातोः आशीर्लिङे रूपम् ।

---

* P. स्थितं ।

स्वस्तिश्रीमति योगशालिमनसि स्थेयान् विमुक्तिस्त्रियाः
प्रेयान् यः प्रभुरद्भुतैरतिशयैः श्रेयान्[1] विनेयान् प्रति ।
जेयान् कर्मरिपून् विजित्य सहसा मेयान् शिवस्याध्वनो[2]
ध्येयान् बोधनयान् दिदेश सुदृशां पेयान् स नः श्रेयसे ॥ ११ ॥

स्वस्तिश्रीर्देवपूजोपहितहितकृतां दीप्रदीपाङ्कुराणां
व्याजाद् राजा[1] सुराणामरुणकिरणभाग् या ढुढौके पुरस्तात् ।
सा नित्याऽऽसीद् यदंह्योर्दशनखर[3]शिखावेशतोऽशेषतोषं
देवः श्रीवासुपूज्यः प्रथयतु परमानन्ददीपोत्सवं नः ॥ १२ ॥

स्वस्तिश्रीर्विमलाऽऽशये[4]ऽनुरजति स्नानावदानादिभि-[5]
र्भक्तिव्यक्तिमुपेयुषी जिनगुणोद्गानस्पृशां भूस्पृशाम् ।
यत्पादाब्जनखावलीमिषबलाल्लक्ष्मीप्रसूनप्रसू-
स्तत्कण्ठस्थितकण्ठिका किमु वदत्येवं स देवो मुदे ॥ १३ ॥

स्वस्तिश्रीः समुपाश्रयत् किमु मिषाद् यत्कौङ्कुमाऽऽलेपजाद्[2]
व्याख्यायां पुरुषोत्तमो[6]ऽयमिति तद्रागेण यस्य प्रभोः ।
गौरी[3] देहरुचिं विचिन्त्य निचितामङ्गेऽप्यनन्तप्रभो-[7]
र्मास्त्वेषा पतिवल्लभेति हृदये स्पर्द्धाऽनुसंवर्धनात् ॥ १४ ॥

स्वस्तिश्रीः स्थिरतामुपैति नियतेः श्रीधर्मभक्ताऽऽत्मना-
मित्येषाऽत्र जनश्रुतिः श्रुतिभृता निश्रीयते स्वाख्यया ।
येनानन्तचतुष्टयी रसमयी भूता[8]ऽतिपूताऽऽत्मना[9]
श्रीधर्मो भगवान् नवान् स विभवान् देयात् सतां सोत्सवान् ॥ १५ ॥

स्वस्ति श्रीविश्वसेनक्षितिधव![5] भवते[6] यस्य वंशोष्णकेतु-
र्हेतुः कीर्त्तेर्बभासेऽजनि जनितविपच्छान्तिरर्हन् स शान्तिः ।
राज्ञस्त्राणे[7][10]ऽपि लब्धे वियति नियतितः सैंहिकेयो[8] हिनस्ती-
त्यामृश्याऽऽयस्य[9] यस्य क्रमशरणमगाच्चारुगोकर्णतर्ण्णः[10] ॥ १६ ॥

---

[१२] १ 'राजा' इत्यत्र तृतीया ।

[१४] २ 'कौङ्कुमाऽऽलेपजाद् मिषाद्' कौङ्कुमाऽऽलेपमिषेण स्वस्तिश्रीरेवाश्लिष्टा इत्युत्प्रेक्षा । ३ 'गौरीदेहरुचिं' यतोऽयमनन्तप्रभुस्तदस्य गौरी भवानीदेहद्युतिमिषादाश्रिता, इयं बहुतया वल्लभा । ४ 'अनन्तप्रभोः' अनन्तः शेषनागस्तदाभरणत्वात् प्रभुस्तस्य ।

[१६] ५ 'श्रीविश्वसेनक्षितिधव!' इति सम्बोधनम् । ६ भवते स्वस्ति अस्तु । ७ 'राज्ञः' चन्द्रस्य । ८ 'सैंहिकेयः' राहुः सिंहश्च । ९ 'आयस्य' आयासं उद्यमं विधाय । १० 'गोकर्णतर्ण्णः' गोकर्णो मृगविशेषस्तस्य तर्ण्णः बालः ।

---

[11] 1 'श्रेयान्' श्रेयः कर्ता । [अस्मिन् श्लोके श्रेयांसप्रभोः स्पष्टोल्लेखो नास्ति परं 'श्रेयान्' इति शब्देन श्रेयांसनाथः प्रतीयते ] 2 'शिवस्याध्वनः' मोक्षस्य मार्गस्य ।

[12] 3 '°नखर°' नखरः नखः ''करजे नखरस्त्रीषु नखोऽस्त्री–'' इति शब्दरत्नाकरः [ कां० ३ श्लो० १७२ ]

[13] 4 'विमलाऽऽशये' निर्मलभावे अथवा विमलप्रभोः विचारे । 5 'अवदानादिभिः' शुद्धकर्मादिभिः 'अवदानं कर्म शुद्धम्' [ है० कां० ३ श्लो० ४७५ ]

[14] 6 'पुरुषोत्तमः' पुरुषश्रेष्ठः कृष्णश्च । 7 'अनन्तप्रभोः' अनन्तनाथस्य शम्भोश्च ।

[15] 8 'भूता' प्राप्ता । 'भूङः प्राप्तौ' २-४-१९ इत्यादिना णिङि भावयते प्राप्नोति इति 'भू'धातोः क्तप्रत्ययस्य रूपम् । 9 'अतिपूताऽऽत्मना' अतिपवित्रिताऽऽत्मना ।

[16] 10 'त्राणे' रक्षणे ।

स्वस्ति श्रीकुक्षयेऽस्तु स्तुतिशतमथवाऽवैतु वै तुष्टिभाजां
राज्ञां स्वर्गस्य रम्भानटनघटनया धीरनीराजनां सा ।
यस्यामश्यामकीर्त्तिस्त्रिभुवनविजयी चक्रभृत्तीर्थनाथः[1]
पाथोधि[2]र्बोधिवारां[3] समजनि भगवान् कुन्थुनामाऽभिरामः ॥ १७ ॥

स्वस्तिश्रीहृदयप्रियैः सहृदयैर्योगीव यो गीयते
भोगी श्रीभरतस्य[4] मुक्तसमरः[5] श्रीमानरस्तीर्थकृत्[6][7] ।
बिम्बे यस्य मणीमये सुमनसां[8] स्रक् कण्ठगा संक्रमाद्[9]
द्वे रूपे दधतीव वक्ति विभुतां तीर्थेशचक्रिश्रियोः[10] ॥ १८ ॥

स्वस्तिश्रीर्भ्रमरीव यन्मणिमयाऽर्चासन्निधौ बम्भ्रमी-[11]
त्युत्फुल्लनवमल्लिकासुमनसामामोदमेदस्वला[12] ।
स्वच्छन्दादमरीगतागतविधौ जातप्रतिच्छन्दत-
श्छिन्द्यान्मल्लिजिनो जनेऽत्र वृजिनाज्जन्यान्यजन्यानि नः[13][14] ॥ १९ ॥

स्वस्तिश्रीमुनिसुव्रतोऽभिदिशतादुद्दिश्य दिश्यं सतः
पद्मानन्दनसंज्ञयाऽङ्कमहसा[15] विस्मारयन् स स्मरम् ।
यत्पादप्रणमन्नृनाकिमुकुटज्योतिर्जलान्तर्लल-[16]
न्नङ्कस्थः कमठोऽपि[17] कर्मठ इव प्रोल्लासते चर्यया[18] ॥ २० ॥

स्वस्तिश्री सरसी[19] इवामृतरसाऽऽपूर्णे विभोर्लोचने
यन्नीलोत्पलवैभवं जगृहतुश्चित्रं न तत् किञ्चन ।
तेनैतन्ननु सेवतेऽङ्कमिषतो[20] यस्यांह्रिपङ्केरुहं
पुत्रः श्रीविजयस्य नः स विजयं पुष्याज्जिनेन्दुर्नमिः ॥ २१ ॥

---

[ १९ ] १ 'श्रीकुक्षये' श्रीनाम्न्याः राजपत्न्याः [ कुन्थुनाथप्रभोः मातुर्नाम श्रीस्तस्याः ] कुक्षये स्वस्ति अस्तु । २ स्वर्गस्य राज्ञां स्तुतिशतं सा कुक्षिः अवैतु प्राप्नोतु ।

[ १९ ] ३ 'अजन्यानि' ईतयः ।

[ २० ] ४ 'दिश्यं' दिग्भवं वस्तु । २ सतः सज्जनान् उद्दिश्य दिशतात् । ५ 'पद्मा' पद्मादेवी लक्ष्मीश्च ।

---

[ 17 ] 1 'चक्रभृत् तीर्थनाथः' चक्रवर्तित्वे तीर्थङ्करपदप्राप्तिः । 2 'पाथोधिः' समुद्रः । 3 'बोधिवारां' सम्यग्दर्शनरूपजलानाम् ।

[ 18 ] 4 'श्रीभरतस्य भोगी' षट्खण्डभारतस्य भोक्तृत्वेन चक्रवर्ती । 5 'मुक्तसमरः' इति स्थाने 'नन्दितनरः' इति पाठान्तरं मूलप्रतौ दर्शितम् ।

6 श्रीमान्, अरः, तीर्थकृत्, इति पदविभागः । 7 'अरः' अरनाथप्रभुः । 8 'सुमनसां' देवतानाम् । 9 'संक्रमाद्' प्रतिबिम्बनात् । 10 'तीर्थेशचक्रिश्रियोः' तीर्थकृत् चक्रवर्ती च तयोः श्रीः लक्ष्मीस्तयोः ।

[ 19 ] 11 'बम्भ्रमीति' 'भ्रमू' चलने इति धातोः यङ्लुबन्तस्य रूपम् । 12 'आमोदमेदस्वला' सुगन्धेन मेदयुक्ता । 13 'वृजिनात्' पापात् । 14 'जन्यानि अजन्यानि' उत्पादितानि अजन्यानि ईतयः ।

[ 20 ] 15 'पद्मानन्दन°' पद्मायाः नन्दनः पुत्रः कामदेवः 16 '°नृनाकिमुकुट°' मनुष्यदेवतानां मुकुटः शिरस्त्राणः ।

17 'कमठः' कच्छपः 'कच्छपः कमठः कूर्मः' इति [ है० कां० ४ श्लो० ४१९ ] प्रभोः कूर्मलाञ्छनयुक्तत्वात् । 18 'चर्यया' पूजया ।

[ 21 ] 19 'सरसी' कासारः 'कासारः सरसी सरः' इति [ है० कां० ६ श्लो० १६० ] 20 'अङ्कमिषतः' लाञ्छनव्याजात् [ नमिनाथप्रभोर्लाञ्छनं पद्ममिति प्रसिद्धिः ]

स्वस्ति[1]श्रीपतिना त्रिखण्डभरते साम्राज्यरूपं रया-
ल्लेभे वैरिबलं विजित्य सकलं यस्याङ्गसाहाय्यकात् ।
सर्वाङ्गीणशिवाय सोऽस्तु भगवान् नेमिः शिवानन्दनो
भास्वाँश्चारुसु[2]दारुशैलशिखरे नित्योदयश्रीमयः ॥ २२ ॥

स्वस्तिश्रीसुखसंततिः शुभमतिर्विद्याऽनवद्या स्थितिः
नित्यं सज्जनसंगतिः शिवगतिः साम्राज्यलक्ष्मीः स्थिरा ।
यस्य श्रीपरमेश्वरस्य चरणाम्भोजन्मसंसेविनां
स श्रीपार्श्वजिनोऽष्ट[3]सिद्धिविधये ध्येयस्त्रिसन्ध्यं बुधैः ॥ २३ ॥

स्वस्तिश्रीरनुगामिनी बहुरसा स्यात् कामिनीवाऽऽदृता
विघ्नानां विलयस्तथा रिपुजयः क्षुद्रादिभीतिक्षयः ।
यस्य श्रीत्रिजगत्पतेः स्मृतिकृतां पञ्चास्य[4]लक्ष्मा प्रभुः
श्रीवीरोऽतिगभीरधीरचरितैः पायाद[5]पायात् स नः ॥ २४ ॥

येषां वि[१]शेषाङ्गभृतां प्रवृत्ते[२]रनेकपानामिव ग[३]र्जितानाम् ।
धैर्यं[४] धियां स्यान्निजपाक्षिकाणां ते गौ[6]तमाद्या गणिनो जयन्तु ॥ २५ ॥

य[7]दङ्गशोभा त्रि[५][8]पदीनिबन्धाद्[६]धस्तेन येषां सकलार्थ[9]सिद्धिः ।
जा[10]त्येव भद्रा गणनायकास्ते म[७]हेन्द्रभूतिप्रमुखाः सुखाय ॥ २६ ॥

---

[ २५ ] १ 'विशेषाङ्गभृताम्' विशेषेण महाकायानां पक्षे आचाराद्यङ्गधारिणाम् । 'प्रवृत्तेः' प्रवृत्तिः वार्त्ता तस्याः [ 'वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः' इति है० कां० २ श्लो० १७४ ] पक्षे दानवारितस्य । २ 'अनेकपानाम्' अनेकान् पान्ति इत्यनेकपास्तेषाम् । पक्षे [ गजानाम् ] ३ 'गर्जितानाम्' मत्तानाम् [ 'मत्ते प्रभिन्न-गर्जितौ' इति है० कां० ४ श्लो० २८६ ] ४ 'धैर्यम्' साहसं पाण्डित्यञ्च ।

[ २६ ] ५ 'त्रिपदी' गात्रबन्धः उत्पादादि [ उत्पादव्ययध्रौव्यादि ] पदत्रयी वा । ६ 'हस्तेन' शुण्डादण्डेन पाणिना वा । ७ 'महेन्द्रभूतिप्रमुखाः' इन्द्रभूत्याद्याः [ गणधराः ] शक्रस्तौ प्रकृष्टाः ।

---

[ 22 ] 1 '०श्रीपतिना' कृष्णेन । [ अस्मिन् श्लोके इतिहवृत्तं वर्त्तते तद् यथा–कृष्णजरासन्धयोर्युद्धप्रसङ्गे यादवसैन्यं जरासन्धेन जराग्रस्तं कृतं तेन नेमिनाथसंदर्शितमूर्त्याः स्नात्रजवारि आनेतुं कृष्णं प्राहिणोत् । कृष्णस्य प्रत्यागमनं यावत् नेमिनाथः स्वस्य भुजबलेन शत्रुसैन्यमरुणत् । वारि आनीय कृष्णेन सैन्यं जराविमुक्तं कृतं पश्चात् शत्रुसैन्यं विजित्य जयलक्ष्मीं लेभे इति । 2 'सुदारु' 'सुदारुः पारियात्रकः' इति [ है० कां० ४ श्लो० ९७ ] अत्र कवे रैवतक इष्टः परं सुदारुशैलः पारियात्रकस्य वाचकः, न रैवतकस्य । कविना कुत्रचिद् सुदारुशब्दः रैवतकवाची दृष्टः स्यात् तेनात्र प्रयोजितो ज्ञायते ।

[ 23 ] 3 'अष्टसिद्धिविधये' अणिमाद्यष्टसिद्धिविधानार्थम् । अष्टसिद्धयस्तावद्–

"लघिमा[2]वशिते[3]शित्वं [4]प्राकाम्यं [5]महिमाऽ[6]णिमा ।
[7]यत्रकामावसायित्वं [8]प्राप्तिरैश्वर्यमष्टधा ॥
[ इति है० कां० २ श्लो० ११६ ]

[ 25 ] 4 'पञ्चास्यलक्ष्मा' सिंहलाञ्छनः । 5 'अपायात्' विघ्नात् पापाद् वा ।

[ 25 ] 6 'गौतमाद्याः' गौतमगणधरादयः ।

[ 26 ] 7 'यदङ्गशोभा' यस्य शरीरकान्तिः पक्षे यस्य प्रभोराचाराद्यङ्गानां कान्तिः । 8 'त्रिपदी द्वयोरग्रजङ्घयोः पश्चिमजङ्घायां गजस्य बन्धनम् 'त्रिपदी गात्रयोर्बन्ध एकस्मिन्नपरेऽपि च' इति [ है० कां० ४ श्लो० २९६ ] 9 'सकलार्थसिद्धिः' समग्रवस्तूनां सिद्धिः । 10 'जात्येव भद्राः' भद्रजातिकाः हस्तिषु भद्रजातिकाः गजाः श्रेष्ठा गण्यन्ते । पक्षे स्वभावेन ऋजुप्रकृतिकाः ।

एकोऽपि सूरिर्धनराशिभर्त्ता यदाऽऽगमो राजगृहे शुभाय ।
पदप्रसादाज्जगतीं पुनाना धन्या न किं सूरिपरम्परा सा ? ॥ २७ ॥

सरस्वती संनिहिता हिताय जडेऽपि पद्माऽभ्युदयेन भूयात् ।
आनन्दनीया कविना विनोदैर्या राजहंसैः सरसोह्यतेऽर्थे ॥ २८ ॥

ये संयता अप्यपरस्य बन्धं विनाशनं वा जनयन्त्यवश्यम् ।
दूरेण हेया न मुमुक्षुणा किं ते शृङ्खलाऽभासि खलाः फलार्थे ॥ २९ ॥

असङ्ख्यकूटैः स्थपुटाः प्रपातस्थानानि भीमा विलसन्महेभ्यः ।
सदोच्चगोत्रा अपि मेखलाऽङ्का हिताय तेषां भुवि पक्षपातः ॥ ३० ॥

युक्तोऽतिजिह्मैर्विटपैरगम्यः प्रवृत्तिहेतुर्बहुनिम्नगानाम् ।
गोत्राधरोऽध्यायतमेखलो यस्तस्मिन् वरत्राशिखराधिरोहः ॥ ३१ ॥

[ पाठान्तरम् ]

जगज्जुगुप्सुः समितिप्रयोगी सदाप्यसाधुर्मलहृद् विरागः ।
स्फुरद्गुणग्रामकथासु मौनी निर्बन्धभेदं न विवेद किं सः ॥ ३२ ॥

---

[ २७ ] १ 'सूरिः गुरुः । २ 'धनराशिभर्त्ता' धनसमूहं पुष्णाति । ३ 'यदाऽऽगमः' यस्य सूरेरागमः सिद्धान्तः । ४ 'राजगृहे' राजगृहनामनगरे । ५ 'शुभाय' [ कल्याणाय ] अभूदिति शेषः । पक्षे–'यदाऽऽगमः' यस्य गुरोः आगमनम् । 'राजगृहे' चन्द्रगृहे कर्कराशौ उच्चस्थानत्वात् । ६ 'पदप्रसादाद्' पदानि वाचकादीनि प्रदानात् ।

[ २८ ] ७ 'सरस्वती' सरस्वती देवी । ८ 'सन्निहिता' योजिता । ९ 'जडे' मादृशे मूर्खे । १० 'पद्माऽभ्युदयेन' लक्ष्मीवर्धनेन । ११ 'आनन्दनीया' वर्द्धनीया । १२ 'कविना' पण्डितेन । १३ 'राजहंसैः' राजसु हंसैः श्रेष्ठैः । १४ 'अर्थे सरसा' इति ॥

[ पक्षे 'सरस्वती' वाणी । 'जडेऽपि' जडेऽपि । 'पद्मा' लक्ष्मीः शोभा इति यावत् । 'राजहंसैः' चन्द्रसूर्यैः । 'ऊह्यते' धार्यते । चन्द्रार्कमण्डले लिखितैव ॥ 'सरस्वती' नदी । 'जडे' जले [ 'डलयोरैक्यम्' इति नियमात् ] । 'कविना' ब्रह्मणा । देवीपक्षेऽपि राजहंसैः ऊह्यते विमृश्यते ]

[ २९ ] १५ 'संयता' अन्योऽन्यं बद्धा । १६ 'अपरस्य बन्धं जनयन्ति' १७ 'विनाशनम्' अशनं भोजनं विना ।

[ पक्षे 'संयताः संवरकुशलाः । 'अपरस्य बन्धम्' काव्यादिसंदर्भम् । 'विनाशनं जनयन्ति' विनाशं प्रापयन्ति ॥

[ ३० ] १८ 'कुटैः' कूटानि शिखराणि छलानि वा । १९ 'स्थपुटाः' विषमोन्नताः । २० 'प्रपातस्थानानि' प्रपातोऽवटः स्खलितं वा तदास्पदम् । २१ 'भीमाः' रुद्राः । २२ 'विलसन्महेभ्यः' बिल, सद्, महा, इभ्य, इति पदविभागः [ बवयोरैक्यमिति ] बिले सीदन्तीति बिलसदः सर्पाः महामहिषास्तेभ्योऽपि । २३ 'सदोच्चगोत्रा' विशिष्टवंशा अपि । २४ 'मेखलाऽङ्काः' मे, खल, अङ्का, इति पदविभागः । 'मे' मम, 'खलाङ्काः' खलवत्, अङ्कश्चिह्नं लक्षणं येषां ते ॥

[ ३१ ] २५ 'अतिजिह्मैः' अतिवक्रैः । २६ 'विटपैः' विटपाः शाखाः दुर्जनाश्च तैः । २७ 'प्रवृत्ति॰' शिक्षाकरः । २८ 'निम्नगानाम्' असन्मार्गगानां पुंसाम् । २९ 'गोत्राधरः' भूधरो गोत्रेण हीनो वा । ३० 'अध्यायतमेखलः' अधिकं आयता मेखला यत्र । अधि, आयतमे, खलः, इति पदविभागे प्रकृष्टः अध्यायः अध्यायतमस्तत्र खलः दूषकः । ३१ 'तस्मिन् वरत्राशिखराधिरोहः' तस्मिन् वरत्रया रज्जुकया शिखरेऽधिरोहः । वर, त्रासि, खरे, ऽधिरोहः, इति पदविभागे त्रासोऽस्मिन्नस्तीति त्रासी [ त्रासयतीति त्रासी इहूक ] खरेऽधिरोहो वरम् ॥

[ ३२ ] ३२ 'जगज्जुगुप्सुः' संसारनिन्दकः संसाररक्षको वा । ३३ 'समितिप्रयोगी' समितय इर्याद्याः समितिः कलहः [ समितिप्रयोगी रणतत्परः ] ३४ 'सदाप्यसाधुः' सतामाप्यः सेव्यः [ प्राप्योऽभिगम्य इति यावत्; साधुः सज्जनः ] ३५ 'मलहृत्' मलं पापं हरति पक्षे मलो देवादिपूजायामश्राद्धस्तद्वत् हृदयं यस्य सः; पक्षे पापहृत् ] ३६ 'गुणग्रामकथासु' गुणभाजनरूपास्वपि ग्रामकथासु । पक्षे, गुणसमूहवार्तासु । ३७ 'मौनी' अभाषकः देशकथानिषेधात् । ३८ 'निबन्धभेदः' निबन्धः कर्मबन्धस्तस्य प्रकारं पक्षे काव्यादिदोषम् । ३९ 'विवेद' वेत्ति ।

---

[ 30 ] 1 'अविलसद् महेभ्यः' महेभ्यः महाऽऽढ्यः लक्ष्मीवान् अविलसद् विलासं करोति स्म । 2 '॰गोत्राः' पर्वताः । 3 'मेखला' कटिसूत्रं पर्वतस्य मध्यभागो वा । 4 'पक्षपातः' पक्षे पातः पक्षाणां वा पातः नाश इति यावत् ।

[ 31 ] 5 'निम्नगानाम्' सरिताम् 'स्रोतस्विनी धुनी सिन्धुः स्रवन्ती निम्नगाऽऽपगा' इति [ धनञ्जयः श्लो॰ २४ ]

[ 32 ] 6 '॰अधरः' 'अथाधरः हीनवादिनि' इति [ है॰ कां २ श्लो॰ ११ ]

प्रयान्ति ये प्रेम जनेष्वपूर्वं वैधेयराजोऽपि विना निमित्तम् ।
परस्य वैकृत्यनिबद्धचित्तास्ते सज्जनाः सन्तु मयि प्रसन्नाः ॥ ३३ ॥
मुखे निबन्धस्य खलप्रवृत्तिं बुधाः सुधावन्न मुधाऽऽद्रियन्ते ।
स्रवेद् विनेतां विलसत्पदा गौरसौ रसौघं न यतोऽद्भुताऽपि ॥ ३४ ॥
स भासतामन्यगुणानुरागः सभा सतामुल्लसतीव यस्मात् ।
प्रमोदयं प्राप्य गवां रहस्ये प्रमोदयन्ती हृदयं कवीनाम् ॥ ३५ ॥
लभ्याः कवीनां सुकृतैः पुराणैः सभ्याः कृपापूर्णदृशं दिशन्तु ।
ययाऽब्जबन्धुप्रभयेव लोकोऽपदोषवृत्तिर्गिरिसानुरागः ॥ ३६ ॥
जगद्गुरूणामतिगौरवेणाभिनम्य सम्यक् चरणारविन्दम् ।
प्रारभ्यतेऽपूर्वधियाऽनुभाव्यं श्राव्यं मया 'दिग्विजयाख्यकाव्यम्' ॥ ३७ ॥

इहास्ति जम्बूपपदः प्रथीयान्, द्वीपोऽवनीपः सकलाश्रयाणाम् ।
प्रदीपरूपः स्वसमीपवृत्त्योरूर्द्ध्वस्थिताऽधः स्थितलोकयोर्यः ॥ ३८ ॥
स्वर्णाऽऽतपत्रप्रतिमं सुमेरुमुच्चैर्दधानः क्षितिभृत्प्रधानः ।
शीतातिशीतोदकयो रयाभ्यां कृतोत्तरासङ्ग इवैष रेजे ॥ ३९ ॥

---

[ ३३ ] १ 'अपूर्वं प्रेम' अप्रेमो द्वेष इत्यर्थः ।
२ 'वैधेयराजोऽपि' मूर्खवरा अपि पक्षे विधेय एव वैधेयो विनयी तद्राजोऽपि । विनयकराः सन्तः । ३ 'विना निमित्तम्' निष्कारणं स्वार्थं विना पक्षे निरर्थकम् ।
४ 'परस्य वैकृत्यनिबद्धचित्ताः' परदूषणलग्नमनसः पक्षे वै निश्चितं परस्य कार्यानुरागिमनसः ।

[ ३४ ] ५ 'गौः' वाणी सुरभिश्च ।
[ ३५ ] ६ 'सभा सतामुल्लसतीव' सतां सभा उल्लसतीव ।
७ 'प्रमोदयम्' ज्ञानोदयम् ।
[ ३६ ] ८ 'अपदोषवृत्तिः' अपगता दोषवृत्तिर्यस्मात् सः ।
९ 'गिरिसानुरागः' इति समस्तपदे पर्वतेषु सानूनां शिखराणां रागो लोहितिमा ।

---

[ 33 ] 1 'वैधेय°' वैधेयो मूर्खः 'वैधेयो मातृशासितः' इति [ है० कां० ३ श्लो० १६ ] 'वैधेय ' विनयस्थः 'विधेये विनयस्थः स्यात्' इति [ है० कां० ३ श्लो० ९६ ]

[ 34 ] 2 'मुखे' प्रारम्भे । 3 'निबन्धस्य' ग्रन्थस्य । 4 'खलप्रवृत्तिम्' दुर्जनप्रवृत्तिम् ।
5 'बुधाः' पण्डिताः कवयः ग्रन्थकर्तार इति यावत् ।
6 'आद्रियन्ते' गृह्णन्ति । 7 'विलसत्पदा' विलसन्ति पदानि पादा वा यस्यां सा । 8 'रसौघम् शृङ्गारवीरादिरसानां ओघः प्रवाहः ।

[ 35 ] 9 'भासताम्' दीप्यताम् 'भासि' दीप्तौ इति धातोः पञ्चम्याः रूपम् । 10 'अन्यगुणानुरागः' अन्येषां गुणानामनुरागः प्रीतिः । 11 'गवाम्' वाणीनाम् । 12 'प्रमोदयन्ती' आनन्दयन्ती प्रमोदं कुर्वन्ती ।

[ 36 ] 13 'कृपापूर्णदृशम्' कृपया प्रसादेन पूर्णाश्च ते दृशस्तम् । अथवा **कृपाविजयः** इति स्वगुरोर्नाम स्मृतम् । 14 'अब्जबन्धुप्रभया' सूर्यकान्त्या । अथवा चरित्रनायकस्य 'प्रभ' इत्यनेन श्री**प्रभसूरेः** स्मरणम् । 15 गिरि सानुराग इति पदविभागे 'गिरि' वाण्याम् । 16 'सानुरागः' अनुरागेन प्रीत्या सह वर्तमान इति ।

[ 37 ] 17 'जगद्गुरूणाम्' जगतो गुरवस्तेषाम् । अत्र 'जगद्गुरु' इत्यनेन **हीरविजयसूरेः** स्मरणं संभाव्यते तस्य तथाविधबिरुदत्वात् ।
18 'अपूर्वधिया' अपूर्वबुद्ध्या अथवा 'पूर्वधिया' इति पदत्वे पूर्वेषां बुद्ध्या यथा पूर्वैः कथितं तथैव ।
19 'अनुभाव्य' स्वयमनुभूयमानं चरित्रविषयं स्वं प्रयुज्येति ।
20 'श्राव्यम्' श्रोतुं श्रावयितुं वा योग्यम् ।

[ 38 ] 21 'जम्बूपपदः' उप समीपे पूर्वं वा पदस्येत्युपपदं जम्बू उपपदं यस्य सः । जम्बूतरुप्रधानत्वाज्जम्बूद्वीपः ।
22 'प्रथीयान्' विस्तृतः । '°योजनशतसहस्रविष्कम्भो जम्बूद्वीपः' इति [ तत्त्वार्थः ३–९ ] 23 'अवनीपः' अवनीं पृथ्वीं पाति रक्षतीत्यवनीपः राजा ।

[ 39 ] 24 'स्वर्णातपत्रप्रतिमम्' सुवर्णस्य छत्रतुल्यम् । 25 'क्षितिभृत्प्रधानः' पर्वतेषु श्रेष्ठः । 26 'शीतातिशीतोदकयोः' शीतलातिशीतलजलयुक्तयोः **'शीता'** 'अतिशीता' इति नाम्न्यौ नद्यौ । 27 'रयाभ्याम्' वेगाभ्याम् । 28 'उत्तरासङ्गः' प्रावारः "वैकक्षे प्रावारोत्तरासङ्गौ बृहतिकाऽपि च" इति [है० कां० ३ श्लो० ३३६]

[1]रत्नप्रभायाः प्रथमांशरूपे सिंहासनेऽयत्ननिबद्धरत्ने ।
यस्तस्थिवान् दिग्वरकन्यकाभिर्व्याधूयमानानिलचामरश्रीः ॥ ४० ॥
वेलाऽबलास्तुङ्गतरङ्गहस्तैः पयोनिधेर्यं समवाकिरन्ति ।
[2]समीरनुन्ना मणिमौक्तिकानां [3]व्रजेन [4]वर्द्धापनयोजितेन ॥ ४१ ॥
यः स्वैर्मणीभिर्[5]नगराजजन्यैर्नदीमहावेगलघुप्रयुक्तैः ।
[6]रत्नाकरत्वं जलधेर्विधत्ते [7]समानयोर्न्याय्यतमौचितीयम् ॥ ४२ ॥
किं स्वर्निवासः स्फुटतामुपैति तारावताराभ्निशि भीतभीतः ।
कचित् प्रभाते प्रपलाय्य याति स्थानेऽधिपः [8]कौशिक एव तस्य ॥ ४३ ॥
स्वर्गेऽपि सम्भाव्य भियाऽसुराणां चलाचलत्वं तदिदं सुराणाम् ।
[9]पुरीं सुमेरोः शिखरेऽध्युवास द्वीपाधिराजः शरणं प्रपद्य ॥ ४४ ॥

एकैव [10]सिन्धुर्[11]वनमेकमेव [12]सरोऽपि चैकं दिवि वेद्यते [13]ज्ञैः ।
द्वीपे सहस्रप्रमितास्[14]तटिन्यः कोटिः प्रमाणं सरसां वनानाम् ॥ ४५ ॥
मन्यामहे द्वीपवरे ह्यमुष्मिन् [15]महौषधीमृत्पयसां विशेषम् ।
इन्द्राभिषेके तत एव तेषामादित्सयाऽऽयान्ति सुरा धरायाम् ॥ ४६ ॥
रसो न तादृक् दिवि देवभोज्ये [16]सुधान्धसो द्वीपमुपेत्य तस्मात् ।
[17]जोहूयमानं हविरास्वदन्ते जाज्वल्यमाने [18]ज्वलने प्रविश्य ॥ ४७ ॥
तावद् विमानस्थललक्षपूर्णस्वर्गस्य लक्ष्मीविजयस्य चिह्नम् ।
द्वात्रिंशदेते [19]विजया विभान्ति द्वीपे जिनानां [20]जनुषाऽतिपूताः ॥ ४८ ॥
यत्[21]प्राभृतं काञ्चनभूमिभागे तारावतारात् त्रिदिवं करोति ।
मुक्तामयेऽराजत कुम्भशोभा तत्रेन्दुबिम्बप्रतिबिम्बनेन ॥ ४९ ॥
दिवा विभूतिर्बहुधेव यस्य द्वीपाधिराजः प्रतिभाति रत्नैः ।
[22]तत्संवरे [23]रात्रिचरोडुरत्नैः स्वर्गस्य शोभाऽ[24]भिनिवेशलेशः ॥ ५० ॥

---

[ 40 ] 1 'रत्नप्रभायाः' 'रत्नप्रभा' इति प्रथमनरकस्थितपृथिव्या नाम तस्याः । "अथ रत्नप्रभा घर्मा" इति हैमः [ अभि० चिं० कां० ५ श्लो० ३ स्थितशेषे श्लो० १ ] ।

[ 41 ] 2 'समीरनुन्नाः' पवनेन क्षिप्ताः । 3 'व्रजेन' समूहेन । 4 'वर्द्धापन°' वधामणी इति भाषायाम् ।

[ 42 ] 5 'नगराजजन्यैः' पर्वतराजोत्पन्नैः । 6 '°रत्नाऽऽकरत्वम्' रत्नानामाकरस्तस्य भावः । 7 'समानयोः' नदीपर्वतयोः ।

[ 43 ] 8 'कौशिकः' इन्द्रः 'कौशिकः पूर्वदिग्देवाऽप्सरःस्वर्गशचीपतिः' इति हैमः [ अभि० चिं० कां० २ श्लो० ८७ ] ।

[ 44 ] 9 'पुरीं' अमरावती [अभि० चिं० कां० २ श्लो० ९२]

[ 45 ] 10 'सिन्धुः' स्वर्गङ्गा । 11 'वनम्' नन्दनम् [ अभि० चिं० कां० २ श्लो० ९२ ] 12 'सरः' नन्दीसरः [ अभि० चिं० कां० २ श्लो० ९२ ] 13 'ज्ञैः' बुधैः । 14 'तटिन्यः' नद्यः ।

[ 46 ] 15 'महौषधीमृत्पयसाम्' महती चासौ औषधी च महौषधी मृच्च पयश्च इति ।



[ 47 ] 16 'सुधान्धसः' सुधाऽमृतमन्धोऽन्नं भोज्यं येषां ते देवाः 'अन्धः पीयूषममृतं सुधा' इति हैमः [ अभि० चिं० कां० २ श्लो० ३ ] ।

17 'जोहूयमानम्' अतिशयेन हूयमानम् 'हुंक्' दानादनयोः [ दानमत्र हविष्प्रक्षेपः, अदनं भक्षणम् ] इति धातोः यङि कृते आनश् प्रत्ययस्य रूपम् । 18 'ज्वलने' अग्नौ ।

[ 48 ] 19 'विजयाः' महाविदेहस्थितद्वात्रिंशद्विजयाः ।

20 'जनुषा' जन्मना [ अद्यापि विंशतिविहरमानजिनानां विदेहे जन्मसम्भवात् ] ।

[ 49 ] 21 '°प्राभृतम्' ढौकनम् ।

[ 50 ] 22 'तत्संवरे' तत्पिधाने ।

23 'रात्रिचरोडुरत्नैः' रात्रिचरश्चन्द्रः, उडूनि ताराश्चेति रात्रिचरोडूनि एव रत्नानि तैः ।

24 'अभिनिवेशलेशः' ईषद् निर्बन्धः 'निर्बन्धोऽभिनिवेशः स्यात्' इति हैमः [ अभि० चिं० कां० ६ श्लो० १३६ ] ।

यद्भूषणानां मणिमौक्तिकानां रात्रौ वियद्दर्पणबिम्बितानि ।
उत्पश्यतो नश्यति रूपगर्वः स्वर्गप्रदेशस्य तदैव सर्वः ॥ ५१ ॥

क[1]वि[2]र्बुधो वा गु[3]रुरेक एव स्वर्गे ह[4]रेर्मानसरञ्जनाय ।
समुद्भवन्त्यत्र सहस्रशस्ते कस्तेन ना[5]कस्य तु[6]लाविमर्शः ॥ ५२ ॥

द्वीपेन सार्धं तुलने गुणौघैर्यद्द्युलोके लघुता बभूव ।
तेनायमुच्चैः स्थिरतामवाप निदर्शयन् स्वं त्रपया निशीव ॥ ५३ ॥

अत्याकुलो भो[7]गिकुलेन ना[8]गलोको द्विजिह्वाऽऽश्रयदोषबुद्ध्या ।
अधःकृतोऽतः परितापयोगाद् विषोपशान्त्यै पवमानमत्ति ॥ ५४ ॥

न[1]-वस्तुतः कश्च न[2]-भोगभावाद[3]मुष्य लक्ष्म्यास्त्रि[4]दिवेऽ[5]तिरेकः ।
न[6]क्षत्रलोकस्पृशि सम्भृतस्य जनेन स[7]त्सङ्गरसङ्गतेन ॥ ५५ ॥

श्री[8]नन्दनोऽप्यङ्गविभासरङ्गः कृ[10]ष्णो न यस्मिन् ननु जिष्णुलोकः ।
न रु[11]द्रता कापि महेश्वरेषु द्वीपोऽतिशेते स्वगुणैः स्वरेवम् ॥ ५६ ॥

वनेऽपि र[12]म्भाः शतशोऽधिपात्रं नृणां सुखायाप्सरसां प्रसङ्गे ।
ना[13]सत्यरूपा जनता समाऽस्मिन् द्वीपः कथं स्वर्गजयाय नालम् ॥ ५७ ॥

द्वि[14]जाधिराजेऽपि कलङ्कपङ्कः सू[15]रेऽपि यत्र ग्र[16]हणप्रसङ्गः ।
भोक्ता पु[17]राणः पुरुषो र[18]मायाः स्ववासिसौख्यं त्वियतैव गम्यम् ॥ ५८ ॥

क[19]लाविलासः सततं द्वि[20]जेशो सू[21]रेऽत्र नि[22]र्दोषसुवृत्तभावः ।
लक्ष्म्या नु रागः पुरुषोत्तमानां द्वीपस्य न स्वर्विषयः प्र[23]तीपः ॥ ५९ ॥

रा[24]जाऽपि कन्यां परिभोक्तुमीष्टे गु[25]रोः कवेः काऽत्र नये जुगुप्सा ।
प्र[26]भाकरो मीनमजं च भुङ्क्ते स्ववासिनां धर्मकथाऽन्यथाऽसौ ॥ ६० ॥

---

[ ५५ ] १ 'न वस्तुतः' नव । स्तुतः इति पदविभागे नवीनस्तुतः वर्णितः । २ 'कश्चन भोगभावात्' कश्च । नभोगभावात् । इति पदविभागे देवसद्भावात् । ३ 'अमुष्य' जम्बूद्वीपस्य । [ 'कश्च । न । भोगभावात्' इति पदविभागे कश्च न अस्ति । पक्षे अमुष्य द्वीपस्य भोगभावात् अतिशयः कश्चन वस्तुतः स्वर्गेऽपि नास्ति ] ४ 'त्रिदिवे' स्वर्गे । ५ 'अतिरेकः' अतिशयः । ६ 'नक्षत्रलोकस्पृशि' दिवि । ७ 'सत्सङ्गरसङ्गतेन' सतां सङ्गस्य यो रसस्तं प्राप्तेन; अथवा सन् यः सङ्गरो व्यापरणस्तत्र सङ्गतो मिलितस्तेन ॥

[ ५६ ] ८ 'श्रीनन्दनः' व्यवहारी पक्षे स्मरः ।

[ ५७ ] ९ 'अप्सरसाम्' अब्युक्तानि सरांसि तेषाम् । १० 'नासत्यरूपा' नासत्यावश्विनीकुमारौ तद्वद् रूपं यस्याः सा ।

---

[ 52 ] 1 'कविः' शुक्रः । 2 'बुधः' सौम्यः । 3 'गुरुः' बृहस्पतिः । 4 'हरेः' इन्द्रस्य । 5 'नाकस्य' स्वर्गस्य । 6 'तुलाविमर्शः' तुलनाविचारः ।

[ 54 ] 7 'भोगिकुलेन' सर्पकुलेन । 8 'नागलोकः' नागकुमारदेवतागणः ।

[ 56 ] [ स्वर्गे स्मरस्यानङ्गत्वम् कृष्णस्य कृष्णत्वम्; रुद्रस्य महादेवस्य रुद्रता अस्ति ] परमत्र द्वीपे [ परिहारस्वरूपे ] 9 'अङ्गविभासरङ्गः' व्यवहारी लोकः 10 'जिष्णुलोकः' विजयिलोकः कृष्णो न । 11 महेश्वरेषु महाऽऽढ्येषु रुद्रता न । तस्मात् द्वीपः स्वगुणैः स्वरं स्वर्गमतिशेते ।

[ 57 ] 12 'रम्भाः' कदल्यः अप्सरसश्च ।

13 'नासत्यरूपा' स्ववैद्यरूपा; असत्यरूपा न ।

[ 58 ] 14 'द्विज°' द्विजः चन्द्रमाः । 15 'सूरे' सूर्ये । 16 'ग्रहणप्रसङ्गः' राहोः ग्रसनप्रसङ्गः । 17 'पुराणः पुरुषः' ब्रह्मा । 18 'रमायाः' लक्ष्म्याः स्वपुत्र्या भोक्तेति प्रसिद्धिः ।

[ 59 ] 19 'कलाविलासः' चतुःषष्टिकलानां विलासः वैभवः । 20 'द्विजेशो' ब्राह्मणश्रेष्ठे । 21 'सूरे' सूर्ये, 'शूरे' वीरे ।

22 'निर्दोषसुवृत्तभावः' निर्गतः दोषः यस्मात् स निर्दोषः । सुवृत्तः सुष्ठु वृत्तं चरित्रं यस्य सः सुवृत्तः । निर्दोषश्च सुवृत्तश्च निर्दोषसुवृत्तयोः भावः । 23 'प्रतीपः' प्रतिकूलम् ।

[ 60 ] 24 'राजा' चन्द्रस्तस्य कन्याराशेर्परिभोगत्वात् । 25 'गुरोः' बृहस्पतेः । 26 'प्रभाकरः' सूर्यः ।

क्षमाधराणां गुरुतां प्रपन्नो जनः प्रवृत्तिं भजते सुशीलाम् ।
कलाधरोऽधःकुरुते भवाङ्कं द्वीपे ह्यसौ धार्मिकताऽसधर्मा ॥ ६१ ॥
पराक्रमाऽऽक्रान्तदिगन्तरालौ द्वीपस्य बाहू इव तौ विशालौ ।
शैलाधिराजौ निषधोऽथ नीलः पूर्वापरायामधरौ धरायाम् ॥ ६२ ॥
तन्मध्यगं भाति विदेहवर्षं विचित्ररूपैर्विजयैः सहर्षम् ।
द्वीपश्रियाऽमण्डि दुरोदराङ्कस्तद्व्याजतस्त्वर्द्धितयीजयाय ॥ ६३ ॥
नीलाद्रिणाऽमा निषधाचलेनाऽन्योऽन्यं युयुत्सावशतो व्यतायि ।
स्वं स्वं भुजद्वन्द्वमिवैतदन्ताश्चकासिरे ते किल हस्तिदन्ताः ॥ ६४ ॥
माध्यस्थ्यमास्थाय किमन्तरेऽस्थात् नगाधिराजोऽतिमहान् सुमेरुः ।
नमेरुरूपैः कलितोऽपि चित्रं महात्मनां स्यादयमेव भावः ॥ ६५ ॥
अपारिजातोऽपि सपारिजातस्त्रैलोक्यलक्ष्म्या इव नाभिभूतः ।
युक्तो वनैरप्यवनः सुराणां रराज राजेव स शैलराजः ॥ ६६ ॥
राशिर्मणीनां रमणीयभावं नीतः सुरैः क्रीडनहेतवे किम् ।
गर्त्तीभवंस्तेन जलैरपूरि स भूरिभिर्वारिनिधिप्रतीत्या ॥ ६७ ॥
क्वचित् स्फटिकसानुभिर्धवलभावमुद्भावयन्
क्वचिच्च बहुधातुभिर्बहलशोणिमानं वमन् ।
क्वचिन्मणिमरीचिभिर्धनुरथैन्द्रमुल्लासयन्
करोति सुरयोषितां मनसि मान्मथोद्दीपनम् ॥ ६८ ॥

---

[ ६१ ] १ 'भवाङ्कम्' क्रोधादिपक्षे ईश्वरदेहम् ।
[ ६६ ] २ 'अपारिजातोऽपि' [ अपारीणि बहूनि जातानि समूहाः प्रक्रमात् तरूणां तिरश्चां वा यत्र ] अपगतानि [ रलयोरैक्यत्वात् ] आलिजातानि अनर्थसमूहा यत्र 'आलिः सख्यावली सेत्वनर्थेषु विशदाऽऽशये' इत्यनेकार्थः ।

३ 'अवनः' सुराणां तर्पणम् । 'प्रीणनेऽवनतर्पणे' इति हैमः [ अभि० चिं० कां० ६ श्लो० १३८ ]

---

[ 61 ] 1 'क्षमाधराणाम्' पर्वतानां तपस्विनां च । 2 'कलाधरः' चन्द्रः । 3 'अधःकुरुते' तिरस्कुरुते ।

[ 62 ] 4 'निषधः' 'नीलः' इत्याख्यौ पर्वतौ । 5 'पूर्वापरायाम्' पूर्वायां पश्चिमायां दिशि । 6 'अधरौ' ओष्ठौ ।

[ 63 ] 7 'विदेहवर्षम्' विदेहनामकं क्षेत्रम् । 8 'विजयैः' द्वात्रिंशद्विजयैः ।

9 'अमण्डि' अशोभि । 10 'दुरोदराङ्कः' द्यूतस्य पाशकः । 'दुरोदरं कैतवं च द्यूतमक्षवती पणः' इति हैमः [ अभि० चिं० कां० ३ श्लो० १५० ] ।

[ 64 ] 11–12 'नीलाद्रि'–'निषधाचल'–इति नामकौ पर्वतौ । 13 'युयुत्सा०' योद्धुमिच्छा युयुत्सा । 14 'व्यतायि' व्यस्तारि; 'तायृङ्' सन्तानपालनयोरिति धातोः "दीपजनबुध"–३–४–६७ इत्यनेन हैमसूत्रेण अद्यतन्यां कर्तरि ञिच् वा स्यात् । 15 'भुजद्वन्द्वम्' भुजाद्वन्द्वम् । 16 'चकासिरे' दिदीपिरे । 17 'हस्तिदन्ताः' हस्तिनो दन्ताः अनेन वलयाकृतित्वं द्वीपसमुद्राणामिति ज्ञेयम् ।

[ 65 ] 18 'नमेरुरूपैः' वृक्षविशेषस्वरूपैः ।

[ 67 ] 19 'गर्त्तीभवन्' अगर्तः. गर्तः भवन्निति 'च्विप्रत्यये' गर्त्तीभवन् ।

[ 68 ] 20 'शोणिमानम्' लोहितम् । 21 'मणिमरीचिभिः' मणीनां मरीचयः किरणास्तैः । 22 'धनुरथैन्द्रम्' ऐन्द्रं इन्द्रसम्बन्धि धनुः । अथेत्यव्ययम् । 23 'सुरयोषिताम्' सुरललनानाम् । 24 'मान्मथोद्दीपनम्' मन्मथस्य स्मरस्य भावः मान्मथ्यं तस्योद्दीपनम् ।

इतः शशिकरक्षरत्सलिलचान्द्र[1]सान्द्रच्छटा-
मिलद्घनघटापटुं सृजति नित्यवर्षाऽऽगमम् ।
इतो रविकरैस्तपत्तपनरत्न[2]जाताऽऽतपा-
न्निदाघसमयः[3] शमं नयति जाड्यमेणीदृशाम्[4] ॥ ६९ ॥

इतो विबुधसुन्दरी[5] व्रजति साऽभिलाषं दरीः[6]
प्रियेण सहसा हसन् मनसि मान्मथं बिभ्रती ।
इतोऽनवरतं[7] रतं[8] सपदि कर्तुकामः स्फुरन्
सुरः सुरसभाषितै[9]र्नयति सान्त्वनं कामिनीम्[10] ॥ ७० ॥

इतस्तपति चारणः[11] सकलजन्तुसाधारणः
शमी शमितपातकः क्षपितमोहदुर्घातकः ।
इतोऽर्चनमहोत्सवं रचयतीह देवोऽर्हतां
पटुर्बटुवधू[12]रितो नटति हावभावोद्भटम्[13] ॥ ७१ ॥

गुञ्जन्मञ्जुमृदङ्गजङ्गमरसाऽऽवेशात् समादेशतः
स्वर्नाथस्य सभासु भासुरमणीहारान्विता[14] स्ववधूः ।
नृत्यन्ती जनयत्यनन्यजमहो[15] यूनां मयूनां[16] हृदि
वैराग्यं शमिनामहो विषमता पात्रेतरप्राणिनाम्[17] ॥ ७२ ॥

उच्चैर्योजनलक्षसम्मिततनुः श्रीरत्नसानु[18]र्महान्
मूर्द्धन्यार्हतचैत्यनित्यविलसद्रत्नध्वजान्दोलनात् ।
जम्बूद्वीपमहीपतेर्मणिभुवां कोटीश्वरत्वं[19] जने
किं प्रख्यापयतीव पीवरतरस्वर्णांशुभिर्भास्वरः ॥ ७३ ॥

द्वीपः श्रीपतिनर्मकर्मभवनं[20] निर्दम्भसंरम्भभूः[21]
स्तम्भस्तस्य सुरेन्द्रशैलमिषतो[22] मध्ये बभावुच्छ्रितः ।
भित्तेः सा जगती प्रतीतिमदधाद् धौताम्बुधेर्वीचिभिः
सूर्याचन्द्रमसोर्द्वयी वितनुते दीपक्रियां सर्वतः ॥ ७४ ॥

---

[ 69 ] 1 '°चान्द्र°' चान्द्रं चन्द्रोपलः । 2 '°तपनरत्न°' तपनरत्नं सूर्योपलः । 3 'निदाघसमयः' ग्रीष्मकालः । 4 'एणीदृशाम्' मृगीदृशां मृगनयनानाम् ।

[ 70 ] 5 'विबुधसुन्दरी' देवललना । 6 'दरीः' गुहाः । 7 'अनवरतम्' सततम् । 8 'रतम्' सम्भोगः । 9 'सुरसभाषितैः' सुष्ठु रसो येषु भाषितेषु तैः । 10 'कामिनीम्' कामुकीम् ।

[ 71 ] 11 'चारणः' कुशीलवः, 'चारणस्तु कुशीलवः' इति हैमः [अभि० चिं० कां० २ श्लो० २४३] । 12 'बटुवधूः' माणवकप्रिया । 13 'हावभावोद्भटम्' हावश्च [ स्वचित्तवृत्तिं परत्र जुह्वतीं ददतीं हावयतीति हावो भ्रूतारकादीनां बहुर्विकारः ] भावश्च [ अन्तर्गतवासनात्मतया वर्तमानं रत्याद्यं भावं भावयतीति भावः, अङ्गस्याल्पो विकारः ] इति हावभावौ ताभ्यामुद्भटम् ।

[ 72 ] 14 'भासुरमणीहारान्विता' देदीप्यमानानां मणीनां हारास्तैर्युक्ता । 15 'महः' उत्सवः । 16 'मयूनाम्' किंनराणाम् 'किंनरस्तु किंपुरुषस्तुरङ्गवदनो मयुः' इति हैमः [ अभि० चिं० कां० २ श्लो० १०८ ] । 17 'पात्रेतरप्राणिनाम्' नाट्येऽधिकृतः पात्रं तस्माद्भिन्नानां जीवानाम् ।

[ 73 ] 18 'श्रीरत्नसानुः' लक्ष्मीयुक्तो मेरुः 'अथ मेरुः कर्णिकाचलः रत्नसानुः' इति हैमः [ अभि० चिं० कां० ४ श्लो० ९७–९८ ] । 19 'कोटीश्वरत्वम्' कोट्याधीशत्वम् ।

[ 74 ] 20 'श्रीपतिनर्मकर्मभवनम्' लक्ष्मीपतेः विष्णोर्वा केलिक्रियामन्दिरम् । 21 'निर्दम्भसंरम्भभूः' निर्दोषोद्यमस्य भूमी । 22 'सुरेन्द्रशैलमिषतः' मेरोर्व्याजतः ।

महाहिमाद्रिर्ननु रुक्मिनामा द्वीपे परौ द्वौ सहजाविवागौ ।
दिशोरुदग्दक्षिणयोर्दिदृक्षोरन्तर्जवन्याविव रत्नसानोः ॥ ७५ ॥
तदन्तराले हरिवर्ष-रम्यकक्षेत्रे पुनर्भोगभुवौ प्रतीते ।
कल्पद्रुमाऽऽमोदमिषाद् यशोभिः स्वीयैर्द्युलोकश्रियमाश्रयन्त्यौ ॥ ७६ ॥
लघुर्हिमाद्रिः शिखरी द्वितीयोऽचलावमू तत्परतोऽतितुङ्गौ ।
वार्द्धि तितीर्षू इव पाणिपादं विस्तार्य कार्यं कुरुतः प्रमायाः ॥ ७७ ॥
हैमन्त-हैरण्यकनामधेयं क्षेत्रद्वयी सौख्यमयीव भोगैः ।
यस्या नरैः प्राग्भवदानयोगाद् वश्याः क्रियन्ते त्रिदशा रसाऽऽढ्यैः ॥ ७८ ॥
तथोत्तरस्यां शिखरीन्द्रशैलादैरावतं वर्षमतर्क्यलोकम् ।
यन्नाम रागादिव किं समागात् स्वर्गस्थितिः सूरकलाधराद्यैः ॥ ७९ ॥
वर्षाणि सप्तापि विभज्य शैलैर्निवेशयामास यथाऽर्हवृत्त्या ।
यः सप्तलोकप्रभुतां स्वकीयां प्रख्यापयन् सर्वजने समृद्ध्या ॥ ८० ॥
जम्बूवृक्षसमाश्रयन् निजकुले पत्रावलम्बीव यो
द्वीपाम्भोनिधिवेष्टितो निधिरिव स्वर्णाद्रिसान्द्रच्छविः ।
चक्रीवोत्तमदैवतोत्तरकुरुक्षेत्रद्वयाऽऽभोगवान्
संवासेन महोदयश्रियमयं द्वीपो ददात्वव्ययाम् ॥ ८१ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
जम्बूद्वीपवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

---

[ ७५ ] १ "अन्तर्जवन्याविव रत्नसानोः" इत्यत्र मेरुस्य इति न ताभ्यां तद्व्यवधानमिति विचार्यं दूरस्थत्वात् । कथुना-ऽपि वस्तुना दूरस्थमाच्छाद्यते ॥

---

[ 75 ] 1 'महाहिमाद्रिः' एतन्नामा पर्वतः । 2 'रुक्मि-नामा' 'रुक्मि' इत्याख्यो गिरिः । 3 'सहजौ' भ्रातरौ । 4 'अगौ' पर्वतौ । 5 'जवन्यौ' यवनिके ।

[ 76 ] 6 'हरिवर्ष-रम्यक'–एतन्नाम्नी क्षेत्रे । 7 'कल्प-द्रुमाऽऽमोदमिषाद्' कल्पवृक्षस्य सुरभिव्याजतः ।

[ 77 ] 8 'लघुर्हिमाद्रिः' एतन्नामा पर्वतः । 9 'शिखरी' तन्नामकः पर्वतः । 10 'प्रमायाः' मानस्य ।

[ 78 ] 11 'हैमन्त-हैरण्यकनामधेयम्' 'हैमन्तश्च' 'हैर-ण्यकश्च' इत्येतयोर्नामधेयमभिधानम् ।

[ 79 ] 12 'सूरकलाधराद्यैः' सूर्याचन्द्रमसावादौ येषां तैः ।

# द्वितीयः सर्गः ।

अथास्त्यमुष्मिन् दिशि दक्षिणस्यां हिमाद्रितः श्रीभरताऽऽख्यवर्षम् ।
तच्चारुतां द्रष्टुमिवोडुनेत्रैर्विभाति रात्रौ त्रिदिवं सतर्षम् ॥ १ ॥

सुवर्णमौलिर्हिमवान् नगेन्द्रो यस्योत्तमाङ्गे नृपचिह्नमाभात् ।
रूप्याद्रिरस्याऽऽभरणं बभूव ग्रैवेयकं रत्नमयूखपूर्णम् ॥ २ ॥

†मुक्ताकलापश्रियमस्य धत्ते स्वःसिन्धुसिन्धुद्वितयस्य धारा ।
पयोधिरूपं दधतो दुकूलं वेलाऽनुकूलं नृपतेरिवात्र ॥ ३ ॥

वैताढ्यशृङ्गस्थितचैत्यमूर्द्धध्वजैर्विजेत्रै रजतप्रभाणाम् ।
स्वर्गस्य शोभाजयजन्यमन्तस्तापं व्यपाकर्तुमिवोद्यतो यः ॥ ४ ॥

काश्मीरजार्चिर्निचयैरजस्रं धृताङ्गरागोऽद्भुतकौशलाऽऽढ्यः ।
वहन् सजीवां धनुराकृतिं स राजेव रेजे भरतप्रदेशः ॥ ५ ॥

स्वर्गेऽन्धकारस्य विकारसत्ता स्वर्भाणुकार्ष्ण्याद्नुमीयते ज्ञैः ।
उच्चैः क्षिपन्त्यंशुभरं मणीनां यः सौहृदात् तामिव धिक् चिकीर्षुः ॥ ६ ॥

सुरानुभावान्मदवार्त्तयैव स्वर्गोऽतिशेतां भरतप्रदेशात् ।
न तत्त्वतो यत्र चतुर्दशापि रत्नानि सिन्धोर्मथनाद् धृतानि ॥ ७ ॥

राजा कलङ्की मघवाऽपि गोत्रच्छेदी तथाऽभूद्दृषिदारजारः ।
प्रजापतिः स्वां चकमेऽङ्गजातां स्वर्गेऽमुना किं समतानयेन ॥ ८ ॥

---

[५] १ 'काश्मीर॰' काश्मीरो देशः पक्षे काश्मीरजं कुङ्कुमम् । २ '॰अङ्गरागः' अङ्गरागो विलेपनं पक्षे अङ्गो देशस्तस्य रागः । ३ 'कौशल॰' कौशलं पाण्डित्यं पक्षे कौशलाऽयोध्या ॥

[७] ४ 'सुरा॰' सुराः देवाः मदिरा च ।

---

[1] 1 'उडुनेत्रैः' उडूनि तारका एव नेत्राणि चक्षूंषीति ।

[2] 2 'सुवर्णमौलिः' सुवर्णं मौलौ शिखरे यस्य सः । 3 'उत्तमाङ्गे' मस्तके । 4 'नृपचिह्नम्' मुकुटम् । 5 'ग्रैवेयकम्' ग्रीवाप्रदेशनिविष्टं कण्ठभूषेत्यर्थः । 'ग्रैवेयकं कण्ठभूषा' इति हैमः [ अभि॰ चिं॰ कां॰ ३ श्लो॰ ३२१ ] । 6 'रत्नमयूखपूर्णम्' रत्नानां मयूखैः किरणैः पूर्णम् ॥

[3] † "प्रावारलीलामनुशीलतीव" इति वा पाठः मूलप्रतौ निर्दिष्टम् । 7 'मुक्ताकलापश्रियम्' मुक्तानां कलापः समूहस्तस्य श्रीः शोभा ताम् । 8 'स्वःसिन्धु॰' स्वर्गङ्गा । 9 'दुकूलम्' क्षौमम् "क्षौमं दुकूलं दुगूलं स्याद्" इति हैमः [ अभि॰ चिं॰ कां॰ ३ श्लो॰ ३३३ ] । 10 'वेलानुकूलम्' समयानुकूलं समुद्राम्भसः वृद्धेरनुकूलं वा ।

[4] 11 'वैताढ्यशृङ्ग॰' वैताढ्यो नाम पर्वतस्तस्य शृङ्गं शिखरम् । 12 'विजेत्रैः' विजयनशीलैः । 13 'रजतप्रभाणाम्' सुवर्णप्रभाणाम् । 14 'व्यपाकर्तुम्' दूरीकर्तुम् ।

[5] 15 'निचयैः' समूहैः । 16 'अजस्रम्' नित्यम् । 17 'सजीवाम्' जीवा ज्या तया युक्ताम् । "इच्छावगाहोनावगाहाभ्यस्तस्य विष्कम्भस्य चतुर्गुणस्य यन्मूलं सा मण्डलक्षेत्रस्य जीवा भवति" । 18 'धनुः' इषुः । "ज्याविष्कम्भयोर्वर्गविशेषमूलं विष्कम्भाच्छोध्यं शेषार्धमिषुः भवति" ।

[6] 19 'ज्ञैः' पण्डितैः । 20 'अंशुभरम्' किरणसमूहम् । 21 'ताम्' अन्धकारस्य विकारसत्ताम् । 22 'चिकीर्षुः' कर्तुमिच्छुः 'कृ'धातोः सनन्तत्वाद् कृतो उप्रत्ययः ।

[7] 23 'सुरानुभावात्' देवानां सुराया वा प्रभावात् । 24 'मदवार्त्तया' गर्वप्रवृत्त्या ।

[8] 25 'राजा' चन्द्रः । 26 'मघवा' इन्द्रः । 27 'गोत्रच्छेदी' गोत्रं पर्वतं छिनत्ति भिनत्तीति । 28 'ऋषिदारजारः' विश्वामित्रो मेनकायां जारतया कामुकत्वेन प्रवृत्त इति प्रसिद्धेः । 29 'प्रजापतिः' ब्रह्मा । 30 'चकमे' 'कमूङ् कान्तौ'—कान्तिरभिलाषस्तस्य परोक्षकालस्य रूपम् । 31 'अङ्गजाताम्' पुत्रीं लक्ष्मीम् । 32 'समतानयेन' साम्यनीत्या ।

स्वर्गस्य नाथा बलिनो महेन्द्रमुख्या जितास्तेऽपि पुराऽसुराद्यैः[1] ।
अमुष्य[2] राजा किल चक्रवर्ती सुरासुरैरप्यहतप्रभावः ॥ ९ ॥
[3]गङ्गाप्रसङ्गाल्लभतां कथञ्चित् स्वर्गोऽस्य साम्यं न तथाऽपि सम्यक् ।
सिन्धुप्रबन्धव्यतिरेकतस्तत् स्पर्द्धा[4]ऽर्द्धरूपैव विवर्द्धनीया ॥ १० ॥
द्वात्रिंशदस्मिन् [5]वरसन्निवेशा देशाः सहस्राणि सुराऽऽलयाद् ये ।
लक्षा [6]विमाना अपि नाधिकत्वं योगान्नराणामुत ! [7]किं नराणाम् ॥ ११ ॥
न भूमिभागे भरतस्य रोगा भोगाश्च [8]साऽऽभोगतया रसाढ्याः ।
स्वर्गे [9]नभोगा वपुषोऽनुयोगात् सविक्रियास्ते[10]ऽनिमिषत्ववृत्त्या ॥ १२ ॥
[11]षड्भूमिदेशा भरतप्रदेशे स्वर्गे पुनः द्वादशधा प्रयोगः ।
[12]सत्पुण्यनैपुण्यवशान्न जेयो [13]द्वाभ्यामथैकोऽपि च देशलेशः ॥ १३ ॥
ध्रुवस्थलं किञ्चन देवलोके तत्रापि मेरोः सविधानुभावः ।
सप्तैव तस्मिन् ऋषयोऽथ तेऽपि [14]सारुन्धतीकाः [15]प्रगटव्यलीकाः ॥ १४ ॥
तीर्थेश्वराश्चक्रभृतो [16]बलाद्या आर्यान्यकार्याय कृतावताराः ।
सहस्रशः [17]सर्वबुधो मुनीन्द्राः स्वर्गेऽस्य साम्यं न जडेन काम्यम् ॥ १५ ॥
नैकेन जेयो भरतप्रदेशः स्वर्गेण युग्मे च मिथोऽनुबद्धे ।
मुख्ये तथान्त्ये विबुधाऽऽलयानां मध्ये [18]तदेकत्वमभीतिभावात् ॥ १६ ॥
द्वयोर्द्वयो[19]स्ताविषयोश्च सारमादाय धाता विदधेंऽशषट्कम् ।
क्षेत्रस्य नूनं भरतस्य तस्मात् स्वःसङ्ख्यया षो[20]डशता न युक्ता ॥ १७ ॥

---

[१६] १ 'मिथोऽनुबद्धे युग्मे' मुख्ये युग्मेऽनुबद्धेऽन्त्ये युग्मेऽप्यनुबद्धे मध्ये, एक एकः स्वर्गः ।

---

[9] 1 'असुराद्यैः' तारकाद्यसुरैः । 2 'अमुष्य' भारतवर्षस्य ।

[10] 3 'गङ्गाप्रसङ्गात्' भरतप्रदेशे यथा गङ्गा वरीवर्ति तथैव स्वर्गेऽपि गङ्गा वर्तते । 4 'स्पर्द्धाऽर्धरूपैव' अर्धरूपैव सा स्पर्द्धा न पूर्णेत्यर्थः ।

[11] 5 'वरसन्निवेशाः' श्रेष्ठसंस्थानानि । 6 'विमानाः' वायुयाना विगतमाना वा सरलाश्चेत्यर्थः । 7 'किं नराणाम्' किन्नराणां कुत्सितपुरुषाणां वा ।

[12] 8 'साभोगतया' ज्ञानयुक्तया विस्तारेण सहितया वा । 9 'नभोगाः' देवाः, भोगाः नेत्यर्थोऽपि । 10 'अनिमिषत्ववृत्त्या' न निमिषति लोचनेऽनिमिषस्तस्य भावः ।

[13] 11 'षड्भूमिदेशाः'—"भरतवंशस्य योजनानां चतुर्दश सहस्राणि चत्वारि शतानि च षड्भागा विशेषोना ज्या वर्तते, तेन तस्य षद् भागाः वर्तन्ते" । 12 'सत्पुण्यनैपुण्यवशात्' सौख्यातिरेकाच्च तत्पुण्यकौशलमधिगन्तुं शक्ताः । यथोक्तम्—"देवानां कृच्छ्रावासविषयसुखलवाऽऽस्वादापहृतचेतसामनवाप्तगुरूदितश्रवणानां केषाञ्चिच्च कथञ्चिद्दितश्रवणसंभवेऽप्यवश्यभोगकर्माधीनत्वादकर्मभूमित्वाच्च विरत्यभावस्तेन भरतप्रदेशो न जेयः" । 13 'द्वाभ्याम्' द्वाभ्यां स्वर्गाभ्यामेको भागोऽपि न जेयः ।

[14] 14 'सारुन्धतीकाः' वशिष्ठपत्नी अरुन्धत्यासहिताः । 15 'प्रगटव्यलीकाः' व्यक्तदोषास्तेषां स्त्रीपरिग्रहत्वात् ।

[15] 16 'बलाद्याः' बलभद्रादयः । 17 'सर्वबुधः' सर्वं बोधन्तीति ।

[16] 18 'तदेकत्वमभीतिभावात्' भरतप्रदेशस्य वीरताऽऽदिगुणप्रकर्षेण तस्यैकत्वं भयाभावात् । स्वर्गश्च तावद् भयान्वितत्वेन मिथोऽनुबद्धः ।

[17] 19 'ताविषयोः' स्वर्गयोः । 20 'षोडशता' अत्र दिगम्बराणां प्रत्याक्षेपो यत् तैरभिमता स्वर्गाणां षोडशता न युक्ता । सा चेयम्—"सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च" इति तत्त्वार्थराजवार्तिकम् [ अ० ४ सू० १९ ] ।

[1]सौधर्मरूपं [2]श्रमणाऽऽश्रमेषु आढ्यास्तथे[3]शानदशा रसाऽऽढ्याः ।
स्याद् [4]ब्रह्मभूयं [5]सुरतोपशान्ते [6]सदानत-प्राणतता [7]विनेये ॥ १८ ॥

[8]महेन्द्रलक्ष्मीर्[9]धरणीधवेषु [10]सनत्कुमाराः पवनाधिकाराः ।
चक्रे [11]सहस्रारविधिश्च [12]शुक्राधिकत्वमङ्के [13]रसिकासुभाजाम् ॥ १९ ॥

ऐश्वर्यलक्ष्मी-धन-धर्म-कीर्त्ति-प्रज्ञा-प्रभा-वैभव-दर्शनेषु ।
परिस्फुरत्य[14]च्युतता प्रजानामस्मिँस्ततः किं दिवि[15] वस्तु [16]शिष्टम् ॥ २० ॥

त्रिभिर्विशेषकम् ॥

[17]खानिः सुखानां विषयोन्मुखानां सुलोचनौ[18]दारिकदेहवृत्त्या ।
न साधुलोकेऽथ सुखं न किञ्चिद् येनोपमेयो भरतप्रदेशः ॥ २१ ॥

एको गुरुः पाठयिता न नव्यं शास्त्रं कुतस्तद् दिवि बोधवृद्धिः ।
नाम्ना न तत्त्वाद् विबुधाः सुधाशा यल्ले[19]खशालाजुष एव नित्यम् ॥ २२ ॥

यस्मिन्ननेके गुरवो विवेके प्रत्याश्रमं सातिशया नयार्थम् ।
विधाय शास्त्राणि नवानि बालानध्यापयन्ति [20]भरतेऽतिदक्षाः ॥ २३ ॥

धनैर्न धर्मैर्न गुणैर्न बोधैः स्वर्गाधिकः स्याद् भरतात् ततोऽद्धः ।
शङ्के [21]शशाङ्कार्कमुखैः प्रकाश्यं वर्षान्महेन्द्रो भजतीव वर्षम् ॥ २४ ॥

तस्मिँस्[22]तृतीयारकदेश्यकाले मुख्योऽर्हतां श्रीवृषभो बभूव ।
[23]धर्म्यस्थितीनां [24]जनजीविकानां कर्त्ताऽपहर्त्ता युगलस्थितीनाम् ॥ २५ ॥

कल्पद्रुमाणां परिणामसारैरभीष्टकारैस्समहोपकारैः ।
सम्भूय भूयः सुखसम्पदर्थं प्रादुष्कृतो दुष्कृतकृन्तनाय ॥ २६ ॥

---

[ 18 ] 1 'सौधर्मरूपम्' सुष्ठु धर्मस्तस्य भावः सौधर्मस्तस्य रूपम् । प्रथमदेवलोकश्च । 2 'श्रमणाऽऽश्रमेषु' साधूनां वसतिगृहेषु 3 'ईशानदशाः' इन्द्ररूपाः । द्वितीयदेवलोकश्च । 4 'ब्रह्मभूयम्' ब्रह्मणो भवनं ब्रह्मभूयं ब्राह्मणैकत्वं मोक्ष इत्यर्थः । पञ्चमदेवलोकश्च । 5 'सुरतोपशान्ते' संभोगोपरते सति । 6 सदानत-प्राणतता' सुष्ठुरीत्या-आनतता समन्तान्नमनक्रिया, प्राणतता प्रकर्षेणाऽऽनमनक्रिया च । नवम-दशमस्वर्गश्च । 7 'विनेये' शिष्ये ।

[ 19 ] 8 'महेन्द्रलक्ष्मीः' महाँश्चासाविन्द्रश्च महेन्द्रस्तस्य लक्ष्मीः ऋद्धिः । चतुर्थस्वर्गः । 9 'धरणीधवेषु' राजसु । 10 'सनत्कुमाराः' सनन्तो भक्तिमन्तः कुमाराः । सनत्कुमारचक्रवर्त्याख्या वा । तृतीयदेवलोकश्च । 11 'सहस्रारविधिः' सहस्रप्रकारेण मङ्गलविधिः । अष्टमस्वर्गश्च । 12 'शुक्राधिकत्वम्' बलाधिकत्वम् । सप्तमस्वर्गः । 13 'रसिकासुभाजाम्' रसिकप्राणभृताम् ।

[ 20 ] 14 'अच्युतता' न च्यवत इत्यच्युतस्तस्य भावः । द्वादशदेवलोकश्च । 15 'दिवि' स्वर्गे । 16 'शिष्टम्' "एषु त्रिषु श्लोकेषु द्वादशदेवलोकानां केवलं नामरूपत्वमस्तीति निर्दिष्टं, न गुणभाक्त्वम् । देवलोकानां नामानुरूपं गुणत्वं तु भरतप्रदेशे एव दृश्यते तस्मात् तेषु स्वर्गेषु न किञ्चिद्वैशिष्ट्यं भरतप्रदेशात्" ।

[ 21 ] 17 'खानिः' आकरः । "स्यादाकरः खनिः खानिर्गञ्जा" इति हैमः [ अभि० चिं० कां० ४ श्लो० १०२ ] । 18 'औदारिकदेहवृत्त्या' औदारिकशरीरप्रकारेण । यथोक्तम्—"औदारिकम्—उदारं बृहदसारं यद् द्रव्यं तन्निर्वृतमौदारिकमसारस्थूलद्रव्यवर्गणासमारब्धमौदारिकप्रायोग्यपुद्गलग्रहणकारणपुद्गलविपाक्योदारिकशरीरनामकर्मोदयनिष्पन्नम्" ।

[ 22 ] 19 'लेखशाला०' स्वर्गः कुमारकपाठस्थानञ्च ।

[ 23 ] 20 'भरते' क्रीडाविशेषे क्षेत्रे वाऽतिदक्षाः ।

[ 24 ] 21 'शशाङ्कार्कमुखैः' चन्द्र-सूर्यप्रमुखैः ।

[ 25 ] 22 'तृतीयाऽऽरक०' 'सुषमा' नामकमारकम् । "तिस्रः कोटिकोट्यः सागरोपमाणां सुषमा" । 23 'धर्म्यस्थितीनाम्' धर्मानुकूलरीतीनाम् । 24 'जनजीविकानाम्' मनुष्याणामाजीविका इति जनजीविकास्तेषाम् ।

कौमारके विंशतिलक्षपूर्वाण्यतीत्य जाते जनकौशलार्थे ।
राज्येऽभ्यषेचि त्रिदशाधिपेन[1] श्रीकौशलायां पुरि पौरहर्षात्[2] ॥ २७ ॥

त्रिषष्टिलक्षानतिगम्य राज्ये पूर्वाणि लोकान्तिकदेववाचा[3] ।
स्वयं प्रबुद्धोऽपि विशिष्य दीक्षां जिघृक्षुरासीद् बहुदानवर्षी ॥ २८ ॥

राज्यं परित्यज्य नृणां हिताय प्रव्रज्य संवत्सरदानयुक्त्या[4] ।
तपोऽपि सांवत्सरमेव तप्यन् श्रेयांसतः[5] पारणमप्यकार्षीत् ॥ २९ ॥

सहस्रवर्षाणि पुनस्तपांसि छद्मस्थभावे विविधानि तत्वा ।
कैवल्यकेलिं कलयाञ्चकार[6] न्यग्रोधमूले[7] स युगादिदेवः ॥ ३० ॥

विशालसालत्रितयादि[8]नीत्याऽस्याः स्थानभूमी रचिता सुरेन्द्रैः ।
अध्यास्य[9] यामाद्यविभुर्विरेजे[10] पूर्वाद्रिमूर्ध्नीव सहस्रभानुः ॥ ३१ ॥

तीर्थं व्यवस्थाप्य सभासदां स प्रबोधदानाय दिदेश धर्मम् ।
संसारवार्धौ निपतज्जनानामालम्बदायी स्वविलम्बनेन ॥ ३२ ॥

व्याख्यातुरीशस्य[11] मुखामृतांशोर्ज्योत्स्नेव[12] साक्षात् प्रकटीबभूव ।
प्रक्षालयन्ती जनमानसान्तस्तमः समग्रं दशनाऽऽलिदीप्तिः[13] ॥ ३३ ॥

ध्यानं मनोऽन्तस्थितमस्य शुक्लं प्रवर्द्धमानं बहिरुज्जगार ।
रागं पराकर्त्तुमिवोष्ठभागे निलीन[14]मुच्चैर्दशनांशुदम्भात्[15] ॥ ३४ ॥

पदाक्षरव्यक्ततयैव[16] वाचां प्रचारणेऽस्य द्विजराजकान्तिः[17] ।
बभौ विभोरुज्ज्वलवाससा गौः[18] प्रादुर्भवन्तीव मुखारविन्दे ॥ ३५ ॥

यन्मृष्टताऽभूद्[19] वचसां जिनस्य द्वेधाऽपि तापापनया[20] त्रिलोक्याः ।
शङ्के ततोऽसौ[21] वसुधाऽवतीर्णा सुधाऽभिधावद्[22] दशनांशुरूपा ॥ ३६ ॥

मांसे समांशेऽब्दसृजि[23] प्रसक्ता दुग्धं परं मुग्धमपास्य कान्तिः ।
भदन्तदन्ताऽऽवलिरश्मिरूपात् तदा मदादेव विनिर्जगाम ॥ ३७ ॥

---

[27] 1 'त्रिदशाधिपेन' इन्द्रेण । 2 'पौरहर्षात्' नागरजनानामानन्दात् ।

[28] 3 "लोकान्तिदेववाचा' लोकान्तिकाः देवास्तेषां वाण्या लोकान्तिकदेवानां तथैवाऽऽचारत्वात् । यथोक्तम्—"लोकान्तिकदेवाः किल भक्तिप्रवणीकृतचेतसः सर्वदा जिनेन्द्रजन्मादिप्रलोकनपराः शुभाध्यवसायप्रायाः वरीवर्तन्ते" ।

[29] 4 'संवत्सरदानयुक्त्या' वार्षिकदानसहितया । 5 'श्रेयांसतः' श्रेयांसनामककाष्ठभारवाहिपुरुषात् क्षीरान्नमादाय पारणमकृत इति श्रुतिः ।

[30] 6 'कल्याञ्चकार' समधिगतवान् । 7 'न्यग्रोधमूले' वटवृक्षस्याधोभागे ।

[31] 8 'विशालसाल॰' दीर्घप्राकाराः "समवसरणे देवाः रत्न-सुवर्ण-रूप्यमयं प्राकारत्रयं रचयन्ति" । 9 'अध्यास्य' उपविश्य । 10 'याम्' स्थानभूमिं समवसरणस्थितनिर्मलं स्फटिकमयं सिंहासनं तद्रूपाम् ।



[33] 11 'व्याख्यातुः' देशनादातुः । 12 'मुखामृतांशोः' मुखचन्द्रस्य । 13 'दशनाऽऽलिदीप्तिः' दन्तसमूहानां कान्तिः ।

[34] 14 'निलीनम्' प्रच्छन्नम् । 15 'दशनांशुदम्भात्' दन्तकिरणकपटात् ।

[35] 16 'पदाक्षरव्यक्ततयैव' पदानि-अक्षराणि च पदाक्षराणि तयोः व्यक्तता प्राकट्यं तेन । 17 'द्विजराजकान्तिः' चन्द्रदीप्तिः । 18 'गौः' वाणी ।

[36] 19 'यन्मृष्टता' यच्छुद्धता । 20 'तापापनया' संतापं कष्टं दूरीकरणेन । 21 'असौ' वाणीशुद्धता । 22 'सुधाऽभिधावत्' अमृतनामवत् ।

[37] 23 'अब्दसृजि' मेघसृजि ।

अङ्गानुषङ्गादिव जातरङ्गा गङ्गाऽप्यभङ्गा विलसत्तरङ्गा ।
[1]आप्लावयन्ती [2]निरियाय [3]भव्याँस्तदा [4]रदांशूपधिना जिनस्य ॥ ३८ ॥
सरस्वतीयं रदनच्छदांशुर्जटा घटाया रुचिर[5]र्कपुत्री ।
[6]मन्दाकिनीह द्विजराजकान्तिर्व्याजाद् विरेजेऽत्र तत[7]स्त्रिवेणी ॥ ३९ ॥
यदुज्ज्वलत्वं दशनांशुजाले मुखारविन्दे रुरुचे विशाले ।
[8]प्रालेयरश्मेरपि विस्मयाय श्रियं जिगीषोर्दिनमात्रमेकम् ॥ ४० ॥
ववर्ष हर्षाद् दशनांशुनीरैः सोत्साहमर्हन् [8]जलवाह एषः ।
[9]रसेन तस्माज्जनमानसानि [10]प्रपूर्य [11]सन्ताप[12]मपाचकार ॥ ४१ ॥
यः स्पर्द्धनोऽभून्महसा शशाङ्कः साङ्कस्तु पूर्णो दिनमात्रमेत्य ।
मुखाम्बुजं तज्जयमा[13]शशंस जैनं सदैव द्विजराजिदीप्त्या ॥ ४२ ॥
[14]द्विजाधिपः किं द्विजमात्रकान्त्या [15]विनिर्जितः [16]खं त्रपयोत्पपात ।
तदत्र जैनस्थितिरेव हेतुरहो ! महोत्साहदशाऽऽश्रयेण ॥ ४३ ॥
[17]दोषाकरो[18]ऽश्नन्नजमीनराशिमुद्योतते यद् द्विजनायकः खे ।
तत्कारणं श्रीजिनवक्त्रपद्मसेवा द्विजानां [19]प्रसृतांशुकानाम् ॥ ४४ ॥
[20]वागदिव्यसिन्धोः सहसा रसान्तर्नि[21]मज्ज्य सुस्नातचरी द्विजाऽऽली ।
[22]जलाञ्जलीनातनुते जपान्ते धारा [23]तदीयांशुमिषात् ससार ॥ ४५ ॥
[24]उत्फुल्लमल्लीवनसौरभाणि श्वासो जिनानां जयतीत्यभाणि ।
पुरातनैस्तद्द्विजकान्तिदम्भात् [25]कर्पूरपूरः पुरतो लुलोठ ॥ ४६ ॥
[26]ब्राह्मी* [27]जिनाऽऽस्याम्बुरुहप्रदेशाद् विनिर्गमे संभ्रमतो निपेतुः ।
मुक्तालताया इव मौक्तिकानि [28]व्याकीर्यमाणद्विजरश्मिदम्भात् ॥ ४७ ॥
[29]यदास्यदास्यं भजते [30]कलाभृत् तीर्थेशितुस्तद्रुचयस्तदीयाः ।
द्विजांशुदम्भादिव शश्वदेव स्फुरन्ति नूनं परितो मुखाब्जम् ॥ ४८ ॥

[ 38 ] 1 'आप्लावयन्ती' स्नापयन्ती । 2 'निरियाय' निर्जगाम । 3 'भव्यान्' मोक्षगमनयोग्यपुरुषान् । 4 'रदांशूपाधिना' दन्तकिरणोपाधिना ।

[ 39 ] 5 'अर्कपुत्री' सूर्यपुत्री । 6 'मन्दाकिनी' गङ्गा । 7 'त्रिवेणी' गङ्गा ।

[ 40 ] 8 'प्रालेयरश्मेः' हिमरश्मेः चन्द्रस्येत्यर्थः ।

[ 41 ] 8 'जलवाहः' मेघः । 9 'रसेन' धर्मदेशनारूपवारिणा । 10 'प्रपूर्य' संभृत्य । 11 'सन्तापम्' कष्टम् । 12 'अपाचकार' दूरीकृतः ।

[ 42 ] 13 'आशशंस' कथयामास ।

[ 43 ] 14 'द्विजाधिपः' चन्द्रमाः । 15 'विनिर्जितः' पराजितः । 16 'खं त्रपयोत्पपात' स्वर्गं लज्जयोदडयत् ।

[ 44 ] 17 'दोषाकरः' चन्द्रमाः । 18 'अश्नन्' भक्षयन् । 19 'प्रसृतांशुकानाम्' विकसितकिरणानाम् ।

[ 45 ] 20 'वागदिव्यसिन्धोः' वाणीरूपदिव्यनद्याः । 21 'निमज्य' ब्रुडित्वा । 22 'जलाञ्जलीनातनुते' जलेन संभृतान् अञ्जलीन् प्रकरोति । 23 'तदीयांशुमिषात्' प्रभोः वाणीकिरणव्याजात् ।

[ 46 ] 24 'उत्फुल्लमल्लीवनसौरभाणि' उत्फुल्लं विकसितं मल्ली विचकिलपुष्पविशेषस्तस्य वनमुद्यानं तस्य सौरभाणि सौगन्ध्यानि । "अब्ज [ मल्लिका ] गन्धः श्वासः तीर्थंकराणामतिशयविशेषः" । 25 'कर्पूरपूरः' घनसारसमूहः ।

[ 47 ] 26 'ब्राह्मी' वाणी । 27 'जिनाऽऽस्याम्बुरुहप्रदेशात्' जिनेश्वरस्य मुखकमलप्रदेशात् । 28 'व्याकीर्यमाणद्विजरश्मिदम्भात्' विक्षिप्ताश्चन्द्रकिरणास्तेषां व्याजात् ।

[ 48 ] 29 'यदास्यदास्यम्' यस्य प्रभोः मुखसेवकत्वम् । 30 'कलाभृत्' चन्द्रः ।

* ब्राह्मया ।

वितीर्यमाणे[1] किल बोधिदाने[2] जिनेन तुर्याण्यभिनेदुरुच्चैः[3] ।
तत्राभवत् किं सुमनोऽभिवृष्टिः[4] प्रसूत्वरैर्दन्तरुचां प्रचारैः ॥ ४९ ॥
जिनस्य दिव्यध्वनिनो[5]ऽर्जितेन[6] ज्ञानार्णवः[7] पूर्णतया जगर्ज ।
पीयूषमा[8]विर्भवति[9] स्म तस्माद् द्विजन्मराजीरुचिकैतवेन[10] ॥ ५० ॥
अस्पष्टवर्णत्वमुशन्ति[11] चान्ये जिनेन्द्रवाचस्तदिदं विनेतुम्[12] ।
वर्णा रदांशूज्ज्वलवर्णवेषमाधाय वक्त्राम्बुरुहान्निरीयुः ॥ ५१ ॥
शब्दे गुणत्वं[13] ह्यपरे दिशन्ति तद्प्रमाणं द्विजकान्तिदम्भात् ।
यन्निःसरन्नेव[14] जिनस्य शब्दः प्रोज्जृम्भते[15]ऽत्युज्ज्वलवर्ण एव ॥ ५२ ॥
सुरासुराद्यान् प्रतिबोधयन्[16] स क्ष्मापीठपावित्र्यविधित्सयैव[17] ।
मिथ्यामतध्वान्त[18]मपास्य[19] सर्वं भास्वानिवोर्वी विजहार लोके ॥ ५३ ॥
विहृत्य चैवं किल पूर्वलक्षं धर्मं स्थिरीकृत्य सभासमक्षम् ।
कैलासशैलेऽनशनेन मोक्षं स प्राप्य भेजे तदनन्तसौख्यम् ॥ ५४ ॥
श्रीचक्रवर्ती भरताभिधानस्तदङ्गजन्मा[20] महसा प्रधानः ।
बभूविवान् दिग्विजयी नयीश[21]स्तदाख्यया वर्षमिदं सहर्षम् ॥ ५५ ॥
क्रमेण तुर्याऽऽरकसंप्रवृत्तौ[22] जज्ञे चतुर्विंशतिरर्हतां सा[23] ।
यस्याः स्मृतेर्ध्यानविधानतो वा जागर्ति लोकस्य महोदयश्रीः ॥ ५६ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
श्रीभरतवर्णनो नाम द्वितीयः सर्गः ॥

---

[ 49 ] 1 'वितीर्यमाणे' ददति । 2 'बोधिदाने' सम्यग्दर्शनप्रदाने । 3 'तुर्याणि' वाजित्राणि । "दुन्दुभिनाद उच्चैर्भुवनव्यापी स्यादिति तीर्थंकराणामतिशयविशेषः" । 4 'सुमनोऽभिवृष्टिः' पुष्पाणां वर्षा । "बहुवर्णपुष्पवृष्टिरपि तीर्थंकराणामतिशयविशेषः" ।

[ 50 ] 5 'दिव्यध्वनिनः' पञ्चत्रिंशद्वाचां गुणैर्युक्तस्य शब्दस्य । 6 'अर्जितेन' उत्पादितेन । 7 'ज्ञानार्णवः' ज्ञानसमुद्रः । "अनेन प्रभोः ज्ञानातिशयो व्यज्यते" । 8 'पीयूषम्' अमृतम् । 9 'आविर्भवति' उद्भवति । 10 'द्विजन्मराजीरुचिकैतवेन' दन्तसमूहकिरणव्याजेन ।

[ 51 ] 11 'उशन्ति' इच्छन्ति 'वशक् कान्तौ' इति धातोः वर्तमानकालस्य "वशेरयङि" ४–१–८३ इति सिद्धहेमसूत्रेण य्वृति रूपम् । 12 'विनेतुम्' देष्टुम् ।

[ 52 ] 13 'शब्दे गुणत्वम्' 'शब्दगुणकमाकाशम्' इति नैयायिका मन्वते । 14 'यन्निःसरन्' यस्मात् मुखान्निःसरन् बहिर्गच्छन् । 15 'प्रोज्जृम्भते' प्रकाशते ।

[ 53 ] 16 'प्रतिबोधयन्' उपदिशन् । 17 'क्ष्मापीठपावित्र्यविधित्सया' पृथ्वीतलस्य पवित्रतां विधातुमिच्छया । 18 'मिथ्यामतध्वान्तम्' मिथ्यादृष्टीनां मतरूपमन्धकारम् । 19 'अपास्य' निराकृत्य ।

[55] 20 'तदङ्गजन्मा' तस्य ऋषभदेवस्य पुत्रः । 21 'नयीशः' न्यायकर्तॄणां स्वामी ।

[ 56 ] 22 'तुर्याऽऽरक-संप्रवृत्तौ' चतुर्थाऽऽरकाऽऽरम्भे । 23 'सा' महोदयश्रीः ।

# तृतीयः सर्गः ।

श्रीवर्द्धमानभगवान्[1]उदियाय साक्षाद् विश्वोपकारकरणे करणे[१] नियोगी[2] ।
प्राच्यार्हतां[3] समुदितै[4]र्मुदितैर्महोभिर्यो जातरूप[5] इव निर्जितजातरूपः[6] ॥ १ ॥
उन्निद्रभक्तिभि[7]रुपेन्द्रयुतैर्महेन्द्रैः सर्वैः सुपर्वकृतपर्वणि[8] पर्वतेशे[9] ।
क्षीराम्बुधेर्मधुरवारिभिरभ्यषेचि मेरौ जिनः प्रसवजातमहोत्सवाहे[10] ॥ २ ॥
लोकेश-केशव-महेश-सुरेशमुख्यैः[11] शिष्यैरिवाप्तविनयैरभिनूयमानः ।
साचीकृतानन[12]शचीजनपीयमानस्नात्रेण तेन विधिना भगवान् स रेजे ॥ ३ ॥
वादित्रचित्ररववैभवपूर्णलोकं लोकम्पृणं[13] तदनृणं सघृणं[14] जनानाम् ।
दिष्ट्या[15] दिनं सकलजन्तुहितं बभूव भूवल्लभस्य बहुदुर्लभपुत्रसूत्या ॥ ४ ॥
सिद्धार्थपार्थिव[16]कुलाम्बरभानुमाली ज्ञातान्ववायजलधौ[17] कलधौतवर्णः[18] ।
चन्द्रायते[19] स्म महसामतिशायिवृत्त्या धुन्वन् द्विधापि रिपुचक्रमनुक्रमेण ॥ ५ ॥
क्रीडारसेन विलसन् विलसत्स्वरूपं वैतालभाव[20]मनुनीय[21] सुरेण देवः ।
संत्रासितो[22]ऽपि न मनाग् भयमाससाद तेनाभवद् विभवसम्भवि वीरनामा ॥ ६ ॥
बाल्यं व्यतीत्य वयसा जयशालिरूपं बिभ्रन्मनोभवनवस्मयहारि[23] हारि ।
द्वेधापि दारपरिकर्म[24]पराङ्मुखोऽपि चक्रे करग्रहमहं[25] स्वजनानुवृत्त्या ॥ ७ ॥
मत्वा विषेण तुलितान् विषयानसारानाराद्पारभवदुःखपरम्परायाः ।
दीक्षां जिघृक्षुरपि मङ्क्षु सुरैर्न्यबोधि लोकान्तिकैर्जयजयारवमीरयद्भिः[26] ॥ ८ ॥
सांवत्सरं वितरणं[27] तरणं भवाब्धेर्दत्वाऽऽददे विरमणं[28] रमणं शिवान्तः ।
त्यक्त्वाऽऽश्रवान्[29] स भगवान् विजहार भूम्यां सम्यक् तृणे मणिगणे समतां दधानः ॥ ९ ॥

---

[ १ ] १ 'करणे' अधिकाराऽऽस्पदे ।

---

[ 1 ] 1 'उदियाय' आविर्बभूव । "प्रभोः वीरस्य जन्म विक्रमार्कात् पूर्वं चतुःशतसप्ततितमे [ ४७० ] वर्षेऽभूदिति विद्वज्जनसम्मतम् । 2 'नियोगी' कर्मसचिवः । "नियोगी कर्मसचिव आयुक्तो व्यापृतश्च सः" इति हैमः [ अभि० चिं० कां० ३ श्लो० ३८३ ] । 3 'प्राच्यार्हताम्' पूर्वतीर्थकृतां ऋषभादिपार्श्वपर्यन्तानाम् । 4 'समुदितैः' समुत्पन्नैः । 5 'जातरूपः' जातं रूपमस्य जातरूपमकृतस्वरूपं सुद्रीदेशजं सुवर्ण्णं वीरस्य सुवर्णवर्णत्वात् । 6 'निर्जितजातरूपः' पराजितः कामदेवो येन सः ।

[ 2 ] 7 'उन्निद्रभक्तिभिः' जागरूकसेवाभिः' । 8 'सुपर्वकृतपर्वणि' देवकृतपर्वणि । 9 'पर्वतेशे' श्रेष्ठपर्वते मेरावित्यर्थः । 10 'प्रसवजातमहोत्सवाहे' जन्मकृतमहोत्सवदिवसे ।

[ 3 ] 11 'लोकेश-केशव-महेश-सुरेशमुख्यैः' लोकेशः राजा, केशवः कृष्णः, महेशः महादेवः, सुरेशः इन्द्रः-तेषां मुख्यैः प्रधानैः । 12 'साचीकृतानन०' तियक्कृतं मुखं येन । 'तिर्यगर्थे तिरः साचि" इति हैमः [ अभि० चिं० कां० ६ श्लो० १७० ] यथा-"साचि लोचनयुगं रमयन्ती" ।

[ 4 ] 13 'लोकम्पृणम्' लोकान् प्रीणाति, आनन्दयतीति तम् । 14 'सघृणम्' करुणायुक्तम् । 15 'दिष्ट्या' सम्मदेन । 'दिष्ट्या सम्मदे' इति हैमः [ अभि० चिं० कां० ६ श्लो० १६४ ]

[ 5 ] 16 'सिद्धार्थपार्थिव०' सिद्धार्थनामा नृपः वीरस्य पिता । 17 'ज्ञातान्ववायजलधौ' ज्ञातनामकवंशसमुद्रे 'वंशोऽन्वयोऽन्ववायः' इति धनञ्जयः [ श्लो० १२५ ] । 18 'कलधौतवर्ण्णः' सुवर्णवर्णः 'तपनीयं कलधौतम्' इति धनञ्जयः [ श्लो० १४ ] । 19 'चन्द्रायते' चन्द्रमिवाचरतीति ।

[ 6 ] 20 'वैतालभावम्' वैतालिकस्वरूपं उच्चैः तालवृक्षमिव स्वरूपं । 21 'अनुनीय' कृत्वा । 22 'संत्रासितः' भापयमानः ।

[ 7 ] 23 मनोभवनवस्मयहारि' कामदेवस्य नवीनो यः स्मयस्तं हरत इति । 24 'दारपरिकर्म°' पत्नीपरिग्रहः । 25 'करग्रहमहम्' विवाहोत्सवम् ।

[ 8 ] 26 'ईरयद्भिः' कुर्वद्भिः ।

[ 9 ] 27 'वितरणम्' दानम् । 28 'विरमणम्' हिंसादि-पञ्चकषायेभ्यः विरमणं विरतिः । 29 'आश्रवान्' आस्रवन्ति कर्माणि यैः द्विचत्वारिंशत्प्रकारैः तान् ।

सोढुं परीषहगणानुपसर्गवर्गैर[1]क्षोभ एव सहसा स य[2]थार्थनामा ।
तीव्रैस्तपोभिर[3]वधूतवधूविलासः कक्षीचकार किल केवलबोधलीलाम् ॥ १० ॥
देवध्वनिर्ध्वनितदिग्वलयः ससार व्योम्नस्तदा सुमनसो द्विविधाऽवतेरुः ।
निर्द[4]म्भदुन्दुभिरभिन्नरवो जगर्ज्ज [5]सन्तर्जयन्निव विमोहमहोर्जितानि ॥ ११ ॥
रत्नैः सुवर्णनिवहै रजतैर्निसृष्टा [6]सालत्रयी भगवतः परितो बभासे ।
अस्याश्छलेन [7]वलयाकृतिशैलराजाः प्राप्तास्त्रयोऽपि जिनऋद्धिदिदृक्षयेव ॥ १२ ॥
सिं[8]हासनं समधिरुह्य जिनस्तदासांचक्रे मणीगणलसत्किरणैर्विचित्रम् ।
भास्वानिवोदयनगोन्नतशृङ्गसङ्गी सङ्गीतवाद्यगणमाद्यदमन्दशब्दैः ॥ १३ ॥
[9]छत्रत्रयी द्युतिमयी [10]प्रचयीकृतानां सान्द्रेन्द्रनीलमणिमौक्तिककाञ्चनानाम् ।
रेजे [11]जगत्त्रयनिविष्टपदार्थसार्थप्रोद्भासनाय वपुषस्त्रितयीव भानोः ॥ १४ ॥
[12]उच्चामरावलिविकीर्ण्णसितप्रकीर्ण्णकान्दोलनैरनिलमूर्च्छनतस्त्रिलोक्याः ।
बाह्यस्तथान्तरगतः [13]समपैति तापः किं किं न शर्म महतामुदये जगत्याम् ॥ १५ ॥
[14]आखण्डलेन विधृतं जिनराजपृष्ठे [15]भामण्डलं किल रराज करैरखण्डम् ।
मार्तण्डमण्डलमिवाऽऽर्हतसेवयेव नित्योदयं न तमसा श्रमसादनीयम् ॥ १६ ॥
निश्शोकतां समधिगच्छति सर्वलोकस्तीर्थेशसन्निधिबलाद[16]चलातलेऽस्मिन् ।
इत्येवमाह नवपल्लवनैर्जिनेन्दोराराद‍ुपेत्य किमु चैत्यतरु[17]र्यशोकः ॥ १७ ॥
केचिज्जिनेशमभितुष्टुवुरात्ततुष्ट्या [18]प्राचीकटन् नटनकर्मघटां च केचित् ।
[19]सर्वाङ्गसाङ्गविधिना जिनपूजनानि केचिद् व्यधुर्जनवरा नवरागभाजः ॥ १८ ॥
[20]पुष्पाणि तत्र ववृषुर्बहुसौरभाणि संसिच्य [21]गन्धसलिलैः परितो धरित्रीम् ।
[22]आजानुभागमपि मेघकुमारदेवाः सेवाविधेरसमयं समयं [23]प्रतीक्ष्य ॥ १९ ॥

---

[10] 1 'अक्षोभः' न क्षुब्धो विचलितो वा । 2 'यथार्थनामा' अर्थमनतिक्रम्य 'महावीर' इति यथार्थं नाम यस्य सः । 3 'अवधूतवधूविलासः' तिरस्कृतपत्नीविलासः ।

[11] 4 'निर्दम्भदुन्दुभिः' दम्भः कपटस्तेन रहितः निर्दम्भश्चासौ दुन्दुभिश्चेति । "भगवतः देवताकृतैकोनविंशतिरतिशयानां मध्ये द्वादशोऽतिशयः" । 5 'सन्तर्जयन्' तिरस्कुर्वन् ।

[12] 6 'सालत्रयी' प्राकारत्रिकम् । "समवसरणे रत्न-सुवर्ण-रूप्यमयं प्राकारत्रयं देवता रचयन्तीति सप्तमोऽतिशयः" । 7 'वलयाऽऽकृतिशैलराजाः' वलयाकारकाः श्रेष्ठपर्वताः ।

[13] 8 'सिंहासनम्' मृगेन्द्रासनम्, "स्फटिकरत्नालङ्कृतमिति तृतीयोऽतिशयः" ।

[14] 9 'छत्रत्रयी' "खे छत्रत्रयं देवता धारयन्तीति चतुर्थोऽतिशयः" । 10 'प्रचयीकृतानाम्' एकत्रीकृतानाम् । 11 'जगत्त्रयनिविष्टपदार्थसार्थप्रोद्भासनाय । त्रिषु जगत्सु निविष्टः स्थितो यो पदार्थानां वस्तूनां सार्थो समूहस्तं प्रोद्भासनाय प्रकाशनाय ।

[15] 12 'उच्चामरावलिविकीर्णसितप्रकीर्णकाऽऽन्दोलनैः' "उर्ध्वं खे चमरा इति द्वितीयोऽतिशयः" । उच्चामराणामावलिभिः विकीर्णाः, प्रसृताः सितप्रकीर्णकाः श्वेतरोमगुच्छास्तेषामान्दोलनैः संचालनैरिति । "चामरं वालव्यजनं रोमगुच्छः प्रकीर्णकम्" इति हैमः [अभि० चिं० कां० ३ श्लो० ३८१] 13 'समपैति' नश्यति ।

[16] 14 'आखण्डलेन' इन्द्रेण । 15 'भामण्डलम्' "भानां प्रभाणां मण्डलमिति कर्मक्षयजस्तृतीयोऽतिशयः" ।

[17] 16 'अचलातले' पृथ्वीतले । 17 'चैत्यतरुर्यशोकः' "चैत्याभिधानो द्रुमोऽशोकवृक्षो देवकृतो नवमोऽतिशयः" ।

[18] 18 'प्राचीकटन्' प्राकाशयन् । 19 'सर्वाङ्गसाङ्गविधिना' नवाङ्गपूजाऽष्टप्रकारकविधियुक्तेन । साङ्गमाचाराद्यङ्गसूत्रं तस्मिन् कथितविधिना ।

[19] 20 'पुष्पाणि' "पञ्चवर्णानां जानूत्सेधप्रमाणपुष्पाणां वृष्टिरिति षोडशोऽतिशयः" । 21 'गन्धसलिलैः' "गन्धोदकैरिति पञ्चदशोऽतिशयः" । 22 'आजानुभागम्' जानूत्सेधप्रमाणम् । 23 'प्रतीक्ष्य' दृष्ट्वा ।

वश्या इवास्य परितो भुवनाधिभर्त्तुस्तस्थुः प्रसन्नमनसः सुदृशः सदस्याः ।
पीता वचोऽमृतरसात्तरसाऽस्तमोहास्ते द्वादशाऽऽप्तविदिशस्त्रिदशाधिपाद्याः ॥ २० ॥
[1]यत्कोटिकोटिगणितो*ऽ[2]प्यधियोजनान्तमास्ते स्म मानव-पशु-द्युसदां समूहः ।
चित्रं न तत् किमु विभोः सकलोऽपि लोकोऽलोकश्च माति न [3]विबोधमयाऽऽत्मदर्शे ॥ २१ ॥
आयोजनं जिनविभोर्ध्वनिर[4]ध्वनीनान् [5]उद्बोधयन् शि[6]वगमे परमागमोक्त्या ।
स्पष्टीकरोति भवसम्भववर्द्धिवार्द्धिक्षोभेण लाभमिह [7]रत्नवरत्रयस्य ॥ २२ ॥
[8]वाणी विभो[9]रमर-मर्त्य-पशुस्वभाषासंवादमेत्य सुगमाधिगमं वितेने ।
मन्दाकिनीव सरसा [10]त्रिपथप्रयाता [11]नानानयैर्ननु सहस्रमुखीति रूढा ॥ २३ ॥
[12]ईतिर्न [13]भीति[14]रपनीति[15]रसत्प्रतीतिस्तन्मण्डले स्म न [16]रुजा [17]प्रसरीसरीति ।
यत्र प्रभुः [18]कनकपद्मनिविष्टपादः कैवल्यभाग् विहरते वरतेजसाऽऽढ्यः ॥ २४ ॥
समवसरणलक्ष्मीर्लक्षणैरित्युदीता [19]जवनपवनयोगा[20]दुल्लसत्केतुहस्तैः ।
नटति झटिति शुभ्रैर्दिव्यपुष्पैः प्रवृष्टैस्तदनु विहसतीव स्वामिसंसर्गतुष्टा ॥ २५ ॥
अथ प्रथमतः प्रभु[21]स्त्रिदशराज-भूमीभुजां
लसत्सदसि सङ्गते सुभगमङ्गले स्फूर्ज्जति ।
[22]पदत्रितयमादिशद् विशदसर्वभावे विशत्
बभूव [23]गणभृद्गणस्तदनु तस्य मीमांसया ॥ २६ ॥
श्रीइन्द्रभूतिरपरोऽग्निपदाद् विभूतिः श्रीवायुभूतिरिति गोतमवंशजाताः ।
व्यक्तः सुधर्मगणभृद् गणिमण्डितोऽथ श्रीमौर्यपुत्र इति तद् द्वितयं गणेन्द्रौ ॥ २७ ॥

[21] 1 'यत्कोटिकोटिगणितः' येषां 'मानव-पशु-द्युसदाम्' नृ-तिर्यग्-देवानां कोटिकोटिसङ्ख्यातः । 2 'अधियोजनान्तम्' "योजनप्रमाणमिति कर्मक्षयजः प्रथमोऽतिशयः" । 3 'विबोधमयाऽऽत्मदर्शे' केवलज्ञानयुक्ताऽऽत्मरूपदर्शे ।

[22] 4 'अध्वनीनान्' पान्थान् "अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ" इति हैमः [ अभि० चिं० कां० ३ श्लो० १५७ ]। 5 'उद्बोधयन्' उपदेशयन् । 6 'शिवगमे' मोक्षगमने । 7 'रत्नावरत्रयस्य' ज्ञान-दर्शन-चारित्रात्मकश्रेष्ठरत्नत्रिकस्य ।

[23] 8 'वाणी' भाषा अर्द्धमागधी । 9 'अमर-मर्त्य-पशुस्वभाषासंवादम्' देव-नर-तिरश्चां भाषाया संवदतीति "वाणी नृ-तिर्यक्-सुरलोकभाषासंवादिनी योजनगामिनी च' इति कर्मक्षयजो द्वितीयोऽतिशयः" [ अभि० चिं० कां० १ श्लो० ५९ ]। 10 'त्रिपथप्रयाता' त्रिषु पथिषु गता । 11 'नानानयैः' विविधनयैः "नया अनेकविधास्तथापि तेषां पञ्चत्वं लक्षणतो निर्दिष्टं तत्त्वार्थाधिगमादिसूत्रेषु । यथा "नैगम-संग्रह-व्यवहार-र्जुसूत्र-शब्दा नयाः"–"आद्यशब्दौ द्वि-त्रिभेदौ" इति तत्वार्थसूत्रम् [ अ० १ सू० ३४–३५ ]।

[24] 12 'ईतिर्न' "धान्याद्युपद्रवकारी प्रचुरो मूषकादिः प्राणिगणो न स्यादिति कर्मक्षयजः षष्ठोऽतिशयः"। 13 'भीतिः' "स्वराष्ट्रात् परराष्ट्राच्च भयं [ न स्याद् ] इत्येकादशोऽतिशयः" । 14 'अपनीतिः' "परस्परविरोधः [ न स्याद् ] इति पञ्चमोऽतिशयः" । 15 'असत्प्रतीतिः' असद्वस्तूनां प्रतीतिः । "मारिरौत्पातिकं सर्वगतं मरणम्, अतिवृष्टिः निरन्तरवर्षणम्, अवृष्टिः सर्वथा वृष्ट्यभावः, तथा दुर्भिक्षं भिक्षाणामभावः–इत्याद्यसद्वस्तुदर्शनं [ न स्याद् ] इति सप्तम-अष्टम-नवम-दशमातिशयाः" । 16 'रुजा' "रोगो ज्वरादिः [ न स्याद् ] इति चतुर्थोऽतिशयः" । 17 'प्रसरीसरीति' अतिशयेन प्रसारमाप्नोति । 18 'कनकपद्मनिविष्टपादः' "सुवर्णकमले न्यासीकृतौ पादौ येन स इति देवकृतः षष्ठोऽतिशयः" ।

[25] 19 'जवनपवनयोगाद्' वेगयुक्तपवनात् । 20 'उल्लसत्केतुहस्तैः' उल्लसन्तश्च ते केतवश्च ध्वजा एव हस्तास्तैः ।

[26] 21 'त्रिदशराज-भूमीभुजाम्' इन्द्र-राज्ञाम् । 22 'पदत्रितयम्' 'उत्पाद-व्यय-ध्रौव्ययुक्तं सत्' इति तत्त्वार्थसूत्रम् [ अ० ५ सू० २९ ] इति पदत्रयीम् । 23 'गणभृद्गणः' एकादशगणधरसमूहः ।

* P गणतो ।

तस्मादकम्पित इतोऽचलशब्दपूर्वो भ्राता गणप्रभुरभूद् गुणरत्नभूमिः ।
मेतार्य आर्यजनकार्यकृतां मुनीनां शास्ता प्रभासगणभृच्चरणप्रवीणः ॥ २८ ॥

एवं विधाय गणिनः श्रुतिसम्पदाढ्यान् दार्ढ्येन तीर्थमपि धर्मधियां समर्थम् ।
भव्याम्बुजानिव विबोधयितुं स लोके नव्यांशुमान् प्रविततान गवां विलासान् ॥ २९ ॥

मोहाभ्यमित्रविधिना गणनायकेभान् सज्जान् लसत्त्रिपदिकान् पुरतो विधाय ।
संस्कृत्य वाडवगणांश्चरणोपदेशे देशे चचाल विजिगीषुरिवाऽऽप्तराजः ॥ ३० ॥

संवर्धयन् समितितत्परसाधुलोके भावाद् गुणाधिकतया परमार्थवृत्तिम् ।
न्यस्यन्नपूर्वकरणे स नियोगिराजान् श्रीइन्द्रभूतिकलितश्चलितो बभासे ॥ ३१ ॥

श्रीधर्मचक्रमनुवृत्य कृतप्रयाणः सद्यः प्रसाधितसुमागधलोकपूज्यः ।
शुद्धव्रतप्रवरदामनियोजिताऽऽज्ञः प्राज्यप्रभासमधिगम्य चिरं स रेजे ॥ ३२ ॥

प्राभाकरीं रुचिमधः कृतवान् विलासैः काये गवां विधिवशाऽऽत्मनिदर्शनेन ।
ब्राह्मीमपि ध्रुवनियोगमहाबलेन तां वैष्णवीमथ जिनो गतदोषभुक्त्या ॥ ३३ ॥

निष्काश्य दास्यकरसर्वपलाददोषं कादम्बरीरसकथां वितथां वितन्वन् ।
व्यावर्तयंश्च जनतां परदारभोगाच्चक्रीव सर्वविषयान् रुरुचे स जित्वा ॥ ३४ ॥

---

[ ३० ] १ 'त्रिपदिकान्' त्रिपदी गात्रबन्धः, पक्षे 'उप्पन्नेइ वे'त्यादिका । २ 'वाडवगणान्' अश्वान् पक्षे विप्रान् । ३ 'चरणम्' चारित्रं पक्षे रणोपदेशे चः समुच्चये ।

[ ३१ ] ४ 'समिति०' समितय ईर्याद्याः पक्षे सङ्ग्रामः । यद्वाऽऽस्थानं समितिस्तत्र तत्पराः । ५ 'गुणाधिकतया' गुणा धैर्यादयः पक्षे गुणस्थानकाधिकतया । ६ 'परमार्थवृत्तिम्' परमार्थं आध्यात्मिकभावः पक्षेऽर्थसम्बन्धिनीं वृत्तिमाजीविकाम् । ७ 'अपूर्वकरणे' करणानि राजदेयभागस्थानानि पक्षेऽपूर्वकरण आत्मवीर्यविशेषः । 'नियोगिराजान्' ८ नियोगिनो मन्त्रिणः पक्षेजिनाऽऽदेशकारिणः ।

[ ३२ ] ९ '°मागधलोकपूज्यः' मागधा मगधदेशवासिनः पक्षे मागधतीर्थवासिदेवास्तेषु पूज्यः । १० 'शुद्धव्रतप्रवरदामनियोजिताऽऽज्ञः' शुद्धमहाव्रतान्येव वरदाममालिका तत्र निर्दिष्टाऽऽज्ञः पक्षे वरदामतीर्थम् । ११ 'प्राज्यप्रभासम्' प्राज्यां प्रकृष्टभासं दीप्तिं पक्षे तीर्थम् ।

[ ३३ ] १२ 'प्राभाकरीम्' प्रभाकरः सूर्यः पक्षे प्रभाकरो मीमांसकविशेषः । १३ 'रुचिम्' रुचिः कान्तिरिच्छा च ताम् । १४ 'काये' देहे षट्कायलक्षणे । १५ 'गवाम्' कान्तीनां पक्षे वचसाम् । १६ 'विधिवशाऽऽत्मनिदर्शनेन' विधिर्ज्ञानमयाऽऽत्मिकधनेन । १७ 'ब्राह्मीम्' ब्राह्मीमपि रुचिमधस्कृतवान् । १८ 'ध्रुवनियोग०' ध्रुवाधिकारेण नियोगकथने । १९ '°नियोग०' नियोगः निरासः । २० 'वैष्णवीम्' वैष्णवीमपि रुचिं निर्दोषाऽऽहारेण रात्रौ भोजननिषेधेन राजपक्षे सूर्य-ब्रह्मविष्णूनां रुचिपराजयात् ॥

[ ३४ ] २१ '°पलाददोषम्' मांसभोजनम् । २२ 'कादम्बरी°' कादम्बरी सुरा । २३ 'सर्वविषयान्' सर्वे विषयाः शब्दादयः पक्षे देशाः ।

---

[ 28 ] 1 'चरणप्रवीणः' चरणं चारित्रं सावद्ययोगत्यागस्तस्मिन् प्रवीणः कुशलः ।

[ 29 ] 2 'गणिनः' गण्यन्ते पूज्यतयेति गणिनस्ताननुचानान् "अनुचानः प्रवचने साङ्गेऽधीति गणिश्च सः" इति हैमः [ अभि० चिं० कां० १ श्लो० ७८ ] । 3 श्रुतिसंपदाढ्यान्' श्रुतिः द्वादशाङ्गी सैव संपत् तयाऽऽढ्यान् सहितान् । 4 'तीर्थम्' तीर्यते संसारसमुद्रोऽनेनेति तीर्थं प्रवचनाधारः साधु-साध्वी-श्रावक-श्राविकास्वरूपश्चतुर्विधसङ्घस्तम् । प्रथमगणधरं वा । 5 'भव्याम्बुजान्' भव्या मोक्षगमनयोग्यास्त एवाम्बुजास्तान् । 6 'विबोधयितुम्' उपदेशयितुं विकासयितुं वा । 7 'नव्यांशुमान्' नवीनसूर्यः । 8 'गवाम्' वाचां किरणानां वा ।

[ 30 ] 9 'मोहाभ्यमित्रविधिना' मोहः कामस्तस्मादभ्यमित्रविधिनाऽऽभिमुख्येन मित्रानलंगामी तस्य विधिस्तेन । 10 'गणनायकेभान्' गणनायकेष्विभान् हस्तिनः श्रेष्ठगणधरानित्यर्थः । 11 'त्रिपदिकान्' त्रिपदी गात्रबन्धः गात्रयोर्द्वयोरग्रजङ्घयोः पश्चिमजङ्घायां गजस्य बन्धस्तान् । 12 'आप्तराजः' आप्तो हितोपदेशकत्वादाप्त इव स आप्तस्तेषु राजेति ।

[ 32 ] 13 'श्रीधर्मचक्रम्' "श्रीधर्मप्रकाशकं चक्रमिति देवकृतः प्रथमोऽतिशयः" । 14 'अनुवृत्त्य' अनुसृत्य ।

[ 34 ] 15 '°पलाददोषम्' राक्षसस्वरूपचौरादिदोषम् ।

[ 37 ] 16 'विबुधसन्निधिः' "भवनपत्यादिचतुर्विधदेवनिकायानां सन्निधिः सामीप्यं सा जघन्यतोऽपि कोटिर्भवतीति देवकृतोऽष्टादशोऽतिशयः" । 17 'पद्मादयः' पद्मादिनवनिधयस्ते चेमे–"महापद्मश्च पद्मश्च शङ्खो मकर-कच्छपौ । मुकुन्द-कुन्द-नीलाश्च चर्चाश्च निधयो नव" । इति हैमः [ अभि० चिं० कां० २ श्लो० १०७ ] ।

औदारिकप्रकृतिना कृतिनायकेना[१]ऽऽजह्रे[२]ऽनुपाधिकबलैः सह [३]साधनं यत् ।
लोके कृपाबलमिदं लभतां यदेष तस्मादनन्तगुणवित्तगुणं प्रतीत्य ॥ ३५ ॥
[४]पुन्नागतः प्रववृते वरदानवृत्ति[५]र्गन्धर्वसङ्गतिरतिप्रबलप्रमोदात् ।
तन्मण्डले विहरति [६]क्षितिनाथरूपे सर्वस्य वश्यकरणं ननु [७]वीतरागे ॥ ३६ ॥
नित्योऽभवद् [1]विबुधसन्निधिरेव सेवा देवाधिपैरपि समाद्रियते स्म भद्रा ।
[२]पद्मादयोऽथ निधयो [८]वसुपद्मवर्गच्छद्माश्रयात् क्षितितले प्रकटीबभूवुः ॥ ३७ ॥
जन्या इवास्य पुरतो मरुतोऽपि [९]वन्या धन्यास्तदा[१]नृतुबला ननृतुर्बलात् ते ।
सद्भावनापरवशाः खलु [१०]भावनानां नाथा दधुर्मधुरगानविधिं [११]गुणानाम् ॥ ३८ ॥
आस्थाय धीरपुरुषश्[२]चरणोन्मुखः सन् [१२]स्थानानि नाम बहुधाऽङ्गनियोजितानि ।
[१३][३]जीवानुचिन्तनमतिर्भुवि [१४]चापरागः को वा जिगाय न रयात् परमोहवर्गम् ॥ ३९ ॥
कश्चित्[१५]त्वजिह्मगमनाः कृतहस्तमुख्यो दण्डं दधौ समरसङ्गत एव कश्चित् ।
आक्रान्तमौलिकलया [४]करवालकर्षी कश्चित् परस्परमभूत् सहसाऽस्त्रबुद्धिः ॥ ४० ॥
[5]उज्जागरः [6]प्रबलसंयतिकर्मशूरः पार्श्वस्थतां न [7]चकमे बहुधा रणार्थी ।
नैव [8]प्रतिग्रहरुचि[9]र्बहुसाधुवाही दण्डादिसज्जनकरः परचारणैषी ॥ ४१ ॥
उच्चारणेऽप्युपनता बहुशोधनाऽऽढ्या विद्याधरा [10]अनवसन्नचरित्रभाजः ।
वीरक्रियाप्रियतया [11]गगनाध्वनीना आज्ञां जिनस्य विपुलां व्यधुरूर्द्ध्वलोके ॥ ४२ ॥
क्षेत्राश्रयेण धनुरादिविमर्शनानि जीवावधारणधियः प्रवितेनिरे[12]ऽमी ।
तत्रेषुयोजनगतिं हृदि निर्णयन्तो लक्षादिमाङ्कविनिविष्टदृशोऽधिसङ्ख्यम्[13] ॥ ४३ ॥
मोहोदयेन पतिताः पुनरप्रमत्ताः सम्यग् गुणादरभृतोऽधिकमार्गणानाम्[14] ।
संयोजनेन[15] विजयश्रियमाश्रयन्तः [१६]प्रासादि [१७]केवलितया[१८]ऽनवसानसौख्यम् ॥ ४४ ॥

---

[ ३५ ] १ 'आजह्रे' तल्लोकानुग्रहाय । २ 'अनुपाधिकबलैः' अनुपाधिभिर्निर्दोषकबलैः पक्षे स्वाभाविकसेनाभिः ३ 'साधनम्' चारित्रं तेन सह यथा स्यात् तथा । 'सहसा, धनम्' इति पदविभागे धनं सहसाऽऽजह्रे तदपि लोकानुग्रहाय न्यायवर्ता राज्ञां न लोभतः ।

[ ३६ ] ४ 'पुन्नागतः' पुन्नागाः श्रेष्ठनरा गजाश्च । ५ 'गन्धर्व०' अश्वाः गायकाश्च । ६ 'क्षितिनाथरूपे' प्रशस्तः क्षितिनाथः क्षितिनाथरूपस्तस्मिन् । ७ 'वीतरागे' वीतमङ्कुशवारणं निषादिनां पादकर्म तद्द्वयं तत्र रागो यस्य [—"यातमङ्कुशवारणम् । निषादिनां पादकर्म यतं वीतं तु तद्द्वयम्" इति हैमः [ अभि० चिं० कां० ४ श्लो० २९१ ] यद्वा 'नु' इति वितर्के न वीतरागे वीतं फल्गुहयद्विपमिति हैमः ।

[ ३७ ] ८ 'वसुपद्म०' वसु स्वर्णं तस्य पद्मानि ।

[ ३८ ] ९ 'वन्याः' वानमन्तरा मरुतो देवाः, पक्षे वनवायवः । १० 'भावनानाम्' भवनपतिदेवानाम् । ११ 'गुणानाम्' वासनागीतगुणानाम् ।

[ ३९ ] १२ 'स्थानानि' आलीढादीनि । १३ 'जीवा०' जीवा मौर्वी । १४ 'अपरागः' विगतरागः, पक्षे धनुषि रागवान् ।

[ ४० ] १५ 'अजिह्मगमनाः' अजिह्मगं ऋजु मनो यस्य, पक्षे शरे मनो यस्य ।

[ ४४ ] १६ 'प्रासादि' प्राप्तम् । १७ 'केवलितया' [ के, बलितया–इति पदविभागे ]–बलितया न वशाः स्वच्छन्दाः केन सुखं प्राप्ताः । १८ 'अनवसानसौख्यम्' अनवसानमनन्तं सुखम् ।

---

[ 38 ] 1 'अनृतुबलाः' ऋत्वभावबलाः । "अनुकूलो वायुः ऋत्वभावेऽपि वहतीति देवकृतश्चतुर्दशोऽतिशयः" ।

[ 39 ] 2 'चरण°' चारित्रं पक्षे चः समुच्चये रणे । 3 'जीवानुचिन्तनमतिः' षट्जीवनिकायेषु अनुचिन्तनमतिः रक्षणबुद्धिः ।

[ 40 ] 4 'करवालकर्षी' तरवारिं कर्षत यः सः ।

[ 41 ] 5 'उज्जागरः' जागरूकः । 6 'प्रबलसंयतिकर्मशूरः' प्रबला प्रकृष्टा या संयतिः संयमस्तस्य कर्मणि शूरः । 7 'चकमे' इयेष । 8 'प्रतिग्रहरुचिः' प्रतिग्रहं सैन्यपृष्ठे रुचिर्यस्य । 9 'बहुसाधुवाही' बहून् साधून् वोढुं शीलं यस्य सः ।

[ 42 ] 10 'अनवसन्नचरित्रभाजः' नावसीदत्यनवसन्नं चरित्रं भजन्त इति । 11 'गगनाऽध्वनीनाः' आकाशचारिणः ।

[ 43 ] 12 'अमी' विद्याधराः । 13 'अधिसङ्ख्यम्' युद्धम् ।

[ 44 ] 14 'अधिकमार्गणानाम्' अधिकबाणानाम् । 15 'संयोजनेन' व्यापृतेन ।

केचित् पुनः प्रतिमया[1]ऽऽसमयानुसारा[2] व्युत्सृष्टकायमु[3]पसर्जनभावनेन[4] ।
स्थानं विधाय समपाद[5]मिवाऽऽदरेण तस्थुर्निरर्गलबल[6]प्रजिघांसयैव ॥ ४५ ॥
तेजोऽदसीय[7]मपहन्तुमिवासमर्थान् आलोचनोपधिपरिग्रहदण्डजार्थान्[8] ।
निश्चित्य दुष्टपरमोहमहीश्वरोऽपि प्राप्तः क्रमाच्छिथिलतां स्वत एव बिभ्यत् ॥ ४६ ॥
दक्षाः पराक्रम[9]धियाऽऽवरणस्य[10] भङ्गे शूरा विचेरुरभितो विषये[11] क्षमायाः[12] ।
मुक्तैषिणः[13] सरसमूह[14]मिहाऽऽदिशन्तः[15] सन्तः स्थिता धृतरुचः[16] खलु मण्डलाग्रे[17] ॥ ४७ ॥
वाणी विभोर्भगवती वरशक्तिरूपा सन्मानसंदृढतरा प्रविवेश साक्षात् ।
तस्या रुचिप्रबलमण्डलदर्शनेन[18] भीतः पलाय्य विगतः क्वचनापि मोहः ॥ ४८ ॥
एवं क्षमाधनवरैः[19] प्रभुशासनेन प्रोल्लासिते समितिकर्मणि सांयुगीनैः ।
विश्वाभ्युदीर्णचरमोहबलक्षयोऽभूदेकातपत्रजिन*राजमहोदयाय ॥ ४९ ॥
विद्याश्चतुर्दश जिनेश्वरशासनान्तः प्रादुर्बभूवुरुपमानमितास्तु रत्नैः ।
प्रत्येकमास्वधिकृता मुनयः सहस्रं तस्माच्चतुर्दशसहस्रगणस्तदीयः ॥ ५० ॥
नन्दीरवा[20]दभिनवाद् भुवि गर्जयन्तः सर्वानुयोजन[21]विधौ निपुणा गुणाढ्याः ।
गुप्तीश्वराः[22] कुसमयार्थविनाशनेन भान्ति स्म साधुगणिनो जिनशासनेन ॥ ५१ ॥
केचिज्जनाः प्रकृति[23]निश्चलता[24]ऽभ्युपायं व्यातेनिरे नरवरस्थितिबन्धतर्कम्[25] ।
यस्मात् परः शतगुणो रसबन्ध[26] एव प्रादेशिकं[27] समुदयं जनयत्यवश्यम् ॥ ५२ ॥

[ ४५ ] १ 'प्रतिमया°' कायोत्सर्गेण, पक्षे मयो नाम उष्ट्र-विशेषस्तं प्रतीति प्रतिमयम् । २ 'आसमयानुसारा' आसमयं यथाऽवसरमनुसारश्छलादिना येषां ते । ३ 'व्युत्सृष्टकायम्' त्यक्तशरीरं यथा स्यात् तथा । ४ 'उपसर्जनभावनेन' स्वदेहेऽप्यनादरबुद्ध्या गौणत्वभावनया । ५ 'समपादम्' समपादं स्थानं कायोत्सर्गे, बाणविसर्गे वा । ६ 'निरर्गलबल०' निरर्गलं स्वतन्त्रं प्रबलं वा बलं शारीरम् ।

[ ४६ ] ७ 'अदसीयम्' कायोत्सर्गकृतं छलेन रणकर्मणा वा । ८ 'आलोचनोपधिपरिग्रहदण्डजार्थान्' आलोचना प्रायश्चित्तस्थानं पक्षे आलोचनं मन्त्रः, उपधिपरिग्रहो वस्त्र-पात्रादि स्वकं वा, दण्डा मनोदण्डादयः सैन्यं वा तेनोत्पन्नार्थान् ।

[ ४७ ] ९ 'पराक्रम°' पराक्रमो बलं, पर उत्कृष्टोऽक्रमो युगपद्भावः । १० 'आवरणस्य' आवरणं ज्ञानावरणादिर्वैरणो वप्रस्तस्य । ११ 'विषये' देशे गोचरे वा । १२ 'क्षमायाः' क्षान्तेः, भूम्या वा । १३ 'मुक्तैषिणः' मुक्ताः सिद्धजीवाः, मुक्तं शस्त्रविशेषः पाणियन्त्राभ्याम् । १४ 'सरसमूहम्' सरसं रसयुक्तं, ऊहं वितर्कं पक्षे शरव्रजः । १५ 'आदिशन्तः' कथयन्तो मुञ्चन्तो वा । १६ 'धृतरुचः' धृतदीप्तयः । १७ 'मण्डलाग्रे' खड्गे मण्डलमुखे मण्डलमत्र सूत्रमण्डलं वा ।

[ ४८ ] १८ 'रुचिप्रबलमण्डलदर्शनेन' रुचिरिच्छारूपं प्रबलमण्डलं प्रकृष्टतरवारिं तस्य दर्शनेन दीप्तेः प्रकर्षपुञ्जदर्शनेन वा ।

[ ४९ ] १९ 'क्षमाधनवरैः' क्षमाधना मुनयो भूपा वा ।

[ ५१ ] २० 'नन्दीरवः' वाद्यसमूहशब्दः नन्दीसूत्रपाठो वा । २१ 'सर्वानुयोजन०' सर्वानुयोजनं सर्वमनुयोजनं पृच्छा, अनुयोगो वा । २२ 'गुप्तीश्वराः' गुप्तयो मनोगुप्त्याद्याः कारागृहं वा ।

[ ५२ ] २३ 'प्रकृति°' प्रकृतयो ज्ञानावरणाद्याः, प्रजा लोको वा । २४ '°निश्चलता°' निश्चलता स्वास्थ्यं निर्जरणं वा । २५ 'नरवरस्थितिबन्धतर्कम्' राज्यस्थितिविचारं, मनुजगत्यायुःस्थितिबन्धं वा । २६ 'रसबन्धः' प्रजास्नेहः कर्मरसबन्धो वा । २७ 'प्रादेशिकः' देशसम्बन्धी प्रदेशबन्धो वा ।

[ 46 ] 1 'अदसीयम्' अस्येदमदसीयम् । 2 'दुष्टपरमोहमहीश्वरः' दुष्टो यः परश्चासौ मोहश्च शत्रुस्वरूपः कामदेवः स एव महीश्वरो राजा ।

[ 48 ] 3 'सन्मानसंदृढतरा' सन्मानेन सम्यगतिशयेन दृढेति । 4 'पलाय्य' नंष्ट्वा । 5 'मोहः' कामदेवः ।

[ 49 ] 6 'समितिकर्मणि' ईर्यादिकार्ये रणे वा । 7 'सांयुगीनैः' तत्परैः । 8 'विश्वाभ्युदीर्णचरमोहबलक्षयः' विश्वेऽभ्युदीर्णः कृतः चरतो मोहस्य कामदेवस्य बलं तस्य क्षयः नाशो येन सः । 9 'एकातपत्र°' एकमद्वितीयमातपत्रं छत्रं यस्य सः ।

* P °राज्य° ।

[१]आचार[२]वर्तनिकयाऽधिजगाम [२]साधो[३]रन्यस्य वाऽनुचरितं सकलो [४]नियोगी ।
[५]निर्वेशन-प्रविशने [६]चरणेऽनुरागादावेदयन् स [७]पुरुषोत्तमराजवाक्यात् ॥ ५३ ॥
ज्ञात्वाऽऽ[८]त्मनस्[९]तदितरस्य [१०]विबोधवृत्ती[११]र्देशस्थसूत्रकृदभिज्ञपुराणवाचा ।
न्यायं प्रयुज्य तदनीतिपदाद् वियुज्य [१२]स्वार्थं परार्थमिव साधयति स्म धीरः ॥ ५४ ॥
[१३]श्रेणीहिताय मनसो वचसोऽपि वृत्तिं यत् [१४]सामवायिकजनो विजनेऽपि दध्यौ ।
तिष्ठँश्चलन्नुपविशन् निविशञ् शयानोऽप्यश्नन् नयानुपदिदेश तथा जिनेशः ॥ ५५ ॥
प्राधान्यमाप [१५]बहुधाऽन्यमहोपकारः स्फारानुराग[१६]परभागदशाऽऽ[१७]गमानाम् ।
मर्यादया विशदया ननु [१८]देशरूपं जज्ञे [१९]क्षमाधनगणे [२०]समरोचितेऽपि ॥ ५६ ॥
[२१]पूर्वस्थितिः प्रकटिताऽत्र विशिष्य लोके तस्याः परं परिणतिः खलु [२२]वस्तुलभ्या ।
श्रीप्राभृते[२३] प्रतिपदं परमोऽधिकारोऽन्या विश्रुतश्रुतकथासु तथा प्रथाऽऽसीत् ॥ ५७ ॥
नो [२४]नैगमादिषु परस्परबाधयोगो नो [२५]पश्यतोहरदशापि जनस्य काचित् ।
नो भङ्गबुद्धिरपि [२६]सङ्गरतः कथञ्चित् श्रीशासने भगवतः स्फुटतामुपेते ॥ ५८ ॥
[२७]मन्युर्न चेतसि पदं मनुजस्य चक्रे यस्मिन् भवेदसुमतां [२८]विनिपातवृत्तिः ।
[२९]ब्रह्मक्रियासु [३०]निरतेऽपि [३१]पलादरूपं प्रादुर्भवेद् [३२]गुरुजनेऽप्य[३३]विकल्पना गीः ॥ ५९ ॥
[1]नासिद्धताऽपि च मिथो न [2]विरुद्धताऽऽसील्लभ्यं क्वचिन्न विहितव्यभिचारकर्म ।
बाधो न यत्र समयेऽप्रतिपक्षभावः क[3]स्तीर्थभास्करमते रमते न विद्वान् ॥ ६० ॥

---

[ ५३ ] १ 'आचारवर्तनिकया' आचारा ज्ञानाचाराद्याः, आसमन्ताच्चाराणां गूढपुरुषाणां प्रवृत्त्या। २ साधोः मुनेः न्यायवल्लोकस्य वा । ३ 'अन्यस्य' असाधोश्चौरादेः । ४ 'नियोगी' मुनिः मन्त्री वा। ५ 'निर्वेशन–प्रविशने' निर्गम–प्रवेशौ तयोः समाहारस्तस्मिन् । ६ 'चरणे' चारित्रे रणे वा । ७ 'पुरुषोत्तम°' पुरुषोत्तमोऽर्हन् ।

[ ५४ ] ८ 'आत्मनः' जीवस्य । ९ 'तदितरस्य' अजीवस्य । १० 'विबोधवृत्तीः' ज्ञानवार्ताः । ११ 'देशस्थसूत्रकृदभिज्ञ°' पार्श्वस्थिता ये सूत्रकृतोऽङ्गस्याभिज्ञा ज्ञातारः, पक्षे देशस्थसूत्रकृतो देशमुख्यजनाः । १२ 'स्वार्थम्' स्वस्य धनस्यार्थं कार्यमात्मकार्यं वा ।

[ ५५ ] १३ 'श्रेणी°' श्रेणिः क्षपकश्रेण्यादिः पौरश्रेणी वा । १४ 'सामवायिकजनः' समवायाङ्गवेत्ता मन्त्री वा ।

[ ५६ ] १५ 'बहुधान्यमहोपकारः' बहुधा, अन्यस्य महोपकारः, बहुधान्यनिष्पत्तिः। १६ '°परभाग°' 'परभागो गुणोत्कर्षः' इति हैमः [अभि० चिं० कां० ६ श्लो० ११]। १७ '°आगमानाम्' आगमा वृक्षा रसालाद्याः, सिद्धान्ता वा। १८ 'देशरूपम्' न्यायः । १९ 'क्षमाधनगणे' क्षमाधना मुनयो भूपा वा। २० 'समरोचिते' समेन रोचिते, समरे उचिता वा ।

[ ५७ ] २१ 'पूर्वस्थितिः' पूर्वजानां स्थितिः पूर्वाणामुत्पादादीनां स्थितिर्वा। २२ 'वस्तुलभ्या' वस्तु परमार्थस्तत्त्वं तेन लभ्या, वस्तु अधिकारविशेषो वा। २३ 'श्रीप्राभृतम्' लक्ष्मीढौकनम्, प्राभृतोऽत्र पूर्वाधिकारः ।

[ ५८ ] २४ 'नैगमादिषु' नैगमादयो नयाः, वणिजां समूहेषु वा। २५ 'पश्यतोहरदशा' पश्यतोहरस्तस्करः, पश्यतो विचारयतो वा हरदशा ईश्वरधर्माङ्गीकारः। २६ 'सङ्गरतः' सङ्ग्रामात् प्रतिज्ञाया वा ।

[ ५९ ] २७ 'मन्युः' कोपो यज्ञश्च। २८ 'विनिपातवृत्तिः' प्राणिघातवृत्तिः। २९ 'ब्रह्मक्रियासु' ब्रह्मचर्यकर्मसु। ३० 'निरते' तत्परे ब्राह्मणेऽपि मांसाशनम्। ३१ 'पलादरूपम्' राक्षसस्वरूपम्। ३२ 'गुरुजने' गुरुलोके। ३३ 'अविकल्पनागीः' अविर्हुडजीवस्तस्य कल्पना मारणा तस्या वाक् ।

---

[ 60 ] 1 'नासिद्धता' असिद्धताऽसिद्धिर्न परं सिद्धिरेव। 2 'विरुद्धता' विरोधः। 3 'तीर्थभास्करमते' तीर्थस्तीर्थङ्करः 'भामा सत्यभामा' इति न्यायात्, तीर्थङ्कर एव भास्करः सूर्यस्तस्य मते सिद्धान्ते ।

एवं दैवतदैवरूपबलतः पुण्यानुगुण्यान्नृणां
साम्राज्यं परमोपकारि चरणाऽऽरम्भेन लेभे विभुः ।
वीरः केसरिणाऽभिलाञ्छिततनूर्नूनं नृसिंहोपमा-
वर्ण्यः स्वर्णसवर्णरोचिरचिराद् देयात् स नः प्रार्थितम् ॥ ६१ ॥

कृत्वा तत्त्वनिदेशपेशलतरं देशं जिनेशः स्वयं
मिथ्यात्वोदयदुस्तमान्धतमसं सान्द्रं विनीय व्ययम् ।
श्रीसूक्ष्मक्रियमद्वयं व्युपरताशेषक्रियं चाप्ययं
ध्यायन्नापदपापपूःपरिसरे श्रीसिद्धशर्मोदयम् ॥ ६२ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
कथानायकवंशमूलस्य श्रीवीरस्य भगवतो दिग्विजयवर्णनो
नाम तृतीयः सर्गः ॥ ३ ॥

---

[61] 1 'चरणाऽऽरम्भेन' चरणं चारित्रं तस्याऽऽरम्भस्तेन । 2 'केसरिणा' सिंहेन लाञ्छनेन । 3 'स्वर्णसवर्णरोचिः' सुवर्णसमाना रोचिः कान्तिः श्रीवीरस्य काञ्चनवर्णत्वात् ।

[62] 4 'तत्त्वनिदेशपेशलतरम्' तत्त्वानि नव, तेषां निदेशेनोपदेशेनातिशयेन शोभनमिति । 5 'देशम्' भारतवर्षम् । 6 'विनीय' कृत्वा । 7 'व्युपरताशेषक्रियम्' शमिता समग्राऽऽरम्भादिक्रिया यस्मिन् तं देशम् । 8 'आपद्' प्राप । 9 'अपापपूःपरिसरे' अपापानगरीविस्तारे ।

## चतुर्थः सर्गः ।

अथ जिनपतिपट्टे श्रीसुधर्मा गणीन्द्रो दिनपतिरिव रेजे राजराजाधिगम्यः ।
गणधरगणनायां पञ्चमोऽप्याद्य एव विनयनयतपोभिर्योऽतिशेते स्म सर्वैः ॥ १ ॥
तदनु दनुजपूज्यः प्राज्यतेजा हि जम्बूर्गणपतिरुदियायोन्निद्रजाम्बूनदश्रीः ।
प्रभव इति गुरुस्तत्पट्टपद्मांशुमाली गणधरमणिरस्मादेव शय्यंभवाऽऽख्यः ॥ २ ॥
तदनु गणहिमांशुः श्रीयशोभद्रसूरिर्विजितविबुधसूरिस्तस्य पट्टेऽद्वयीयम् ।
प्रगुणगुणविभूतिश्चारुसम्भूतिशब्दाद् विजय इति मुनीन्दुर्भद्रबाहुर्द्वितीयः ॥ ३ ॥
श्रुतसुरतरुमूलं स्थूलभद्रोऽनुकूलं समजनि यशसाऽऽशासुन्दरीणां दुकूलम् ।
तदनु च गिरिनामाऽऽर्यो महादिः सुहस्ती द्वयमपि गणराजौ पट्टभाजौ तदीयौ ॥ ४ ॥
परमपि युगलं स्यात् सुस्थितः सुप्रबुद्धः श्रमणगणभृदिन्द्राद् दिन्नसूरिस्ततोऽभूत् ।
गणगुरुरुरुकीर्तिर्दिन्ननामाऽथ सिंहाद् गिरिगणविभुरस्माद् वज्रसूरिः सुरेज्यः ॥ ५ ॥
प्रसृमरमुनिसेनः सूरिराड् वज्रसेनः शमिपतिरथ चन्द्रश्चारुसामन्तभद्रः ।
नव इव सुरसूरिर्वृद्धदेवाऽऽख्यसूरिर्गणपतिरतिशायिप्रोदितद्योतनाऽऽह्वः ॥ ६ ॥
प्रणतनृपतिदेवः सूरिराण्मानदेवः क्षितिधर इव तुङ्गः स्वैर्गुणैर्मानतुङ्गः ।
सुरगिरिरिव धीरः श्रीधरो वीरसूरिः प्रभुरपि जयदेवश्चारुताकामदेवः ॥ ७ ॥

---

[ 1 ] 1 'जिनपतिपट्टे' श्रीवर्द्धमानस्वामिपट्टे ।

( १ ) 'श्रीसुधर्मा' श्रीसुधर्मस्वामी । 2 'दिनपतिः' सूर्यः । 3 'पञ्चमोऽप्याद्य एव' एकादशानामपि गणधरपदस्थापनाऽवसरे श्रीवीरेण श्रीसुधर्मस्वामिनं पुरस्कृत्य गणोऽनुज्ञातः दुष्प्रसहं यावत् श्रीसुधर्मस्वाम्यपत्यानामेव प्रवर्त्तनात् ।

[ 2 ] 4 'दनुजपूज्यः' असूरैः पूज्यः वन्द्यः 'असुरा दितिदनुजाः' इति हैमः [ अभि० चिं० कां० २ श्लो० १५२ ] (२) 'जम्बूः' श्रीसुधर्मस्वामिपट्टे द्वितीयः श्रीजम्बूस्वामी । 5 'उन्निद्रजाम्बूनदश्रीः' उन्निद्रा विकसिता जम्बूनदस्य सुवर्णस्य श्रीः शोभा यस्य सः । (३) 'प्रभवः' श्रीजम्बूस्वामिपट्टे तृतीयः श्रीप्रभवस्वामी । (४) 'शय्यंभवाऽऽख्यः' श्रीप्रभवस्वामिपट्टे चतुर्थः श्रीशय्यंभवस्वामिनामा ।

[ 3 ] (५) 'श्रीयशोभद्रसूरिः' श्रीशय्यंभवस्वामिपट्टे पञ्चमः श्रीयशोभद्रसूरिः । 5 'विजितविबुधसूरिः' विजितः विबुधानां सुराणां सूरिराचार्यो बृहस्पतिरित्यर्थः । (६) 'सम्भूतिशब्दाद् विजयः'–'भद्रबाहुः' इति द्वौ श्रीयशोभद्रसूरिपट्टे षष्ठौ श्रीसंभूतिविजय-श्रीभद्रबाहुस्वामिनावभूताम् ।

[ 4 ] 6 'श्रुतसुरतरुमूलम्' श्रुतानि चतुर्दशपूर्वाण्येव सुरतरवो देववृक्षास्तेषां मूलम् । (७) 'स्थूलभद्रः' श्रीसम्भूतिविजय-श्रीभद्रबाहुस्वामिनोः पट्टे सप्तमः श्रीस्थूलभद्रस्वामी । (८) 'गिरिनामाऽऽर्यो महाऽऽदिः सुहस्ती' श्रीस्थूलिभद्रस्वामिपट्टेऽष्टमौ श्रीआर्यमहागिरि-श्रीआर्यसुहस्तीसूरिरिति द्वौ बभूवतुः ।

[ 5 ] (९) 'सुस्थितः सुप्रबुद्धः' 'श्रीआर्यमहागिरि-श्रीआर्यसुहस्तिसूरिपट्टे नवमौ श्रीसुस्थित-सुप्रतिबद्धसूरी । (१०) 'इन्द्राद् दिन्नसूरिः' 'सुस्थित-सुप्रतिबद्धपट्टे दशमः श्रीइन्द्रदिन्नसूरिर्बभूव । (११) 'दिन्ननामा' इन्द्रदिन्नसूरिपट्टे एकादशः श्रीदिन्नसूरिः बभूव । (१२) 'सिंहाद् गिरिगणविभुः' श्रीदिन्नसूरिपट्टे द्वादशः सिंहगिरिर्बभूव । 'गिरिगणविभुः' सिंहाद् गिरिरिति सिंहगिरिरेव गणेषु विभुः प्रभुरिव । (१३) 'वज्रसूरिः' श्रीसिंहगिरिपट्टे त्रयोदशः श्रीवज्रस्वामी बभूव ।

[ 6 ] (१४) 'वज्रसेनः' श्रीवज्रसूरिपट्टे चतुर्दशः श्रीवज्रसेनसूरिः । (१५) 'चन्द्रः' वज्रसेनसूरिपट्टे पञ्चदशः श्रीचन्द्रसूरिर्बभूव । (१६) '°सामन्तभद्रः' 'श्रीचन्द्रसूरिपट्टे षोडशः श्रीसामन्तभद्रसूरिर्बभूव । (१७) 'वृद्धदेवाऽऽख्यसूरिः' 'श्रीसामन्तभद्रसूरिपट्टे सप्तदशः श्रीवृद्धदेवसूरिनामा बभूव । (१८) 'प्रोदितद्योतनाऽऽह्वः' 'श्रीवृद्धदेवसूरिपट्टेऽष्टादशः प्रद्योतनसूरिनामा सञ्जातः ।

[ 7 ] (१९) 'मानदेवः' श्रीप्रद्योतनसूरिपट्टे एकोनविंशतितमः श्रीमानदेवसूरिः । (२०) 'मानतुङ्गः' श्रीमानदेवसूरिपट्टे विंशतितमः श्रीमानतुङ्गसूरिर्जातः । (२१) 'वीरसूरिः' श्रीमानतुङ्गसूरिपट्टे एकविंशतितमः श्रीवीरसूरिर्बभूव । (२२) 'जयदेवः' श्रीवीरसूरिपट्टे द्वाविंशतितमः श्रीजयदेवसूरिर्बभूव ।

सुरपतिरिव देवानन्दनामा[२३] द्विधापि कमनदमनकान्तिर्विक्रमो[२४]ऽपि क्रमेण ।
समजनि नरसिंहः[२५] सूरिरुत्सारितारिर्गुणगणमणिराशेः श्रीसमुद्रः[२६] समुद्रः ॥ ८ ॥

पुनरपि गुरुरासीन्मानदेवो[२७] द्वितीय-
स्तदनु विबुधशब्दाच्छ्रीप्रभो[२८]ऽप्यद्वितीयः ।
भुवि विजितजयार्थः श्रीजयानन्दसूरिः[२९]
प्रवचनरविरूपोऽस्माद् रवेः[३०] श्रीप्रभाऽऽह्वः ॥ ९ ॥

यशसि शशिसमानः श्रीयशोदेवसूरिः[३१] स्मर इव कमनीयः प्रोचितद्युम्नसूरिः[३२] ।
[1]शमकमलविवस्वान् मानदेवस्[३३]तृतीयस्तदनु विमलचन्द्रश्[३४]चन्द्रमाश्चन्द्रगच्छे ॥ १० ॥
रुचिभरजितभूरिः सूरिरुद्योतनो[३५]ऽस्मादवनतनरदेवः सर्वदेवो[३६] गणेन्द्रः ।
धृतचरणविशुद्धिर्देवसूरिः[३७] सुबुद्धिः पुनरपि गणभर्त्ता सर्वदेवो[३८]ऽद्वितीयः ॥ ११ ॥
कुनयजययशोभित् श्रीयशोभद्रनामा[३९] तदनु च मुनिचन्द्रश्[४०]चन्द्रनिस्तन्द्रकीर्त्तिः ।
गणभृदजितदेवः[४१] सेवनासक्तदेवस्तदनु विजयसिंहः[४२] सिंहवत् साहसेन ॥ १२ ॥
[2]सुजननयनसोमः सोमनाम्नः[४३] प्रभोऽभूद् गुरुरपि मणिरत्नस्[४३]तद्द्वयं चैकपट्टे ।
बहुतपसि वितन्द्रः [४४]श्रीजगच्चन्द्रसूरिरजनि मुनिनरेन्द्रोऽस्मात् स देवेन्द्रसूरिः[४५] ॥ १३ ॥
तदनु मुनिसमूहं धर्मघोषः[४६] पुपोष पुनरभवदमुष्मात् [४७]सोमशब्दात् प्रभोऽन्यः ।
तदनु तिलकसूरिः[४८] सोमपूर्वो बभूव गणगुरुरथ देवात्[४९] सुन्दराऽऽह्वानसूरिः ॥ १४ ॥

---

[ 8 ] (२३) 'देवानन्दनामा' श्रीजयदेवसूरिपट्टे त्रयोविंशतितमः श्रीदेवानन्दसूरिः । (२४) 'विक्रमः' श्रीदेवानन्दसूरिपट्टे चतुर्विंशतितमः श्रीविक्रमसूरिर्जातः । (२५) 'नरसिंहः' श्रीविक्रमसूरिपट्टे पञ्चविंशतितमः श्रीनरसिंहसूरिर्जज्ञे । (२६) 'श्रीसमुद्रः' श्रीनरसिंहसूरिपट्टे षड्विंशतितमः श्रीसमुद्रसूरिः संभूतः ।

[ 9 ] (२७) 'मानदेवः' श्रीसमुद्रसूरिपट्टे सप्तविंशतितमः श्रीमानदेवसूरिर्जातः । (२८) 'विबुधशब्दाच्छ्रीप्रभः' श्रीमानदेवसूरिपट्टेऽष्टाविंशतितमः श्रीविबुधप्रभसूरिरभवत् । (२९) 'श्रीजयानन्दसूरिः' श्रीविबुधप्रभसूरिपट्टे एकोनत्रिंशत्तमः श्रीजयानन्दसूरिर्जज्ञे । (३०) 'रवेः श्रीप्रभाऽऽह्वः' श्रीजयानन्दसूरिपट्टे त्रिंशत्तमः श्रीरविप्रभसूरिः सञ्जातः ।

[ 10 ] (३१) 'श्रीयशोदेवसूरिः' श्रीवीरप्रभसूरिपट्टे एकत्रिंशत्तमो नागरब्राह्मणः श्रीयशोदेवसूरिरुदियाय । (३२) 'प्रोचितद्युम्नसूरिः' श्रीयशोदेवसूरिपट्टे द्वात्रिंशत्तमः श्रीप्रद्युम्नसूरिर्बभूव । 1 'शमकमलविवस्वान्' शमः शान्तिस्तद्रूपं कमलं तं विकासयितुं विवस्वान् सूर्य इव । (३३) 'मानदेवः' श्रीप्रद्युम्नसूरिपट्टे श्रीमानदेवसूरिरजनि । (३४) 'विमलचन्द्रः' श्रीमानदेवसूरिपट्टे चतुस्त्रिंशत्तमः श्रीविमलचन्द्रसूरिर्बभूव ।

[ 11 ] (३५) 'उद्योतनः' श्रीविमलचन्द्रसूरिपट्टे पञ्चत्रिंशत्तमः श्रीउद्योतनसूरिः समजायत । (३६) 'सर्वदेवः' श्रीउद्योतनसूरिपट्टे षट्त्रिंशत्तमः श्रीसर्वदेवसूरिर्बभूव । (३७) 'देवसूरिः' श्रीसर्वदेवसूरिपट्टे सप्तत्रिंशत्तमः श्रीदेवसूरिर्जज्ञे । (३८) 'सर्वदेवः' श्रीदेवसूरिपट्टे अष्टत्रिंशत्तमः पुनः श्रीसर्वदेवसूरिरभूत् ।

[ 12 ] (३९) 'श्रीयशोभद्रनामा' श्रीसर्वदेवसूरिपट्टे एकोनचत्वारिंशत्तमः श्रीयशोभद्रसूरिरभवत् । (४०) 'मुनिचन्द्रः' श्रीयशोभद्रसूरिपट्टे चत्वारिंशत्तमः श्रीमुनिचन्द्रसूरिर्जज्ञे । (४१) 'अजितदेवः' श्रीमुनिचन्द्रसूरिपट्टे एकचत्वारिंशत्तमः श्रीअजितदेवसूरिरजनि । (४२) 'विजयसिंहः' श्रीअजितदेवसूरिपट्टे द्विचत्वारिंशत्तमः श्रीविजयसिंहसूरिर्बभूव ।

[ 13 ] 2 'सुजननयनसोमः' सज्जनानां नयनानि चक्षूंषि शीतलीकर्त्तुं सोमश्चन्द्र इव । (४३) 'सोमनाम्नः प्रभः, मणिरत्नः' श्रीविजयसिंहसूरिपट्टे त्रिचत्वारिंशत्तमौ श्रीसोमप्रभ-श्रीमणिरत्नसूरी सञ्जातौ, तयोः सोमप्रभसूरिः शतार्थितया भुवि ख्यातनामा बभूव । (४४) 'श्रीजगच्चन्द्रसूरिः' श्रीसोमप्रभ-श्रीमणिरत्नसूरिपट्टे श्रीजगच्चन्द्रसूरिरजायत । (४५) 'देवेन्द्रसूरिः' श्रीजगच्चन्द्रसूरिपट्टे पञ्चचत्वारिंशत्तमः श्रीदेवेन्द्रसूरिः समजनि ।

[ 14 ] (४६) 'धर्मघोषः' श्रीदेवेन्द्रसूरिपट्टे षट्चत्वारिंशत्तमो धर्मघोषसूरिर्बभूव । (४७) 'सोमशब्दात् प्रभः' श्रीधर्मघोषसूरिपट्टे सप्तचत्वारिंशत्तमः श्रीसोमप्रभसूरिः । (४८) 'तिलकसूरिः सोमपूर्वः' श्रीसोमप्रभसूरिपट्टे अष्टचत्वारिंशत्तमः श्रीसोमतिलकसूरिर्जज्ञे । (४९) 'देवात् सुन्दराह्वानसूरिः' श्रीसोमतिलकसूरिपट्टे एकोनपञ्चाशत्तमः श्रीदेवसुन्दरसूरिर्जातः ।

मुनिकुवलयसोमः सोमतः सुन्दराह्वः प्रभुरथ मुनिशब्दात् सुन्दरः सूरिचक्री ।
श्रमणगगनरत्नं रत्नतः शेखराऽऽख्यस्तदनु च वरलक्ष्मीसागरः सूरिरासीत् ॥ १५ ॥
तदनु सुमतिसाधुर्माधुरीपूर्णवाक्यस्समजनि विमलः श्रीहेमपूर्वस्ततोऽपि ।
तदनु विमलनामाऽऽनन्दशब्दाद् यथार्थां तपगणगुणसंज्ञां यश्चकार क्रियाभिः ॥ १६ ॥
तदनु विजयदानः सूरिरुच्चावदानः प्रभुरभवदतः श्रीहीरनामा गणस्य ।
अकबरनरराजां यः समाजं ररञ्ज प्रकृतसुकृतवाग्भिः पुण्यनैपुण्यभाग्भिः ॥ १७ ॥
हरिरपि दिवि सूरेर्यस्य सत्कीर्तिवार्त्तां सदसि विबुधसूरेर्वाचि सम्यग् निशम्य ।
रमयति वसुधायां स्वं मनोऽमुं दिदृक्षुर्नमयति न सुधायामप्सरस्संनिधायाम् ॥ १८ ॥
वदति निगदसिद्धन्यायतोऽप्यस्य धर्मोन्नयनविजयवार्त्तां गीष्पतिर्वर्षकोट्या ।
नवनवरसरीत्या संसदि स्वर्गराजः प्रभवति न तथापि व्यापिनीं तां समाप्तुम् ॥ १९ ॥

कलिललितममुष्मिन्नभ्युदीनेऽपनीतं
श्रमणमणिषु साक्षाद् वीररूपे गणीन्द्रे ।
अविकृतकृतलक्ष्म्या जङ्गमः सङ्गमोऽभूत्
प्रतिपदमपि सूरेर्भाग्ययोगैः स्फुरद्भिः ॥ २० ॥

अचरमजिनवारे या न वाऽऽरेक्यते ज्ञैर्जनवृजिननिहन्त्री धर्मलीला सुशीला ।
परमगुरुविहारेऽभ्युद्धृतार्हद्विहारे समजनि जनितश्रीः साऽप्यशेषाऽविशेषात् ॥ २१ ॥
कविभिरभिनवार्थैर्यत् प्रवृत्तिः प्रबद्धा सहृदयजनभाव्ये हीरसौभाग्यकाव्ये ।
अथ कथमहमस्या विस्तरायोन्नताऽऽस्यः पशुशिशुरिव हृद्यः स्यां बुधस्योपहास्यः ॥ २२ ॥

---

[ 15 ] 1 'मुनिकुवलयसोमः' मुनयः साधवस्त एव कुवलयानि कुमुदानि तेभ्यश्चन्द्र इव । (५०) 'सोमतः सुन्दराह्वः' श्रीदेवेन्द्रसूरिपट्टे पञ्चाशत्तमः श्रीसोमसुन्दरसूरिरजनि । (५१) 'मुनिशब्दात् सुन्दरः' श्रीसोमसुन्दरसूरिपट्टे एकपञ्चाशत्तमः श्रीमुनिसुन्दरः सूरिर्बभूव । (५२) 'रत्नतः शेखराऽऽख्यः' श्रीमुनिसुन्दरसूरिपट्टे द्विपञ्चाशत्तमः श्रीरत्नशेखरसूरिः संभूतः । (५३) 'वरलक्ष्मीसागरः' श्रीरत्नशेखरसूरिपट्टे त्रिपञ्चाशत्तमः श्रीलक्ष्मीसागरसूरिरजायत ।

[ 16 ] (५४) 'सुमतिसाधुः' श्रीलक्ष्मीसागरसूरिपट्टे चतुष्पञ्चाशत्तमः श्रीसुमतिसाधुसूरिः संजज्ञे । (५५) 'विमलः श्रीहेमपूर्वः' श्रीसुमतिसाधुसूरिपट्टे पञ्चपञ्चाशत्तमः श्रीहेमविमलसूरिर्बभूव । (५६) 'विमलनामाऽऽनन्दशब्द०' श्रीहेमविमलसूरिपट्टे आनन्दविमलसूरिर्बभूव ।

[ 17 ] (५७) 'विजयदानः सूरिः' श्रीआनन्दविमलसूरिपट्टे सप्तपञ्चाशत्तमः श्रीविजयदानसूरिर्बभूव । (५८) 'श्रीहीरनामा' श्रीविजयदानसूरिपट्टेऽष्टपञ्चाशत्तमः श्रीहीरविजयसूरिः संजज्ञे । 2 'उच्चावदानः' उच्चैः प्रशस्तकर्म यस्य सः । 'प्रकृतसुकृतवाग्भिः' प्रकृतानि च तानि सुकृतानि पुण्यानि च प्रकृतसुकृतानि, वाचः वचांसि येषां तैः ।

[ 19 ] 3 'निगदसिद्धन्यायतः' सत्यकथनन्यायात् 'निगदः रोकड' इति भाषायाम् । 4 'धर्मोन्नयनविजयवार्त्ताम्' धर्मस्योन्नयनमुन्नतिस्तस्य विजयवार्त्ता विजयकथा ताम् । 5 'गीष्पतिः' बृहस्पतिः 'गीर्बृहत्योः पतिः' इति हैमः [ अभि० चिं० कां० २ श्लो० ३३ ] 6 'नवनवरसरीत्या' नवीनो वीरशृङ्गारादिरसः रीतिः गौड्यादिस्तया ।

[ 20 ] 7 'कलिललितम्' कलिरन्त्ययुगं तस्य ललितं लीलां क्रीडामित्यर्थः । 'कलिर्बिभीतके शूरे विवादेऽन्त्ययुगे युधि' इति हैमः [ अने० सं० कां० २ श्लो० ४८९ ] ।

[ 21 ] 8 'आरेक्यते' शङ्क्यते । 'रेकृङ्' शङ्कायामिति धातोः क्यपि वर्तमाने रूपम् । 9 'ज्ञैः' पण्डितैः । 10 'जनवृजिननिहन्त्री' जनानां वृजिनानि पापानि दुःखानि वा निहन्त्री नाशकर्त्री । 11 'अभ्युद्धृतार्हद्विहारे' अभ्युद्धृताः जीर्णोद्धाराः कृता अर्हतां विहाराश्चैत्यानि येन स तस्मिन् ।

[ 22 ] 12 'कविभिः' देवविमल-हेमविजयादिकविभिः-हीरसौभाग्य-विजयप्रशस्त्यादिमहाकाव्यानां कर्तृभिः कविभिः । 13 'अस्याः' प्रवृत्त्याः

तदनु विजयसेनः सूरिराडस्य पट्टे दिनकरकरणिः स्वर्नाथपूज्यो बभासे ।
अकबरनरचक्री यस्य चक्रे प्रशंसां सदसि विजयमस्य प्रेक्ष्य [1]विप्रौघवादे ॥ २३ ॥
सुरपतिमिव साक्षान्नव्यदिव्यर्द्धिभाजमकबरनरराजं बोधयन् [2]साऽवरोधम् ।
गणिगणमणिहीरः पूर्वदेशे विहारात् स विजयमुपलेभे मोहमुच्छिद्य सद्यः ॥ २४ ॥
गुरुरिव गुरुशिष्यः स्यादितीवोत्तरस्याम[3]कबरनरशक्राभ्यर्चितो [4]लाभपुर्याम् ।
[5]उपनतविजयश्रीर्मोहसर्वस्वभङ्गात् स गुरुविजयसेनो गीयतेऽद्यापि भूम्याम् ॥ २५ ॥
इति जिनवरपट्ट[6]श्रेणिमालाप्रसूनैर्मुनिपतिभिरकारि *[7]स्फारविद्याद्यनूनैः ।
स्वसमयमनुजीव्य† प्रौढमोहप्रघातात् कति कतिचन वारान् दिग्जयो जैनराज्ये ॥२६॥
बहुगुणबलशक्तिप्राप्त्युपायोदिताऽऽशाविजय इह कवीन्द्रैर्विस्तरात् कैर्निगद्यः ।
[8]यतिपतिमतिलभ्यः सभ्यतुष्ट्यै समासात् कथमपि कथयामस्तं तथापि प्रशस्तम् ॥ २७ ॥
तदनु तदनुभावादेव देवस्वरूपी
विजयिविजयदेवः श्रीगणेन्दुर्बभूव ।
किमुत ! विजयदेवच्छद्मनाऽस्यावतीर्णो
भरतभुवि जिनानां भक्तये व्यक्तयुक्त्या ॥ २८ ॥
प्रवचनमुपदिश्योद्दिश्य [9]भव्याङ्गभाजः प्रति[10]विषयविहारैर्धर्मकर्मप्रवृत्तिम् ।
कुनयमपनयन् यस्ते[11]निवांस्तेन मुक्तेः पथि पथिकजनानां [12]सार्थनाथायते स्म ॥ २९ ॥
भजति जिनमतस्य प्राज्यसाम्राज्यमस्मिन् रजति सुकृतिलोकश्चैत्यनित्यार्चनासु ।
अमलकमलजाग्रद्भूरिसौरभ्यलुभ्यद्भ्रमररवमिषाद् दिग् गायतीवास्य कीर्त्तिम् ॥ ३० ॥
अभिनवभवदर्हच्चैत्यमूर्द्धध्वजौघैः [13]परमगुरुगरीयःकीर्त्तिबाला ननर्त्त ।
[14]अभिनयमिव तस्याः प्रेक्ष्य [15]रम्भाऽप्यदम्भाद् [16]विकिरति कुसुमानि [17]स्फारतारामिषेण ॥ ३१ ॥

---

[ 23 ] (५९) 'विजयसेनः सूरिराट्' श्रीहीरविजयसूरिपट्टे एकोनषष्टितमः श्रीविजयसेनसूरिः संजज्ञे ।

1 'विप्रौघवादे' पञ्चशतविप्रैः सह वादं कुर्वाणे ।

[ 24 ] 2 'सावरोधम्' अन्तःपुरसहितम् 'शुद्धान्तः स्यादन्तःपुरमवरोधोऽवरोधनम्' इति हैमः [ अभि० चिं० कां० ३ श्लो० ३९१ ]

[ 25 ] 3 'अकबरनरशक्राभ्यर्चितः' अकबरो नृपतिः नरेषु शक्र इन्द्र इवेति अकबरनरशक्रस्तेनाभ्यर्चितः पूज्यः । 4 'लाभपुर्याम्' देहलीति नगर्याम् । 5 'उपनतविजयश्रीः' उपनता प्राप्ता विजयश्रीर्लक्ष्मीर्यस्य सः ।

[ 26 ] 6 '°श्रेणिमालाप्रसूनैः' श्रेणिः पङ्क्तिरेव माला तस्याः प्रसूनैः पुष्पैः । 7 'स्फारविद्याद्यनूनैः' स्फारा विपुला या विद्या साऽऽदौ यस्य स स्फारविद्याद्यस्तेनानूनैः ।

[ 27 ] 8 'यतिपतिमतिलभ्यः' यतीनां पतयस्तेषां मतिभिर्लभ्यः प्राप्यः ।

[ 28 ] (६०) 'विजयदेवः' श्रीविजयसेनसूरिपट्टे षष्टितमः श्रीविजयदेवसूरिः संबभूव ।

[ 29 ] 9 'भव्याङ्गभाजः' भव्यप्राणिनः । 10 '°विषय°' विषयो देशः । 11 'तेनिवान्' विस्तारं कृतवान् । 'तनूयी विस्तारे' इति धातोः शतृप्रत्ययाद् रूपम् । 12 'सार्थनाथायते' सार्थनाथः वृन्दस्वामीवाऽऽचरतीति सार्थनाथायते । 'सार्थो वृन्दे वणिग्गणे' इति हैमः [ अने० सं० कां० २ श्लो० २२५ ]

[ 31 ] 13 'परमगुरुगरीयःकीर्तिबाला' परमश्चासौ गुरुश्चेति परमगुरुस्तस्य गरीयसी कीर्तिः सैव बाला । 14 'अभिनयम्' व्यञ्जकम् 'व्यञ्जकोऽभिनयः समौ' इति हैमः [ अभि० चिं० कां० श्लो० १९६ ] 15 'रम्भा' सुरपत्नी 'रम्भा त्रिदशभामिन्यां कदल्यां च' इति हैमः [ अने० सं० कां० २ श्लो० ३१५ ] 16 'विकिरति' क्षिप्यति 'कॄ विक्षेपे' इति धातोः रूपम् । 17 'स्फारतारामिषेण' स्फाराः विकसिताः यास्तारास्तारकास्तासां मिषेण व्याजेनेत्यर्थः ।

---

* P स्फारि° । † P वीप्य ।

विभवफलमभीप्सुर्भव्यलोकः प्रभूणां सदसि सदुपदेशं प्राप्य देवप्रतिष्ठाः ।
व्यरचयदचिरात् तत्प्रीणने[1]ऽद्यापि देवा न धरणि[2]मवतीर्य स्वं नरान् दर्शयन्ति ॥ ३२ ॥
प्रवचनकुशलानां रम्यवात्सल्यकर्मण्य[3]विरलरसवत्याः[4] प्रोद्भवत्सौरभेण ।
भुवि फणभृदधीशो[5]ऽप्युन्नमन्मौलिरास्त[6] भुवनजनहिताय स्यान्न किं पुण्यकार्यम् ॥ ३३ ॥
प्रतिपदमदसीयश्रेयसः प्राज्यरागा[7]दनुपमशमभाजामाश्रमानन्वतिष्ठन् ।
तपगणगुणनिष्ठाः श्रावकाः सप्रतिष्ठा मुनिजनपठनेऽभूत् तेषु घोषोऽपि नान्याः[8] ॥ ३४ ॥
सविनयमिदमीयाऽऽदेशमासाद्य सद्यस्समयनयविदो[9]ऽत्र प्रौढगीतार्थपार्थाः ।
दिशि दिशि विचरन्तश्चारुचारित्रबोधं विदधुरधुतलज्जा[10] जैनधर्मेऽतिसज्जाः[11] ॥ ३५ ॥
कुमतरत[12]विनाशाद् बोधिहेतुप्रकाशाज्जिनभवनविधानाद् योगिनां संनिधानात् ।
अतनुत सनिसर्गं[13] श्रावकः पुण्यसर्गं विजितदुरितवर्गं[14] मोहवृत्तेर्विसर्गम् ॥ ३६ ॥
मरुधरणि-सुराष्ट्रा-गूर्जरत्रादिदेशेष्वभयमथ विहृत्य स्तुत्यसत्कृत्यलाभात् ।
विषयगणललाटे मेदपाटे जगाम मुनिपतिरतिशायी तेजसा तीव्रधाम्नः ॥ ३७ ॥
नरपतिरपि तत्र श्रीजगत्सिंहनामा गुरुचरणपयोजे योजयँश्चावनामम् ।
वचसि रसिकवृत्त्या जीवरक्षां प्रपेदेऽनिमिषवधनिषेध[15]स्तेन जज्ञे सरस्योः[16] ॥ ३८ ॥
परिपतितजिनौकांस्युद्धरन्[17] शुद्धबुद्धिः स्वमपि[18] नरकपातादुद्दधार क्षितीशः ।
गुरुरपि सुनिवेशे सर्वदेशे चकाराविरतिविरतिमद्भिस्तीर्थयात्राः सहैव ॥ ३९ ॥
पुनरपि समियाय श्राद्धवर्गं पुपूषुः[19] सपदमहमदाद्यं वादमत्यादरेण ।
युगपरिमित[20]मासान् जातपुण्यप्रकाशान् स्थिरतरचरणस्थ[21]स्तस्थिवानुत्सवेन ॥ ४० ॥
गुरुतरगणभारं भूरिचिन्तावतारं निजबलमसहायं ध्यानधारान्तरायम् ।
उचितगुणनिकायं चिन्तयन्नञ्जसा यं संपदि विजयसिंहं[61] यौवराज्ये न्यधत्त ॥ ४१ ॥

---

[ 32 ] 1 'तत्प्रीणने' विजयदेवसूरिं प्रीणयितुम् । 2 'धरणिम्' पृथ्वीम्, धरणिशब्दः ह्रस्वो दीर्घोऽपि । 'अवन्यवनिधरणी धरणिर्धरिया धरा' इति साधुसुन्दरः [ शब्दरत्नाकरे कां० ४ श्लो० ३ ]

[ 33 ] 3 'रम्यवात्सल्यकर्मणि' मनोहरसाधर्मिकवात्सल्यकार्ये । 4 'अविरलरसवत्याः' निरन्तरपाकस्थानस्य । 'सुदशाला रसवती पाकस्थानं महानसम्' इति हैमः [ अभि० चिं० कां० ४ श्लो० ६४ ] 5 'फणभृदधीशः' सर्पराजः वासुकिर्वा । 6 'आस्त' उपविष्टः । 'आसिक् उपवेशने' इति धातोः ह्यस्तन्यां रूपम् ।

[ 34 ] 7 'प्राज्यरागाद्' गाढस्नेहात् । 8 'घोषोऽपि नान्याः' नन्दिघोषः बन्दिघोषः ।

[ 35 ] 9 'समय-नयविदः' समयः सिद्धान्तः नयः नीतिस्तयोर्विदः वेत्तारः । 10 'अधुतलज्जाः' अधुता-अचलिता लज्जा व्रीडा येषां ते । 11 'अतिसज्जाः' अतिसंनद्धाः ।

[ 36 ] 12 "°रत°" रतं मोहनम् । 13 'सनिसर्गम्' सदानम् । 14 'विजितदुरितवर्गम्' विजितं दुरितानां पापानां वर्गं समूहं येन तम् ।

[ 38 ] 15 'अनिमिषवधनिषेधः' अनिमिषा मत्स्यास्तेषां वधनिषेधः हिंसाप्रतिषेधः । 16 'सरस्योः' उदयसागर-पीछोलाऽऽख्यतडागयोः ।

[ 39 ] 17 'परिपतितजिनौकांसि' खण्डितजिनमन्दिराणि । 18 'स्वमपि' आत्मानमपि ।

[ 40 ] 19 'पुपूषुः' परीतुमिच्छुः 'पृश् पालनपूरणयोः' इति धातोः सन्नन्तत्वादुप्रत्ययः । 20 'युग०' युगाश्चत्वारः, चातुर्मासिकम् । 21 'स्थिरतरचरणस्थः' स्थिरतरमतिशयेन दृढं चरणं चारित्रं तस्मिन् तिष्ठतीति ।

[ 41 ] (६१) 'विजयसिंहम्' 'श्रीविजयदेवसूरिपट्टे एकषष्टितमः श्रीविजयसिंहसूरिरभवत् ।

अथ स विजयसिंहः सूरि[1]रुत्सारितारि[2]र्धृतधृतितरवारि[3]र्मोहदावाग्निवारिः ।
गुरुहृदयम[4]राङ्क्षीद् दुष्टकर्मा[5]ण्यभाङ्क्षीत् तपगणमनुशासद् [6]वारण-स्मारणाद्यैः ॥४२॥
विमलगिरिशिरस्थश्रीयुगादीशयात्राकरण[7]नियतचेता देवसूरिश्चचाल ।
अनुगतबहुसङ्घ[8]स्यन्दना-श्वोष्ट्र-[9]नागोच्छलदविरलधूली रुद्धदिक्[10]चक्रवालः ॥ ४३ ॥
अनुपदबहुरूप्य-स्वर्णमुद्राङ्कपूजाकरण[11]वितरणाद्यैर्ग्राम्यसङ्घेन पूज्यः ।
मुदितजनसुराष्ट्रासर्वतीर्थाण्यनंसीदुचितनगरजातज्येष्ठसंस्थानरीत्या ॥ ४४ ॥
[12]अभिनवनगरस्थं श्रीगुरुं [13]वारिदर्त्तौ चतुरचतुरिकाऽऽख्या श्राविका दक्षिणस्याः ।
सकलनगरसङ्घानुज्ञयाऽभेत्य भक्त्या विनयमभिनयन्ती सोत्सवं तं ववन्दे ॥ ४५ ॥
[14]प्रतिकृतिशतमत्र श्रीजिनानां नवीनं [15]समहमहमिकाभृद् भूरिवित्तव्ययेन ।
सकलजनसमक्षं संप्रतिष्ठाप्य सूरे[16]रशन-वसनदानैः प्रीणयामास सङ्घम् ॥ ४६ ॥
अवसरमधिगम्य स्वं प्रणम्याशयं सा सदसि गणगुरूणामागमं दक्षिणस्याम् ।
[17]प्रबलसुकृतलब्ध्यै नाम विज्ञापयन्ती गुरुपरिचरणेऽस्थाद् वत्सराणां चतुष्कम् ॥४७॥
प्रतिदिनमिदमीयां देशविज्ञप्तिवाचं मनसि गणधरेन्द्रो निश्चयेना[18]नुनीय ।
गमित[19]जलदकालस्तामलिप्ते [20]व्यहार्षीत् [21]सहसि हसितलक्ष्म्या आढ्यया वृद्ध्याऽस्मा॥४८॥
अथ चलति मुनीन्द्रेऽनुव्रजद्राजसङ्घप्रबलबलसमूहादुच्छलद्धूलिपुञ्जैः ।
जलधिजलविशोषाऽऽशङ्कया दक्षिणाशा स्वविषयपरिवृद्ध्याऽलं हसन्तीव रेजे ॥४९॥
स्फुरति मुनिमहेन्द्रे [22]सौरतेजोऽधिकत्वे हृतवसुरिव भास्वान् प्रेरयन्नञ्जसाऽश्वान् ।
जलधिशरणमापद् व्यापदं छेत्तुकामस्तत इव धनराशिं लब्धवानब्धिपार्श्वे ॥ ५० ॥
पथि नगरजनस्याभ्यर्थनातो[23]ऽवरङ्गात् परपुरि परमेज्यः प्रावृषं संनिनाय ।
तदनु तपसि चर्यामाचरंश्चारुविद्यापुरमतुलमहेन प्राविशद् भाविशर्मा ॥ ५१ ॥

---

[42] 1 'उत्सारितारिः' उत्सारिताः दूरीकृता अरयो येन सः । 2 'धृतधृतितरवारिः' धृतो धृतेर्धैर्यस्य तरवारिः खड्गो येन सः । 3 'मोहदावाग्निवारिः' मोहरूपो यो दावाग्निः दावानलस्तं शीतलीकर्तुं वारि जलमिव । 4 'अराङ्क्षीत्' ररञ्ज 'रञ्जीं रागे' इति धातोरद्यतन्यां रूपम् । 5 'अभाङ्क्षीत्' बभञ्ज 'भञ्जोंप् आमर्दने' इति धातोरद्यतन्यां रूपम् । 6 'वारणा-स्मारणाद्यैः' वारणा-स्मारणादिशिक्षाप्रकाराः ।

[43] 7 '°नियतचेताः' निश्चितमनाः । 8 'स्यन्दन°' स्यन्दना रथाः । 9 'नाग°' नागा हस्तिनः । 10 '°चक्रवालः' चक्रवालः मण्डलम् । 'चक्रवालं तु मण्डले' इति हैमः [ अने० सं० कां० ४ श्लो० ३०१ ]

[44] 11 '°वितरणाद्यैः' दानादिभिः ।

[45] 12 'अभिनवनगरस्थम्' नवानगरस्थितम् । 13 'वारिदर्तौ' वर्षाकाले ।

[46] 14 'प्रतिकृतिशतम्' मूर्तीनां शतसङ्ख्याप्रमाणम् । 15 'समहमहमिकाभृद्' सम्यक् प्रकारेणाहमहमिकां परस्परं शक्तोऽहं शक्त इति स्पर्द्धास्वरूपां बिभर्तीति । 16 'अशन-वसनदानैः' अशनं भोजनं वसनं वस्त्रं च तयोर्दानैः ।

[47] 17 'प्रबलसुकृतलब्ध्यै' प्रबलानि दृढानि च तानि सुकृतानि पुण्यानि तेषां लब्ध्यै प्राप्त्यै ।

[48] 18 'अनुनीय' विज्ञप्य । 19 '°जलदकालः' वर्षाकालः । 20 'व्यहार्षीत्' विजहार विपूर्वकं 'हृंग् हरणे' इति धातोः अद्यतन्यां रूपम् । 21 'सहसि' मार्गशीर्षे । 'मार्गशीर्षः सहः सहाः' इति हैमः [ अभि० चिं० कां० २ श्लो० ६६ ] ।

[50] 22 'सौरतेजः°' सूरस्यापत्यं सौरः शनैश्चरस्तस्य तेजः प्रकाशः ।

[51] 23 'अवरङ्गात्' औरङ्गाबादनगरात् ।

अकृत कृतविमेयाँस्तत्र मासान् निवासं गुरुरुरुतरभक्तिश्राद्धविज्ञप्तियोगात् ।
मुनिहरिमनुनीय श्रद्धया देवचन्द्रो व्यरचयत वरिष्ठां देवबिम्बप्रतिष्ठाम् ॥ ५२ ॥
तदनु मनुजसङ्घेनान्वितस्तीर्थयात्राफलबलमभिलिप्सुर्मार्गशीर्षे चचाल ।
जिनवरकलिकुण्डाह्वानपार्श्वं प्रणम्यायतकरकरहेडास्थायिपार्श्वं निनंसुः ॥ ५३ ॥
पथि विचरति चास्मिन् दक्षिणस्याः पयोधिर्भयतरल इवाभूल्लोलकल्लोलदम्भात् ।
मुनिरपि घटजन्मा क्षारतां मां निनाय मुनिपतिरथ कर्त्ता किं ममेति प्रबुध्य ॥ ५४ ॥
परमगुरुरिहायं सर्वसौख्याभ्युपायं विमृशति च कथश्चित् कस्यचिन्नापकर्त्ता ।
मगधजनमुखेभ्यः सम्यगेतन्निशम्य जलधिरधिविनोदं नृत्यतीवोत्तरङ्गैः ॥ ५५ ॥
तटनिकटमुपेतेऽस्मिन् पयोराशिरासीन्मुदित इव तरङ्गोन्मुक्तमुक्ताः प्रवर्षन् ।
अभिलुलितपयोभिर्धौतपादः प्रसादमविरललहरीभिर्मन्यमानो मुनीन्दोः ॥ ५६ ॥
मुनिपतिसहचारिश्राद्धसङ्घे तुरङ्गा अभिजिगमिषुसिन्धावुल्लसन्तस्तरङ्गाः ।
ध्वजपटलममुष्मिन्नुल्ललास द्विपानां पृथुतरमितरत्राऽपोतपोतोत्तमानाम् ॥ ५७ ॥
अभिरमति वधूनां वृन्दमस्मिन् सुरूपं जलनिधिमधिगम्य स्पर्द्धयेवामरीणाम् ।
दिशति कनकमुद्रा मार्गणेभ्यो महेभ्यः प्रसरति मणिमुक्ताश्रेणिराकीर्यमाणा ॥५८॥
पटुपटहनिनादस्तत्र सङ्घे जगर्ज जलगजकुलमेवोर्ज्जस्वलं चापरत्र ।
दृढरुचिचतुराऽऽख्या श्राविकारत्नमस्मिन् जयति तदितरस्मिँश्चारुलक्ष्मीः स्वरूपात् ॥५९॥
कृतजनपदतीर्थस्तीर्थरक्षासु दक्षः कतिपयदिवसान् स श्राद्धलोकेन साकम् ।
न्यगमयदुदधेस्तत् सैकतं प्राप्य रम्यप्रभुरभिनवपार्श्वद्वैतपूजाऽनुरोधात् ॥ ६० ॥
न्यवृतदथ मुनीनां सिन्धुरः सिन्धुरोधोभुवमिव परिपूय स्तूयमानो महेभ्यैः ।
सविनयवाचाऽभ्यर्थितः सैष विर्धापुरवरमधितष्ठौ श्रीचतुर्मासकाय ॥ ६१ ॥
कतिपयदिवसान्ते चारुबर्हानिनाम्ना[10] पुरवरमधिजग्मे स्वामिनानेन सद्यः ।
बहुनगरविभूषायोगतः प्रौढपूषाऽभ्युदयनरुचिरासीत् स्वर्ण-रूप्यांशुकौघैः ॥ ६२ ॥
अतिशयितमहिम्नामुत्सवानां वितानैर्गणगुरुरिह नीत्वा प्रावृषं[11] कार्तिकान्ताम् ।
पुनरपि च विजह्रे राष्ट्रमुख्ये तिलिङ्गे प्रथममभिनिनंसुस्तीर्थपं[12] तीर्थपङ्क्तौ ॥ ६३ ॥

---

[ 52 ] 1 'कृतविमेयान्' चतुःपरिमितान् । 2 'मुनिहरिम्' मुनीन्द्रम् ।

[ 54 ] 3 'घटजन्मा' अगस्त्यः ।

[ 55 ] 4 'मगधजन॰' मगधः स्तुतिवंशजः; यदाहुः 'मागधाः स्तुतिवंशजाः' ।

[ 57 ] 5 'अपोतपोतोत्तमानाम्' अपोता अबालाश्च ते पोताश्च दशवर्षीयाः गजास्तेषूत्तमानां श्रेष्ठानाम् ।

[ 61 ] 6 'सिन्धुरः' हस्ती । 7 'सिन्धुरोधोभुवम्' पयोधिकुलपृथ्वीम् । 8 'परिपूय' पवित्रीकृत्य 'पूग्श् पवने; पवनं शुद्धिः' इति धातो क्त्वो यपि रूपम् । 9 'अधितष्ठौ' स्थितः ।

[ 62 ] 10 'चारुबर्हानिनाम्ना पुरवरम्' बर्हानपुर इति नाम्ना श्रेष्ठनगरम् ।

[ 63 ] 11 'प्रावृषं कार्तिकान्ताम्' आषाढमासतः कार्तिकमासपर्यन्तं वर्षाकालम् । 12 'तीर्थपम्' तीर्थं साधु-साध्वी-श्रावक-श्राविकाणां तीर्थं सङ्घं पातीति तीर्थङ्करम् ।

जिनपतिनवबिम्बस्थापनां [1]भाग्यपुर्यां [2]यवनपतिनिबोधात् सोत्सवं स प्रणीय ।
जनपदमपि सम्यग् भावयन् जैनमार्गे पुनरपि पुरि विद्यापूर्विकायामियाय ॥ ६४ ॥
भृशमकृशमहेनाभ्यर्थितस्तत्र भव्यैः स्वयमधिकृतवान् स प्रावृषौ सान्तरं द्वे ।
सुकृतभरविशेषा जज्ञिरे ये तदानीं क इह ननु समर्थस्तानशेषान् प्रवक्तुम् ॥ ६५ ॥
[3]सुरभिवधनिषेधं व्यादिशत् [4]पातिसाहिः सकलजनपदेऽपि श्रद्धया शुद्धबुद्धिः ।
परमगुरुकरेणाकारयद् देवचन्द्रः प्रबलतरमहेनान्यां जिनेन्द्रप्रतिष्ठाम् ॥ ६६ ॥
[5]विबुधपदनिवेशस्तत्प्रतिष्ठामहेऽभूदमलचरणभाजां दक्षिणस्यां गणेन्दोः ।
बहुविदमरचन्द्रे वाचकश्रीर्दिदीपे गुरुचरणनिषेवा देववल्लीवदेव ॥ ६७ ॥
अगमयदसमानां पुण्यवृत्त्या समानां वरनगरनिवेशोष्वष्टकं दक्षिणस्याम् ।
सुकृतविभवलाभं लम्भयन्नात्मनि स्वे प्रसृमरवरकीर्तिर्देवसूरिः स विश्वे ॥ ६८ ॥
परमगुरुविहाराद् दक्षिणा दक्षिणासीज्जिनपतिवरधर्मे मोहसम्मोहनेन ।
इति कृतविजयोऽयं दक्षिणस्याः समायादहमदपदवादश्रीपुरं गूर्जरस्थम् ॥ ६९ ॥

निजवपुषि विचिन्त्य [6]स्थाविरीं कान्तिमीशः
परिणतिमपि दिव्यां स्वां द्विधा साऽवधानः ।
प्रवचनपटुपट्टे स्थापयामास सूरिं
सविजयविजयादिश्रीप्रभं प्रौढनाम्ना ॥ ७० ॥

[7]विबुधमपि च [8]वीरं वीरपट्टश्रिया तं [9]कृतपरिणययोगं वीक्ष्य शुद्धोपयोगम् ।
मुदमुदवहदुच्चैः श्राद्धसङ्घः समग्रो रविमिव दिवसश्रीसंयुतं कोकलोकः ॥ ७१ ॥
परमगुरुरिदानीं तैः सहाऽऽ[10]चार्यधुर्यैर्व्यहरत कृतकृत्यः क्ष्मातले निर्विकल्पः ।
[11]हिमरुचिरिव दीपैर्ध्वस्तसर्वान्धकारे जगति मतिमदर्च्यः शीतले [12]शीतलेश्यः ॥७२॥
कतिपयशरदन्ते श्रीसुराष्ट्रां भदन्ते भजति सुरसमाजोऽभ्याजगामे[13]शसत्कः ।
अनशनमनुगृह्णेतद्गिरा स्वर्गिराजः समितिममितिजापादाऽऽप [14]गच्छप्रजापः ॥७३॥

---

[ 64 ] 1 'भाग्यपुर्याम्' तिलङ्गदेशे गलकुण्डप्रत्यासन्नभाग्यनगरे । 2 'यवनपतिनिबोधात्' यवनपतिः पातिसाहिश्रीकुतबसाहिनः निबोधात् प्रतिबोधात् ।

[ 66 ] 3 'सुरभिवधनिषेधम्' गोहननप्रतिषेधम् । 4 'पातिसाहिः' पातिसाहिईदलसाहिनामा ।

[ 67 ] 5 'विबुधपदनिवेशः' श्रीवीरविजयानां एकाधिके सप्तदशशतवर्षे श्रेष्ठिदेवचन्द्रकृतप्रतिष्ठायां पंन्यासपदं दत्तवान् ।

[ 70 ] 6 'स्थाविरीम्' स्थितशीलाम् । (६२) °विजयादिश्रीप्रभम्' श्रीविजयसिंहसूरिपट्टे द्वाषष्टितमः श्रीविजयप्रभसूरिः प्रस्तुतकाव्यस्य नायकोऽजनि ।

[ 71 ] 7 'विबुधमपि' पंन्यासमपि । 8 'वीरम्' श्रीवीरविजयम् । 9 'कृतपरिणययोगम्' कृतः परिणयो विवाहस्तस्य योगम् । ४ 'कोकलोकः' कोकश्चक्रवाकः स एव लोकः ।

[ 72 ] 10 'आचार्यधुर्यैः' आचार्याः सूरयस्तेषु धुर्याः श्रेष्ठास्तैः । 11 'हिमरुचिः' चन्द्रमाः । 12 'शीतलेश्यः' श्वेतलेश्यावान् ।

[ 73 ] 13 'ईशसत्कः' श्रीविजयदेवसूरिसंनिधौ ।
14 'गच्छप्रजापः' गच्छनायकः ।

व्यधित विजयमुच्चैः प्राग् दिशो हीरसूरिस्तदनु विजयसेनश्चाप्युदीच्या[1] विशिष्य ।
गणपतिरयमेवं[2] दक्षिणामण्डलस्य कुनयविषयमोहं द्राग् निराकृत्य लोके ॥ ७४ ॥

श्रीजैनेश्वरशासनं क्षितितले प्रोद्भाव्य[3] भव्यात्मना-
मुद्धाराय भवाम्बुधेः प्रबुबुधे यो योगवृत्त्या स्वयम् ।
गच्छेन्दुर्[4]विजयादिदेव भगवान् देवः प्रकृत्या सतां
देयान्मोदमहोदयं[5] सविजयं विश्वावभासाश्रियम्[6] ॥ ७५ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
कथानायकगुरोर्दिग्विजयवर्णनो नाम चतुर्थः सर्गः ॥ ४ ॥

---

[74] 1 'उदीच्याः' उत्तरदिशः । 2 'गणपतिः' गच्छपतिः ।
[75] 3 'प्रोद्भाव्य' प्रकाश्य । 4 'गच्छेन्दुः' गच्छे इन्दुश्चन्द्र इव । 5 'मोदमहोदयम्' आनन्दस्वरूपं महोदयं मोक्षम् । 'महोदयः सर्वदुःखक्षयः' इति हैमः. [ अभि० चिं० कां० १ श्लो० ७४ ] । 6 'विश्वावभासश्रियम्' जगत्प्रकाशलक्ष्मीम् ।

## पञ्चमः सर्गः ।

ऐँ ह्रीँ नमः ।

अथ गणधरस्तत्पट्टश्रीप्रभुर्विजयप्रभः
समभवदलं[1]भूष्णुर्भूमी[2]स्पृशां भ्रमविच्छिदे ।
[3]अभिनवसहस्रांशुप्रांशुप्रभाभरजित्वरः
[4]कमनविजयी शीलोन्मीलद्रुचा [5]समुदित्वरः ॥ १ ॥
प्रतिदिनमयं तेजोवृद्ध्याऽन्तरारिपराजयं
[6]कुशलरचितैर्[7]मन्त्रैस्[8]तन्त्रैश्चिकीर्षुरिवात्मना ।
गणभरधुरं [9]विन्यस्यैवो[10]पधेयजने धियाऽ-
गमयदमदः कश्चित् कालं [11]नयाऽऽहितलोचनः ॥ २ ॥
सबलमु[12]पधाशुद्धं बुद्धं नियोज्य बलं क्रमात्
समयमुचितं दिग्यात्रायामुपस्थितमामृशन् ।
अथ [13]शमभृतां चक्री [14]चक्रेऽभिषेणनमुत्तरां
[15]कुमततमसाऽऽकीर्ण्णां यातुं विमोहजिगीषया ॥ ३ ॥
प्रभुविहरणे [16]द्वीपाऽऽह्वानात् पुरः स्तुतिमङ्गलं
जय जय विभोरासीदाशीर्वचः [17]श्रुतिसंहितम् ।
चतुरतुरगः सर्वाङ्गीणस्फुटाऽऽभरणान्वितोऽ-
[18]भ्यस(ष)जदगजद् गजेन्द्रर्जध्वनिर्नगराध्वनि ॥ ४ ॥
[19]सुभगविहगः [20]सव्येऽ[21]सव्ये यथार्हतया रुता-
न्यकृत सुकृतश्रेणीलाभं प्रतिस्थलमादिशन् ।
[22]जलरुहदृशो [23]मुक्तावर्द्धापनानि वितेनिरे
सतिलकतया विप्रः क्षिप्रं पपाठ ऋचां वचः ॥ ५ ॥

---

[1] 1 'अलंभूष्णुः' शक्तो भवतीत्येवं शीलोऽलं भूष्णुः 'भूजेः ष्णुक्' ५-२-३० । इति सिद्धहेमीयसूत्रात् ष्णुक् प्रत्ययः । 2 भूमीस्पृशाम्' मनुष्याणाम् । 3 'अभिनवसहस्रांशुप्रांशुप्रभाभरजित्वरः' अभिनवः नव्यश्चासौ सहस्रांशुः सूर्यश्चेत्यभिनवसहस्रांशुस्तस्य प्रांशुरुन्नता या प्रभा द्युतिस्तस्या भरः समूहस्तं जित्वरः जयनशीलः । 4 'कमनविजयी' कामदेवविजेता । 5 'समुदित्वरः' सम्यगुदयशीलः ।

[2] 6 'कुशलरचितैः' विज्ञकर्तृभिः । 7 'मन्त्रैः' मन्त्रः रहस्याऽऽलोचनं तैः । 8 'तन्त्रैः' तन्त्रमौषधं तैः । 9 'विन्यस्य' संस्थाप्य । 10 'उपधेयजने' उपधीयते समीपे ढौक्यते भयधर्मार्थकामोपन्यासेनामात्यानामाशयान्वेषणरूपपरीक्षार्थमुपधा; उपधातुं योग्य उपधेयः, उपधेयश्चासौ जनश्चेत्युपधेयजने । यत्कौटिल्यः– 'उपधाभिः शौचाशौचपरिज्ञानममात्यानाम्' । 11 'नयाऽऽहितलोचनः' नयैः नीतिभिराहिते विकसिते लोचने यस्य सः ।

[3] 12 'उपधाशुद्धम्' उपधाभिः शुद्धं पवित्रम् । "भिया धर्मार्थकामैश्च परीक्षा या तु सोपधा" इति हैमः [ अभि० चिं० कां० ३ श्लो० ४०४ ] । 13 'शमभृताम्' शान्तिभृतां साधूनाम् । 14 'अभिषेणनम्' निष्क्रमणम् । 15 'कुमततमसाऽऽकीर्ण्णाम्' मिथ्यात्वरूपान्धकारेण व्याप्ताम् ।

[4] 16 'द्वीपाऽऽह्वानात्' 'दीव'नाम्नो नगरात् । 17 'श्रुतिसंहितम्' छन्दःसहितम् । 18 'अभ्यषजद्' अभिपूर्वात् 'षञ्ज सङ्गे' इति धातोः ह्यस्तन्यां 'स्थासेनि०' २-३-४० इति सिद्धहेमीयसूत्रेण षे कृते रूपम् ।

[5] 19 'सुभगविहगः' सुभगः विजयाशंसी विहगः पक्षी । 20 'सव्ये' वामाङ्गे । 21 'असव्ये' दक्षिणे । 22 'जलरुहदृशः' कमलाक्ष्यः स्त्रियः । 23 'मुक्तावर्धापनानि' मुक्तानां वर्धापनानि 'वर्धापनं वधामणी'ति भाषायाम् ।

जलनिधिजले वेलावृद्धिर्बभूव विभोः पुरः
सकलकलया कार्ये सिद्धेर्महोदयशंसिनी[1] ।
उभयतटयोर्माद्यद्वाद्यावलीपरिवादना-[2]
न्निनदमतुलाऽऽनन्दाद् वृन्दं दिशामिव निर्ममे ॥ ६ ॥
प्रवहणमथारूढे[3] तस्मिन् जगज्जनतारके
स इह सुतरां योगो रेजे द्वयोः समकर्मणोः ।
लवणजलधेर्व्युत्क्रान्त्याऽभूत्[4] प्रभोः किमितो दिना-
ल्लवणिमवचःस्थित्या लोके व्यतिक्रमसूचना[5] ॥ ७ ॥
लवणजलधिः पादौ प्रक्षालयन्निव वीचिभि-[6]
रनुजिगमिषू[7] रागान्मुक्ताफलैस्तमवाकिरत्[8] ।
अभिनवभवत्फेनश्रेण्या सृजन् बृहतीमिवो-[9]
ल्ललितकलिकाहस्तैर्भूयो[10] भ्रमन्निव जग्मिवान् ॥ ८ ॥
प्रतिपदमथ ग्राम्यैः सङ्घैः कृतार्चनवन्दनः
समयवचनाऽऽरोपैर्निघ्नन्[11] विमोहमहाबलम्[12] ।
विमलशिखरिण्यासीनं[13][14] श्रीयुगादिजिनेश्वरं
श्रमणमघवाऽनंसीद्[15] भक्त्या नवस्तवनोक्तिभिः ॥ ९ ॥
लवणिमगुणे[16] सर्वाग्रण्यां गुरोर्बहुगौरवं
समरसविधे प्रागल्भ्यं चौचितीरणलाघवे ।
बहुतररुचिः प्रत्याकारे सुसज्जनकर्मणि
प्रभवति कथं मोहं[17] जेतुं न स प्रभुराहवे[18] ॥ १० ॥

---

[९] १ 'समयवचनारोपैः' समयः सिद्धान्तस्तद्वचनरूपैरारोपैः ।

[१०] २ 'समरसविधेः' समस्य समभावस्य रसविधेः पक्षे सङ्ग्रामपार्श्वे । ३ 'प्रागल्भ्यम्' पाण्डित्यं धृष्टत्वं वा । ४ 'चौचितीरणलाघवे' च पुनः ईरणं प्रेरणं धर्मे तल्लाघवे औचिती । ५ 'प्रत्याकारे' खड्गकोशे आकारं प्रतीति प्रत्याकारं तत्राऽऽहंदाकारे ऋषिवेषे वा । ६ 'सुसज्जनकर्मणि' सज्जनानां कर्म दानादि तत्र पक्षे सज्जनं सेनाया उपरक्षणम् ।

---

[6] 1 'महोदयाशंसिनी' महोदयो महाविजयस्य संसूचिका । 2 'माद्यद्वाद्याऽऽवलीपरिवादनात्' माद्यन्ती चासौ वाद्यावली वादित्राणां समूहस्तस्य परिवादनात् ।

[7] 3 'प्रवहणम्' नावम् । 4 'व्युत्क्रान्त्या' 'विशेषेणोत्क्रान्तिस्तया । 5 'व्यतिक्रमसूचना' व्यतिक्रमं उल्लङ्घनं तस्य सूचना ।

[8] 6 'वीचिभिः' तरङ्गैः । 7 'अनुजिगमिषुः' अनुगन्तुमनुसर्तुं वेच्छुः । 8 'अवाकिरत्' व्यक्षिपत् । 9 'बृहतीम्' वस्त्रम् 'बृहती क्षुद्रवार्ताक्यां छन्दोवसनभेदयोः' इति हैमः [अने० सं० कां० ३ श्लो० ३२५] । 10 'ललितकलिकाहस्तैः' ललिताः कान्ताः कलिका वीचय एव हस्तास्तैः ।

[9] 11 'समयवचनाऽऽरोपैः' समयानुकूलवचनस्वरूपाणामारोपाः आ समन्ताद्रोप्यन्ते लक्ष्ये इति, आरोपा बाणास्तैः । 12 ''बलम्' शक्तिः सैन्यं वा । 13 'विमलशिखरिणि' शत्रुञ्जयनामकपर्वतशिखरे । 14 'आसीनम्' विराजितम् । 15 'श्रमणमघवा' श्रमणाः साधवस्तेषु मघवेन्द्रः ।

[10] 16 'लवणिमगुणे' कान्तगुणे । 17 'मोहम्' कामदेवम् । 18 'आहवे' युद्धे ।

समितिरसिकाश्चेलुः पूर्वं गुरोश्चरणाऽऽशया
रुचिमपि सदाकारे शस्त्रे मुदा दधतस्ततः ।
ललितगतयो दानादुच्चैः करास्सदनेकपाः
प्लुतिपरिचिता गन्धर्वाश्च स्फुरत्कविकामिताः ॥ ११ ॥

प्रणिधिविधिना शुद्धं मार्गं व्यगाहत साऽऽगमं
प्रमुदितसुनासीरश्चक्रे स्थितिं नयसाधनीम् ।
समयवृषभव्यूहे न्यस्यन् भरं विषमाऽऽयुध-
ग्रहजमसकृद् दत्त्वा नृणां परं बहुशोधनम् ॥ १२ ॥

स नयमनयद् वर्षां हर्षाद् घनौघपुरेऽनघ-
स्थितिरनुगतं भक्त्येवाङ्घ्रिं दृशा परिभावयन् ।
प्रतिकृतिशतं चातुर्मास्याः परम्परयाऽऽहृतां
समहमहनि प्राप्ते सौम्येऽभ्यषेचयतायकम् ॥ १३ ॥

उदितमहसा नुन्नः सूरिः क्रमात् सहसाऽचलद्
विमलशिखरिण्यादीशस्य प्रणम्य पदाम्बुजम् ।
अहिमदपदाद् वादस्थानं समेत्य महोत्सवे-
र्गणपतिरिहाऽऽरूढः सिंहासने शुशुभे शुभे ॥ १४ ॥

अधिकृतगुणश्चापस्थानं यथोचितमाहृतः
कृतदृढपरीवारान्निस्त्रिंशकं परिकर्षयन् ।
उपकृतिधनश्राद्धं देशं वशीकृतवान् वशी
पटुतरमतिः सर्वं पश्यँस्तथाऽऽप्तधियां पथा ॥ १५ ॥

[ ११ ] १ 'समितिरसिकाः' समितिरीर्यादिस्तत्र रसिकाः पक्षे सङ्ग्रामतत्पराः । २ 'सदाकारे शस्त्रे' सदाकरे शास्त्रविशेषे इत्यर्थः । ३ 'प्लुति०' घोटकगतिविशेषः स्वरविशेषश्च । ४ 'गन्धर्वाः' अश्वाः गायनाश्च । ५ 'स्फुरत्कविकामिताः' कविकां मुखयन्त्रणं इताः प्राप्ताः 'कविका कवियं मुखयन्त्रणम्' इति हैमः [ अभि० चिं० कां० ४ श्लो० ३१६ ] पक्षे स्फुरत् भासमानं कवेः कामितं कवित्वं येषां ते ।

[ १२ ] ६ 'प्रणिधि०' प्रणिधिः ध्यानं गूढपूरुषश्च । 'हेरिको गूढपूरुषः प्रणिधिः' इति हैमः [ अभि० चिं० कां० ३ श्लो० ३९७ ] । ७ 'सागमम्' सवृक्षं ससिद्धान्तं च । ८ 'व्यगाहत' प्राविशत् । ९ 'प्रमुदितसुनासीरः' आनन्दितशक्रः, नासीरं सैन्याग्रयानम् । १० 'समयवृषभव्यूहे' समये सिद्धान्ते वृषभाः प्रवर्त्तकाः पक्षे मयैरुष्ट्रविशेषैः सहिते वृषभवर्गे । ११ 'विषमाऽऽयुधग्रहजम्' विषमाऽऽयुधः स्मरस्तत्प्रियग्रहजातं पक्षे विषमान्यायुधानि तत्संग्रहजातम् । १२ 'बहुशोधनम्' आलोचनां, [ बहुशो धनम् इति पदविभागे ] बहुवारं धनं वा ।

[ १५ ] १३ '०गुणः' गुणा मूलोत्तररूपाः प्रत्यञ्चा च । १४ 'चापस्थाने यथोचितम्' यथोचितं स्थानं चापः पक्षे चापस्थानम् । १५ '०परीवारात्' परिकराद् गच्छात् कोशाद्वा 'प्रत्याकारः परीवारः कोशः खड्गपिधानकम्' इति हैमः [ अभि० चिं० कां० ३ श्लो० ४४७] १६ 'निस्त्रिंशकम्' धूर्तं तरवारिं वा । १७ 'उपकृतिधनश्राद्धम्' उपकृतिरुपकार एव धनं येषां तादृशाः श्राद्धा यत्र । १८ 'आप्तधियाम्' आप्ता जिनाः प्रत्ययितनरा वा तेषां धियः बुद्धयस्तासाम् ।

[11] 1 'चरणाशयाः' चरणं चारित्रं तस्याशया विचारा येषां ते । 2 'सदनेकपाः' सन्तश्च तेऽनेकपा हस्तिनः सद्रूपा वा ।

[ 13 ] 3 'घनौघपुरे' आधुनिकघोघानगरे । 4 'प्रतिकृतिशतम्' मूर्त्तीनां शतकम् । 5 'समहम्' महोत्सवपूर्वकम् । 6 'अयकम्' अयमित्ययकम् ।

[ 14 ] 7 'उदितमहसा' उदितं च तन्महस्तेजश्चेत्युदितमहसेन । 8 'नुन्नः' ईरितः ।

मुनिनृपतिना [1]स्कन्धावारस्थितिः शरदोद्भवं
व्यरचि निचिता[2]ऽऽचाराणां च क्षितौ [3]स्थितिरक्षता ।
दिशि दिशि समादिश्य प्रौढक्षमाधननायकान्
समुपनयता [2]मोहारातेर्बले शिथिलक्रियाम् ॥ १६ ॥
स्वयमपि गुरुर्वाक्पारुष्यं निरस्य शनैः शनैः
नयपरिचयात् कोशं मित्रं समेधयिताऽर्थतः ।
क्वचन समयं पश्यन् सन्धिं प्रशस्ततया परे-
ष्वनुगुणधिया क्रोधाद्येषु स्फुटं प्रवितेनिवान् ॥ १७ ॥
कमपि विषये मुख्यं कुर्वन्नयं [3]ह्युपचारतां
क्वचन वचनाद् गृह्णन् गौणप्रवृत्तिकृताऽऽदरः ।
क्वचिदपि महोपायैश्चार्थं सुसूत्रतया श्रयन्
[4]प्रवचनमहासाम्राज्यस्य श्रिया विललास सः ॥ १८ ॥
[5]समुदयबलोपेते जाग्रद्गुणे गणिनि प्रभु-
[6]र्न्यधित विधितस्तूर्णं धीरश्रियां पदमादरात् ।
[7]निर्गमनविधेः सद्यः कुर्वन् [8]दमं [9]प्रतिरोधके
शिवमनुपदं तस्माल्लोके प्रियं समभूद् भुवि ॥ १९ ॥
सुकर[10]करणप्रत्याहारक्रियाकुशलः प्रभुः
सकलविषयान् बुद्धेर्योगाज्जिगीषुरिवाऽऽत्मना ।
[11]सहृदयजने जाग्रत्तेजस्तपोधनमुन्नय-
[12]न्नयहरणात् तस्मिन् देशे [13]समञ्जसमादधे ॥ २० ॥
जिनपतिमथो नन्तुं शङ्खेश्वरस्थितमुन्नमत्
[*]फणमणिगणाधीशाऽऽराध्यं ससङ्घतयाऽ[14]नघः ।
अनुचलदनो[15]गन्त्री सम्यग् [16]मरुद्रथसङ्कुले-
ऽध्वनि धनिवरैः पूज्यः पूज्यश्चचाल तपोगणे ॥ २१ ॥

---

[ १६ ] १ 'स्कन्धावारस्थितिः' कटकनिवेशः पक्षे स्कन्धावारे राजधान्यां स्थितिरवस्थानम् । २ '°आचाराणाम्' ज्ञानादीनां चाराणां गूढपुरुषाणाम् । ३ 'स्थितिरक्षता' स्थितिर्व्यवस्था–अक्षता पूर्णा व्यरचि ।

---

[ 16 ] 1 'शरदः' वर्षस्य । 2 'मोहारातेः' मोहः कामदेव एवारातिः शत्रुस्तस्य ।

[ 18 ] 3 'उपचारताम्' गौणम् । 4 'प्रवचनमहासाम्राज्यस्य' प्रवचनमागमस्तत्स्वरूपं महासाम्राज्यं तस्य ।

[ 19 ] 5 'समुदयबलोपेते' समुदयो युद्धं तस्य बलं सैन्यं तेनोपेतं युक्तं तस्मिन् । 6 'न्यधित' स्थापितः; निपूर्वकं 'डुधाञ्क् धारणे च' इति धातोरद्यतन्यां "इश्च०" ४–३–३१ इतीत्वे, कित्त्वे "धुड्ह्रस्व०" ४–३–७०, इति सिच् लुपि 'न्यधित' इति रूपं सिद्धम् । 7 'निगमनविधेः' मार्गविधेः । 8 'दमम्' दण्डम् । 9 'प्रतिरोधके' चोरे ।

[ 20 ] 10 "°करणप्रत्याहार°" करणानीन्द्रियाणि तेषां प्रत्याहारः विषयेभ्यः समाहृतिः 'प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यः समाहृतिः' इति हैमः [ अभि० चिं० कां० १ श्लो० ८३ ] । 11 'सहृदयजने' प्रियजने । 12 'अनयहरणात्' अनीतिहरणात् । 13 'समञ्जसम्' सम्यक्प्रकारेण ऋजुम् ।

[ 21 ] 14 'अनघः' पवित्रः । 15 'गन्त्री' कम्बलिवाह्यकम् । 16 'मरुद्रथसङ्कुले' देवरथैर्व्याप्ते ।

---

* P फणफणि° ।

विधिरधिकृतः क्षोणीपीठे जिनैर्जनितः पुरा
　गणगणधरोपाध्यायादिव्यवस्थितिसर्ज्जनात् ।
[1]प्रणतभगवत्पूज्येनान्तर्मलच्छलहारिणा
　समभिनयता [2]मेघस्ये[3]होदयं [4]पुटभेदने ॥ २२ ॥

भगवति गणाधीशेऽभ्यर्णे [5]समीयुषि [6]पत्तनं
　[7]व्यरुचततरां [8]नीवृल्लक्ष्म्या [9]हिरण्मयचित्रवत् ।
[10]विपणिसरणेर्नानावर्णां[11]शुकाऽऽभरणश्रिया
　समुदयदशां सौरीं साक्षादिवाभिनिवेदयत् ॥ २३ ॥

सकलभवनश्रेण्यामुत्तम्भितैरभितः पुरं
　ध्वजपटलकैर्नृत्यन्मोदादिवो[12]द्भुजमाबभौ ।
विहसितमितस्तद्वीक्षायां दिशामिव मण्डलं
　प्रतिपदमिहोदात्तश्रेष्ठिप्रकीर्णधनच्छलात् ॥ २४ ॥

भुवि गजघटाऽचालीद् बालीकृतार्कसहोदरा
　[13]विचकिलभरं कुर्वन्तीव क्षरन्मदवारिभिः ।
दिवि घनघटास्पर्द्धाबन्धात् [14]सुपुष्करशालिनी
　[15]स्तनितजनिताऽऽनन्दा लोके गुरोरभिगामुके ॥ २५ ॥

निनदति पुरे विस्मेरश्री[16]स्मरध्वजसङ्करे
　जगति सकले शब्दाद्वैते प्रसर्प्पति दर्प्पतः ।
[17]विधिरपि परं छात्रान् वेदान् प्रपाठयति स्म किं
　दृढतमतया बाढोद्घोषैरजस्रमुदीरितैः ॥ २६ ॥

अनुपदमनुत्सेके [18]छेके [19]महेच्छजने घने
　[20]वितरति महे स्वर्णादीनि क्रमाद् गुरुसङ्गमे ।
इह [21]सुमनसामैन्द्रीं लक्ष्मीं विभावयतामभू-
　दतिरतिपदं नृत्यन् गायन् पटुस्स [22]बटुव्रजः ॥ २७ ॥

---

[२२] १ 'मेघस्योदयम्' वर्षाकालम् ।　|　[२३] २ 'सौरीम्' सूरिसम्बन्धिनीं सूर्यसत्कां वा ।

---

[22] 1 'प्रणतभगवत्पूज्येन' प्रणतो भगवान् सङ्खेश्वरपार्श्वो येन, ईदृशो यः पूज्यस्तेन । 2 'मेघस्य' ग्रन्थकारस्य मेघविजयस्य । 3 'उदयम्' वाचकादिपदवीप्रदानस्वरूपम् । 4 'पुटभेदने' नगरे ।

[23] 5 'समीयुषि' प्राप्ते । 6 'पत्तनम्' अणहिल्लपुरपत्तनं नाम नगरम् । 7 'व्यरुचततराम्' अतिशयेनादिदीपत् । 8 'नीवृल्लक्ष्म्या' नीवृद् राष्ट्रं तस्य लक्ष्म्याः शोभायाः । 9 'हिरण्मयचित्रवत्' हिरण्यं सुवर्णं तस्य विकारो हिरण्मयस्तस्य चित्रमिव । 10 'विपणिसरणेः' विपणीनामापणानां सरणिः पन्थास्तस्य । 11 °अंशुकाऽऽभरणश्रिया' अंशुकानि वस्त्राण्याभरणान्यलङ्काराणि च तेषां श्रीः शोभा तया ।

[24] 12 'उद्भुजम्' ऊर्ध्वं भुजौ यस्य तम् ।

[25] 13 'विचकिलभरम्' विचकिलो मल्लिका तस्या भरम् । 14 'सुपुष्करशालिनी' सुष्ठु पुष्कराः शुण्डाग्रास्तैः शालिनी । 15 'स्तनित°' स्तनितं मेघस्य गर्जितम् ।

[26] 16 '°स्मरध्वजसङ्करे' स्मरध्वजो वादित्रं तेन सङ्करं तस्मिन् । 17 'विधिः' ब्रह्मा ।

[27] 18 'छेके' विदग्धे । 19 'महेच्छजने' उदात्तजने । 20 'वितरति' ददाति । 21 'सुमनसाम्' सज्जनानाम् । 22 'बटुव्रजः' माणवकसमूहः ।

प्रियतममभूद् रक्षायोगाद् यदेव हि गोपुरं[1]
विशति यतिनामीशो तस्मिन्ननिष्टमिदं तदा ।
गज-हय-रथे साङ्कर्येणा[2]पथे पथकारिणि
स्फुरति पुरतः को वा स्वार्थे प्रियो यदि वाऽप्रियः ॥ २८ ॥

वहति महति स्वैरं लोके पुरो नि[3]गमेशिनां
मधुरचरितैर्गायं गायं नटन्नटनायकः ।
रसजननतः खेद[4]च्छेदं चकार सकारणः
सरसवचनाऽऽरम्भः स्त[5]म्भच्छिदे विदुषां न किम् ? ॥ २९ ॥

[6]बहुसुमनसामा[7]मोदेनाभवच्छरदागमः
कुनयजडताप्रादुर्भावाद्धिमागमसम्भवः ।
तमसि सुदृशां किञ्चिच्छेषः कृतः सुकृतोदयैः
सुरभिरभितः श्रीमत्सूरेर्यशोभिरयं जनः ॥ ३० ॥

व्यसनसरसि ग्रीष्मो भीष्मस्तदा विशदाशयै-
र्धनवितरणे हर्षाद् वर्षाऽऽगमः समनीयत ।
षडपि ऋतवश्चैवं दैवं विमृश्य शुभं नृणां
किमनु[8]गुणतां भेजुः सूरेः समागमने पुरे ॥ ३१ ॥

भवनशिरसि व्यारूढानां तदा क्षणवीक्षणे
[9]नवमृगदृशां मे[10]षाभावान्मनागपि तद्दृशाम् ।
अतिरुचिरताऽऽरम्भाद् र[11]म्भा अमूरिति निश्चय-
श्चतुरमनसि प्रादुर्जज्ञे सविभ्रमभावनात् ॥ ३२ ॥

प्रतिगृहमुखं तत्र न्यासीकृते मणितोरणेऽ-
भ्युदितदि[12]नकृद् बिम्बालम्बानुबिम्बनसन्ततिः ।
द्वि[13]गुणसुषमामाविश्चक्रे निरस्ततमास्तमा
समवगमने सान्द्रं चान्द्रं रुचां पटलं तथा ॥ ३३ ॥

गुरुरपि विश[14]न्नस्यां वश्यां जगज्जनतां व्यधा-
द[15]भिनवसुधालिप्ते कु[16]ड्ये परःशतबिम्बितैः ।
सममिव पुरीलोकं साक्षात् पवित्रयितुं स्वतः
प्रणतम[17]मदापूर्णं तूर्णं प्रमोदयिताऽऽशिषा ॥ ३४ ॥

---

[ 28 ] 1 'गोपुरम्' पुर्द्वारम् । 2 'साङ्कर्येण' व्याप्तेन ।

[ 29 ] 3 'निगमेशिनाम्' विबुधमहात्मनाम् । 4 'खेदच्छेदम्' अध्वश्रमनाशम् । 5 'स्तम्भच्छिदे' स्तम्भो जाड्यं तं छिनत्तीति च्छित् तस्मै ।

[ 30 ] 6 'बहुसुमनसाम्' अतिपुष्पाणाम् । 7 'आमोदेन' सुगन्धेन ।

[ 31 ] 8 'अनुगुणताम्' औचित्यम् ।

[ 32 ] 9 'नवमृगदृशाम्' नव्यकमलाक्षीणाम् । 10 'मेषाभावात्' रोमशाभावात् । 11 'रम्भाः' देवस्त्रियः ।

[ 33 ] 12 '°दिनकृद्°' दिनकृत् सूर्यः । 13 'द्विगुणसुषमाम्' द्विगुणसातिशायिनीं शोभाम् ।

[ 34 ] 14 'अस्याम्' पुर्याम् । 15 'अभिनवसुधालिप्ते' अभिनवा नव्या या सुधा तया लिप्ते 'सुधा चूनो' इति भाषायाम् । 16 'कुड्ये' भित्तौ । 17 'अमदाऽऽपूर्णम्' अमदोऽगर्वस्तेनाऽऽपूर्णम् ।

[1]भवनवलभौ श्राद्धैः पुष्पस्रजोऽवललम्बिरे
परिमलमिलद्[2]भृङ्गारावैरिव स्तुतिवादिनीः ।
गणधरगुरौ जाग्रद्ब्रह्माऽऽयुधे समुपेयुषि
धनुष इव किं [3]जीवा एताः [4]स्मरस्य विपातुकाः ॥ ३५ ॥
वरयुवतिभिर्द्वारे द्वारे सुमङ्गलकर्मणि
सपदि वितते स्थाले मुक्ताभृतेऽत्र [5]हिरण्मये ।
प्रतिकृतिमिषात् तासां [6]नागाङ्गना इव भूतला-
[7]ल्ललितवपुषः प्राप्ता रेजुर्गणीन्द्र[8]निनंसया ॥ ३६ ॥
[9]गणिदिनमणिं दर्शं दर्शं प्रमोदमहोदयाद्
*विहसितमुखाः पद्मिन्यस्ता व्यधुर्मधुरक्रियाः ।
नटनमटनप्रादक्षिण्यं स्थिरक्षणवीक्षणं
प्रणमति मतिस्नेहाद् गेहादुपेत्य पुरो गुरोः ॥ ३७ ॥
[10]रसपरवशाः काश्चिद् गानं विकस्वरसुस्वरैः
[11]सरसिजदृशः प्राचामाचारजैर्धवलैर्व्यधुः ।
यदनुभवतस्ताम्राक्षीणां स्वरः †[12]परपुष्टता-
न्वयपरिगतां गौणीं वृत्तिं विनिश्चिनुतेतराम् ॥ ३८ ॥
‡अरुणवसनैश्छन्ने मार्गे नखांशुभरैरिव
परमगुरवश्चेलुर्यत्नात् तदा दधतः क्रमौ ।
उचितमुदये सौरैः पादैर्भुवोऽपि सरागता
प्रभवति तमभिच्छत्त्यै दोषापहारविधौ पटुः ॥ ३९ ॥
परिकलितयाऽऽ[13]रामैः [14]सौम्यैर्महेश्वर[15]लक्ष्मणे-
र्भुवपरिणतिप्रौढो[16]च्छ्राये सुधर्मसभाश्रये ।
गणिपतिगुरुस्थित्यामेवं [17]सुपर्वपुरस्सर-
ममरनगरीसख्यं मुख्यं तया नियतं दधे ॥ ४० ॥
फणिपतिसमासीनः शङ्खेश्वरः प्रभुरन्तिके-
ऽस्य जयति परं पार्श्वः श्रीमान् महेन्द्रमनःप्रियः ।
गुरुपरिचयादिन्द्रोपेन्द्राऽऽगमेऽत्र न विस्मयः
[18]स्मयहृतिपुरे लङ्कापुर्याः प्रभाभरभासुरे ॥ ४१ ॥

[ 35 ] 1 'भवनवलभौ' भवनानि गृहाणि तेषां वलभिः वंशपञ्जरादिच्छदिष आधारस्तस्मिन् । 2 'भृङ्गाऽऽरावैः' भ्रमरगुञ्जारवैः । 3 'जीवा' गुणः । 4 'स्मरस्य' कामदेवस्य ।

[ 36 ] 5 'हिरण्मये' सुवर्णयुक्ते । 6 'नागाङ्गनाः' नागलोकस्त्रियः । 7 'ललितवपुषः' कान्तदेहाः । 8 °'निनंसया' नन्तुमिच्छया ।

[ 37 ] 9 'गणिदिनमणिम्' गणिषु दिनमणिः सूर्य इव तम् ।

[ 38 ] 10 'रसपरवशाः' कामाधीनाः । 11 'सरसिजदृशः' कमलाक्ष्यः । 12 'परपुष्टतान्वय°' कोकिलवंशः ।

[ 39 ] 13 'सौरैः' सूरिसम्बन्धिभिः ।

[ 40 ] 14 'आरामैः' उद्यानैः । 15 '°लक्ष्मणैः' लक्ष्मीवद्भिः । 16 '°उच्छ्राये' आरोहे । 17 'सुपर्वपुरस्सरम्' पर्यूषणादिपर्वपूर्वकं देवतापूर्वकं वा ।

[ 41 ] 18 'स्मयहृतिपुरे' सीरोहीनगरे ।

* A विहसितदृशः । † B पुर° । ‡ B °वसनैः ।

वसति धनदः सर्वः पौरः परं न कुबेरकः
परमरतिमान् वारुण्यां[1] न प्रचेतसि[2] चाग्रिमः ।
न चपलकलां क्वाप्यादत्ते स पुण्यजनोऽप्यहो
प्रमुदितमनाः सद्यः सौरोदये[3] न जडाऽऽत्मभूः ॥ ४२ ॥
बहुकुशलतारामाः[4] कामाऽऽस्पदं[5] सुमनःप्रियाः[6]
निदधति रसं[7] पात्रव्यूहे[8] सिताम्बरसङ्गते ।
सुकविकलया कान्ताः शुद्धैर्मरुद्भि[9]रुपासिता
प्रसृमरमुखामोदा ह्यस्यां[10] महाशयनन्दनाः[11] ॥ ४३ ॥
अभिनवधनावास्या स्फीता[12]श्चिरं मगधश्रिय[13]-
स्तपगणगुरोस्तस्यां स्थित्या सुधर्मसधर्मणः[14] ।
अभिनतमहाराजप्रील्या प्रभासविशेषता
पुरि परिचिता भव्या येनोत्सवैर्वरदा मता ॥ ४४ ॥
समयचतुरैर्जीवाजीवादयोऽङ्गदयोदय-
प्रकरणबुधैर्विश्वेऽप्यर्था मतेर्विषयीकृताः ।
गणनृपगुरुप्रत्यासत्त्या[15] स्फुटं चतुरङ्गता-
ऽजनि फलवती तेषां तस्माद् विमोहपराजयः ॥ ४५ ॥
विजयचरितं सूरेर्दूरे कुलाचलचूलिका-
स्वविचलरसाद् गायन्ति स्मोल्लसन्मयुबालिकाः[16] ।
स्फुटतरतया जातं पुण्यावदातशतैरिदं
परमरमया[17] रम्ये तस्मिंश्चिरंतनपत्तने ॥ ४६ ॥
बहुलसुकृतैश्चातुर्मास्याः क्रमात् समतिक्रमे
तपसि तपसां राजा जीवाह्वयस्य दृढाऽऽग्रहात् ।
उदयनगरे श्रीमत्पार्श्वाभिषेकविधित्सयाऽ-
भ्यचलदचलश्रेणीकीर्णाध्वनाधिकधामवान्[18] ॥ ४७ ॥
क्वचन विटपश्रेण्या[19] गोत्रस्थितिं[20] स्थगयन् निजा-
मपथगमनेनैवाऽऽलब्धः समेखलतां गिरिः ।
परमगुरुणा कूटै[21]र्भीमः परं ददृशे पथि
कुनृपतिरिव क्रूरक्रोडाऽऽश्रयेण कुरङ्गभूः[22] ॥ ४८ ॥

---

[ 42 ] 1 'वारुण्याम्' मदिरायाम् । 2 'प्रचेतसि' वरुणे । 3 'सौरोदये' सूर्योदये ।

[ 43 ] 4 '°रामाः' स्त्रियः । 5 'कामाऽऽस्पदम्' मोहस्थानम् । 6 'सुमनःप्रियाः' देवस्त्रियः रम्भादयः । 7 'रसम्' 'विभवाद्यैरभिव्यक्तः सामाजिकानां वासनारूपेण स्थिते रत्यादिको भावः कविसहृदयै रस्यमानो रसः शृङ्गारादिः । 8 'पात्रव्यूहे' पात्राणि नाट्येऽधिकृतास्तेषां व्यूहे समूहे । 9 'मरुद्भिः' देवैः । 10 'अस्याम्' नगर्याम् । 11 'महाशय-नन्दनाः' महेभ्यपुत्राः ।

[ 44 ] 12 'स्फीताः' विस्तृताः । 13 'मगधश्रियः' मगधदेशलक्ष्म्याः । 14 'सुधर्मसधर्मणः' सुधर्मस्वामिगणधरसमानस्य ।

[ 45 ] 15 '°प्रत्यासत्त्या' सेवया ।

[ 46 ] 16 '°मयुबालिकाः' किन्नरबालाः । 17 'परमरमया' परमलक्ष्म्या ।

[ 47 ] 18 '°अधिकधामवान्' अधिकप्रतापवान् ।

[ 48 ] 19 'विटपश्रेण्याः' वृक्षराज्या । 20 'गोत्रस्थितिम्' अभिजनस्थितिम् । 21 'कूटैः' शृङ्गैः । 22 'कुरङ्गभूः' मृगभूमिः ।

अविरलदलद्वल्लीवेल्लत्सशोणिमपल्लवैः
[1]शबरयुवतीगीतैः स्फीतैः प्रणुन्न इवाचलः ।
नटनघटनां रागात् सूरेः पुरस्समजीघटद्
मृदुलपवनाद् गुञ्जद्[2]वेणुध्वनिध्वनितोत्सवः ॥ ४९ ॥

क्वचन निवसत्[3]पल्लीभिल्लीजनेन सविस्मयं
करकिसलयै[4]र्गुञ्जापुञ्जाऽऽदरेण विभूषितैः ।
विहितमसकृत् सूरिर्मुग्धप्रणामविधिं दृशा
प्रतिपदमनारम्भात् सम्भावयन् पथि निर्ययौ ॥ ५० ॥

ज्वलदनलजज्वालामाला[5]जटालमनाकुलः
कुलगिरिकुलाचारेणोच्चैश्चलन्तमिवाचलम् ।
यतिमिव दृढध्यानं साक्षान्निरैक्षत सूरिराट्
क्वचन रचनाभीमे सिंहासनेन शिलातले ॥ ५१ ॥

अतिमृदुलतारामाः कामाश्रयः परभोगिनां
*किसलयकरैर्वातोद्धूतैर्गुरुं प्रणता लताः ।
[6]तरणिकिरणक्लेशो माऽस्मां प्रभूदिति [7]भूधरोऽ-
स्थगयदभितो दिक्चक्रं चोत्तरैः शिखरैः खरैः ॥ ५२ ॥

[8]जलदपटलीवासोऽवाप्य क्वचिच्च सिताम्बरः
समजनि [9]दवग्रासात् क्वापि स्फुटं स दिगम्बरः ।
भयमुपनयन् [10]भिल्लोदीर्णैर्द्विधाऽपि च [11]भल्लकैः
क्वचन सुरभिः[12]सल्ली†वल्लीवनैर्जननन्दनः ॥ ५३ ॥

[13]शबरपृतनानाथः सूरेः पदाम्बुजमानमन्
मनसि रसिको वाचां पाने सपानवराधिपः ।
[14]शपथमदधात् त्रस्यज्जन्तोर्वधस्य रहस्यवित्
परमगुरुणाऽऽदिष्टे शिष्टे महोदयदेशने ॥ ५४ ॥

---

[ 49 ] 1 'शबरयुवतीगीतैः' भिल्लस्त्रीगायनैः । 2 '°वेणुध्वनि°' वेणुः वंशस्तस्य ध्वनिः शब्दः ।

[ 50 ] 3 '°पल्ली°' पल्ली ग्रामम् । 'पल्ली च ग्रामके कुड्याम्' इति हैमः [ अने० सं० कां० २ श्लो० ५०८ ] । 4 'गुञ्जा°' गुञ्जा कृष्णला 'चणोठी' इति भाषायाम् । 'कृष्णला तु गुञ्जा' इति हैमः [ अभि० चिं० कां० ४ श्लो० २२१ ]

[ 51 ] 5 '°जटालम्' सटाढ्यम् ।

[ 52 ] 6 'तरणि°' तरणिः सूर्यः । 7 'भूधरः' पर्वतः ।

[ 53 ] 8 'जलदपटलीवासः' जलदः मेघस्तस्य पटली समूहः सैव वासस्तदर्थं वासः वस्त्रम् । 9 'दवग्रासात्' दावानलकवलात् । 10 'भिल्लोदीर्णैः' किरातोत्क्षिप्तैः । 11 'भल्लकैः' बाणैः । 'भल्लं भल्लुक-बाणयोः' इति हैमः [ अने० सं० कां० २ श्लो० ५१५ ] । 12 'सल्लीवल्लीवनैः' सल्लीवृक्षविशेषस्तस्य वल्लयः लतास्तासां वनम् ।

[ 54 ] 13 'शबरपृतनानाथः' भिल्लसैन्यपतिः । 14 'शपथम्' प्रतिज्ञाम् ।

---

* P °किशलय° । † P मल्ली° ।

सरससरसां[1] तीरे धीरे स्फुटे तटिनीतटे[2]
पटनिलयने पूर्वं जीवाह्वयेन निवेशिते ।
प्रभुरधिवसन् शुद्धाचारैः पटुर्बटुभिः स्तुतः
शावरविषयं[3] धर्माऽऽधानैः स पावनमादधे[4] ॥ ५५ ॥

क्रमगमनिकायोगाद्[5] योगातिशायिमहस्विनां
समुदययुतः प्रापद् व्यापद्भरस्य विनाशकः ।
विशदचरणोत्साही[6] नाहीपुरं नृपुरन्दर-
प्रणमतशिरोरत्नज्योतिःपरीतपदः[7] प्रभुः ॥ ५६ ॥

अधिगतगणाधीशाभ्यासाऽऽगमान् मुदमावहन्
उदयनगराधीशः प्रातर्जनैरथ तुष्टुवे ।
जय जय विभो ! त्वं सुन्दर्या विलोकनमादरात्
कुरु गणगुरुप्राप्तौ पुर्या महोत्सवसन्ततेः ॥ ५७ ॥

प्रतिजनगृहं जज्ञे पुष्पस्रजामवलम्बनं
प्रसृमरयशोराशेर्भासां गुरोरिव साम्प्रतम् ।
निशि दिशि दिशि स्वैरभ्रान्त्या द्विजाधिपतिप्रिया
पटलकमिव प्रातर्ब्रह्मप्रवृत्तमिवाचलम् ॥ ५८ ॥

उदयननगे सौरं तेजश्चकार सरागता-
मुदयनगरेऽप्येतच्चेतश्चमत्कृतिकारणम् ।
सपदि कमलाऽऽमोदः प्रादुर्बभूव ततो द्वये
भुवि सुमनसां राज्या राज्यातिशायिमुदो धृताः ॥ ५९ ॥

अशुभततरां लक्ष्मीस्तार्क्ष्याग्रजातिसमुत्थिता[8]
व्यपहृततमा रत्नश्रेणी विभूषणभासुरा ।
प्रगुणिततरालङ्कारश्रीस्तथा हयवाहने
वदति विभवं सौरांशूनामुपस्थितिशालिनम् ॥ ६० ॥

प्रसरति परं सौरे गौरे रुचां निचये चये
दधति सुतरां वैवर्ण्यं ते द्विजेशकलाभराः[9] ।
प्रकृतिशिशिरा अप्यास्थायै[10] मुदां न कलङ्किनो
न भवति रतिर्दोषाधारे सुवृत्तमहोदये ॥ ६१ ॥

---

[ 55 ] 1 'सरससरसाम्' सुष्टुसरोवराणां कोकूयितादिकुण्डानाम् । 2 'तटिनीतटे' मन्दाकिनीनदीतीरे । 3 'शावरविषयम्' भिल्लप्रदेशम् । 4 'पावनम्' पवित्रम् ।

[ 56 ] 5 'क्रमगमनिकायोगात्' क्रमैः पादैः गमनिका विहारस्तस्य योगात् । 6 'विशदचरणोत्साही' निर्मलचारित्रे उत्साही । 7 'परीतपदः' परीता परिवेष्टिता पादा यस्य सः ।

[ 60 ] 8 'तार्क्ष्याग्रजाति°' तार्क्ष्या अश्वास्तेष्वप्यग्रजातिः भेदः ।

[ 61 ] 9 'द्विजेशकलाभराः' द्विजेशश्चन्द्रस्तस्य कलाभराः । 10 'आस्थायै' स्थित्यै ।

हरिकरिवरः[1] सिन्दूराक्तं[2] शिरः समघर्षयत्
कुलशिखरिणि प्राच्ये तस्मादिवारुणिमाश्रये ।
मदजललसद्भृङ्गश्रेण्या समं क्वचिदुद्ययौ
तिमिरनिवहः सावर्ण्येनोद्भवद्भयसम्भ्रमात् ॥ ६२ ॥

दिशि दिशि निशि स्फारास्तारा दधुर्मधुरप्रभा-
मुषसि[3] सबला सौरी कान्तिस्तदाहरणादिव ।
भृशमुदयते प्राचीभागे सदाद्यमहाद्भुतं
दिशि जलपतेस्ताद्रूप्येणाऽऽगते गणभास्करे[4] ॥ ६३ ॥

द्विजपतिमहाराज्ये रात्रौ बभुः प्रभुताभृतो
जगति सततं नक्षत्राणां गणा गगनाङ्गणे ।
महसि हसिते सौरे दूरे ययुस्तमसा समं
प्रकृतिसमतालभ्येऽलभ्ये भवेद् भुवि साधनम् ॥ ६४ ॥

गगनसरिति[5] स्नानं चक्रे द्विजाधिपतिश्चिरं
भगणमिषतः[6] प्रादुर्भूतास्तदम्बुनि बुद्बुदाः ।
निबिडजडिमच्छित्यै वेगाद् विभेजुषि वारुणी-
मुषसि विरते तस्मिन्नेते क्रमाच्छममाययुः ॥ ६५ ॥

वसतिमिलिता लोकाः सौरे समागमनोत्सवे-
ष्वहमहमिकापूर्वं[7] कर्तुं वसुव्ययमुद्यताः[8] ।
अनुनिजगृहं जग्मुः सर्वेऽधुना भगणा[9] इव
नवरुचिघनप्रत्यासत्तिं विभाव्य च गोपतेः[10] ॥ ६६ ॥

मुदितमनसः पुंनागास्ते[11] करान् यदितस्ततो
विदधत इहोदात्ता[13] दानाऽऽशयाः कलभोत्तमाः[12] ।
परिणतितराः केचित् पोता[14] अपि प्रयतैषिणो
विविधरुचयः सौरस्थानोन्मुखाः प्रतिभान्त्यमी ॥ ६७ ॥

अभिजिगमिषुः सर्वो राजप्रियादिगणोऽपरां
समुदयि महः सौरं वेगादुपस्थितमामृशन् ।
इदमनुययौ तस्यावश्यं कलाधरमण्डलं[15]
क्षणपरिचये का वा पूर्वाऽपरागतिसङ्गतिः ॥ ६८ ॥

---

[62] 1 ‘हरिकरिवरः’ इन्द्रहस्ती । 2 ‘सिन्दूराऽऽक्तम्’ सिन्दूरैराक्तं विलेपितम् ।

[63] 3 ‘उषसि’ प्रातःकाले । 4 ‘गणभास्करे’ गणेषु भास्कर इव तस्मिन् ।

[65] 5 ‘गगनसरिति’ स्वर्गङ्गायाम् । 6 ‘भगणमिषतः’ तारागणव्याजतः ।

[66] 7 ‘अहमहमिकापूर्वम्’ परस्परमहं शक्त इत्यस्यामहमहमिका पूर्वं यस्य तत् । 8 ‘वसुव्ययम्’ द्रव्यव्ययम् । 9 ‘भगणाः’ नक्षत्राणि । 10 ‘गोपतेः’ राज्ञः ।

[67] 11 ‘पुंनागाः’ पुरुषेषु नागा हस्तिनः । 12 ‘कलभोत्तमाः’ कलभास्त्रिंशदब्दका गजबालास्तेषूत्तमाः । 13 ‘उदात्ताः’ महाशयाः । 14 ‘पोताः’ पोता दशवर्षका गजबालाः ।

[68] 15 ‘कलाधर’’ कलाधरश्चन्द्रः ।

हिमकणलसन्मुक्तायुक्ता इतो वरपद्मिनीः
परिधृतनवज्योतिर्वस्त्राऽऽदिदृक्षुतयोद्यताः ।
हसितवदनाम्भोजाः सौराऽऽगमे सरसीतटे
मिलितललिताऽऽलीनां[1] गानैः प्रपश्य नृपोज्ज्वलाः ॥ ६९ ॥
उडुसुमनसः[2] प्रक्षीणाया निःशेषनिशः कृते
गगनशयने निर्माल्यं तद्व्यपाक्रियतेऽधुना ।
पवनपुरुषैर्भूमीभागे तथैव महोत्सवे
विजयिनि कृते पौरैः सौराऽऽगमस्य विसृत्वरे[3] ॥ ७० ॥
नदति मधुरं बाह्याऽऽरामः[4] स्वरैः प्रविकस्वरै-
र्नृपसवयसां लोकानां द्राग् विबोधविलासिनाम् ।
तदनु तदनु प्रौढिं कर्तुं स्मरध्वजमण्डलं[5]
ध्वनति मुखरीकुर्वत्[6] सर्वं दिशामपि मण्डलम् ॥ ७१ ॥
अमरसरिति[7] प्रोत्फुल्लं यद् ग्रहोत्पलकाननं[8]
वियति तदलं सौरी दीप्तिः शुशोष सरोषणम् ।
द्विजपतिरुचे[9]र्नाशादेवं क्षितावपि वीक्ष्यतां
विषयवशतः सर्वाङ्गीनग्रहोत्पलकाननम् ॥ ७२ ॥
गगनसुभगाऽऽरामे रात्रावुडुप्रसवावली
विकसिततरा सौरीं पूजां तयेव विधित्सुना ।
विबुधनिवहे[10] नेदानीं द्रागचीयत सर्वतः
प्रभवतु भवाँस्तत्साहाय्य विधातुमनातुरः ॥ ७३ ॥
इति नरपतिः सुप्तस्तत्रार्थिकैः प्रतिबोधितो
व्यधित सहसाऽऽदेशं देशे प्रवेशमहामहे ।
कुरुत सकलां सज्जां सद्योऽनवद्यपताकिनी-[11]
मभिजिगमिषुः सूरेरेवं कृताभ्युदयक्रियः ॥ ७४ ॥
तृणमिव दिवमेवं भावयन् भावशुद्ध्या
उदयनगरदेशाधीश्वरः स्वीयऋद्धया ।
सुरपतिरिव सूरेः सम्मुखीनश्चचाला-
चलमपि बलभाराच्चालयन्नुज्ज्वलश्रीः ॥ ७५ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
कथानायकस्य उत्तराशाविजयवर्णनो नाम पञ्चमः सर्गः ॥ ५ ॥

[ 69 ] 1 'मिलितललिताऽऽलीनाम्' मिलिताश्च ते ललिताश्चेति मिलितललितास्ताश्च ता आल्यः सख्यस्तासाम् ।
[ 70 ] 2 'उडुसुमनसः' नक्षत्रदेवाः । 3 'विसृत्वरे' प्रसारिणि ।
[ 71 ] 4 'बाह्याऽऽरामः' बाह्योद्यानम् । 5 'स्मरध्वजमण्डलम्' वादित्रसमूहम् । 6 'मुखरीकुर्वत्' वाचालीकुर्वत् ।
[ 72 ] 7 'अमरसरिति' स्वर्गङ्गायाम् । 8 'ग्रहोत्पलकाननम्' ग्रहा एवोत्पलानि कमलानि तेषां काननं वनम् । 9 'द्विजपतिरुचेः' चन्द्रकान्त्याः ।
[ 73 ] 10 'विबुधनिवहे' पण्डितसमूहे ।
[ 74 ] 11 'अनवद्यपताकिनी' निर्दोषसेनाम् ।

## षष्ठः सर्गः ।

श्रीः ऐँ नमः श्रीपार्श्वार्हते ।

अथ चचाल विशालबले पुरो मदमलीनकटा करिणां घटा ।
घनघटेव भुवं परिसिञ्चती तरुणतारुणतान्वितबिन्दुभिः ॥ १ ॥
सकलसाध्यविधेर्वरसाधनं धनबलेऽवधिरेव गजाऽऽवली ।
पथि जनव्रजतापमपाहरत् सुकरशीकरशीतलवारिभिः ॥ २ ॥
किमिदमीयमिषात् समुपस्थिताः प्रभुसिसेविषया विषयाचलाः ।
गलदमन्दमदाम्बुविनिर्झरा न बहुधा बहुधातुविभूषिताः ॥ ३ ॥
कर-चतुष्पद-वालधि-शेपसा क्षितितलस्पृगसौ गजसंहतिः ।
सपदि दर्शनतोऽप्यभिनन्दयेन्नृपरमां परमां खलु तादृशी ॥ ४ ॥
कनक-रत्नविभूषणरश्मिभिः समभिभासितदिग्वलयाभितः ।
भृशमदीप्यत सा द्विपसन्ततिः सुखचिता खचिता शुभलक्षणैः ॥ ५ ॥
परिणता क्वचन क्वचिदुन्नता द्रुतगतिर्यदि वा स्खलिता हठात् ।
गजघटा क्वचिदम्बुधरोद्धुरस्वनवती नवतीव्रहयानुगा ॥ ६ ॥
प्रणमनाय कृतोन्नतपुष्करा कुथचलाचलरश्मितरङ्गिणी ।
गजघटा रुरुचे यमुनेव साऽऽहतरसा तरसा तटभेदने ॥ ७ ॥
रजतकिङ्किणिकारणपूरितैर्भ्रमदवभ्रतरभ्रमरस्वरैः ।
द्रुतविलम्बितमेव जगाम सा घनमदा न मदाऽऽयतपृष्ठिका ॥ ८ ॥

---

[ १ ] १ 'तरुणताऽरुणतान्वितबिन्दुभिः' हस्तिनां तारुण्ये स्वेदबिन्दवोऽरुणा भवन्ति ।

[ २ ] २ 'किमिदमीयमिषात् समुपस्थिताः' गजघटाया इदमीयं यन्मिषं तस्मात् किं न समुपस्थिताः ।

[ ५ ] ३ 'सुखचिता' सुखपुष्टा । ४ 'खचिता' व्याप्ता । ३ 'शुभलक्षणैः' भद्रजातिलक्षणैः ।

[ ७ ] ५ 'कृतोन्नतपुष्करा' कृतान्युन्नतान्युच्चानि पुष्कराणि शुण्डाया अग्रभागा यया सा 'अग्रं स्वस्य पुष्करम्' इति हैमः [ अभि० चिं० कां० ४ श्लो० २९० ] । ६ 'कुथ०' 'कुथे वर्णः परिस्तोमः' इति हैमः [ अभि० चिं० कां० ३ श्लो० ३४४ ] 'कुथः स्यात् करिकम्बले' इत्यनेकार्थः । ७ '०तरङ्गिणी' नदी । ८ 'तरसा' शीघ्रम् ।

---

[ 1 ] 1 'मदमलीनकटा' मदः दानं तेन मलीनाऽऽविलाः कटा गण्डा यासां सा । 2 'घटा' बहूनां गजानां रचना घटा 'बहूनां घटना घटा' इति हैमः [ अभि० चिं० कां० ४ श्लो० २८९ ] 3 'घनघटा' मेघमाला ।

[ 3 ] 4 'प्रभुसिसेविषया' प्रभुं सेवितुमिच्छा सिसेविषा तया । 2 'विषयाचलाः' देशपर्वताः ।

[ 4 ] 5 'कर-चतुष्पद-वालधि-शेपसा' करः शुण्डा 'हस्तिनासा करः शुण्डा हस्तः' इति हैमः [ अभि० चिं० कां० ४ श्लो० २९० ], चतुष्पदाः चत्वारः पादाः, वालधिः पुच्छम् 'अथ पुच्छं बालहस्तो लाङ्गूलं लूम वालधिः' इति हैमः [अभि० चिं० कां० ४ श्लो० ३१०], शेपः पुंश्चिह्नं तेन प्राण्यङ्गत्वादेकवद्भावः 'अथ पुंश्चिह्नं मेहनं शेपशेपसी' इति हैमः [ अभि० चिं० कां० ३ श्लो० २७४ ] । 6 'नृपरमाम्' राजलक्ष्मीम् ।

[ 6 ] 7 'परिणता' तिर्यग्दत्तघातपरिणता 'तिर्यग्घाती परिणतो गजः' इति हैमः [ अभि० चिं० कां० ४ श्लो० २८७ ] । 8 '०उद्धुर०' उद्धुरमुन्नतम् । 9 'नवतीव्रहयानुगा' नवा नव्याः तीव्रा द्रुतगतयश्च ये हया अश्वास्ताननुगच्छतीति ।

[ 8 ] 10 'रजतकिङ्किणि०' रजतं सुवर्णं तस्य किङ्किणी क्षुद्रघण्टिका ।

तदनु काञ्चन-रत्नमयैर्युताः [1]प्रवरपल्ययनैस्तुरगोत्तमाः ।
अनुचरैश्चतुरैरुपरक्षिता अगणना गणनायकमभ्ययुः ॥ ९ ॥
[१]हरिक-शोण-हलाहक-पङ्गुलैर्[२]धवल-लोहित-नीलक-पिङ्गलैः ।
प्रचलितैर्ललितैः पुरतो बभौ [३]सचतुरं चतुरङ्गबलं हयैः ॥ १० ॥
[2]अतिचलाचलवालधिकेशरैर्[3]विततपक्षतयो गरुडा इव ।
कनकरश्मिधरा [4]हरिपुङ्गवा नृपरवेः परवेगभृतो बभुः ॥ ११ ॥
जवनता [5]विनतातनयाऽऽश्रयादुपनता ननु [6]तार्क्ष्यवराऽऽख्यया ।
पवनतोऽप्यतिशायितयाऽचले [7]हरिबलेऽरिबले श्लथताकरे ॥ १२ ॥
[8]हरिपरिक्रमणे जनतामनः [9]सजति चारुपदेषु रजोमिषात् ।
तदिव धूनयितुं चलताऽभवद्धरिपदेऽरिपदे [10]विपदेधके ॥ १३ ॥
[४]दधतः किमु मण्डलमाश्रिताँश्चरणरेणुमिषात् परिमण्डलम् ।
उपदिशन्ति मनोऽणुकणान् स्म ते हयवरा यवराजिरसोत्कटाः ॥ १४ ॥
करिपरिश्रमसम्भ्रमकारिणोऽन्तिकमुपेत्य निवृत्त्य सुदूरगाः ।
विदधिरे तुरगा [11]उरगारिवत् [५]सनिगमे [६]निगमे गतिविभ्रमान् ॥ १५ ॥
तुरगचङ्क्रमवक्रतया क्वचित् क्वचन वक्रपरिक्रमविक्रमम् ।
विविधवेल्लितवल्गितकौशलाद्[12]पि [७]कलापिकलामतनोत् पथि ॥ १६ ॥
प्रतिपदं कनकोत्किरणैर्नृपः [13]सुरपतिप्रतिमोऽभिचलन् गुरोः ।
[14]सुभगपात्रजनं पथि नर्त्तयन् मुद[८]मवादमवाप [९]सहास्तिकैः ॥ १७ ॥

---

[ १० ] १ 'हरिक-शोण-हलाहक-पङ्गुलैः' हरिकः पीतहरितच्छायः 'हरिकः पीतहरितच्छायः स एव हालाकः' इति हैमः [ अभि० चिं० कां० ४ श्लो० ३०८ ], शोणः कोकनदच्छविः, हलाहकश्चित्रितो हयः, पङ्गुलैः सितकाचाभैः । २ 'धवल-लोहित-नीलक-पिङ्गलैः' धवलः श्वेतः, कर्कलोहितो क्रियाहः, नीलकः आनीलः पिङ्गलैः पीतरक्तैः । ३ 'सचतुरम्' हयचालनकुशलास्तैः सह ।

[ १४ ] ४ 'हयवरा मण्डलं विदधतः किमु मनोऽणुकणान् परिमण्डलं परिमाणं वर्तुलमुपदिशन्ति स्म' इत्युत्प्रेक्षते ।

[ १५ ] ५ 'सनिगमे' वणिक्सङ्कीर्णे । ६ 'निगमे' मार्गे ।

[ १६ ] ७ 'कलापिकलाम्' मयूरवद्गतिविशेषम् ।

[ १७ ] ८ 'अवादम्' प्रतिपक्षरहितं–अतुल्यं यथा स्यात् तथा । ९ 'सहास्तिकैः' हस्तिसमूहैः, आस्तिकैः श्राद्धैः सह वा ।

---

[ 9 ] 1 'प्रवरपल्ययनैः श्रेष्ठपर्याणैः 'पर्याणं तु पल्ययनम्' इति-हैमः [ अभि० चिं० कां० ४ श्लो० ३१८. ] ।

[ 11 ] 2 'अतिचलाचलवालधिकेशरैः' अतिचपलवोल्लाहैः 'वोल्लाहस्त्वयमव स्यात् पाण्डुकेशरवालधिः' इति हैमः [ अभि० चिं० कां० ४ श्लो० ३०५ ] । 3 'विततपक्षतयः' वितता विस्तृताः पक्षतयो पक्षमूलानि येषां ते । 4 'हरिपुङ्गवाः' अश्वश्रेष्ठाः ।

[ 12 ] 5 'विनतातनयाऽऽश्रयाद्' विनतातनयः गरुडाग्रजस्तस्याश्रयात् । 'विनतासूनुररुणो गरुडाग्रजः' इति हैमः [ अभि० चिं० कां० २ श्लो० १६ ] 6 'तार्क्ष्यवराऽऽख्यया' श्रेष्ठगरुडनाम्न्या । 7 'हरिबले' अश्वसैन्ये ।

[ 13 ] 8 'हरिपरिक्रमणे' अश्वगमने । 9 'सजति' 'षञ्ज सङ्गे' इति धातोः 'दंशसञ्जः शवि' ४–२–४९ । इति सिद्धहैमीयसूत्रेण वर्तमानकाले रूपम् । 10 'विपदेधके' कष्टवर्धके ।

[ 15 ] 11 'उरगारिवत्' गरुडवत् 'सर्पारातिर्वज्रिजिद् वज्रतुण्डः' इति हैमः [ अभि० चिं० कां० २ श्लो० १४४ ] ।

[ 16 ] 12 'विविधवेल्लितवल्गितकौशलाद्' विविधानि वेल्लितानि लोठनानि वल्गितानि प्लुतानि च तेषां कौशलान्नैपुण्यात् । 'अपावृत्त-परावृत्तलोठनानि तु वेल्लिते'–'धोरितं वल्गितं प्लुतोत्तेरितानि च' इति हैमः [ अभि० चिं० कां० ४ श्लो० ३११ ] ।

[ 17 ] 13 'सुरपतिप्रतिमः' इन्द्रतुल्यः । 14 'सुभगपात्रजनम्' सुभगाः शोभनाः पात्रजना नाट्येऽधिकृतपुरुषाः ।

समभिनम्य रयात् परया श्रिया क्षितिपतिर्जिनशासननायकम् ।
पुरवरेऽस्य निवेशमकारयत् सविनयं [1]विनयन् [2]नृदरिद्रताम् ॥ १८ ॥
समभिषेकविधिं निरमापयद् जिनवरे ननु विघ्नहराऽऽह्वये ।
सकलसङ्घसमक्षमयं [3]कूपारसदृशा [4]सदृशा [5]जनरञ्जनः ॥ १९ ॥
मुनिवरानिव रागजयोर्जितान् [1]बुधपदे विनिवेश्य [2]कृतार्थयन् ।
सुकृतपीवरजीववरास्तिकं द्रुत[3]मसन्तमसं भुवनेऽकरोत् ॥ २० ॥
[4]स्मरवशीकरणाय जगद्भुवामवनिजात[5]वनीपरिजीवनम् ।
[6]मधुपगीतयशा मधुराययौ प्रथमतोऽथ मतो रसिकाङ्गिनाम् ॥ २१ ॥
बहुदिनान्यु[7]दगम्बुजलोचना विहरतः कृशकान्ति[8]रहर्मणिः ।
[6]हृतवसुर्ननु दक्षिणया तदुत्सुकमनाः [9]कमनादिव निर्ययौ ॥ २२ ॥
हिमवतः परिशीलनयोत्तरा विरहतापमिवा[10]पचिकीरभूत् ।
[11]अहिमरश्मिरसौ नवपद्मिनीरतिकरोऽ[12]तिकरोदयदुस्सहः ॥ २३ ॥
गलदमन्द[13]परागपिशङ्गितोऽपि [14]नवकामुकव[15]न्मधुपव्रजः ।
[16]विटपरागितयेव तमस्समः कमलिनीमलिनीकरणं बभौ ॥ २४ ॥
[17]जल-नभः-स्थलचारिवपुष्मतामनुययु[18]र्मिथुनानि परस्परम् ।
कलरवैर्यतिनामपि मानसे [19]स्मरमयं रमयन्ति रसं भृशम् ॥ २५ ॥
विरहिणां [20]सहकारमहीरुहा किमपह्नुत्य [21]कुलान् [22]मुकुलादिभिः ।
प्रियतमाङ्कजुषां सुदृशां [23]पिकध्वनिभृता [24]निभृता रतिरादधे ॥ २६ ॥
हिमवतः पवनो मृदुराववौ मनसि [25]सञ्जनयन् [26]मदमङ्गिनाम् ।
कमलिनीवनसौरभसम्भृतः कमलकोमल[27]कोशविघट्टनात् ॥ २७ ॥

[ १८ ] १ 'विनयन्' अपनयन् स्फेटयन् । २ 'नृदरिद्रताम्' नराणां दरिद्रभावम् ।

[ १९ ] ३ 'कूपासदृशा' कूपारसदृश्या । ४ 'सदृशा' तुल्यया । ५ 'जनरञ्जनः' लोकसन्तोषदः ।

[ २२ ] ६ 'हृतवसुः दक्षिणया' दक्षिणया श्रिया हृतवसुः सन् ।

[ 20 ] 1 'बुधपदे' विबुधपदव्याम् । 2 'कृतार्थयन्' उपकारयन् । 3 'असन्तमसम्' अनन्धकारमर्थाद्, अपापम् ।

[ 21 ] 4 'स्मरवशीकरणाय' स्मरः कामदेवस्तं वशीकर्त्तुम् । 5 '°वनीपरिजीवनम्' वनी भिक्षाधनमेव परिजीवनं जीविकाम् । 6 'मधुप°' मधुपो भ्रमरः ।

[ 22 ] 7 'उदगम्बुजलोचना' उदग् उदञ्चतीति उदक्कमलाक्षी । 8 'अहर्मणिः' सूर्यः । 9 'कमनाद्' पण्डितात् कामाद् वा ।

[ 23 ] 10 'अपचिकीः' दूरीकर्त्ता । 11 'अहिमरश्मिः' सूर्यः । 12 'अतिकरोदयदुस्सहः' अतिकराः बहुकिरणास्तेषामुदयेन दुस्सहोऽसह्यः ।

[ 24 ] 13 '°परागपिशङ्गितः' परागः पौष्पं रजस्तेन पिशङ्गितः पीतरक्तः कृतः । 14 'नवकामुकवत्' नवः नवीनश्चासौ कामुकोऽनुकश्चेति नवकामुकस्तेन समानः । 15 'मधुपव्रजः' भ्रमरसमूहः : 16 'विटपरागितया' विटपाः वृक्षास्तेषु रागितया । 'विटपः पुनः पल्लवेऽपि च वृक्षेषु' इति हैमः [ अने० सं० कां० ३ श्लो० ४७५ ]

[ 25 ] 17 'जल-नभः-स्थलचारिवपुष्मतां' जलचर-खेचर-स्थलचरप्राणिनाम् । 18 'मिथुनानि' द्वन्द्वानि 'स्त्रीपुंसौ द्वन्द्वं मिथुनम् च तत्' इति हैमः [ अभि० चिं० कां० ३ श्लो० २०२ ] । 19 'स्मरमयम्' कामयुक्तम् ।

[ 26 ] 20 'सहकारमहीरुहाः' आम्रवृक्षाः । 21 'कुलान्' सजातीयप्राणिनां वृन्दान् । 22 'मुकुलादिभिः' कुड्मलादिभिः । 23 'पिक°' पिकः कोकिलः । 24 'निभृता' विनीता ।

[ 27 ] 25 'सञ्जनयन्' उत्पादयन् । 26 'मदम्' आनन्दसंमोहयोः सङ्गमम् । 27 '°कोश°' कोशः कुड्मलः योनिश्च ।

तरुवनान्निपतत्कुसुमैः समं [1]स्मरशरैरिव मूर्त्तिधरैः क्षता ।
सविनयं प्रियम[2]न्वनयत् स्वयम[1]नवमा नवमानवती वधूः ॥ २८ ॥
[4]अनुययौ [2]सुरभिं [3]सुरभिश्रियं विकसितां समवेक्ष्य [4]मदोद्धुरः ।
[5]परवृषं [6]विनुनुत्सुरिव क्रुधा स्थिरतरं [7]रतरञ्जनया [3]हि [8]गौः ॥ २९ ॥
[9]अनुनयन् वचनैः शुकसारिकास[10]मुदयो हृदयेश्वरपाठितः ।
विविधसन्धिविधानविचक्षणः[11] प्रि[12]यतमाऽऽयतमानम[13]पाकरोत् ॥ ३० ॥
किशलयैर्व[14]लयैः स[15]रसीरुहां कनकजैर्वलयैश्च न तद्भुवाम् ।
कुवलयैर्मलयैकभुवां रसैर्न [16]कमनः कमनम्रमदं व्यधात् ॥ ३१ ॥
प्रथमतीर्थकरा[17]भिनिनंसया स विजहार गुरुर्गुरुगौरवः ।
ष(ख)डग[18]नाह्व्युपवागडमण्डलं जनपदे न [4]पदे वि[5]पदेनसाम् ॥ ३२ ॥
समभिवन्द्य जिनप्रभुमादिमं प्रतिपदं विहरन् स जनाग्रहात् ।
अपनयन् कुनयाननयानिव नि[6]हतमोहतमो जगदातनोत् ॥ ३३ ॥
गणगुरूननुनीय महोत्सवैर्नगरशोभनया भरणांशुकैः ।
समनमद् वरवागडभूपतिरुपवने पवनेन चलाचले ॥ ३४ ॥
तमभिबोध्यगुरुवचनामृतैः कुशलकीर्त्तितकीर्त्तिरथाचलत् ।
उदयपूर्वपुरे [7]क्रममोदिताऽ[19]नुगमना गमनाय शि[20]वाऽऽगमः ॥ ३५ ॥
परिवसन्निह मासचतुष्टयीं जनगणान् जिनधर्ममबूबुधत् ।
[8]नरपतेरपि रागिणि मानसेऽविशदयं सदयं श्रुतमुद्गिरन् ॥ ३६ ॥
जनपदे विचरन् [21]शरदत्यये प्रतिपुरं किल [22]सङ्घपुरन्दरः ।
जि[23]नमतोन्नयनं क्रियया व्यधात् [10]प्रसलमांसलमाङ्गलिकार्चितः ॥ ३७ ॥

[ २८ ] १ 'अनवमा' प्रधाना श्रेष्ठा। 'वसन्तबलाधिक्यमिदम्'।

[ २९ ] २ 'सुरभिम्' धेनुम् । ३ 'हि' निश्चितम्, गौः अनुययौ ।

[ ३२ ] ४ 'पदे' स्थानके। ५ 'विपदेनसाम्' आपत्पापानाम्।

[ ३३ ] ६ 'निहतमोहतमः' निहतं निराकृतं मोहतमो यत्र तत् ।

[ ३५ ] ७ 'क्रममोदिताऽनुगमनाः' क्रमेण विहारपरिपाट्या, मोदितमनुगानां श्राद्धादीनां मनो येन सः ।

[ ३६ ] ८ 'नरपतेः मानसे' नृपमनसि । ९ 'अविशद्' प्रविवेश ।

[ ३७ ] १० 'प्रसलमांसलमाङ्गलिकार्चितः' प्रसले हेमन्तर्तौ मांसलानि पुष्टानि यानि माङ्गलिकानि तैरर्चितः पूजित इति ।

[ 28 ] 1 'स्मरशरैः' कामदेवस्य बाणैः । 2 'अन्वनयत्' रहसि प्रैरीत् ।

[ 29 ] 3 'सुरभिश्रियम्' वसन्तशोभाम् । 'वसन्त इष्यः सुरभिः' इति हैमः [ अभि० चिं० कां० २ श्लो० ७० ] । 4 'मदोद्धुरः' मदेन रेतसोद्धुर उन्नतः । 5 'परवृषम्' शत्रुवृषभम् । 6 'विनुनुत्सुः' युद्धार्थं शृङ्गाणि प्रेरयितुमिच्छुः 'णुदंत् प्रेरणे' इति धातोः सन्नन्तात् रुः प्रत्ययः । 7 'रतरञ्जनया' रतं रतिस्तस्या रञ्जनया । 8 'गौः' वृषभः ।

[ 30 ] 9 'अनुनयन्' वहन् । 10 'समुदयः' समूहः । 11 'विविधसिन्धिविधानविचक्षणः' विविधप्रकारेण संदेशहारकत्वादेव्यकरणकुशलः । 12 'प्रियतमाऽऽयतमानम्' भार्यामानविस्तारम् । 13 'अपाकरोत्' दूरीकृतम् ।

[ 31 ] 14 'वलयैः' कङ्कणैः । 15 'सरसीरुहाम्' कमलानाम् । 16 'कमनः' कामदेवः ।

[ 32 ] 17 '॰अभिनिनंसया' अभिनेतुमिच्छया । 18 उपवागडमण्डलम् वागडप्रदेशं तत्समीपम् ।

[ 34 ] 19 'अनुनीय' प्रणतिं कृत्वा ।

[ 35 ] 20 'शिवाऽऽगमः' शिवः कल्याणकारी, आगम आगमनं यस्य सः ।

[ 37 ] 21 'शरदत्यये' शरत्कालव्यतीते । 22 'सङ्घपुरन्दरः' चतुर्विधसङ्घेषु पुरन्दर इन्द्रः इव श्रेष्ठः । 23 'जिनमतोन्नयनम्' जैनधर्मस्योन्नयनमुन्नतिम् ।

जिनपति[१]प्रतिमाभिषवद्वयोत्सवसमुद्यतभक्तजनाऽऽदरैः ।
द्रुतविलम्बितया व्यहरद् भुवि [1]गजगतिर्जगति प्रसरद्यशाः ॥ ३८ ॥
बहुविधाऽऽर्हतपूजनवन्दनाद्युचितकर्मरतैर्विरतैर्भवात् ।
समनुनीय गुरुं सदुपासकैर्निजगृहे [2]जगृहे [3]जनुषः फलम् ॥ ३९ ॥
गुरुसमागमवित्त[4]विसर्जनैर्विदलिता[5] [6]कलितापकलाऽखिला ।
उपनता जनता सुतपोभरैः सुकृतता कृततात्त्विकभावनैः ॥ ४० ॥
[7]बहुलवाङ्मयशोधनकर्मणाऽजनि जनेऽस्य यशोधनमद्भुतम् ।
प्रसृत[8]मुग्रमहोदयया विभोरसुमतां सुमताश्रितधीमतः ॥ ४१ ॥
नरपतिप्रतिबोधम[9]जीजनत् समयदेशनया स नयाद् द्विधा ।
प्रभवति प्रभुवाक्यसुधारसे[10]ऽपरमते रमते स्म न कश्चन ॥ ४२ ॥
अपहृता प्रभुणा [२]रुचिरैन्दवी प्रतिहतं च [३]जनार्दनशासनम् ।
नयविशेषयुजा भृशमुज्ज्वलं भुवि हितं विहितं मतमार्हतम् ॥ ४३ ॥
नरकपालिकपालिजनादृता दृढनृशंसतया पिशिताशिता[४] ।
समुपदेशनयैव विनाशिता विहरता [५]हरतापसदेशिता ॥ ४४ ॥
भगवतः [11]क्रमपद्मनिवेशनाद् [12]वसुमती शुशुभे [13]घनसौरभा ।
[14]नवनवोत्सवसम्भवतः श्रिता [15]सकमला [16]कमलाकरलीलया ॥ ४५ ॥
इति [६]कृशानुभृशानुगतां दिशं समुपदिश्य विमोहबलस्थितिम् ।
शिथिलयन्नथ किञ्चन दुर्णयभ्रमपरामपरामगमद् गुरुः ॥ ४६ ॥
पथि समैक्षत दक्षतयाऽक्षतः [17]क्षितिपतिर्यतिनां [18]जलजाकरम् ।
प्रगुणिताद्भुतरागमिवोन्मिषत् सुजलजं [19]जलजन्तुकुलाकुलम् ॥ ४७ ॥
यवनराजभयेन यथा सुरा विषयमुग्रमहीधरमाश्रयत् ।
नवतटाकमिषाज्जलधेः स्थितिर्भुवि तथा[७]ऽवितथा सकला बभौ ॥ ४८ ॥

---

[ ३८ ] १ 'जिनपतिप्रतिमाऽभिषवद्वय°' जिनप्रतिष्ठाद्वयम् ।

[ ४३ ] २ 'रुचिरैन्दवी' रुचिः कापालिकश्रद्धा, इन्दुस्तन्मतप्ररूपकः सोमस्तत्सम्बन्धिनीति । ३ 'जनार्दनशासनम्' लोकपीडोपदेशः कृष्णशासनं वा ।

[ ४४ ] ४ 'पिशिताशिता' मांसभोजनम् । ५ 'हरतापसदेशिता' हरस्येश्वरस्य मते ये तापसास्तैः कथिता ।

[ ४६ ] ६ 'कृशानुभृशानुगतां दिशम्' आग्नेयीं दिशम् ।

[ ४८ ] ७ 'अवितथा' सत्या ।

---

[ 38 ] 1 'गजगतिः' गज इव प्रशस्ता गतिर्यस्य सः ।

[ 39 ] 2 'जगृहे' प्राप । 3 'जनुषः' जन्मनः ।

[ 40 ] 4 '°विसर्जनैः' दानैः । 5 'विदलिता' विनाशिता । 6 'कलितापकला' कलिः क्लेशः कलियुगो वा तस्य तापः सन्तापस्य कला ।

[ 41 ] 7 'बहुलवाङ्मयशोधनकर्मणा' बहुलाः बहवो वाङ्मयाः सिद्धान्तग्रन्थास्तेषां शोधनं सम्पादनं तस्य कर्मणा कार्येन । 8 'उग्रमहोदयया' उग्रस्तीव्रो यो महोदयो महोन्नतिस्तया ।

[ 42 ] 9 'अजीजनत्' 'जनैचि प्रादुर्भावे' इति धातोः णिगन्ते अद्यतन्यां 'उपान्त्यस्यासमानलोपि°' ४–२–३५–इति सिद्धहेमीयसूत्रेण रूपं सिध्यति । 10 'अपरमते' शैव-वैष्णवाद्यन्याम्नाये ।

[ 45 ] 11 'क्रमपद्मनिवेशनात्' चरणकमलन्यासात् । 12 'वसुमती' पृथ्वी । 13 'घनसौरभा' गाढगन्धवती 'गन्धवती पृथ्वी' इति लक्षणात् । 14 'बहुसितच्छदपक्षिसुखाश्रिता' इत्यपि मूलप्रतौ पाठान्तरम् । '°सितच्छदपक्षि°' सितच्छदाः हंसाः । 15 'सकमला' कमला लक्ष्मीस्तया सहिता । 16 'कमलाऽऽकरलीलया' कमलसरःक्रीडया ।

[ 47 ] 17 'क्षितिपतिर्यतिनां' यतिनां साधूनां क्षितिपतिर्नृपतिः श्रीविजयप्रभसूरिः । 18 'जलजाऽऽकरम्' सरोवरम् । 19 'जलजन्तुकुलाऽऽकुलम्' जलजन्तूनां कुलं समूहस्तेनाऽऽकुलं व्याप्तम् ।

निशि सतारनभःप्रतिबिम्बना कृपणवद् गणयांचकृवान् मणीन् ।
जलचलत्कुमुदच्छलसम्भवद्विमकरो मकरो[1]ऽग्रसरो[2]ऽम्बुधिः ॥ ४९ ॥
तरदनेकसित[3]च्छदपिच्छलच्छदमिषोच्छलदुज्ज्वलचामरः ।
[4]स्फुटरथाङ्गकुलाऽऽतपवारणः सरसभारसभाधिपतिर्व्यभात्[5] ॥ ५० ॥
अनुतटं [6]जलकेलिचिकीर्षया मिलितचारुविलासवतीजने ।
सपदि [7]पाद्यविधिं विलुलत्कुशैर्नवसरोऽवसरोचितमादधे ॥ ५१ ॥
अभिपतत्त[8]टिनीचलवीचिभिर्जनितफेनमिषाद्धसिताम्बुधिः ।
मणिगणैर्विरराज जलाशयः सललनाललनात् [9]पतयालुभिः ॥ ५२ ॥
विततपात्रतयैव पयोधरैरनुदिशं निभृतः समुदित्वरैः ।
जलनिधेः प्रतिकर्तुमिवो[1]ल्लसद्रसवयाः [2]सवयास्सजलाशयैः ॥ ५३ ॥
चलतरङ्गतु[10]रङ्गमशालिनीरनुनयन्नृपवद् बहुवा[11]हिनीः ।
स रुरुधे क्षितिविप्लवनोद्यतः शिखरशेखरसेतुमहीभृता ॥ ५४ ॥
वहनमुच्छ्रितलोहितकेतनं दधदयं ह्रदयं समरङ्गयत् ।
जयवतः क्षितिपस्य निपश्यतः [12]प्रकृतिभिः [13]कृतिभिर्विहितस्तुतेः ॥ ५५ ॥
जलनिमज्जनसज्जनकामिनीनयननिर्जितशालिपयोरुहः ।
सुषमयास्यसुनंदिसरोम्बरे सुरपतेरपतेज इवोद्ययौ ॥ ५६ ॥
उदयनगरलक्ष्या रम्यमादर्शरूपं पुरवरमदसीये सन्निविष्टं प्रतीरे ।
तपगणगुरुरागात् तत्र रागाविभागाद् घनतरवि[3]जयश्रीर्भूपरूपैरपीज्यः ॥ ५७ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
कथानायकस्य ईशानदिग्विजयवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

---

[ ५३ ] १ 'उल्लसद्रसवयाः' उल्लसन्तः रसवयसो जलपक्षिणो यत्र सः । २ 'सवयाः' जलनिधेः मित्रैः सहितः ।

[ ५७ ] ३ '°विजयश्रीः' पत्तनाकलितानामीशानदिग्विजयः । मरुदेशापेक्षयाऽऽग्नेयीविजयः ।

---

[ 49 ] 1 'मकरः' निधिविशेषः । 2 'अग्रसरः' प्रष्ठः ।

[ 50 ] 3 '°सितच्छद°' सितच्छदाः हंसाः । 4 'स्फुटरथाङ्गकुलाऽऽतपवारणः' स्फुटा ये रथाङ्गाश्चक्रवाकास्तेषां कुलं समूहः स एवाऽऽतपवारणं छत्रं यस्य सः । 5 'व्यभात्' विशेषेणादीदिपत् ।

[ 51 ] 6 'जलकेलिचिकीर्षया' जलक्रीडां कर्तुमिच्छया । 7 'पाद्यविधिम्' पादार्थं वारि पाद्यं तस्य विधिः 'पादार्थं पाद्यम्' इति हैमः [ अभि० चिं० कां० ३ श्लो० १६४ ] ।

[ 52 ] 8 'तटिनीचलवीचिभिः' तटिनी नदी तस्या चलाः चपला वीचयः कल्लोलास्तैः । 9 'पतयालुभिः' पातुकैः ।

[ 54 ] 10 '°तुरङ्गम°' तुरङ्गमा अश्वाः । 11 'वाहिनीः' सेनाः ।

[ 55 ] 12 'प्रकृतिभिः' प्रजाभिः । 13 'कृतिभिः' विद्वद्भिः ।

## सप्तमः सर्गः ।

श्रीः ऐँ नमः श्रीपार्श्वभगवतेऽर्हते ।

जिने[1]शतीर्थे [2]समभूदमत्सरो निपीय सूरेर्वचनानि भूपतिः ।
जि[3]नेशतीर्थे [4]समभूदमत्सरोऽ[5]प्यलंचिकीर्षुः [6]प्रमनाः स [7]संवरे ॥ १ ॥
[8]समांशमास्थाय ततः क्षमाभृतां प्रभुश्चचालाचलनिश्चयाऽऽशयः ।
[9]स [10]मांसमास्थाय ततः [11]क्षमाभृतां नृपोऽपि [12]तस्यानुमतेर्न्य[13]वर्त्तत ॥ २ ॥
[14]अवेत्य [15]साप्तच्छदिकं पुरं [16]पुरो [17]व्यधाच्चतुर्मासकमार्हतार्चितः ।
अवेत्य [18]साप्तच्छदिकं पुरं [19]पुरोर्जितद्विपेन्द्राननयक्षराडिव ॥ ३ ॥
स [20]शासनेनो[21]दयितोऽ[22]परागिणां [23]महार्हतां भव्यजनानिति क्षितौ ।
शशास [24]नेनोदयितोऽपरागिणां भवेत् प्रकाशस्त[25]मसामिव क्वचित् ॥ ४ ॥
[26]परैः [27]सतीर्थ्यैः [28]सहसाऽऽहवार्थिभिर्जनैः समं सद्व्यवहारगीर्गुरुः ।
[29]परैः स तीर्थ्यैः [30]सहसाऽऽहवार्थिभिर[31]बाध्यबोधोऽ[32]भिजगाम कामितम् ॥ ५ ॥
[33]शुभप्रवृत्तेः शमरोचितस्थितेर्महात्मनः प्रेरयिता [34]यताऽऽशयः ।
[35]शुभप्रवृत्तेः [36]समरोचितस्थितेर्गजस्य [37]सादीव बभौ जयश्रिया ॥ ६ ॥

---

[१] १ 'जिनेशतीर्थे' अर्हद्धर्मे । २ 'समभूदमत्सरः' अमत्सरोऽद्विष्टोऽभूत् । किं० भूपतिः । ३ 'जिनेशतीर्थे' जिनः कृष्ण ईशो महादेवस्तयोस्तीर्थे । ४ 'समभूदमत्सरः' समा चासौ भूः समभूस्तस्यां दमो बन्धो दण्डः, समभूदम इवाचरतीति क्विपि समभूदमति शतृप्रत्यये तादृशां सरस्तटाकस्तम् । "दमः स्यात् कर्दमे दण्डे दमने दमथेऽपि च" इति हैमः [ अने० सं० कां० २ श्लो० ३२८ ] ५ 'अलंचिकीर्षुः' अलङ्कारं कर्तुमिच्छुः कृष्णेश्वरप्रासादयोः [ विष्णु-शिवमन्दिरयोः ] ६ 'प्रमनाः' उत्कण्ठितः, उत्सुको वा ७ 'संवरे' पाल्याम् ॥

[२] ८ 'समांशमास्थाय' मासमात्रं तत्र स्थित्वा, मासे वर्षांशको भवेदिति शेषः, तुल्यमंशमैश्वर्यरूपं मत्वा वा । ९ 'सः' भूपतिः । १० 'मांसमास्थाय' मांसमाश्रित्य मांसाशनम् । ११ 'क्षमाभृतां नृपः' राज्ञां नृपो राजराजः । १२ 'तस्यानुमतेः' तस्य गुरोरनुमत्याऽऽज्ञया १३ 'न्यवर्त्तत' निवृत्तः कतिचित् प्रयाणान्यनुगत्य पश्चाद् वलितः मांसाशनं प्रत्याचख्यौ वा ।

[३] १४ 'अवेत्य' प्राप्य । १५ 'साप्तच्छदिकम्' 'सादडी'ति नाम्ना पुरं नगरम् । १६ 'पुरः' अग्रे परापूर्वं वा । १७ 'व्यधात्' व्यधत्त । १८ 'साप्तच्छदिकम्' सप्तवर्णसम्बन्धिनं गग्गुलं प्राप्य । १९ 'पुरोर्जितद्विपेन्द्राननयक्षराडिव' पुरं शरीरं तेनोर्जितो बलवान् द्विपेन्द्राननो गणपतियक्षः, यक्षो [ मेघदूतस्यनायकः ] यथा चातुर्मासकं व्यधत्त तथैव । "पुरं शरीरे नगरे गृहपाटलिपुत्रयोः । पुरस्तु गुग्गुलौ पुन्नं कृमौ दैत्येक्षुभेदयोः" इति हैमः [ अने० सं० कां० २ श्लो० ४५०-४५१ ] ॥

[४] २० 'शासनेन' आज्ञया । २१ 'उदयितः' उदयो जातोऽस्योदयितः । २२ 'अपरागिणाम्' रागरहितानाम् । २३ महार्हतां भव्यजनान् इति शशास । २४ 'इनस्य' स्वामिनः सूर्यस्य वा । 'उदयितोऽपरागिणाम्' या उदयिता तत्रोपद्रवकारिणां प्रकाशो न भवेत् । २५ 'तमसाम्' तिमिराणां राहूणामिव ॥

[५] २६ 'परैः' उत्कृष्टैः । २७ 'सतीर्थ्यैः' एकब्रह्मव्रताऽऽचारैः । २८ 'सहसाऽऽहवार्थिभिः' बलेनाऽऽकारणार्थिभिः जनैः समम् । २९ 'परैः तीर्थ्यैः' अन्यैस्तीर्थ्यैस्तीर्थान्तरीयैः । ३० 'सहसाऽऽहवार्थिभिः' सहसा शीघ्रं, आहवार्थिभिः रणोन्मुखैः यज्ञार्थिभिर्वा । "आहवस्तु सङ्गतन्त्रौ स्यान्निदेशाऽऽह्वानयोरपि" इत्यनेकार्थः । ३१ 'अबाध्यबोधः' अबाध्यो बोधो यस्य सः । ३२ 'अभिजगाम कामितम्' कामितं स्थानमभिजगाम ॥

[६] ३३ 'शुभप्रवृत्तेः शमरोचितस्थितेर्महात्मनः प्रेरयिता' महात्मनः साधोः प्रेरयिता शुभप्रवृत्तेः 'शमरोचितस्थितेः' शमरोचिता स्थितिर्यस्य । ३४ 'यताऽऽशयः' यते नियमे, आशयो यस्य सः । ३५ 'शुभप्रवृत्तेः' शुभा प्रवृत्तिर्मदो यस्य । ३६ 'समरोचितस्थितेः' समरे सङ्ग्रामे उचिता स्थितिर्यस्य । ३७ 'सादी' महामात्रः ॥

स दक्षजातिप्रणयः कलाभृतां नृणामभीष्टः सुमनो मुदेऽभवत् ।
सदक्षजातिप्रणयः कलाभृतां तनुं वहन्निन्दुरिवोज्ज्वलांशुपः ॥ ७ ॥

विबोधहेतुर्जडजन्मशालिनां गवां प्रसारैः सरसां श्रियं दधौ ।
विबोधहेतुर्जलजन्मशालिनां महावनानामिव भानुमान् विभुः ॥ ८ ॥

सदा रसं सज्जनताः स्वसादरं समुन्नयन् यो जगति प्रणीतवान् ।
सदारसंसज्जनतास्वसादरं प्रतिस्थलं तं स्थलगा ववन्दिरे ॥ ९ ॥

समीहितार्थप्रथनैः स दैवतद्रुमायते स्माङ्गभृतां धियां निधिः ।
शमी हितार्थप्रथनैः सदैव तन्न कस्य लाभाय जनेऽस्य सन्निधिः ॥ १० ॥

क्रमात् समासाद्य मरोः रसामयं पुपाव भावोज्ज्वलमेदिनीपुरम् ।
क्रमात् समाऽऽशाद्यमरोरसामयं स देशसङ्गाऽऽगमभक्तिभावनैः ॥ ११ ॥

हृतव्यवायोपगतेर्विनायकः पुरे स नारायणनाम्नि तस्थिवान् ।
हृतव्यवायोऽपगतेर्विना यकन्नकोऽपि निस्तारयिता कलौ युगे ॥ १२ ॥

सुरेश्वराऽऽशाविजयाऽऽहिताऽऽशयः परं चतुर्मासककर्मणस्ततः ।
सुरेश्वराशाविजया हि तासयन्नघं स सङ्गामपुरं समीयिवान् ॥ १३ ॥

इतोऽपराऽऽशापवनाद् दिवोदितं तमो विमोहोदयजं स चिन्तयन् ।
इतोऽपराऽऽशापवनाद् दिवो दितं स्वतेजसा माल्यपुरं गुरुस्ततः ॥ १४ ॥

---

[ ७ ] १ 'सः' गुरुः । २ 'दक्षजातिप्रणयः' दक्षजात्यां प्रणयः स्नेहो यस्य सः । ३ 'कलाभृताम्' कला विज्ञानं तद्भृतामभीष्टः । ४ 'सदक्षजातिप्रणयः' सदक्षे सद्व्यवहारे जात्या जन्मना प्रणयो याञ्चा यस्य सः, यस्य सदक्षे शिवे प्रणयमतिक्रान्तोऽतिप्रणयः न रागी । दक्षजा प्रार्वती तया सह यः स सदक्षजः शिवस्तत्र प्रणयमतिक्रान्तोऽतिप्रणयो न रागवानित्यर्थः "अक्षो रथस्यावयवे व्यवहारे बिभीतके" इति हैमः [ अने० सं० कां० श्लो० ५६९ ] । "प्रणयः प्रेमयाञ्चयोः, विस्रम्भे प्रसरे चापि" इति हैमः [ अने० सं० कां० ३ श्लो० ५२२ ] ५ 'कलाभृताम्' कलेनाजीर्णेनाभृताम् । "कलस्त्वं जीर्णरेतसोः, अव्यक्तमधुरध्वाने कला स्यादंशशिल्पयोः । कलने मूलरैवृद्धौ षोडशांशे विधोरपि" इति हैमः [ अने० सं० कां० २ श्लो० ४८८ ] । ६ 'उज्ज्वलांशुपः' उज्ज्वलांशून् श्वेताम्बरान् पातीति ॥

[ ८ ] ७ 'जडजन्मशालिनाम्' जडप्राणिनां पक्षे पद्मानाम् ।

[ ९ ] ८ "सदा रसं सज्जनताः स्वसादरं समुन्नयन् यः" यः सदा रसं समुन्नयन् सज्जनताः सभ्यजनसमूहान् स्वसाद् स्वाधीनान्, भरमत्यर्थं प्रणीतवान् । ९ 'सदारसंसज्जनतास्वसादरम्' सस्त्रीसभालोकेषु अनादरम् । १० 'तम्' गुरुम् ॥

[ १० ] ११ 'समीहितार्थप्रथनैः' इष्टार्थदानैः । १२ 'सः' गुरुः । १३ '°द्रुमायते स्म' कल्पवृक्षायते स्म । १४ 'शमी' शान्तः । १५ 'हितार्थप्रथनैः' हितप्रयोजनविस्तारैः ॥

[ ११ ] १६ 'क्रमात्' क्रमाभ्यां पादाभ्यामततीति क्रमात् यद्वा क्रमः परम्परागमस्तेनातततीति क्रमात् । १७ 'मरोः रसामयम्' मरोः भूमीम् । १८ 'समाऽऽशाद्यम्' सर्वदिग्भागे आद्यम् । १९ 'अरोरसामयम्' रोरा दरिद्राः सामायाः सरोगास्तैः रहितम् ॥

[ १२ ] २० 'हृतव्यवायोपगतेः' हृता नष्टा व्यवायानां विघ्नानामुपगतिस्तस्याः हेतोः । २१ 'विनायकः' गणेशः । २२ 'हृतव्यवायः' हृतः व्यवायो मैथुनं येन सः । २३ 'अपगतेः' नारकादेः । २४ 'यकन्नकोऽपि निस्तारयिता' विभानकोऽपि निस्तारयिता ॥

[ १३ ] २५ 'सुरेश्वराऽऽविजयाऽऽहिताऽऽशयः' पूर्वदिग्विजये स्थापितभावः । २६ 'सुरेश्वराऽऽशाविजया' सुरायामीश्वराऽऽशा धनवतां तृष्णा तस्या विजा पृथग्भावस्तया । २७ 'हि' निश्चितम् । २८ 'तासयन्' क्षेपयन् । २९ 'अघम्' पापम् ॥

[ १४ ] ३० 'इतोऽपराऽऽशापवनाद्' इतश्चापरस्य परपक्षस्य य आशायास्तृष्णायाः पवनो वायुस्तस्माद् । ३१ 'दिवोदितम्' दिवा दिने उदितम् । ३२ 'तमः' पापमज्ञानं वा । ३३ 'इतः' प्राप्तः । ३४ 'अपराशापवनाद्' अपराशा पश्चिमा तत्पवित्रणात् । ३५ 'दिवः' स्वर्गस्य । ३६ 'दितम्' खण्डितम् । ३७ 'स्वतेजसा' स्वप्रतापेन ॥

असौ [1]गतं [2]नाटयिता [3]सितच्छदव्रजस्य चक्रे वचनैः क्षमातलम् ।
[4]असौगतं [5]नाटयिता [6]सितच्छदप्रभुस्तथो[7]त्सूत्रपथे मनागपि ॥ १५ ॥
[8]स [9]मानवाधीश्वरसेवितक्रमाम्बुजश्चतुर्मासककर्म तेनिवान् ।
[10]समा [11]नवा [12]धीः [13]स्वरसेऽवितक्रमाऽङ्गि[14]नां ततोऽभूद् वि[15]षयेऽर्हतां मते ॥ १६ ॥
[16]विहारशोभाऽतिशयात् [17]सभा सुरप्रभोर्यदीया [18]बहु पिप्रिये मुहुः ।
[19]विहारशोभाऽतिशयात् सभासुरः क्रमात् [20]समास्तत्र निनाय काञ्चन ॥ १७ ॥
अलं कलङ्कः सकलोऽप्यपास्यत सचेतसां दुर्णयहारिणाऽमुना ।
[21]अलं [22]कलं कः सकलोऽप्य[23]पास्यतः प्रभोर्वचो बोधयितुं नरः परः ॥ १८ ॥
[24]असन्निभो[25]ऽङ्गप्रभया[26]ऽधिकाञ्चनश्रियं दधौ गौत[27]मतः प्रति प्रभुः ।
[28]असन्निभो[29]ऽङ्ग ! [30]प्रभयाऽधिकां च [31]नः प्रियां [32]समज्ञां भुवने [33]गुरोरपि ॥ १९ ॥
न [34]वासवानाम[35]नुरागिता गता [36]वसुन्धरायां स्फुरितेऽस्य [37]शासने ।
[38]नवाऽऽसवानामनुरागिता गता जनस्य नश्यत्तमसः प्रभोर्गिरा ॥ २० ॥
[39]नदीनभावातिगभीरतामसावशिश्रियद् विश्वगुरुर्गरीयसीम् ।
न दीन[40]भा [41]वाऽ[42]तिगभीर[43]तामसाऽऽशयस्य सर्वस्य मुनेर्गणे ततः ॥ २१ ॥
[44]अजन्यताऽऽपारविहारि [45]मण्डलं प्रभोर्विहारेण धनाढ्यबोधने ।
[46]अजन्यतापा [47]रविहारिमण्डलं [48]महाऽऽतपेऽ[49]प्याप्य [50]मही सुसीमगा ॥ २२ ॥
[51]न रोचिता [52]चापकलाऽ[53]सुहारिणी नृपादिलोकेऽस्य शमोपदेशनात् ।
[54]नरोचिता चाऽऽप[55] कलाऽऽशु हारिणी तपोजपादेर्जगति प्रसारिताम् ॥ २३ ॥

---

[ १५ ] १ 'गतम्' गमनं ज्ञानं वा । २ 'नाटयिता' प्रवर्त्तकः ३ 'सितच्छदव्रजस्य' श्वेताम्बरव्रजस्य । ४ 'असौगतम्' अबौद्धम् । ५ 'नाटयिता' न, अटयिता 'स्वार्थे णिच्' । ६ 'सितच्छदप्रभुः' श्वेताम्बराधिपः । ७ 'उत्सूत्रपथे' उत्सूत्रमार्गे ॥

[ १६ ] ८ 'सः' गुरुः । ९ 'मानवाधीश्वरसेवितक्रमाम्बुजः' नृपवन्दितपादपद्मः । १० 'समा' अकुटिला । ११ 'नवा' नवीना । १२ 'धीः' मतिः । १३ 'स्वरसेऽवितक्रमा' स्वाभिप्रायेऽवितः रक्षितः क्रमः पारम्पर्यं यस्यां सा । १४ 'अङ्गिनाम्' प्राणिनाम् । १५ 'विषयेऽर्हतां मते' अर्हतां मते विषये देशे ॥

[ १७ ] १६ 'विहारशोभाऽतिशयात्' विहारा जिनप्रासादास्तेषां शोभाभरेण । १७ 'सभा सुरप्रभोः' सुरप्रभोः, इन्द्रस्य सभा । १८ 'बहु पिप्रिये' बहु यथा स्यात् तथा पिप्रिये तुष्टा १९ 'विहारशोभाऽतिशयात्' विहारे देशान्तश्चलने यः शोभाया अतिशयो दुर्भिक्षडमरादिनाशस्तस्मात् । २० 'समाः' वर्षाणि ॥

[ १८ ] २१ 'अलम्' समर्थः । २२ 'कलम्' मृष्टम् । २३ 'अपास्यतः नरः पुरुषस्य परः सकलोऽपि कः बोधयितुं अलम्, इत्यन्वयः' अपि तु न कोऽपीत्यर्थः ॥

[ १९ ] २४ 'असन्निभः' अतुल्यः । २५ 'अङ्गप्रभया' देहकान्त्या । २६ 'अधिकाञ्चनश्रियम्' काञ्चनमधिकृत्याधिकाञ्चनं श्रीर्लक्ष्मीस्ताम् दधौ । २७ 'गौतमतः प्रति' गौतमतुल्यः । २८ 'असन्निभः' असद् अविद्यमानं निभं यस्मिन् सः । २९ 'अङ्ग !' अङ्ग इति संयोजने । ३० 'प्रभया' बुद्ध्या । ३१ 'नः' अस्माकम् । ३२ 'प्रियाम्' इष्टाम् । ३३ 'समाज्ञाम्' कीर्त्तिम् । ३३ 'गुरोः' देवसूरेरधिकां दधौ ॥

[ २० ] ३४ 'वासवानाम्' भूपानाम् । ३५ 'अनुरागिता' रागित्वं गता भूपाः । ३६ 'वसुन्धरायाम्' पृथ्व्याम् । ३७ 'शासने' जैनशासने तस्मिन्ननुरागिणो जाता इत्यर्थः । ३८ 'नवाऽऽसवानामनुरागिता गता' नवा नव्याऽऽसवानामादरो गतः ॥

[ २१ ] ३९ 'नदीनभावातिगभीरतामसावशिश्रियद्' नदीनः समुद्रस्तद्वद् भावे चित्ताभिप्रायेऽतिगभीरताम्, असौ, अशिश्रियत् आश्रितः । ४० 'दीनभा' दैन्यम् । ४१ 'वा' अथवा । ४२ 'अतिगभीः' अति गच्छतीत्यतिगाऽतिशायिनी भीर्भयम् । ४३ 'अतामसाऽऽशयस्य' अतामसोऽक्रोध आशयो यस्य ।

[ २२ ] ४४ 'अजन्यताऽऽपारविहारि' अपाराः बहवो विहाराश्चैत्यानि यत्रेदृग्, अजन्यत । ४५ 'मण्डलम्' देशः । ४६ 'अजन्यतापा' अतापा अजनि । ४७ 'रविहारिमण्डलम्' रवेश्चारुबिम्बम् । ४८ 'महाऽऽतपेऽपि' ग्रीष्मेऽपि । ४९ 'आप्य' प्राप्य ऋतूनामानुकूल्यात् । ५० 'मही' पृथ्वी ॥

[ २३ ] ५१ 'न रोचिता' नेष्टा । ५२ 'चापकला' धनुःकला । ५३ 'असुहारिणी' प्राणहारिणी । ५४ 'नरोचिता' नराणामुचिता । ५५ 'आप कलाऽऽशु हारिणी तपोजपादेर्जगति प्रसारिताम्' तपोजपादेस्तपोजपाद्यस्य [illegible] घटिका, प्रसारितां विस्तारमाप, आशु शीघ्रम्, हारिणी रम्या ॥

गणेशनैपुण्यमहो महाऽऽयतेः प्रभोर्दिदीपे बहुदानवत्तया ।
गणे शनैः पुण्यमहो महायते जगत्प्रकाशाय बभूव शाश्वतम् ॥ २४ ॥
न बादरः कोऽपि निकामजागरे गणेऽभवत् तस्य गुणव्यतिक्रमः ।
न वाऽऽदरः कोपिनि कामजागरेरिता नृणां चेतसि धैर्यविक्रिया ॥ २५ ॥
न वैरपीडा न बलाभियोगिता गुरोर्विहारे मरुमण्डले ततः ।
नवैरपीडा नवलाभियोगितादृशाऽन्यतीर्थ्यैरकृशा व्यधीयत ॥ २६ ॥
नाऽऽवेशरोगोऽभिनिवेशकामना गुरोः प्रकाशेऽन्यमते तनुभृतः ।
नावे सरोगोऽभिनिवेशकामनाऽऽशयो बुधः कस्तरणेऽङ्घ्रिबन्दिरे ॥ २७ ॥
पराजितो धन्वनि योजिते गुणे प्रभोर्बली मोहमहाभटच्छली ।
पराजितो धन्वनि योजिते गुणे गुरुप्रकाण्डान्न बिभेति कः क्षितौ ॥ २८ ॥
सभाजनेऽनन्तरसस्तपालये गुणं गुरौ शासति सङ्गते प्रगे ।
स भाजनेऽनन्तरशस्तपा लये जिनेन्द्रवाचां परमानुरागिणि ॥ २९ ॥
स देशरूपं कलया च कारयन् मरौ गणी धर्मविधौ निजे पदे ।
सदेशरूपं कलयाश्चकार यन्निवेश्य सूरिं विजयादिरत्नकम् ॥ ३० ॥
वसुन्धरा सा शुचिरस्य संगतः प्रतिस्थलं स क्षणलक्षणेक्षणैः ।
वसुं धराऽऽशासु चिरस्य संगतमबोधि बोधिप्रदमेनमार्हतः ॥ ३१ ॥

---

[ २४ ] १ 'गणेशनैपुण्यमहः' गणेशवत् पाण्डित्यस्य तेजः । २ 'महाऽऽयतेः' महती, आयतिर्विस्तृतिर्यस्य 'यतिर्विकारे विरतौ भिक्षौ' इति हैमः [ अने० सं० कां० २ श्लो० १९२ ] तेन, अमहायतेः न महद्विकारस्य । ३ 'गणे' गच्छे । ४ 'शनैः शनैर्जगत्प्रकाशाय शाश्वतं पुण्यमहर्दिनं बभूव' इत्यन्वयः । ५ 'महाऽऽयतेः' महायोत्सवायाऽऽयतिरुत्तरकालो यस्य ॥

[ २५ ] ६ 'बादरः' दृश्यमानः । ७ 'निकामजागरे' अत्यर्थं जागरूके । ८ 'गुण०' गुणाः प्राणातिपातनिवृत्त्यादयो मूलगुणाः, पिण्डविशुद्ध्यादय उत्तरगुणाः । ९ 'कोपिनि' क्रुद्धे आदरः । १० 'कामजागरेरिता' कामाज्जाता गरेण करणेनेरिता न धैर्यविक्रिया । 'गरस्तूपविषे विषे । रोगे गरं स्यात् करणे' इति हैमः [ अने० सं० कां० २ श्लो० ४२०–४२१ ] ॥

[ २६ ] ११ 'नवैरपीडा' नवैः स्तवैरपि ईडा स्तुतिः । १२ 'नवलाभियोगितादृशा' लाभोऽस्त्येषां लाभिनः, योगोऽस्त्येषां योगिनस्ततो द्वन्द्वस्तेषां भावस्तत्ता नवा चासौ लाभियोगिता तस्याः दृग् दृष्टिस्तया । गणे लाभाधिका लब्धिपात्रं योगभाजश्च बहुला दृश्यन्ते तेन श्रीपरमगुरौ मतान्तरीयाणामपि महती श्रद्धा । १३ 'अन्यतीर्थ्यैः' तापसभक्तादिभिः । १४ 'अकृशा' बहुला । १५ 'व्यधीयत' अक्रियत ॥

[ २७ ] १६ 'नाऽऽवेशरोगः' आवेशरोगोऽपस्माररुजाऽन्यमतप्रवेशरूपो रोगो वा न । १७ 'अभिनिवेशकामना' अभिनिवेशवाञ्छाऽपि हठाऽऽग्रहोऽपि न । १८ 'गुरोः प्रकाशे सत्यन्यमते' । १९ 'तनुभृतः' जीवस्य । अन्योक्तिमाह 'नावे०' अङ्घ्रिबन्दिरे तरणे नावे यानपात्राय को बुधः 'सरोगः' सरसि गच्छतीति 'अभिनिवेशो' वाहनमध्यासने कामनाऽभिलाषाऽऽशयो यस्य सः ।

[ २८ ] २० 'पराजितः' भग्नः । २१ 'धन्वनि' मरौ । २२ 'गुणे' धर्मरूपे योजिते सति प्रभोः पराजितः । २३ 'धन्वनि' धनुषि । २४ 'गुणे' ज्यायां योजिते सति । २५ 'गुरुप्रकाण्डात्' उत्कृष्टसङ्ग्रामाद् महाबाणात् को न बिभेति । अयमपि गुरुप्रकाण्डो गुरुमुख्य इति ॥

[ २९ ] २६ 'सभाजनेऽनन्तरसः' सभाजने बहुरस आसीत् । २७ 'तपाऽऽलये' तपागणोपाश्रये । २८ 'सङ्गते' प्रातर्मिलिते । २९ 'प्रगे' अग्रं गते । ३० 'भाजने' स्थाल्यादौ । ३१ 'अनन्तरशस्तपा' अनन्तराणि सान्द्राणि शस्तानि मङ्गलानि पातीत्यनन्तरशस्तपा बहुमङ्गलान्वित इत्यर्थः । ३२ 'लये' ध्याने । सभाजने जिनेन्द्रवाचां ध्याने परमानुरागिणि ॥

[ ३० ] ३३ 'स देशरूपम्' गुरुन्यायिप्रवृत्तिम् । ३४ 'कलया' विज्ञानोद्बोधनेन । ३५ 'निजे पदे' निजे पदे श्रीविजयरत्नसूरिं निवेश्य । ३६ 'सदेशरूपम्' सदा ईशरूपं पट्टनायकत्वं कलयाञ्चकार । 'ईशः स्वामिनि रुद्रे च' इति हैमः [ अने० सं० कां० २ श्लो० ५५६ ] ॥

[ ३१ ] ३७ 'वसुन्धरा सा' सा भूमिः । ३८ 'शुचिः' उज्ज्वला पवित्रा वा । ३९ 'अस्य' गुरोः संगतः । ४० 'प्रतिस्थलं स क्षणलक्षणेक्षणैः' प्रतिस्थलं सर्वत्र, क्षणलक्षणेक्षणैः महोत्सवलक्षणदर्शनैः । ४१ 'वसुम्' देवविशेषमबोधि । ४२ 'धराऽऽशासु' पर्वतदिक्षु । ४३ 'चिरस्य' बहुकालम् । ४४ 'संगतम्' मिलितम् । ४५ 'एनमार्हतः' आर्हतः श्राद्धः, एनं गुरुम् ॥

न गौतमीयं मतम[1]क्षपादजं धिया प्रमाणयक्रियताऽमुना मनाक् ।
न [2]गौतमीयं मतम[3]क्षपादजं [4]प्रमोचितं के[5]वलिनः प्रमोचितम् ॥ ३२ ॥
न साधुना वै[6] भवहारिणी [7]रुचिर्वि[8]खण्डिता नन्दितपण्डिता [9]गणे ।
[10]नसाधुना वै[11]भवहारिणी [12]रुचिर्धृता तपोभिः प्रभया समन्वितैः ॥ ३३ ॥
वि[13]मुक्तरा [14]गा [15]नवधा सुरक्षणा [16]जगौ गुरुर्ब्रह्मधरः क्षमापरः ।
विमुक्तरागा [17]नवधासुरक्षणा गणे प्रवृत्तिर्व्रतिनां ततोऽभवत् ॥ ३४ ॥
[18]प्रवासना [19]शापनयेऽ[20]स्य मानसे गुरोर्निदेशेन [21]रुषाऽपि योगिनाम् ।
[22]प्रवासनाऽऽ[23]शापनयेऽ[24]स्यमा[25]नशे परिग्रहं भावयतां वि[26]दूरतः ॥ ३५ ॥
[27]शुचिप्रभावैः [28]श्रमणानुगामिनस्तदाऽऽर्हताः पुण्यजना इवेश्वराः ।
[29]शुचिप्रभा वै[30]श्रमणानुगामि[31]नप्रसादतः प्रौढिविभूतिमादधौ ॥ ३६ ॥
नि[32]रन्तरायाऽऽगमहेतुरङ्गतः [33]शुभां [34]रुचिं प्राप्य गुरोर्निदेशतः ।
नि[35]रन्तरा [36]यागमहे [37]तुरङ्गतस्तदा विहिं[38]स्यात् [39]सुजना [40]न्यवीवृतन् ॥ ३७ ॥
वि[41]नाऽशनायां [42]गजविक्रमा [43]रते पराङ्मुखाः शुद्धदृशो न भुञ्जते ।
वि[44]नाशनायाङ्गजविक्रमारतेस्तपस्विनो यस्य गणे गणेशितुः ॥ ३८ ॥
न नाम [45]धीरञ्जनया जि[46]नोदिते [47]पटुः [48]सभा का [49]तमुपेत्य दूरतः ।
ननाम [50]धीरं [51]जनयाजिनोदिते चिरं वि[52]रक्तं वि[53]पथे यथेच्छया ॥ ३९ ॥

---

[३२] १ 'अक्षपादजम्' अक्षपादो नैयायिकमतप्रणेता तस्माज्जातं श्रीगौतमीयं मतम् । २ 'गौतमीयम्' गौतमोऽत्रेन्द्रभूतिः । ३ 'क्षपादजम्' क्षपायां रात्रावत्तीति क्षपादस्तस्माज्जाते, ईदृशं न तन्मतम् । ४ 'प्रमोचितम्' मुक्तम् । ५ 'केवलिनः प्रमोचितम्' केवलज्ञानिनो ज्ञानयोग्यम् ॥

[३३] ६ 'वै भवहारिणी' वै निश्चितं साधुना भवहारिणी भवहर्त्री । ७ 'रुचिः' इच्छा । ८ 'विखण्डिता' खण्डिता न । ९ 'गणे' गच्छे । १० 'नसाऽधुना' नसा नासिकारूपेणाधुना । ११ 'वैभवहारिणी' वैभवेन हारिणी मनोहरा । १२ 'रुचिः' कान्तिः ॥

[३४] १३ 'विमुक्तराः' विमुञ्चति कर्मपाशाद् विमुग् । अतिशयेन विमुचो विमुक्तराः । १४ 'गाः' वाणीः । १५ 'नवधा सुरक्षणाः'—नवब्रह्मगुप्तिरूपा सुरक्षणा सुराणां क्षणं उत्सवा यासु ताः सुष्ठु लक्षणानि यासु ता वा । १६ 'जगौ गुरुः' गुरुर्जगौ जगाद । १७ 'नवधासुरक्षणाः' नवप्रकारा असवः प्राणास्तदाऽऽश्रयत्वात् प्राणिनस्तेषां रक्षणं यस्यां सा ॥

[३५] १८ 'प्रवासना' प्रयाणम् । १९ 'शापनये' शापस्य नये अभिप्राये । २० 'अस्य' गुरोः निदेशेन । २१ 'रुषाऽपि' रोषेणाऽपि योगिनां मानसे; न कोऽपि शशापेत्यर्थः । २२ 'प्रवासना' प्रकृष्टा वासना भावना । २३ 'आशापनये' लोभमुञ्चने । २४ 'अस्यम्' क्षेप्यं परिग्रहं भावयताम् । २५ 'आनशे' व्याप्ता । २६ 'विदूरतः' दूरतः ॥

[३६] २७ 'शुचिप्रभावैः' पवित्रतेजोभिः । २८ 'श्रमणानुगामिनः' यतिसेवकाः । २९ 'शुचिप्रभाः' निर्मलधियः । ३० 'वैश्रमणानुगाम्' धनदानुरूपाम् । ३१ 'इनप्रसादतः' स्वामिप्रसादतः ॥

[३७] ३२ 'निरन्तरायाऽऽगमहेतुरङ्गतः' अन्तरायरहितो य आगमेषु हेतुषु च रङ्गोऽत्याग्रहस्तस्मात् । ३३ 'शुभाम्' निर्दोषाम् । ३४ 'रुचिम्' इच्छाम् । ३५ 'निरन्तरा' दृढा । ३६ 'यागमहे' यज्ञोत्सवे । ३७ 'तुरङ्गतः' अश्वात् । ३८ 'विहिंस्यात्' वध्यात् । ३९ 'सुजनाः' शुद्धा लोकाः । ४० 'न्यवीवृतन्' निवृत्ताः ॥

[३८] ४१ 'विनाऽशनायाम्' अशनायां क्षुधां विना । ४२ 'गजविक्रमाः' गजवद् बलवन्तः । ४३ 'रते' भोगे पराङ्मुखाः । ४४ 'विनाशनायाङ्गजविक्रमारतेः' अङ्गजस्य स्मरस्य विक्रमा विगतक्रमा याऽरतिस्तस्या विनाशनाय ॥

[३९] ४५ 'धीरञ्जनया' बुद्धिरागेण । ४६ 'जिनोदिते' जिनवचने । ४७ 'पटुः' व्यक्ता । ४८ 'सभा' नामप्राकाश्येका सभा । ४९ 'तमुपेत्य दूरतः' दूरतः उपेत्य तं, न नाम अपि तु सर्वाऽपि ननाम । ५० 'धीरम्' प्राज्ञम् । ५१ 'जनयाजिनोदिते' जनं यजतीति जनयाजी नरमेधादियज्ञकृत् तेन नोदिते प्रेरिते । ५२ 'विरक्तम्' विरक्तं तं गुरुम् । ५३ 'विपथे' कुमार्गे ॥

सदा नवाऽऽलापिकयाचि[१]दुत्तरा वितेनिरे तां खगणे मिथः [२]कथाम् ।
[३]सदानबालाऽपि [४]कयाचिदुत्तरात् समं [५]यदाख्यावशतोऽनयन् निशाम् ॥ ४० ॥

अनङ्गरागं नि[६]यतः [७]स मुक्तभा यः साङ्गरागः [८]सुतनो[९]स्तनौ दधौ ।
[१०]अनङ्गरागं नियतः समुक्तभाः प्रोच्चैः स्तनः को न गिरिर्वनं दधत् ॥ ४१ ॥
[एकालापकम्]

[११]नियामकाश्चेतसि भावयन्त्यहो ! किं नाम देयो[१२]ऽनुवरायकः स्त्रियाः ।
[१३]नियामकाश्चेतसि भावयन्त्यहोरात्रं स तीर्थङ्कर एव नः प्रभुः ॥ ४२ ॥

[१४]सुखायनः [१५]सारसनाभिकामितः कीदृग् रथः स्यात् सुभटो वधूजनः ।
सुखाय नः [१६]सारसनाऽभिकामितः कथं जयार्थी नृपतिर्महाबलः ॥ ४३ ॥
[एकालापकं समस्तम्]

[१७]महो दयाया [१८]जगतीश्वरश्रियो [१९]मा या विमोहं स्म यतोऽर्हतां मते ।
[२०]महोदयायाऽऽजगतीश्वरश्रियो [२१]यथास्थितं [२२]भावनयाऽ[२३]स्य सन्मते ! ॥४४॥ [क्रियागुप्तम्]

[२४]पराऽ[२५]सितीव्रा विरतिः [२६]प्रमाऽऽपणे [२७]न नाम काऽबोधि विदा तपोगणे ।
[२८]पलाशितीव्राऽविरतिः [२९]प्रमापणे नवाऽपि कामोचितया न भी भृता ॥ ४५ ॥
[क्रियागुप्तम्]

---

[ ४० ] १ 'उत्तराः' ज्ञानप्रवराः, "उत्तरं प्रवरोर्द्ध्वयोः" इति हैमः [ अने० सं० कां० ३ श्लो० ५५८ ] । २ 'कथाम्' वार्त्ताम्, मिथः सदा नित्यं नवाऽऽलापिकया वितेनिरे । ३ 'सदानबाला' दानवती बाला स्त्री । ४ "कयाचिद्' सख्या । ५ 'यदाख्यावशतः' यस्याः कथाया आख्यावशत आलापिका-कथनेन ॥

[ ४१ ] ६ 'नियतः' बद्धोऽपि । ७ 'स मुक्तभाः' स मुक्तवद् भासत इति मुक्तभाः "मुक्ता मौक्तिकपुंश्चल्योः" इति हैमः [ अने० सं० कां० २ श्लो० १९१ ]। ८ 'सुतनोः' स्त्रियाः । ९ 'तनौ' शरीरे यः साङ्गरागोऽपि अनङ्गरागं दधौ । १० 'अनङ्ग-रागम्' अनङ्गे आकाशे रागोऽरुणिमा यस्य तत् "अङ्गहीनेऽप्यनङ्गं खे चित्तेऽनङ्गस्तु मन्मथे" इति हैमः [ अने० सं० कां० ३ श्लो० ११५ ]; "रागः स्याल्लोहितादिषु" इति हैमः [ अने० सं० कां० २ श्लो० ४६ ]; यद्वाऽनङ्गैर्मदनफलै राजत इत्य-नङ्गराः, अगाः वृक्षा यस्य तत् ईदृशः स्तन इत्येकालापकम् ॥

[ ४२ ] ११ 'नियामकाः' पोतवहाः । १२ "ᶜवरायः कः स्त्रिया देयः" देयः करः । १३ "नियामकाः" नियमधारिणः साधवः । 'तीर्थङ्कर एव नः अस्माकं प्रभुः' ॥

[ ४३ ] १४ 'सुखायनः' सुखकारि अयनं गमनं यस्य यद्वा नोऽस्माकं सर्वलोकानां सुखाय । १५ 'सारसनाभिकामितः' सारं अरैः सहितं सनाभि नाभियुक्तं कामितमभिलषितं यस्य स भटः; सारसनमधिकाङ्गमभिकामितं प्रियं यस्य स वधूजनः; राज्ञः पक्षे सारः श्रेष्ठः सनाभिस्सगोत्रः स एव कामितो यस्य सः; "नाभिः क्षेत्रप्रधानयोः, चक्रमध्ये मृगमदे प्राण्यङ्गे मुख्यराज्ञि च" इति हैमः [ अने० सं० कां० २ श्लो० ३१४ ] "सनाभि-र्ज्ञातिसदृशोः" इति हैमः [ अने० सं० कां० ३ श्लो० ४८९] १६ 'सारसनाऽभिकामितः' सारं धनं तस्य सना नित्यमभिकः कामयिता तेन अमितः प्राप्तः "गत्यर्थानां प्राप्त्यर्थत्वात्" रथस्य धनवतामादराद् यद्वा सारे धने सदाऽभिकामिता लुब्धता यस्येति वधूजनः सरसैव सा रसा सा चासौ नाभिः कामिता इष्टा यस्य सः ॥

[ ४४ ] १७ 'महः' उत्सवः । १८ 'जगतीश्वरश्रियः' जगती भूमिस्तदीश्वरो भूपस्तस्य श्रियो लक्ष्म्याः । १९ 'मा या विमोहं स्म यतोऽर्हतां मते' इति पदविभागे–अर्हतां मते विमोहं मा या स्म–मा प्राप्नुहि; 'या' इति क्रियागुप्तं ह्यस्तन्यपि स्मसहिते वाक्ये भविष्यत्काले रूपम्–यद्वा 'मायाविमोहं स्मयतः' इति पदविभागे तु स्मयतोऽहङ्कारात् मायया कपटेन विमोहः परेषां भ्रमे पातनम् । २० 'महोदयायाऽऽजगतीश्वरश्रियः' आजगति आभुवनं, ईश्वरा समर्था श्रीः शोभा यस्य । २१ 'यथास्थि-तम्' परमार्थतया । २२ 'भावनया' चिन्तनया । २३ 'अस्य' क्षिपस्वेति, अस्येति क्रियागुप्तं "असूष् क्षेपणे" धातुर्दिवादिः ॥

[ ४५ ] २४ 'परा' उत्कृष्टा । २५ 'असितीव्रा' खड्गधारे-वोग्रा । 'परासितीव्रा' इति पदविभागे परासि परास्ता तीव्रा इति क्रियागुप्तम् । २६ 'प्रमाऽऽपणे' ज्ञानहट्टे । २७ 'न नाम काऽबोधि विदा तपोगणे' तपोगणे विदा ज्ञानिना नाम प्राकाश्येका विरतिर्नाबोधि । बोधिविदा नरेण का अविरतिर्न परासि । २८ 'पलाशितीव्रा' मांसाशिवत् तीव्रा; "तीव्रं कटूष्णा-त्यर्थेषु तीव्रा तु कटुरोहिणी" इति हैमः [ अने० सं० कां० २ श्लो० ४४० ] २९ 'प्रमापणे नवापि कामोचितया न भी भृता' इति पदविभागे कामोचितया न भी भृता कन्दर्पार्हगमनस्य

न विप्रयुक्तिर्मधुरा न वास्तवमदःप्रबोधे विदुराऽर्हता गुणम् ।
न विप्रयुक्तिर्मधुरा नवा स्तवप्रतीतिरागात् पटुतां ततो गुरुः ॥ ४६ ॥ [ क्रियागुप्तम् ]

समाधिता पापरुचिर्विवर्द्धनं ससार पुण्याभ्युदयो महस्विनाम् ।
समाधितापाऽपरुचिर्विवर्द्धनं वीरे गुरौ श्रीजिनवीरतीर्थपे ॥ ४७ ॥ [ क्रियागुप्तम् ]

पुरोगमैषी प्रयतः सधारणः साधोरणः कल्पितमत्तवारणः ।
पुरोगमैषी प्रयतः सधारणः प्रपीयतामित्युदिते न कोऽप्यभूत् ॥ ४८ ॥
[ स्पष्टान्धकम् ]

तपोगणेऽराजत तेजसा समं सौरीप्रभा साऽधिसरोजनालिकम् ।
तपोऽङ्गणे राजततेऽञ्जसा समं सितच्छदानामभिनन्दनं ततः ॥ ४९ ॥
[ सन्दानोपमा ]

स दानतः स्वर्गहरिप्रभावकस्तपःप्रशस्यश्चकमे यते जयम् ।
सदाऽऽनतः स्वर्गहरिप्रभावकसभाऽवतस्तस्य यशश्च यं तदा ॥ ५० ॥ [ गूढचतुर्थः ]

---

नरकस्य भयधारिणा; 'प्रमापणे नवाऽऽपि काऽमोचि तया' इति पदविभागे तु प्रमापणे जीवघातेऽविरतिः का न आमोचि तया विरत्या; 'काऽऽमोचितयानभीभृता' भीभृता नरेणाऽऽमोचितं यानं रोगार्हगमनं तस्माद् बिभ्यता, यद्वा प्रमापणे घाते विरतिः का न आपि 'वा' इति पक्षान्तरे आपीति वा, 'अमोचि' इति क्रियागुप्तम् ॥

[ ४६ ] १ 'न विप्रयुक्तिमधुरा' श्राद्धानां विप्रस्य द्विजस्य युक्तिर्न मधुरा । २ 'न वास्तवम्' न तात्त्विकम् । ३ 'अदः-प्रबोधे' अमीषां विप्राणां प्रबोधे उपदेशे । ४ 'विदुरार्हता गुणम्' विदुराः पण्डिता ये आर्हता श्राद्धा गुणमविदुः 'अविदुः' इति क्रियागुप्तम् । ५ 'न विप्रयुक्तिः' गुरोर्विप्रयुक्तिर्वियोगो न पटुतामागात् । ६ 'मधुरा' प्रिया । ७ 'नवा स्तवनप्रतीतिरागात्' नवीना स्तवनप्रसिद्धिरागात् पटुतामागाद् 'आगाद्' इति क्रियागुप्तम् ॥

[ ४७ ] ८ 'समाधिता' समाधेर्योगविशेषस्य भावः । ९ 'पापरुचिर्विवर्द्धनम्' विशेषेण वर्द्धनमाप; पापरुचिर्विवर्द्धनं छेदमधित । १० 'ससार पुण्याभ्युदयो महस्विनाम्' इति पदविभागे महस्विनां पुण्यः पवित्रोऽभ्युदयः ससार प्रसृतः; 'स सारपुण्याभ्युदयः' इति पदविभागे तु स प्रसिद्धः सारः श्रेष्ठः पुण्याभ्युदयः । ११ 'समाधितापाऽपरुचिर्विवर्द्धनम्' समा समस्ता पापरुचिरपरुचिर्मलिना यद्वा समाधितापयतीति समाधितापा तदाऽपरुचिर्मिथ्यात्वं च्छेदमधित । समा प्राग्वत् । 'ससार' 'अधित' 'आप' इति क्रियात्रयं गुप्तम् ॥

[ ४८ ] १२ 'पुरोगमैषी' पुरोगमाः पत्तयस्तान् इच्छतीति पुरोगमैषी । १३ 'प्रयतः' प्रकृष्टं यतं निषादिनां पादकर्म यस्य । १४ 'सधारणः' धारणया पुष्ट्या सहितः सधारणः । १५ 'साधोरणः' आधोरणा हस्तिपकास्तैः सह साधोरणः; साधोः मुनेः रणः शब्दः । १६ 'कल्पितमत्तवारणः' सज्जितो मत्तो वारणः; कल्पिता कथिता मत्ता वारणा येन सः । १७ 'पुरोगमैषी' पुरोगमान् अग्रस्थान् एषते इति पुरोगमैषी । १८ 'प्रयतः' सोद्यमः उद्यमोपदेशयुक्तः । १९ 'सधारणः' धारणा बुद्धिगुणस्तेन सहितः; धारणा ध्यानविशेषस्तेन युक्तः । २० 'प्रपीयतामित्युदिते न कोऽप्यभूत्' इज्यतामित्युक्तेऽपि पुरः नगराद् बहिर्गमनेच्छुर्न कोप्यभूत् । प्रपीयताम् सादरं श्रूयताम् ॥

[ ४९ ] २१ 'तपोगणेऽराजत तेजसा समं सौरीप्रभा' सौरीप्रभा सूरेः सम्बन्धिनी प्रभा कान्तिः तेजसा प्रकाशेन समं तपोगणेऽराजत । २२ 'साऽधिसरोजनालिकम्' सरोजनालिकं सरसा ज्ञानेन युक्ता जनाः सरोजनास्तेषामलिकं भालं तदधिकृत्य; अन्याऽपि सौरीप्रभाऽधिसरोजनालिकं पद्मनालिकामधिकृत्य राजते । २३ 'तपोऽङ्गणे राजततेऽञ्जसाऽसमम्' तपो धर्मः राजतते राजभिस्तते व्याप्तेऽङ्गणेऽञ्जसा शीघ्रमसमं अतुल्यमराजत "तपः कृच्छ्रादिकर्मणि, धर्मे लोकप्रभेदे च" इति हैमः [ अने० सं० कां० २ श्लो० ५४३–५४४ ]। २४ 'सितच्छदानामभिनन्दनम्' सितच्छदानां श्वेताम्बराणामभिनन्दनं तोषणम्; अन्याऽपि पद्मनालिकानिष्टसौरप्रभया सितच्छदानां हंसानाम् ॥

[ ५० ] २५ 'सः' गुरुः । २६ 'स्वर्गहरिप्रभावकः' कल्पवृक्षकान्तिरक्षकः । २७ 'तपःप्रशस्यः' तपसा प्रशस्यः । २८ 'चकमे' ऐच्छत् । २९ 'यते' संयते देशतः सर्वतो वा । ३० 'आनतः' नता देवेन्द्रा यं सः । ३१ 'प्रभावकसभा' प्रभावकाणां श्रावकाणां सभा । ३२ 'अवतः' पालयतः । ३३ 'तस्य यशश्च यम्' तस्य प्रभोर्यशश्च यं चकमे ॥

[1]दिष्ट्या [2]स्थिरासज्जनधीधनाऽऽदरैर्यतो दिनादेष गणेऽधिनायकः ।
[3]दिष्ट्या [4]स्थिरा [5]सज्जनधीधनादरै रराज राज्ञां [6]सखिताऽभिषङ्गतः ॥५१॥ [ निरौष्ठ्यः ]

[7]कल्याणधाऽऽ[8]राधिगतार्हतां [9]गणे क्रियाऽऽसनाथा यतिनायकेन तत् ।
[10]कल्याणधाराऽ[11]धिगतार्हतां गणे श्रेयो न कस्यातिशयाय जायते ॥ ५२ ॥ [ निरौष्ठ्यः ]

[12]समङ्गलं [13]माण्डलिकेन्द्रमण्डलं यं वन्दते पिञ्जरयत् पदाम्बुजम् ।
[14]समङ्गलं माण्डलिके[15]न्द्रमण्डलं [16]संस्कृत्य [17]सन्तः सततं स्तुवन्ति तम् ॥ ५३ ॥
[ बिन्दुमान् ]

[18]विश्वम्भरेणोद्धरणे जग[19]द्भुवः प्राकाशि नूनं गुरुणा स्वतेजसाम् ।
[20]विश्वं भरेणोद्धरणे जग[21]द्भुवः पदार्थराशेर्ददता नृणां व्रतम् ॥ ५४ ॥ [ बिन्दुच्युतकम् ]

[22]सदा[23]गमानाम[24]नुयोगदेशने [25]मन्द्रध्वनिर्बोधयति स्मयान् गुरोः ।
[26]सदागमा [27]नाम नु [28]योगदे[29]ऽशनेऽभक्ष्यस्य [30]तैर्वाग्विभवेऽस्य निश्चिताः ॥ ५५ ॥
[ बिन्दुच्युतकम् ]

[31]वन्दने [32]रुचिराभाति [33]शितांशुकलयाऽन्विता ।
[34]वन्दने [35]रुचिराभाऽतिशयाद् [36]गीर्विदुषां गुरोः ॥ ५६ ॥ [ बिन्दुच्युतकम् ]

[37]सामयः [38]सुदृशा हेयः [39]शाकारम्भविचिन्तनात् ।
[40]सामयः सुदृशाऽहेय इदं मोहस्य जृम्भितम् ॥५७॥ [ मात्राच्युतकं बिन्दुच्युतकं च ]

---

[ ५१ ] १ 'दिष्ट्या' दिष्टिर्देशनोपदेशो भाग्यं वा तया । २ 'स्थिरासज्जनधीधनाऽऽदरैः' स्थिरे मोक्षे आसीदन्तीति स्थिरासदो भव्यास्त एव जनास्तेषां धीधनस्य पण्डितस्याऽऽदरैः । "स्थिरो मोक्षे निश्चले च स्थिरा भूः शालपर्ण्यपि" इति हैमः [ अने० सं० कां० २ श्लो० ४७९ ] । ३ 'दिष्ट्या' प्रमोदेन । ४ 'स्थिरा' भूमिः । ५ 'सज्जनधीधनादरैः' सज्जनान्युपस्करणानि धीर्बुद्धिर्धनान्यदरोऽभयस्तैः । ६ 'सखिताऽभिषङ्गतः' मैत्रीप्रसङ्गात् ॥

[ ५२ ] ७ 'कल्याणधा' कल्याणं मोक्षं धत्ते कल्याणधा । ८ 'आराधिगतार्हताम्' आराधिक्रियाऽर्हतां योग्यतां गता प्राप्ता । ९ 'गणे' गच्छे । १० 'कल्याणधारा' स्वर्णधारा । ११ 'अधिगता' प्राप्ता । 'अर्हतां गणे' श्राद्धानां गणे ॥

[ ५३ ] १२ 'समङ्गलम्' मङ्गलेन सहितम्, "मङ्गला श्वेतदूर्विका" इति हैमः [ अने० सं० कां० ३ श्लो० ७१३ ]; तया युक्तम् । १३ 'माण्डलिकेन्द्रमण्डलम्' मण्डलराजस्तद्वृन्दं स्वर्णादिना मौलिस्थेन । १४ 'समङ्गलम्' समं सार्द्धं गलं कण्ठं च । १५ '°मण्डलम्' सूत्रार्थचिन्तनस्थानम् । १६ 'संस्कृत्य' पद्धकृत्य । १७ 'सन्तः' सज्जनाः ॥

[ ५४ ] १८ 'विश्वम्भरेण' विष्णुना गुरुणा । १९ 'भुवः उद्धरणे जगत् प्राकाशि' इत्यन्वयः । २० 'विश्वम्भरेण' सर्वसमूहेन; विश्वं समग्रं जगत् पदार्थराशेः भरेण सर्वात्मना उद्धरणे परिग्रहे व्रते । २१ 'भुवः' लोकसञ्जातस्य ॥

[ ५५ ] २२ 'सदा' नित्यम् । २३ 'गमानाम्' सदृशपाठानाम् । २४ 'अनुयोगदेशने' व्याख्याने । २५ 'मन्द्रध्वनिः' मन्द्रशब्दे बिन्दुं विना मद्रध्वनिर्मङ्गलशब्दः 'जयइ जगजीवजोणी'-त्यादिनां जयजयारावो वा । २६ 'सदागमाः' शुद्धसिद्धान्ता निश्चिताः । २७ 'नाम' प्राकाश्ये । २८ 'योगदे' नियमदायके । २९ 'अशनेऽभक्ष्यस्य' अभक्ष्यस्याशने प्राशने । ३० 'तैर्वाग्विभवेऽस्य' तैः नरैरस्य गुरोः वाग्विभवे ॥

[ ५६ ] ३१ 'वन्दने' नमने । ३२ 'रुचिः' सम्यक्त्वमाभाति । ३३ 'शितांशुकलयान्विता' श्वेताम्बरध्यानयुता । ३४ 'वन्दने' स्तवने बिन्दुं विना वदने मुखे चन्द्रकलया युक्ता । ३५ 'रुचिराभाति शयात्' इति पदयोजने रुचिर्दीप्तिराभाति मुखे आभाति दीप्यमाने शयात् हस्तात्; 'रुचिराऽऽभाऽतिशयात्' आभाया अतिशयाद् रुचिरा स्यात् । ३६ 'गीर्विदुषाम्' धन्यैर्षां विदुषां गीर्वाणी यया गुरुः स्तूयत इत्याभाराद्धा । विदुषां वदने जल्पने गी रुचिरा ॥

[ ५७ ] ३७ 'सामयः' रोगी हेयः । ३८ 'सुदृशा' शुभनेत्रेण प्राज्ञेन वा । ३९ 'शाकारम्भविचिन्तनात्' शाकारम्भस्य विचिन्तनात् शाकभोजी रोगी असाध्यः यद्वा साकं सहारम्भः शयनासहनादिस्तद्विचारणात् कुष्ठादीनां साङ्क्रामिकरोगत्वात्; शाकस्य राज्ञामाज्ञाविशेषकालस्याऽऽरम्भ उत्पत्तिस्तद्विचिन्तनात्; शाककर्त्तारोऽपीदृग्बलिनो नवनवा जायन्ते तर्हि काऽन्येषां गणनाऽपि यद्वा साकारं यथा स्यात् तथा भविनः प्राणिनश्चिन्तनाद् अनित्योऽयमिति; साकारं भविचिन्तनात् शाकस्य भारं भरिसमूहरूपा ये भविनस्तद्विचिन्तनात्; शाककर्त्तुर्बलवतोऽप्यधिकास्तद्ध्वंसका जायन्ते । ४० 'सामयः सुदृशाऽहेयः' समयो लक्ष्मी-

[1]महेश्वरः [2]शर्वजनै[3]रपीड्यते हासप्रकाशे नटनेऽति[4]दक्षधीः ।
[5]महेश्वरः सर्वजनैरपीड्यतेत्येवं [6]विनेयोऽपनयै[7]र्विनीयते ॥ ५८ ॥ [ मात्राच्युतकम् ]
[8]प्रतिक्रियाम[9]र्हति [10]कामलालसः सुरो भजन्नेव [11]समग्रभुद् भुवि ।
प्रति क्रियामर्हति [12]कामलालसः कथं जनो [13]निर्मललोचनेक्षणम् ॥ ५९ ॥
[ मात्राच्युतकम् ]

[14]स्वकान[15]नेकान्ततया [16]विशारदद्विजेशजैत्रान् गुरुरेवमादिशत् ।
[17]स्वकाऽऽनने [18]कान्ततया [19]विशारदसितांशुलक्ष्मीं [20]निदधे महोदये ॥ ६० ॥
[21]अनेनसा [22]कारिकयाचिदाश्रया सभा [23]सभावा गणभृता सताम् ।
[24]अनेन साऽकारि कयाचि[25]दाश्रयानुशीलिनी जैनमते [26]परापरे ॥ ६१ ॥ [ वर्णच्युतकम् ]
[27]नालीकराजी [28]सरसः [29]प्रबोधभाक् [30]प्रेष्यप्रसारे हि यथाऽऽ[31]प्तसौरभा ।
[32]नालीकराजी सरसप्रबोधभाक् तथा तदाऽऽसीत् [33]सुमनः प्रभोर्गिरा ॥ ६२ ॥
[ यकारच्युतकम् ]

[34]प्रभञ्जने [35]कोमलतां [36]ससौरभां [37]सुसीमतां वर्णयते यतः कविः ।
[38]प्रभं जने [39]कोऽमलतां [40]ससौरभां [41]सुसीमतां [42]ध्यायति किं न मन्यते ॥ ६३ ॥
[ बिन्दुच्युतकम् ]

---

प्रधानः सुदृशा स्त्रियाऽहेय आदरणीयः; आकारमात्रां विना समयोऽवसरः सुदृशा पण्डितेन हेयः; समयः सिद्धान्तः सुदृशा सम्यक्त्ववता हेयस्त्याज्य उत्सूत्रप्रसङ्गात्–पण्डितोऽपि समयमवसरं त्यजति भट्टारकोऽयं मदाधिपत्यं यन्मया क्रियते तद् भवतीति मदान्धतया इदं मोहविजृम्भितम् ॥

[ ५८ ] १ 'महेश्वरः' महामहिषो लोकैरपीड्यते । २ "शर्वजनैः" ईश्वरभक्तैः । ३ 'ईड्यते' स्तूयते । ४ 'अतिदक्षधीः' दक्षमतिक्रान्ताऽतिदक्षा धीर्यस्य; अतिदक्षा निपुणा धियो यत्र सः । ५ 'महेश्वरः' अत्र मात्राच्युतके महस्वर उत्सवशब्दः; महिषशब्दः सर्वजनैरपीड्यत–अपशब्दत्वाद् इत्येव रागद्वेषविजृम्भितं विरुद्धनये संसारमार्गे । ६ 'विनेयः' शिष्यः । ७ 'विनीयते' शिक्षां प्राप्यते ॥

[ ५९ ] ८ 'प्रतिक्रियाम्' विद्वेषभावं स्पर्द्धां भजन्नपि । ९ 'अर्हति' जिने । १० 'कामललालसः सुरः' स्मरपरवशः सुरः । ११ 'समग्रभुत्' सर्वज्ञः । अत्र दृष्टान्तः–'कमलारोगेण अरसः निर्मललोचनेक्षणं यथा स्यात् तथा जनः कथं प्रतिक्रियां वैद्योपचारमर्हति' कमलायामलसः प्रतिक्रियां वैरशुद्धिं नैवार्हति किं० भुवि सुर इव सुरः पुनः किं० भजन्नपि पुनः किं० अग्रभुद् न पूर्वापरभागवेदी अविवेकीत्यर्थः–अत्रार्थान्तरम् । १२ 'कामलालसः' अलालसोऽलोभी जनः कथं केन प्रकारेण कम् ? । १३ 'निर्मललोचनेक्षणम्' कृपास्नेहाऽऽर्द्रनेत्रेण विलोकयितारमपि पुरुषं प्रति क्रियां सेवादिकां नैवार्हति न कमपीत्यर्थः । अत्र कामपि कमपीति मात्राच्युतिर्व्याख्येया ॥

[ ६० ] १४ 'स्वकान्' स्वीयान् शिष्यादीन् । १५ 'अनेकान्ततया' स्याद्वादभावेन । १६ 'विशारदद्विजेशजैत्रान्' निपुणविप्रराजजयनकारिणः । १७ 'स्वकाऽऽनने' स्वमुखे । १८ 'कान्ततया' रम्यतया । १९ 'विशारदसितांशुलक्ष्मीम्' विशिष्टशरत्कालीनचन्द्रशोभाम् । २० 'निदधे' धत्ते स्म ॥

[ ६१ ] २१ 'अनेनसा' पापवर्जितेन सतां सभा । २२ 'कारिकया' स्वल्पवृत्त्या । २३ 'सभावा' ज्ञानवती । २४ 'अनेन सा' अनेन सा प्रसिद्धाऽकारि कयाचिद् । २५ 'आश्रयानुशालिनी' चैत्योपश्रयानुरक्ता; आशयशुद्धा । २६ 'परापरे' स्याद्वादरूपे पक्षे परे उत्कृष्टे अपरा अपगतो रो यस्याः साऽपरा ॥

[ ६२ ] २७ 'नालीकराजी' पद्मश्रेणिः । २८ 'सरसः' तटाकस्य । २९ 'प्रबोधभाक्' विकाशवती । ३० 'प्रेष्यप्रसारे प्रेष्यः वसन्तः; प्रकृष्ट इषः आश्विनमासः । ३१ 'आप्तसौरभा' प्राप्तपरिमला । ३२ 'नालीकराजी' न अलीकेन राजते इत्येवंशीलः । ३३ 'सुमनः' सज्जनः ॥

[ ६३ ] ३४ 'प्रभञ्जने' वायौ । ३५ 'कोमलताम्' मन्दताम् । ३६ 'ससौरभाम्' सपरिमलाम् । ३७ 'सुसीमताम्' शीतताम् । ३८ 'प्रभम्' श्रीविजयप्रभम् 'सत्यभामा-भामा' इति न्यायात्; 'प्रभजने' सेवने । ३९ 'कोऽमलताम्' अमलतां को न मन्यते, अपि तु सर्वोऽपि मन्यते । ४० 'ससौरभाम्' सूरेरियं सौरी सा चासौ भा दीप्तिस्तया सह । ४१ 'सुसीमताम्' समर्यादताम् । ४२ 'ध्यायति' ध्यानकरे जने ॥

वि[1]भाजयन् वा[2]रिबलं स क[3]श्मलं यथा प्रशस्योऽत्र वि[4]शारदाऽऽगमः ।
वि[5]भा जयन् वा[6]ऽरि[7]बलं [8]सकश्मलं दधौ [9]विसं बोधयिता [10]जगद्गुरुः ॥ ६४ ॥

[ शकारच्युतकम् ]

वि[11]श्लेषयन्न[12]ङ्गजपांशुसङ्करं नृणां [13]निपेयः [14]सुरापगाऽम्बुवत् ।
वि[15]श्लेषयन्न[16]ङ्ग ! जपांशुसङ्करं ह्यलं विचक्रे विमलं महीतलम् ॥ ६५ ॥

[ लकारच्युतकम् ]

[17]स्तम्भेन [18]धाम्नः स्थिरता बलान्वितेऽने[19]नाभवत् [20]तीर्थवरस्य [21]सज्जने ।
[22]स्तम्भे [23]न धाम्नः स्थिरताबलान्वितेऽभिनन्दयित्र्यौ[24] किमितीव सुश्रुतेः ॥ ६६ ॥

[ बिन्दुच्युतकम् ]

[25]स कं प्रभावं न बभार भारते समुन्नयञ्जैनमते तपोभरैः ।
[26]सकम्प्रभावं नवभालभारते हृष्टे गुरौ मोह[27]महीश्वरे दधौ ॥ ६७ ॥

[ रकारच्युतकम् ]

वि[28]भा [29]वसु [30]श्रीम[31]हिमाऽ[32]र्थ[33]नन्दनादिनादिनाद्धत सर्वदा[34]र्हते ।
वि[35]भावसुश्री[36]र्महिमाऽर्थनन्दनान्यदीधरत् तत्समये तपोगुरुः ॥ ६८ ॥

[ रकारच्युतकम् ]

---

[ ६४ ] १ 'विभाजयन्' विश्लेषयन् । २ 'वारिबलम्' जलबलम् । ३ 'सकश्मलम्' कश्मलं मलिनम् । ४ 'विशारदाऽऽगमः' विशिष्टः शरदोऽयं शारदागमः । ५ 'विभाः' कान्तीः । ६ 'वा' पादपूरणे । ७ 'अरिबलं जयन्' इत्यन्वयः । ८ 'सकश्मलम्' पापपरं पक्षे विशं शकाररहितं सकमलं सलक्ष्मीकम् । ९ 'विशम्' मनुष्यं वैश्यं वा बोधयिता । १० 'जगद्गुरुः' गुरुः जगद् बोधयिता ॥

[ ६५ ] ११ 'विश्लेषयन्' दूरीकुर्वन् । १२ 'अङ्गजपांशुसङ्करम्' अङ्गे जातं पांशुसङ्करं धूलीपुञ्जम् । १३ 'निपेयः' सादरं वीक्षणीयः । १४ 'सुराऽऽपगाम्बुवत्' गाङ्गवारिवत् । १५ 'विश्लेषयन्' कथं अलं लकार-रहितं यथा स्यात् तथा विशेषयन्नित्यर्थः पक्षे अलमत्यर्थं विशेषेण श्लेषयन् मालयन् । १६ 'अङ्गजपांशुसङ्करम्' 'अङ्ग !' इति संबोधने । यद्वा अङ्गे जपेन मन्त्रजापेन जपाया वा अंशुसमूहं विश्लेषयन्; जपावदरुणतां दधत् ॥

[ ६६ ] १७ 'स्तम्भेन' स्तम्भेन बलान्विते सति । १८ 'धाम्नः' गृहस्य स्थिरताऽभवत् । १९ 'अनेन' गुरुणा । २० 'तीर्थवरस्य' सङ्घरूपस्य । २१ 'सज्जने' सज्जीकरणे । २२ 'स्तम्भे' जाड्ये; 'स्तम्भोऽङ्गजाड्ये स्थूणायाम्' इति हैमः [ अने० सं० कां० २ श्लो० ३१७ ] बिन्दुच्युतके, अबलान्विते बागीगणयुते स्तम्भेऽजे धाम्नः गृहस्य स्थिरता; स्तम्भेनावष्टम्भेनानेनाभिनन्दयित्रा स्थिरताऽभवत् 'पशुभिः बहुभिरपि न कुलावष्टम्भः किन्तु कुलस्तम्भेनैकेनाऽपि कुलावष्टम्भ' इति तात्पर्यम् । २३ 'न धाम्नः स्थिरता' न तेजसः स्थिरता । २४ 'अभिनन्दयित्र्यौ किमितीव सुश्रुतेः' आगमस्य वर्धयित्रा 'मूर्खेभ्यो धर्मतेजोहानिः स्याद्' इति शास्त्राणि पाययिता गुरुरित्यर्थः, इतीव किं सुश्रुतेर्धाम्नस्तेजसः ॥

[ ६७ ] २५ 'सः' गुरुः । २६ 'सकम्प्रभावम्' चञ्चलताम् । २७ मोहमहीश्वरे' मोहराजे ।

[ ६८ ] २८ 'विभा' दीप्तिः । २९ 'वसु' धनम् । ३० 'श्रीः' लक्ष्मीः । ३१ 'महिमा' महत्त्वम् । ३२ 'अर्थ०' अर्थः कार्यम् "अर्थो हेतौ प्रयोजने निवृत्तौ विषये वाच्ये प्रकारद्रव्यवस्तुषु" इति हैमः [ अने० सं० कां० २ श्लो० २१५ ] । ३३ 'नन्दनादिना' पुत्रादिना । ३४ 'आर्हते' श्राद्धे । ३५ 'विभावसुश्रीः' विभावसुः सूर्यस्तद्वत् श्रीर्यस्य "विभावसुस्तु भास्करे हुताशने हारभेदे चन्द्रे" इति हैमः [ अने० सं० कां० ४ श्लो० ३४९ ] । ३६ 'महिमार्थनन्दनानि' महा उत्सवा विद्यन्ते यस्यां सा महिनी ईदृशी मा लक्ष्मी तयाऽर्थवर्धनानि; पूर्वार्धपदे रकारं विना अथ इति महिमा आवेतः क्यात्यर्थः । यद्वा महिम्ना महत्त्वेनार्थनन्दनानि सूत्रार्थवृद्धीः ॥

[1]विश्वाङ्गणे [2]चेतनतां [3]निभालयन् [4]दध्रे पदं यो[5]ऽनवधीरणायुतः ।
[6]विश्वां [7]गणे [8]चेतनतां [9]निभालय स्थितिं [10]सं सन्त्याजयति स्म मण्डले ॥ ६९ ॥
[ वकार-रकारयोश्च्युतकम् ]

[11]ससंयमो [12]मानिनि [13]कामशर्मणे स्तनप्रदेशश्च मरालबालकः ।
[14]ससंयमो [15]मानिनिकामशर्मणे [16]कीदृक् सुदृग्भूषणतामुपैत्ययम् ॥ ७० ॥
[ [17]मुक्ताहारविभूषितः—बहिरेकाऽऽलापकं प्रश्नोत्तरम् ]

[18]वामाङ्गजातिप्रणये[19]ऽघनाशने मनः क्व [20]वा धी[21]रमते [22]महात्मनः ।
[23]वामाङ्गजातिप्रणये [24]घनाशने जैनस्य शैवस्य नृपस्य मालिनः ॥ ७१ ॥
[ क्रियागुप्तम्-बिन्दुच्युतकम्-सर्वतोभद्रम्-व्यस्तसमस्तमेतरैकालापकम् ]

---

[ ६९ ] १ 'विश्वाङ्गणे' जगन्मध्ये । २ 'चेतनताम्' जीवस्वरूपम् । ३ 'निभालयन्' विलोकयन् । ४ 'दध्रे' दध्र इत्यत्र रेफं विना दधे । ५ 'अनवधीरणायुतः' अनवहेलनाऽऽदरस्तेन युतः; वेवकारे धीः ईदृग् न यद्वा न वधी न हिंसकः; यद्वा नवधीर्नवमतिः; रणेनायुतः यद्वा नवबुद्धिप्रेरणायुक्तः । ६ 'विश्वाम्' सर्वाम्; पृथ्वीम्; वकारच्युतौ विशांगणे नरसमूहे; विश्वामित्यत्र वकारं विना विशामिति । ७ 'गणे' गच्छे । ८ 'चेतनताम्' च पूर्वमिता प्राप्ता पश्चाच्चता प्रगुणीकृताऽऽचीर्णताम्; इतनतां पूर्वं प्राप्ता पश्चाच्चता नम्रा ताम् । ९ 'निभालयस्थितिम्' निभं कपटं तदाऽऽलयस्तत्र स्थितिं धारणां त्याजयति स्म; निभालय–स्थितिं दम्भरीतिं त्याजयति स्म । १० 'सः' गुरुः ॥

[ ७० ] ११ 'ससंयमः' सम्बन्धः । १२ 'मानिनि' अहङ्कारिजने; विवेकिनि; हे मानिनि ! । १३ 'कामशर्मणे' कामस्य शर्मणे कामं गाढं शर्मणे । १४ 'ससंयमः' सच्चारित्रः; सम् सम्यग् यमं युग्मं संयमं तेन सहितः । १५ 'मानिनिकामशर्मणे' मानि मानं ज्ञानमस्मिन्नस्तीति मानि ईदृशं निकाममत्यर्थं शर्म तस्मै मोक्षाय । १६ 'कीदृक् सुदृग्भूषणतामुपैति' कीदृक् सुदृग् भूषणतां सम्यक्त्ववदलङ्कारत्वं याति' कीदृक् सुदृशः स्त्रिया भूषणतां स्तनप्रदेशो याति' कीदृक् सुदृशः पण्डितस्य विवेकादिना भूषणतां याति । १७ 'मुक्ताहारविभूषितः' मुक्ताहारश्चासौ विशेषेण भूम्यामुषितः' मुक्ताहारविभूषितो मरालबालकः, मुक्तानामाहारेण विभूषितः ॥

[ ७१ ] १८ 'वामाङ्गजातिप्रणये' स्त्रीपार्श्वस्नेहे; स्त्रीपुत्रस्नेहे । १९ 'अघनाशने' पापनाशने; बहुभोजने च । २० 'वा' अथवा । २१ 'धीरमते' धीर्मतिः क्व रमते ?; हे धीरमते, इति सम्बोधने क्रियागुप्तम् । २२ 'महात्मनः' उत्तमस्य मनः; महिम्नः जीवस्य वा महात्मनो जीवस्य जैनस्य वा; महात्मनः उत्सववतः 'अमहात्मनः' इति पदविभागे, क्षुद्रस्य । २३ 'वामाङ्गजातिप्रणये' शैवस्य वामः प्रतिकूलोऽङ्गजः स्मरो यस्य तस्य हरस्य स्नेहे; नृपस्य बिन्दुच्युतके वामाः स्त्रियः गजाश्च तेषां स्नेहे; मालिनः वामा मनोहराऽगजातिर्वृक्षजातिस्तस्याः स्नेहे; महात्मनो महिम्नजीवस्य वा मा प्रतिकूला विषमाऽगजातिः पर्वतश्रेणिस्तत्स्नेहे; महात्मन उत्सववतः मनोज्ञाऽङ्गजातिः स्वजनवर्गस्तत्स्नेहे, अमहात्मनः क्षुद्रस्य मनोज्ञेऽङ्गे देहे जातेर्जन्मनः स्नेहे इत्यपि; नृपस्य वामा स्त्रीरूपा मनोहरा वाऽगजा पार्वती तस्याः स्नेहे; शैवस्य वामा वामभागस्था अगजा पार्वती यस्य तस्येश्वरस्य स्नेहे; नृपस्य वामः प्रतिकूलोऽगजातिप्रणयः पर्वतस्नेहो यस्य तत्र; वामा याऽगजा भवानी तस्यामतिप्रणयो यस्य तस्मिन् जैनस्य प्रणयमतिक्रान्तोऽतिप्रणयः; वामाऽगजा यस्य स वामागजः शिवस्तत्रातिप्रणयो विरागस्तस्मिन् इत्यपि; वाऽथवा मा लक्ष्मीः, अगजः कामस्तयोरतिप्रणयो यस्य तत्र कृष्णे; जैनस्य स्त्रीपुत्रविरागे; मालिनः वामं सुन्दरमङ्गं यस्यास्तस्या जातेर्जातिवृक्षस्य स्नेहे इत्यपि; क्षुद्रस्य वामा प्रतिकूलाऽङ्गजा पार्वती यस्य स दरिद्रस्तेनातिस्नेहे इत्यपि सर्वतोभद्रत्वाद् यथेच्छं व्याख्या । २४ 'घनासने' घनं यदासनं वाहनं तत्र; घनो मुस्ताऽशनो वायाकवृक्षस्तत्र; बहुघनभोजने; बहूनां भोजने; 'अघनाशने' इति पदविभागे त्वघमशिवं तन्नाशने; न घनाशने व्रतोपवासादौ; नृपस्य घनासने इन्द्रे; घनासने ईश्वरे वा; 'अघनाशने' अबहुभोजने ॥

[1]कामीहतेऽजः [2]क्षितिपे च कीदृशे बलं [3]महात्मा क बहु क वाऽथ कः।
कामीह तेजः [4]क्षितिपेचकी दृशो [5]वामाङ्गजातिप्रणये [6]घनासनः ॥ ७२ ॥

[ आदिविषममन्तरे कालापकम्; व्यस्तसमस्तम् पाठान्तरम् ]

[7]सभाऽनुयोगे [8]नवसौररागतः [9]प्रसृत्वरे [10]द्रांक् [11]कमलाऽवबोधने।
[12]सभानुयोगे [13]नवसौररागतः कथैवमासीत् सुदृशां गुरोर्गणे ॥ ७३ ॥

सितम्बराणामुदयेऽनुरागिणां तथार्हतानामुदिता यशः प्रथा।
[14]सितम्बराणामुदये [15]नु [16]रागिणां [17]भवोद्धृतानां शशिनां विजित्वरी ॥ ७४ ॥

[18]तपो [19]धनं निर्वृति[20]साधनं जयस्तपोगणे सर्वमिदं महोदयः।
तपोधनं निर्वृतिसा [21]धनञ्जयश्रियं [22]तमीशं समवाप्य [23]दिद्युते ॥ ७५ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
पश्चिमदिग्विजयो नाम सप्तमः सर्गः ॥ ७ ॥

[ ७२ ] १ 'कामीहतेऽजः' अजः कृष्णः कामीहते इच्छति, मां लक्ष्मीं प्रायः कथनात्। २ 'क्षितिपे' भूपे कीदृशे ?। ३ 'महात्मा क बहु क वाऽथकः कामी' महात्मा क कामी अभिलाषी इह लोके तेजो बहु क। ४ 'क्षितिपेचकी' क्षितौ पेचकी कः ? 'पुच्छमूलं तु पेचकम्'। 'पेचकः करिलाङ्गुलमूले' इति हैमः [ अने० सं० कां० ३ श्लो० ७१ ]। ५ 'वामाङ्गजातिप्रणये' वाऽव्ययं पादादौ महाचित्रत्वान्न दुष्टम् "अहह चण्डसमीरणदारुणं किमिदमाचरितं चरितं त्वया" इत्यादौ दृश्यतेऽपि, एवमाह "कुशवज्जलदायीति निषेधे प्रतियोगोऽपि' यद्वा वामां स्त्रियं भोगेश्वरत्वाद् विष्णोः; श्रीपार्श्वस्नेहे; बिन्दुच्युतके वामा स्त्रीरूपा या अगजा पार्वती तस्यामतिस्नेहो यस्य तत्र। ६ 'घनासनः' महात्मा कीदृशोऽघनाशनः, घनमासनं स्कन्धो यस्य गजस्य स घनासनः ॥

[ ७३ ] ७ 'सभाऽनुयोगे' सभाव्याख्याने। ८ 'नवसौररागतः' नवो नवीनो यः सूरिसम्बन्धी रागः स्नेहस्तस्मात्। ९ 'प्रसृत्वरे' प्रसृत्वरे प्रसृते सति। १० 'द्राक्' शीघ्रम्। ११ 'कमलाऽवबोधने' कमलप्रकाशने। १२ 'सभानुयोगे' भानूनां रश्मीनां योगः सम्बन्धस्तत्सहिते कस्मात्। १३ 'नवसौररागतः' नवो यः सूरसम्बन्धी रागोऽरुणिमा ततः ॥

[ ७४ ] १४ 'सितम्बराणामुदये' श्वेतपटानां पक्षे सितमुज्वलमम्बरं गगनं येभ्यस्तेषामुदये। १५ 'नु' वितर्के। १६ 'रागिणाम्' लौहित्यभाजाम्। १७ 'भवोद्धृतानाम्' संसारादुद्धृताः श्राद्धास्तेषां पक्षे भवनेश्वरेणोद्धृतानाम् ॥

[ ७५ ] १८ 'तपो धनं निर्वृतिसाधनं जय इदं सर्वं तपोगणेऽभूद्' इत्यन्वयः। १९ 'तपोधनम्' तप एव धनं यस्य तम्। २० 'निर्वृतिसा' निर्वृतिः सा सुखलक्ष्मीः। २१ 'धनञ्जयश्रियम्' धनञ्जयोऽर्जुनस्तद्वदथवाऽग्निस्तद्वत् श्रीर्यस्य तम्। २२ 'तमीशं समवाप्य' तं ईशं स्वामिनं प्राप्य। २३ 'दिद्युते' दिदीपे ॥

इति श्रीदिग्विजयकाव्ये महोपाध्यायश्रीमेघविजयगणिकृते सप्तमसर्गविवरणम्।

## अष्टमः सर्गः ।

अथ विक्रमभूपतेः क्रमाच्छरदां त्यष्टि[१७]शतव्यतिक्रमे ।
मुनिराड् मुनि[७]राम[३]वत्सरे शिवपुर्यां विदधे गुरुस्थितिम् ॥ १ ॥
शिवसंनिधिनेव यत्पुरे शिवरागः शिवमव्ययं हितम् ।
शिवपाठरुचिर्द्विजन्मनां विदिता तच्छिवपुर्यसाविति ॥ २ ॥
अलकाऽप्यलकायते त्विषा पुरतोऽस्याः सुरतोत्सवाऽऽगमे ।
नगरी न गरीयसी दिवः प्रतिभाति प्रतिभाऽतिशायिनाम् ॥ ३ ॥
भवनं नवनन्दनश्रिया रहितं यत्र न किञ्चिदीक्ष्यते ।
वनमप्यरविन्दलोचनातनुरम्भाऽधिकरूपसम्पदा ॥ ४ ॥
कलिना बलिनाऽपचिन्वता सुकृतस्याद्भुतवैभवं द्विधा ।
पुरमव्ययशर्मबन्धुरं न परामृष्टमदुष्टदुर्णयम् ॥ ५ ॥
तनुजैरदितेर्महाभुजैर्दनुजैर्वा मनुजैरसौ पुरी ।
ननु जैनविहारभासुरा मनसा सौमनसान्न कैर्धृता ॥ ६ ॥
रमणी रमणीयताबलान्न कलाकेलिरमुं व्यमुञ्चत ।
रतिरप्यतिशायिनी जने सकला केलिकला स्वतः स्थिरा ॥ ७ ॥

---

[२] १ 'शिवसंनिधिनेव' शिवस्य हरस्य सारणेश्वरमूर्त्तेः सामीप्येन, धर्मकर्मणामत्यादरे शिवस्य मोक्षस्य सामीप्येनेवेत्युत्प्रेक्षा । २ 'शिवरागः' शिवस्य मोक्षस्य रागः, "शिवस्य मन्त्रध्याने स्वामात्मानं ध्यात्वा" इति वचनात् शान्तरूपस्य राग इत्येवं समर्थनीयम् "शिवं तु मोक्षे क्षेमे सुखे जले, शिवो योगान्तरे वेदे गुग्गुलौ वालुके हरे पुण्डरीकद्रुमे कीले, शिवा झाटामलोमयोः" इति हैमः [ अने० सं० कां० २ श्लो० ५५०–५५१ ] । ३ 'शिवम्' क्षेमम् । ४ 'हितम्' हितकृत् । ५ 'शिवपाठरुचिः' शिवस्य वेदस्य पाठस्तस्मिन् रुचिः प्रीतिः । ६ 'विदिता' ख्याता ।

[४] ७ "नवनन्दनश्रिया" नवा ये नन्दनाः पुत्रास्तेषां श्रिया; वनपक्षे नन्दनं नाम देववनं तस्य श्रिया "नन्दनं वनम्" इति हैमः [ अभि० चिं० कां० २ श्लो० ९२ ] । ८ "अरविन्दलोचनातनुरम्भाऽधिकरूपसम्पदा" अरविन्दान्येव लोचनानि यद्वाऽरविन्दानां रोचना शोभाऽतनवो महत्यो या रम्भास्तासां यदधिकं रूपं सैव संपत् तया; भवनपक्षेऽरविन्दलोचनानां स्त्रीणां तनौ रम्भा देववनितास्ताभ्योऽतिशायिरूपलक्ष्म्या ।

[५] ९ "सुकृतस्य" पुण्यस्य कृतयुगस्य वा ।

---

[1] 1 'त्यष्टि°' त्यष्टिः सप्तदश "अथ सप्तदशा त्यष्टिः" इत्यङ्कसंज्ञा । 2 'मुनिरामवत्सरे' मुनयः सप्त "मुनिपर्वतशैलादिसप्ताचलनगाः स्मृताः" रामाः त्रयः "कृशानुगुणरामाग्निपावकानलवह्नयः" इत्यङ्कसंज्ञा । 3 "शिवपुर्याम्" आधुनिक'सिरोही'ति प्रसिद्धनगर्याम् । 4 'गुरुस्थितिम्' चातुर्मासिकावस्थानम् ।

[3] 5 "अलका" अलं भूषयतीत्यलका, "अलका वस्वौकसारा" इति हैमः [ अभि० चिं० कां० २ श्लो० १०५ ] । "पुर्योऽमरावती भोगावती" इत्यरिसिंहः [ काव्यकल्पलतावृत्तिः, प्रतानः ४ स्तबकः ४ श्लो० २४२ ] 6 "सुरत०" सुरतं मोहनम्, "सुरतं मोहनं रतम्" इति हैमः [ अभि० चिं० कां० ३ श्लो० २०० ] ॥

[5] 7 "कलिना" कलिश्चतुर्थो युगस्तेन । 8 "अपचिन्वता" अपहर्त्रा । 9 "अव्ययशर्मबन्धुरम्" अक्षीणसुखशोभनम् । 10 "परामृष्टम्" भृशं चिन्तितम् ॥

[6] 11 "तनुजैः" पुत्रैः । 12 "अदितेः" पुनर्वसुनक्षत्रस्याधिष्ठातृदेवस्य । 13 "दनुजैः" असुरैः, "असुरा दैत्यदैतेयदनुजेन्द्रा०" इत्यमरः [ अमर० कां० १ श्लो० १२ ] "दैत्ये दितेर्दनोः पुत्राः" इत्यरिसिंहः [ काव्यकल्पलतावृत्तिः, प्रतानः २, स्तबकः २, श्लो० ५८ ] ।

न विना [1]कविनाऽभिधीयते [2]विधिनाऽ[3]स्या [4]विधिनाऽखिलस्तुतिः ।
सफलीक्रियतां ततः स्ववाक् [5]सुधिया [१]तद्विषयांशवर्णनात् ॥ ८ ॥
गुरुणा [6]करुणाऽरुणाऽऽत्मना शिवरूपेण [7]महाव्रतश्रिया ।
गिरि[२]भूरिह भूषिताऽऽश्रयान्न नृणामभ्युदये तदद्भुतम् ॥ ९ ॥
[३]शिवसङ्गतरङ्गयोगतः [४]प्रभया संयुत एव तत्पुरे ।
[8]धनदः किमु[9]पेयिवान् [५]नृपप्रतिकृत्यो[६]त्तरलोकपालकः ॥ १० ॥
नगरी [७]नगरीतिबृंहितैर्धनिनां शुभ्रतरैर्नि[10]केतनैः ।
समराजत [11]राजताऽद्रिणा सह वादं सृजतीव [12]केतनैः ॥ ११ ॥
गगने [13]गगनाध्ववाजिनां [14]सुरसिन्धोस्तटश[15]ष्पभोजने ।
जनयन्ति जिनालया रयान्निजकेतूच्छलनेन चालनाम् ॥ १२ ॥
परितः [16]सरितां पतिर्बभौ निशि [17]चान्द्रोपलनिर्गलज्जलैः ।
तमुदीक्ष्य सुराऽऽपगाऽप्यगाज्जिनचैत्यध्वजकै[18]तवाद् दिवः ॥ १३ ॥
वसुधास्थलमीयुषी सुधा विबुधानामभिषिञ्चनेऽर्हताम् ।
किमु [८]कैतवकैतवान्नृणां नयनाऽऽनन्दनिदानदानतः ॥ १४ ॥
शिखरेषु [19]जिनौकसां धृतान् [20]नवगाङ्गेयमयाँल्लसत्त्विषः ।
कलशानिव पूरितुं दिवो ननु गङ्गाऽवतरद् ध्वजश्रिया ॥ १५ ॥
सकलं धवलं भुवस्तलं विदधे चैत्यसुधा नवच्छविः ।
गगनेऽपि तथा [21]विधित्सया ध्वजरूपाऽभ्युदियाय साऽ[22]वशा ॥ १६ ॥

---

[ ८ ] १ "तद्विषयांशवर्णनात्" तद्विषयस्तद्गोचरो य अंशो भागः प्रदेशविशेषः ।

[ ९ ] २ "गिरिभूः" पर्वतभूमिः नगरे तत्सामीप्यात् पक्षे गिरिभूर्भवानी ।

[ १० ] ३ "शिवसङ्गत" शिवस्य सङ्गतं मैत्री यद्वा प्रसङ्गबाहुल्यम् । ४ "प्रभया" अलकानगर्या कान्त्या वा । ५ "नृपप्रतिकृत्या" राज्ञः प्रतिबिम्बेन । ६ "उत्तर०" उत्तरस्याः उत्तरः श्रेष्ठो वा ।

[ ११ ] ७ "नगरीतिबृंहितैः" पर्वतवद् वृद्धैः ॥

[ १४ ] ८ "कैतवकैतवात्" केतूनां समूहः कैतवं तस्य कैतवाद् व्याजात् ।

---

[ 8 ] 1 "कविना" शुक्रेण "शुक्रो मघाभवः काव्य उशना भार्गवः कविः" इति हैमः [ अभि० चिं० कां० २ श्लो० ३३ ] । 2 "विधिना" धात्रा "धाता विधाता विधिः" इति हैमः [ अभि० चिं० कां० २ श्लो० १२६ ] । 3 "अस्याः" पुर्याः । 4 "विधिना" विधानपूर्वकेण । 5 "सुधिया" विदुषा ॥

[ 9 ] 6 "करुणाऽरुणाऽऽत्मना" करुणा दया तया बालसन्ध्यासदृशाऽऽत्मना । 7 "महाव्रतश्रिया" अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहस्वरूपलक्ष्म्या ॥

[ 10 ] 8 "धनदः" कूबेरः । 9 "उपेयिवान्" आगतः ॥

[ 11 ] 10 "निकेतनैः" गृहैः । 11 "राजताऽद्रिणा" अष्टापदपर्वतेन । 12 "केतनैः" ध्वजैः ॥

[ 12 ] 13 "गगनाध्ववाजिनाम्" आकाशमार्गाश्वानाम् । 14 "सुरसिन्धोः" स्वर्गङ्गायाः । 15 "०शष्प०" शष्पं तृणम् ।

[ 13 ] 16 "सरितां पतिः" समुद्रः । 17 "चान्द्रोपल०" चन्द्रस्यायं चान्द्र उपलः मणिः, चन्द्रमणिः । 18 "०कैतवाद्" व्याजात् ॥

[ 15 ] 19 "जिनौकसाम्" जिनमन्दिराणाम् । 20 "नवगाङ्गेयमयान्" नवीनसुवर्णयुक्तान् ।

[ 16 ] 21 "विधित्सया" विधातुमिच्छया । 22 "अवशा" स्वतन्त्रा ।

चरितं सरितः सुधाभुजां[1] दुरितादङ्कुरितं घनास्थिजात्[१] ।
तदिव व्यपनेतु[2]मायया ध्वजवेषा हरशेखरा[3]ऽपरा ॥ १७ ॥
कलशैः किल शैवलोपमे[4] गगनाब्धेस्तिमिरे व्यपाकृते[5] ।
स्फुरितेव सुधामयी प्रभा परितः केतुमिषाद् विषादहृत्[6] ॥ १८ ॥
हिमवच्छिखरैः सुहृत्क्रिया विदधे चैत्यगणेन शाश्वती ।
अत एव सुराऽऽपगाऽप्ययादनुनेतुं[7] तमथो[8] ध्वजच्छलात् ॥ १९ ॥
प्रथमं प्रमथेशमाश्रय[9]द्दृषिकल्पः स तु रुद्ररूपभाक्[10] ।
इति सङ्कुचितेव सा लघुर्ध्वजरूपाऽऽर्हतसद्मसङ्गता[11] ॥ २० ॥
कविधीरिव सर्वतोमुखी जनतापच्छिदि[२] चन्द्रगोलिका[12] ।
मरुदन्वयिनीश्वरेव या ध्वजराजिर्न मुदेऽस्तु कस्य सा ॥ २१ ॥

[ इति ध्वजवर्णनम् ]

मणिनिर्मितनर्महर्म्यजा[13] द्युतिरन्वास्त मिथोऽत्र सङ्करम्[14] ।
न पुपोष परं प्रदोषकं[३] रसगोष्ठी[15] जनसङ्कुले कुले ॥ २२ ॥
अहरन् नवचन्द्रशालिकाद्युतयो दर्शतमिस्रकालिकाः[16] ।
न विवेद विभेदमालिका[17] रमणे पक्षयुगेऽपि बालिका ॥ २३ ॥
दयिता दयिताङ्कगा[18] क्षणान्मणिभित्तिप्रतिबिम्बितेक्षणात्[19] ।
सहसापि सकोपलक्षणा न जहौ मैथुनम्[४] अम्बुजेक्षणा ॥ २४ ॥
मणिकुट्टिमरङ्गसङ्गमे[20] शतधा स्वस्य धवस्य[21] बिम्बितैः ।
भयविस्मयसाहसान्विता वनिता स्वाऽऽलिजनेन[22] हस्यते ॥ २५ ॥
नवनीलमणीरुचां चयैर्[23] निचिता यत्र तमीव[24] शाश्वती ।
धृतमानतया निशात्ययेऽपि[25] च भीतिर्न वधूषु भास्वती ॥ २६ ॥

---

[ १७ ] १ "घनास्थिजात्" घनानि यान्यस्थीनि तेभ्यः संजातात् ।

[ २१ ] २ "जनतापच्छिदि" जनानां तापो जनताया आपद् वा तं छिनत्तीति जनतापच्छित् तस्मिन् ॥

[ २२ ] ३ "प्रदोषकम्" सन्ध्यासमयम्, "प्रदोषो रजनी-मुखम्" इत्यमरः [ अमर० कां० १ श्लो० ११३ ] परस्परजाति-साङ्कर्यदोषं वा ।

[ २४ ] ४ "न जहौ मैथुनम्" चाञ्चल्याद् मैथुनात्यागः ।

---

[ 17 ] 1 "सुधाभुजाम्" देवानाम् । 2 "व्यपनेतुम्" दूरीकर्त्तुम् । 3 "हरशेखरा" शिवमस्तका ॥

[ 18 ] 4 "शैवलोपमे" शेवालसदृशे "शेवालं शैवलं शेपालम्" इति हैमः [ अभि० चिं० कां० ४ श्लो० २३३ ] । 5 "व्यपाकृते" दूरीकृते । 6 "विषादहृत्" ग्लानिनाशिका ॥

[ 19 ] 7 "अनुनेतुम्" प्रसादितुम् । 8 "तम्" चैत्यगणम् ।

[ 20 ] 9 "प्रमथेशम्" शिवम्, "प्रमथाः पार्षदा गणाः" इति हैमः [ अभि० चिं० कां० २ श्लो० ११५ ] । 10 "रुद्ररूपभाक्" शिवस्वरूपी । 11 "आर्हतसद्मसङ्गता" जिनमन्दिरयुक्ता ॥

[ 21 ] 12 "चन्द्रगोलिका" चन्द्रभित्तिका; "मुसली गोधिका गोलिके गृहात्" इति हैमः [ अभि० चिं० कां० ४ श्लो० ३६३ ] ।

[ 22 ] 13 "हर्म्यजा" प्रासादजाता । 14 "सङ्करम्" समुत्कीर्यतेऽसौ सङ्करस्तम् । 15 "रसगोष्ठी" रसवार्त्ता ।

[ 23 ] 16 "दर्शतमिस्रकालिकाः" अमावास्यान्धकारवच्छ्यामिका, "अमाऽमावस्यमावस्या दर्शः सूर्येन्दुसङ्गमः" इति हैमः [ अभि० चिं० कां० २ श्लो० ६४ ] । 17 "आलिका" सखी ॥

[ 24 ] 18 "दयिताङ्कगा" प्रियक्रोडगता । 19 "अम्बुजेक्षणा" कमललोचना ॥

[ 25 ] 20 "मणिकुट्टिम०" मणिभिः कुट्टिमं गृहस्य बद्धा भूमिः । 21 "धवस्य" नाथस्य । 22 "स्वालिजनेन" स्वकीयसखीजनेन ॥

[ 26 ] 23 "नवनीलमणिरुचां चयैः" नवीनेन्द्रनीलद्युतीनां समूहैः, "नीलमणिस्त्विन्द्रनीलः" इत्यमरः [ अभि० चिं० कां० ४ श्लो० १३१ ] । 24 "तमी" रात्रिः । 25 "निशात्यये" रात्रिविरामे ॥

प्रतिबिम्ब यथास्थलस्थितैस्तदलङ्कारमणीगणैर्वधूः ।
अनलङ्कृतमङ्गमात्मनो बुबुधे न स्मरविस्मयाऽऽकुला ॥ २७ ॥
प्रतिवेश्म महोत्सवादहर्निशमाहूतसगोत्रभुक्तिषु ।
[1]सुहितो [2]ह्यवनीवनीपकः पुरि यस्यामवनीपति [3]स्वतः ॥ २८ ॥
[1]नवहर्म्यशिरस्सु [2]काञ्चनैः कुसुमैर्नीलमणीदलस्थितैः ।
[3]सुमनोभिरसौ हि [4]वीरुधां [5]हरिभिर्[6]निस्वगृहे समाबभौ ॥ २९ ॥
सुदती [7]तुदती नृणां मनः [8]कमनव्यासभृतां जलाशये ।
मुखम[4]म्बुरुहां वनान्तरे [5]नृपरूपं दधती मुदेऽभवत् ॥ ३० ॥
समवापि नवाऽपि वापिका चतुरैः कैरिह न [9]स्मराऽऽतुरैः ।
सुदृशां जलमज्जने श्रिता कमलाऽऽभां वदनैर[10]नार्तवाम् ॥ ३१ ॥

[इति नगरभवन–वन–वापी–सरोवर्णनम्]

अथ तत्र पुरे सुरेशितु[11]र्महनीयः किरणै[12]रहर्मणिः ।
उदियाय जयाय तीर्थकृत् प्रभुपार्श्वः प्रतिमास्वरूपतः ॥ ३२ ॥
विषयैर्[13]विषयीकृते शुभैर्विषये निर्विषयीकृताशुभे ।
सुकृताभ्युदयाय [14]भूस्पृशामुदियाय प्रतिमाऽ[15]श्वसेनभूः ॥ ३३ ॥ [पाठान्तरम्]
जनता बहुधेष्टपूरणात् स हि शङ्खेश्वर एव शाश्वतः ।
कुरुते गुरुतेजसाऽऽत्मनां बहुशं स्वेश्वरदेवभास्वतः ॥ ३४ ॥
भरतार्द्धपतिः पुरा [16]हरिः पुरि शङ्खेश्वरनाम्न्यतिष्ठिपत् ।
[17]ककुभां विजये जिनेश्वरं स्वरसात् पार्श्वमतीव भास्वरम् ॥ ३५ ॥
अभिधानविधिस्ततोऽर्हतः स्मरणीयोऽस्य पुरा [18]पुरानुगः ।
अथ तीर्थमिहापि [19]पप्रथे प्रतिबिम्बेऽतिशयप्रभावतः ॥ ३६ ॥

---

[२८] १ "सुहितः" तृप्तः, "तृप्ते स्वाघ्रातसुहिताऽऽशिताः" इति हैमः [अभि० चिं० कां० ३ श्लो० ९०]। २ "अवनी-वनीपकः" पृथिव्या मार्गणः "याचकस्तु वनीपकः" इति हैमः [अभि० चिं० कां० ३ श्लो० ५१]। ३ "अवनीपति" अवनीप इवाऽऽचरतीत्यवनीपति क्विप् ॥

[३०] ४ "अम्बुरुहाम्" कमलानाम् । ५ "नृपरूपं दधती" राजवद्–मुखं प्रकाशयन्ती ॥

---

अत्र "स्वस्थादिभिर्भ्रमात् कार्यप्रवृत्तिः परिकल्पते" इति काव्य-कल्पलतावृत्तौ" [प्र० ४ स्त० ५] उक्तत्वात् नीलमणिषु भ्रमेण रात्रिं परिकल्प्य स्त्रियः वीतभया दृश्यन्ते ।

[29] 1 "नवहर्म्यशिरस्सु" नवीनप्रासादशिखरेषु । 2 "काञ्चनकुसुमैः" सुवर्णपुष्पैः । 3 "सुमनोभिः" पुष्पैः । 4 "वीरु-धाम्" वल्लीनाम् । 5 "हरिभिः" पीतैः; सारस्यमत्र व्यङ्ग्यम् । 6 "निस्वगृहे" सुवर्णपुष्पाभावेऽपि ।

[30] 7 "तुदती" पीडयती । 8 "कमनव्यासभृताम्" मदनप्रपञ्चभृतानाम् ॥

[31] 9 "स्मराऽऽतुरैः" कामपीडितैः । 10 "अनार्तवाम्" अपीडिताम् ॥

[32] 11 "महनीयः" तेजस्वी । 12 "अहर्मणिः" सूर्यः ।

[33] 13 "विषयीकृते" गोचरीकृते, "विषयोऽत्र यो ज्ञातस्तत्र गोचरदेशयोः शब्दादौ जनपदे च" इति हैमः [अने० सं० कां० श्लो० ]। 14 "भूस्पृशाम्" मानवानाम् । 15 "अश्वसेनभूः" पार्श्वनाथः ॥

[35] 16 "हरिः" कृष्णः । 17 "ककुभाम्" दिशाम् ॥

[36] 18 "पुरानुगः" पूर्वानुगतः । 19 "पप्रथे" वितस्तार ॥

भगवान् समुदेत्य[1]अहर्पतिर्[2]विषयांस्[3]तद्विषयान् प्रकाशयन् ।
क्वचिदम्बुधरोपरोधने मधुरा वा विधुराऽऽतपक्रिया ॥ ३७ ॥
[4]नयभावनयाऽनया भवेद् विभवस्तीर्थपमूर्त्तितेजसः ।
भुवनेष्वपि तारतम्यवाँस्तनुभाजां ननु दैवसङ्गतेः ॥ ३८ ॥
सुरसंनिधिरत्र सन् निधिर्महसामीहितपूरणं नृणाम् ।
त्रिजगज्जनपूजनं वपुः कमला कोमलतापि तादृशी ॥ ३९ ॥
विदितं तदितो[5]ऽदितेर्[6]दितेस्तनयैस्सद्भि र्यैर्निषेवितम् ।
वरतीर्थमनन्तशर्म्मदं भुवि शङ्खेश्वरपार्श्वशर्म्मणा ॥ ४० ॥
अभिधामभिधारणं श्रियां [7]शिवपुर्यां हृदि भावयन्निव ।
जननप्रणयादशिश्रियन्नगरीं तामुचितां [8]जगद्गुरुः ॥ ४१ ॥

[ इति श्रीभगवत्प्रतिमावर्णनम् ]

[9]चलनद्वितयी भृशं बभौ दृढपद्मासननिश्चितप्रभोः ।
कमलोदयनित्य[10]बोधनं निदिशन्तीव [11]निजोपजीविनाम् ॥ ४२ ॥
गतिहेतुपदद्वयोन्मुखीभवनेऽवादि किमत्र [१]लक्षणैः ।
भगवद्भजनेन [12]चक्रिताद्युपलब्धिर्नियतोत्वगामिता ॥ ४३ ॥
चरणारुणिमा[13]ऽनणुश्रिया नववैराग्यजितः [14]सिसेविषुः ।
मुमुचेंऽह्रितलं कदापि नो ननु रागः [15]स्वपरागसच्छिदे ॥ ४४ ॥
पुरतो [16]मरुतां [17]स्मितानना: प्रभुसौभाग्यदिदृक्षया स्थिराः ।
अयमंह्रितलेऽनुबिम्बितः खलु [18]तासामनुरागनिर्भरः ॥ ४५ ॥
अथ एव विधीयते द्विधा [२]भवरागः प्रभुणा तथाप्यहो ।
उदयश्चरणेऽनुरागतः सुदृशामित्यवदत् तलं किमु ॥ ४६ ॥
भगवच्चरणद्वये ध्रुवं नवनालीकरुचिर्व्यजृम्भत ।
अत एव परागभागजा परमा रागदशा प्रसारिणी ॥ ४७ ॥
प्रभुणा जयता [19]मनोभुवं यद्[३]उपासङ्गयुगं बलाद्धृतम् ।
तदिदं पदसम्पदा बभौ स्फुटपञ्चाङ्गुलि[20]मार्गणाङ्कितम् ॥ ४८ ॥

---

[ ४२ ] १ "लक्षणैः" चक्रादिभिः" ।
[ ४५ ] २ "भवरागः" भवस्य संसारस्येश्वरस्य वा रागः ।
[ ४८ ] ३ "उपासङ्गयुगम्" उपासङ्गं शराश्रयः–तूणीर-युगलम् । "तूणो निषङ्गस्तूणीर उपासङ्गः शराश्रयः" इति हैमः [ अभि० चिं० कां० ३ श्लो० ४४५ ]

---

[ 37 ] 1 "अहर्पतिः" सूर्यः । 2 "विषयान्" देशान् । 3 "तद्विषयान्" तत्पदार्थान् ॥

[ 38 ] 4 "नयभावनया" नैगमादिसप्तनयभावनया ।

[ 40 ] 5 "अदितेः" पुनर्वसुनक्षत्राधिष्ठातृदेवस्य । 6 "दितेः" दैत्यमातुः ।

[ 41 ] 7 "शिवपुर्य्याः" आधुनिकसिरोहीनगर्य्याः । 8 "जगद्गुरुः" श्रीविजयप्रभसूरिः ॥

[ 41 ] 9 "चलनद्वितयी" क्रमद्वयी । 10 "°बोधनम्" विकासम् । 11 "निजोपजीविनाम्" स्वसेवकानाम् ॥

[ 42 ] 12 "चक्रिताद्युपलब्धिः" चक्रवर्तित्वादिप्राप्तिः ।

[ 43 ] 13 "अनणुश्रिया" महालक्ष्म्या । 14 "सिसेविषुः" सेवितुमिच्छुः । 15 "स्वपरागसच्छिदे" स्वपरपापनाशाय ॥

[ 44 ] 16 "मरुताम्" देवानाम् । 17 "स्मितानना:" हसितवदनाः स्त्रियो देव्य इत्यर्थः । 18 "तासाम्" देवीनाम् ।

[ 48 ] 19 "मनोभुवम्" कामदेवम् । 20 "°मार्गणाङ्कितम्" बाणैश्चिह्नितम् ॥

करपद्मयुगोपसम्पदा चरणाब्जे वदतः किमुन्मुखे ।
निवसन्ति चतुर्विधा अपि चतुराशाब्धिभुवो[1]ऽत्र नित्यशः ॥ ४९ ॥
नखरैः[2] खररश्मयो जिता जडजातिप्रभया[3] कलाभृतः[4] ।
चरणद्वितयेन चक्रिणा हरिणेव[5] स्फुटमाहतं तमः[6] ॥ ५० ॥
विनतेन्द्रसुवर्णमौलिजद्युतिलक्षेशपदाम्बुजन्मना ।
नलिनं तुलयेन्न तत्र तद्विधिनाऽऽधीयत किं वराटकः[1] ॥ ५१ ॥

[ इति चरणकमलवर्णनम् ]

भुजयोर्विजयोर्जितश्रिया विभुमूर्त्तिः शुशुभेऽशुभारिणी ।
मरुतां सरितः[7] प्रवाहयोरिव युक्तिः[8] करपद्मशालिनी ॥ ५२ ॥
हृदि दुग्धमहोदधिर्विभोर्धवलध्यानविधेर्[9]विसृत्वरः[10] ।
भुजमध्यमपाणियोजनैरिव वेलालहरीमरीरमत्[11] ॥ ५३ ॥
अभिषेकविधौ द्युसद्मनां[12] पयसां पूर इवेश्वराङ्गतः ।
स्थिरतां समुपेत्य दिद्युते विपुलोत्सङ्गसरःस्वरूपतः[13] ॥ ५४ ॥
वदनेन कलाभृता विभोर्जनतापापहरी द्विधाऽप्यसौ ।
किमु तानि विशिष्य कौमुदी सहसाऽङ्के कुमुदावबोधनी ॥ ५५ ॥
गलकन्दलमालिकामिषादवतीर्णा त्रिदशाऽऽपगा[14] नगात्[15] ।
विपुलस्थलमङ्कशोभया समवाप्य प्रससार सारसात् ॥ ५६ ॥
इह दुग्धपयोनिधिः स्वयं भजते नैव कदाऽपि विक्रियाम् ।
मुनिभर्त्तुरिवा[16]ङ्कवर्ष्मणा[17] भजनायाः फलमेतदुज्ज्वलम् ॥ ५७ ॥
समवेक्ष्य मुनीन्दुमानसं धवलध्यानजलेन पूरितम् ।
किमियाय[18] सरोऽपि मानसं[19] तदिहाङ्कोपधिनेव सौहृदात् ॥ ५८ ॥

---

[ ५१ ] १ "वराटकः" पद्मबीजकोशः कपर्दको वा, वराटकः "पद्मबीजकोशे रज्जौ कपर्दके" इति हैमः [ अने० सं० ४ श्लो० ३२ ]

---

[ 49 ] 1 "चतुराशाब्धिभुवः" चतुर्दिगसागरभूमयः ।

[ 50 ] 2 "नखरैः" नखैः । 3 "जडजातिप्रभया" कमलातिशायिलक्ष्म्या । 4 "कलाभृतः" चन्द्राः । 5 "हरिणा" इन्द्रेण । 6 "तमः" पापं राहुश्च ॥

[ 52 ] 7 "मरुतां सरितः" स्वर्गङ्गायाः । 8 "युक्तिः" योजनम्, "युक्तिर्न्याये योजने च" इति हैमः [ अने० सं० कां० २ श्लो० १९३ ]

[ 53 ] 9 "धवलध्यानविधेः" शुक्लध्यानविधेः । 10 "विसृत्वरः" प्रसारी । "विसृत्वरः विसृमरः प्रसारी च विसारिणि" इत्यमरः [ अमर० कां० ३ श्लो० १०४३ ] 11 "अरीरमत्" अतिशयेनारमत्, 'रमिं क्रीडाया'मिति धातोर्यङ्लुग्व्यन्तस्या रूपम् ॥

[ 54 ] 12 "द्युसद्मनाम्" देवानाम् । 13 "विपुलोत्सङ्गसरःस्वरूपतः" विस्तृतक्रोडसरोरूपी, "पूर्वभाग उपस्थोऽङ्कः क्रोड उत्सङ्ग इत्यपि" इति हैमः [ अभि० चिं० कां० ३ श्लो० २६६ ] ॥

[ 56 ] 14 "त्रिदशाऽऽपगा" स्वर्गङ्गा । 15 "नगात्" पर्वतात् ॥

[ 57 ] 16 "मुनिभर्त्तुः" तीर्थकृतः । 17 "अङ्कवर्ष्मणा" उत्सङ्गशरीरेण ॥

[ 58 ] 18 "इयाय" जगाम । 19 "सरोऽपि मानसम्" हिमालयस्थमानससरोवरमपि चित्तं सरोरूपमपि वा ॥

[1]कमलाऽभ्युदिता न [2]नीरधेर्न पुनः पङ्कजमेतदाश्रयः ।
इयमङ्क[3]पयोधिजा विभोर्ध्रुवमास्तेऽह्रिकराम्बुजन्मसु ॥ ५९ ॥
[4]तरसा [5]तरणाय जन्मिनां भवसिन्धोः किमिवाङ्गरूपभृत् ।
विभुना [6]वहनं [7]पटूकृतं तदमुष्मिन् खलु कोटिपात्रता[१] ॥ ६० ॥

[ इति भगवत्प्रतिमाया मध्यभागवर्णनम् ]

अरुचद् [8]मरुदर्चितं विभोः प्रतिमाने विपुलं भुजान्तरम् ।
भुवनाद्भुतकेवल[9]श्रिया रमणायेव कृतं [10]जगत्कृता ॥ ६१ ॥
[11]मसृणै[12]र्घुसृणानुलेपनैर्निदधे दीप्तिरह[13]र्मुखोचिता ।
[14]नवकेवलभानुमालिनोऽभ्युदयस्थानतयेव वक्षसा ॥ ६२ ॥
हृदयं हृदयङ्गमं नृणां सदयं धीररुचेर्द्विधाऽऽश्रयम् ।
परिभावयतीव पीवरप्रभुभक्त्या हि महोन्नतिं श्रियाः ॥ ६३ ॥
नवरश्मिकलापशालिनी द्विविधा काऽपि वि[15]भा वि[16]भावसोः ।
विजयेन जगत्त्रयी भुवां हृदि [17]शम्भोर्मुदमुन्निनीषति ॥ ६४ ॥
[२]परिधापनिकानिकाचितैर्विलसत्काञ्चनरत्नभूषणैः ।
हृदये प्रतिबिम्बितैर्विभोर्भुवि विश्वम्भरतैव दिद्युते ॥ ६५ ॥
कमला जडजाऽऽश्रयेत् पदः किल [18]कौलीनम[19]पाचिकीर्षति ।
बहुधैर्यविबोधशालिनि हृदि देवस्य पदार्थसङ्क्रमैः ॥ ६६ ॥
[20]स्मितसौमनसस्रजां मिषाद् हृदये सौमनसं जगत्त्रये ।
प्रकटीभवति स्म विस्मयान्मुनिराजोऽङ्गभृतां हितैषिणः ॥ ६७ ॥

[ इति वक्षःस्थलवर्णनम् । ]

जिनकण्ठतटी पटीयसी महसा निर्मलवृत्तरूपतः ।
वदतीव तथाप्ररूपणा ध्वनिसन्धानपदत्वमात्मना ॥ ६८ ॥

---

[ ६० ] १ "कोटिपात्रता" के निपातः (?) कोटिपात्रं पक्षे कोटिगुणपात्रत्वम् ।

[ ६५ ] २ "परिधापनिका" जिनमूर्तेः संनिहिता वक्षाऽऽभरणपूजा ।

---

[ 59 ] 1 "कमला" लक्ष्मीः । 2 "नीरधेः" समुद्रात् "लक्ष्मीः समुद्रादुत्पन्नेति पुराण-कथा प्रसिद्धाऽस्ति" । 3 "अङ्कपयोधिजा" क्रोडरूपसमुद्राज्जाता ॥

[ 60 ] 4 "तरसा" शीघ्रम् । 5 "तरणाय" तरीतुम् । 6 "वहनम्" पोतः, "बोहित्थं वहनं पोतः" इति हैमः [ अभि० चिं० कां० ३ श्लो० ५४० ] । 7 "पटूकृतम्" अपटुः पटुः कृतमिति गतिशीघ्रत्वं कृतम् ॥

[ 61 ] 8 "मरुदर्चितम्" देवपूजितम् । 9 "केवलश्रिया" केवलज्ञानरूपलक्ष्म्या । 10 "जगत्कृता" ब्रह्मणा ॥

[ 62 ] 11 "मसृणैः" स्निग्धैः, "स्निग्धे मसृणचिक्कणे" इति हैमः [ अभि० चिं० कां० ३ श्लो० ७७ ] 12 "घुसृणानुलेपनैः" लोहितचन्दनविलेपनैः "काश्मीरजन्म घुसृणं वर्णं लोहितचन्दनम्" इति हैमः [ अभि० चिं० कां० ३ श्लो० ३०८ ] । 13 "अहर्मुखोचिता" प्रभातयोग्या, "प्रभातं स्यादहर्मुखम्" इति हैमः [ अभि० चिं० कां० २ श्लो० ५२ ] । 14 "नवकेवलभानुमालिनः" नवीनकेवलज्ञानरूपसूर्यस्य ॥

[ 64 ] 15 "विभा" प्रभा कान्तिरित्यर्थः । 16 विभावसोः सूर्यस्य । 17 "शम्भोः" प्रभोः ।

[ 66 ] 18 "कौलीनम्" जनप्रवादम्, "जनप्रवादः कौलीनं विगानं वचनीयता" इति हैमः [ अभि० चिं० कां० २ श्लो० १८४ ] । 19 "अपाचिकीर्षति" अपाकर्तुमिच्छतीति-दूरीकरोतीत्यर्थः ॥

[ 67 ] 20 "स्मितसौमनसस्रजाम्" हास्यरूपकुसुममालानाम् ।

त्रिपदी[1] त्रिजगद्विशुद्धये त्रिपथेव प्रससाद साऽऽदरा ।
इत एव जगत्पतिरिति स्फुटरेखात्रितयाङ्कवान् गलः ॥ ६९ ॥
रमते सततं गलस्थले विनिधायेव निजं भुजद्वयम् ।
विभुना वरशुक्लधारणा[1] वनिता सौमनसस्रजश्छलात् ॥ ७० ॥
गलकन्दलशोभयेशितुर्विजितः कम्बुरनम्बुमेघवत्[2] ।
ध्वनिमातनुते विशीर्णहृत् प्रतिवेश्म[3] भ्रमभिक्षुहस्तगः[4] ॥ ७१ ॥
स्वरसात् स्वरसार्थमाधुरी त्रिविधाऽऽस्थायमिदं गलस्थलम् ।
जनरञ्जनहेतुरीशितुर्विधिनैतत् त्रिरुदीक्ष्य रेखितम् ॥ ७२ ॥
यदि वाऽत्र समुद्भवद्ध्वनेर्मननं संवरणं तथा रुचिः ।
त्रयमभ्युदयाय जायते गलरेखात्रयमित्यवीवदत् ॥ ७३ ॥
भगवन्मुखचन्द्रमण्डलादिव सुस्राव सुधा त्रिधा रयात् ।
तत एव गले त्रिरेखिका त्रिदशैः स्निग्धतया निपीयते ॥ ७४ ॥
धृतरेखतया त्रिधोपमात्रितयं कण्ठतटी जिगाय सा ।
महसा[5] (१) कृतितः[6] (२) स्वरोदया[7] (३) च्छशिनं (१) कम्बुवरं (२) सुधारसम् (३) ॥७५॥
जडधी[2]ष्टतनूद्भवः स्वयं बहुधाऽऽवर्त्तविवर्त्तितान्तरः ।
कथमेत्युपमां हि वारिजः शुभकण्ठस्य समग्रवेदिनः ॥ ७६ ॥
वदनं विधुरेखसोदरः कमलाभोगधरः[3] करः प्रभोः ।
किमितीव विमृश्य वारिजो विरराजेव गलस्थलच्छलात् ॥ ७७ ॥
जलधिर्ध्वनिनाऽवधीरितः[8] शशभृद्[9] भृत्य इवाऽऽननश्रिया ।
इति नाथगलस्य लीलया वरकम्बोर्विजये सहायता ॥ ७८ ॥
मणिभर्त्तुरतः पुरोद्भवन् ध्वनिरेव प्रसृतः सुराध्वनि ।
जलधेर्विजयी तदङ्गभूरिह[4] शङ्खस्तुलयेद् गलेन किम् ॥ ७९ ॥

[ इति गलस्थलवर्णनम् । ]

भगवद्वदनेन्दुमण्डलं[10] सततं प्राप्तमहोदयश्रिया ।
अपनीय कलङ्कसङ्करं सुदृशामभ्युदयश्रियेऽद्भुतम् ॥ ८० ॥

---

[ ७० ] १ "वरशुक्लधारणा" श्रेष्ठशुक्लध्यानरुचिः ।
[ ७६ ] २ "जडधी०" जलधिः सिन्धुः "रलयोरैक्यम्" इति सूत्रात्, पक्षे जडधी मन्दः ।
[ ७७ ] ३ "कमलाऽऽभोगधरः" कमलानामाभोगो विस्तारस्तं धरत इति, पक्षे श्रीभोगधरः ॥
[ ७९ ] ४ "तदङ्गभूः" समुद्रपुत्रः ।

---

[ 69 ] 1 "त्रिपदी" उत्पाद-व्यय-ध्रौव्यात्मिका पदत्रयी ।

[ 71 ] 2 "कम्बुः" शङ्खः "कम्बुस्तु वारिजः त्रिरेखः षोडशावर्त्तः शङ्खः" इति हैमः [ अभि० चिं० कां० ४ श्लो० २७०–७१ ] । 3 "प्रतिवेश्म" प्रतिगृहम् । 4 "भ्रमभिक्षुहस्तगः" चलनस्वभावस्य याचकसाधोः 'बावा' इति भाषाप्रसिद्धस्य करगतः ।

[ 75 ] 5 "महसा" तेजसा शशिनं चन्द्रं जिगाय । 6 "कृतितः" कार्यात् कम्बुवरं श्रेष्ठशङ्खं जिगाय । 7 "स्वरोदयात्" ध्वनेरुद्गमात् सुधारसममृतरसं जिगाय ।

[ 78 ] 8 "अवधीरितः" तिरस्कृतः । 9 "शशभृद्" चन्द्रः

[ 80 ] 10 भगवतो मुखमिन्दुमण्डलेनोपमीयते तेनोदयश्रीरूपो धर्मः, मुखं चोपमावाचकमतो धर्मोपमावाचकयोः पूर्णत्वमुपमाया प्रदर्शितमस्ति, यथा काव्यालङ्कारवृत्तावरिसिंहः—

"धर्मोपमावाचकयोश्चोक्तौ पूर्णा मता यथा ।
शशीवाऽऽस्यं मुदं दत्ते········ [ प्र० १, स्त० ५ श्लो० २ ]"

वदनेन्दुविभाभरैर्जितं कमलं लज्जितवन्निमज्जनम् ।
प्रविधाय जलाऽऽशये भ्रमद्भ्रमराऽऽरावमिषेण रोदिति ॥ ८१ ॥
परितः शतपत्रयोगजा कमलानां कमला प्रसर्पति ।
न पुनः स्वत इत्यतः कथमुपमा तेषु विभोर्मुखश्रियाः॥ ८२ ॥
मुखशीतरुचेः प्रकाशतः शतपत्रं त्रपयेव संदधत् ।
भ्रमरोपधिनाऽसिताम्बरं स्वशिरो धूनयति प्रकम्पनैः ॥ ८३ ॥
मधुपैः परिपीतमन्वहं नलिनं पङ्कभरात् कलङ्कितम् ।
भगवद्वदनोपमाधियं न जडोऽप्यत्र मनाग् व्यवस्यति ॥ ८४ ॥
वदनं सदनं विदां प्रभोः स्मरणीयं सततं विदांवरैः ।
कमलेन मलेन विप्लुते जडजातेन किमेति तुल्यताम् ॥ ८५ ॥
भगवन्मुखसौरभश्रियाः किमु चौरं सरसीरुहं विधिः ।
भ्रमराय सशृङ्खलस्खलवलनं न्यक्षिपदम्बुनिर्भरे ॥ ८६ ॥
अपि भागवताऽऽस्यदास्यतः कमले बोधकला सुवृत्तता ।
प्रतिभाति ससौरभा न चेज्जडजातेऽस्ति कुतः प्रबुद्धता ॥ ८७ ॥
श्रुतिपाटवमस्य शाश्वतं विपुला निर्मलदर्शनस्थितिः ।
भगवद्वदनस्य भास्वतो जडजातेर्विजयेन चाद्भुतम् ॥ ८८ ॥
कमलावसतेः पयोरुहं वहतामीशमुखोपमास्मयम् ।
परमार्थविचिन्तने तनोत्युदबिन्दुच्छलतोऽश्रुमोचनम् ॥ ८९ ॥
कमलं सलिलाऽऽतपक्रियातपसा प्राप्य विभोर्मुखोपमाम् ।
पतनस्य भियेव न स्पृशत्युत दोषाकररोचिरन्तरम् ॥ ९० ॥
जगतीतलभासनाद् दृशोः सुखदानात् परितापनाशनात् ।
भगवद्वदनश्रियं श्रयेत् कथमप्येष विधुर्न चेत् क्षयी ॥ ९१ ॥
रुचिरालिकसन्नियोजने दधदत्युच्चमहस्विता विभोः ।
अतुलं वदनं तुलाभृता सदृशं स्याद् विधुनाऽधुना कथम् ॥ ९२ ॥

---

[ ८३ ] १ "प्रकम्पनैः" वातैर्भयकम्पैर्वा ।
[ ९२ ] २ "°अलिकसन्नियोजने" अलिकभावं तत्सामीप्यात्, अलिको वृश्चिकराशिः ।

---

[ 81 ] 1 अत्र वदनेन्दुना पराभूतं कमलं लज्जया जलाशये निमज्जति; अर्थादिन्दुदर्शनेन विकस्वरं कमलाऽऽकुञ्चति तत्स्थितश्च भ्रमर आक्रन्दं करोति । अत्र लज्जाऽऽक्रन्दादिभावाः यथोचिताः काव्यकल्पलतावृत्तेः कथनानुसारेण योजिताः । यथा–

"लज्जाकोपतपोनाशसेवाऽऽक्रन्दाऽऽस्यकृष्णताः ।
रागात् पाण्डुरता शम्भीविषक्षम्पादियोजने ॥ १४६ ॥
[ प्र० ४ स्त० ५ ]"

[ 85 ] 2 "सदनं विदाम्" विदुषां गृहम् । 3 "विदांवरैः" श्रेष्ठपण्डितैः ।

[ 86 ] 4 अत्र "समानवस्तुनः शोभाचौर्यान्नाशोऽथ निग्रहः" इति काव्यकल्पलतावृत्तौ [ प्र० ४ स्त० ५ ] उक्तत्वात्, ब्रह्मा मुखसौरभस्य चौरं कमलं जले सशृङ्खलं निगृह्णाति ।

[ 90 ] 5 अत्र "तपसा सत्पदावाप्तिः" [ प्र० ४ स्त० ५ श्लो० १४९ ] इति काव्यकल्पलतोक्तेः यत्कमलेनाऽऽकण्ठजले जलाऽऽहारेण तपस्तप्तं तेन प्रभुमुखसमानता लब्धेत्याशयः । 6 "दोषाकररोचिः" चन्द्रकिरणम् ।

[ 91 ] 7 अत्र "तदाऽसौ दुष्कृतं बिभ्रः" इति कल्पलतावृत्त्युक्तेः [ प्र० ४ स्त० ५ श्लो० १५० ] यदि चन्द्रमा क्षयशीलो न स्यात् तदा भगवद्वदनस्य साम्यं स्यात्, तेजसो ज्ञानाद् वा चन्द्रवदनयोर्वक्षेऽनुक्रमात् जगत्प्रकाशनात्, सुखरूपप्रकाशादुपदेशाद् वा, सुधावर्षाद् दुःखनाशाद् वा, लभेत ।

विदुषामुपमा सुदुर्लभा प्रभुवक्त्रस्य सदा महस्विनः ।
तदनन्यगतेर्विमर्शने ननु दिग्मात्रमयं सुधाकरः ॥ ९३ ॥
अमृतद्युतिरर्हदीशितुर्मुखसाम्यं समवाप्य किञ्चन ।
न जडोद्भवमध्यसङ्गतिं मधुपापीततयेव सेवते ॥ ९४ ॥
शशिनः शिरसि न्यधात् कलां गिरिशस्तं सकलं हरिर्दृशि ।
विभवानुभवोऽयमर्हतः सुलभोऽस्याऽऽस्यवरस्य दास्यतः ॥ ९५ ॥
नलिने मलिनालिनो न चेन्न सुधाधाम्नि कलङ्कसङ्करः ।
सततप्रतिबुद्धबुद्धराण्मुखसाम्यस्य कथा तथाऽपि न ॥ ९६ ॥
कमले क्रमपात्रविच्युतिः शशिनि स्यात् सकला कलाक्षतिः ।
भगवद्वदनेन साम्यताकरणाद्देष विधेरयं विधिः ॥ ९७ ॥
उपमानमदर्शि भूचरैः कमलं शीतरुचिश्च खेचरैः ।
प्रतिवादधिया न तात्त्विकी भगवद्वक्त्रकलाऽनयोर्मनाक् ॥ ९८ ॥
सकलांशुकधारणं विधोरधनस्येव न पर्वणः परम् ।
जलजस्य विबोधनं दिने मुखसादृश्यनयोऽनयोऽनयोः ॥ ९९ ॥
भगवद्वदनोपमाविधेरधिकारो द्वितये विवर्त्तते ।
निशि चन्द्रमसि प्रभाकरेऽभ्युदिते तत्क्षणतः सरोरुहे ॥ १०० ॥
विभुतो हि सदैवदैवतो भवति न्यूनतमेऽधिकारिता ।
अत एव मुखोपमापदं हिमगुर्वा जलजं न सर्वथा ॥ १०१ ॥
विजितं प्रभयेन्दुमण्डलं कमलं सौरभपूरसंभवात् ।
भगवद्वदनं ततोऽभवद् भुवने निस्तुलवस्तुपुष्कलम् ॥ १०२ ॥
यदि सौम्यरुचिर्दिवाकरेऽप्यथवा राजनि निष्कलङ्कता ।
जलजन्मनि भासुरद्युती रमतां तत्र शुभाऽऽननोपमा ॥ १०३ ॥
बहुलक्षणभास्वरं प्रभोर्मुखमीदृग् ननु राजमण्डलम् ।
अभिनन्दितराजदर्शनं प्रतिबोधेन न चेद् दृगमम्बुजम् ॥ १०४ ॥
सकलैः स्वगुणैर्मुखोपमाऽद्भुतभावे यदि दृश्यते क्वचित् ।
विबुधा न मुधा निशाकरे जलजेवाभिनिवेशयन्ति ताम् ॥ १०५ ॥

[ इति भगवद्वदनवर्णनम् । ]

[ १०४ ] १ "बहुलक्षणभास्वरम्" भूरिलक्षणैर्दीप्तम्; बहुलस्य कृष्णपक्षस्य क्षणोऽवसरस्तत्र नदीप्रम् । २ "अभिनन्दितराजदर्शनम्" अभिनन्दिताः प्रमोदिता राजानो येनेदृशं दर्शनं यस्य मुखमीदृशं न कमलम्; अभिनन्दितश्चासौ राजा चोदितेन्दुस्तस्य दर्शनं यस्य । ३ "प्रतिबोधेन" प्रबोधेनोपदेशकरणेन प्रकाशेन वा ।

[93] 1 "विद्वद्भिः" प्रभुमुखं चन्द्रेणोपमितं तत्त्वन्यथोपायत्वाद् दिशा सूचनमात्रमिति भावः ।

[94] 2 "अमृतद्युतिः" चन्द्रः । अत्र "श्रेयस्तदाप्तौ दोषेऽपि" इति काव्यकल्पलतावृत्तौ [ प्र० ४ स्त० ५ श्लो० १५१ ] कथनात् चन्द्रः मुखसादृश्यं समवाप्य जडोऽपि भ्रमरैः सेव्यते ।

[96] 3 कमले भ्रमराश्चेन्न स्युः, चन्द्रमसि कलङ्कश्चेन्न न स्यात् तदा प्रतिबोधितस्य बुद्धभगवतो झटिति मुखसादृश्यस्य संकथाऽपि न स्यादिति भावः ।

[100] 4 दिनोद्गते कमलस्य निशि च चन्द्रमस उपमाऽर्हत्वं भगवन्मुखस्य वर्तत इत्याशयः ।

नयनद्युतिरीशितुर्जने जनयन्ती बहुशर्मसम्पदम् ।
विलसद्रसबोधसत्वरी भवदिन्दीवररूपजित्वरी ॥ १०६ ॥
हृदयान्तरतापवारणात् सुदृशां नित्यविकासकारणात् ।
अमृतद्रवसम्भृते दृशौ सरसीवास्य विरेजतुर्विभोः ॥ १०७ ॥
वसुधास्थलवासिदैवतैः किमिवाऽऽनीय दिवः सुधा धृता ।
इह सा मुनिराजलोचनोज्ज्वलपात्रे अनुभाव्य दीव्यति ॥ १०८ ॥
अजरामरतां प्रयान्त्यमी विबुधास्तन्नयनांशुपानतः ।
धवलीभवदात्मना मनागपि जाड्येन विना तदद्भुतम् ॥ १०९ ॥
अमृताशनतो द्युसद्मनां विविधा वर्णगतिस्तथा मतिः ।
नयनांशुसुधापरिप्लवादतिशुक्लैव नृणामिहोभयी ॥ ११० ॥
अचिराद् रुचिरा रुचिर्दृशोस्तनुते पङ्कभरापसर्पणम् ।
सुरसिन्धुरिव प्रसारिणी स्फुरदिन्दीवरराजिशोभया ॥ १११ ॥
धवलाऽधवलाऽरुणत्विषामनुषङ्गाद् भगवद्दृशोर्द्वयी ।
विशदीकरणाय देहिनामुदीयायेव सरित्त्रिवेणिका ॥ ११२ ॥
अहरद् वरदीप्तिमीक्षणद्वितयी शुभ्रतया तथा हरेः ।
शितिमानमपि स्वतारयां चलशोणत्वविधेर्विधेर्द्युतिम् ॥ ११३ ॥
करुणामरुणत् स्वमानसं भुवनस्योपरि यामधीश्वरः ।
अधिपात्रयुगं समुच्छ्वसित्यधुना साऽमललोचनश्रिया ॥ ११४ ॥
बहुसौरभलोभविस्फुरद्भ्रमरौचैरुभयी सरोजयोः ।
उपमां प्रभुचक्षुषोर्दधात्यसितभ्रूयुगलोपधानयोः ॥ ११५ ॥

**[ इति नयनवर्णनम् । ]**

अलिकं कलिकन्दलच्छिदे भविनां संभवति स्वभावतः ।
समसन्तमसं भुवोऽहरद् यतिनामीशितुरुद्यतद्युतेः ॥ ११६ ॥
स्फुटमातपवारणं श्रियो वरनाशाऽऽयतदण्डमण्डनम् ।
विपुलप्रभुभाललीलया प्रविरेजे रजसां निवारणम् ॥ ११७ ॥

---

[ ११० ] १ "उभयी" गतिर्मतिश्च ॥

---

[ 106 ] 1 "भवदिन्दीवररूपजित्वरी" सतः कमलरूपस्य जयनशीला ।

[ 107 ] 2 प्रभोरक्षिणी सुधासम्भारेण मनुजानां हृदयं निस्तापं नित्यविकस्वरं च सरसीव कुर्वाते ।

[ 110 ] 3 "अमृताशनतः" सुधाभोजनात् । 4 "द्युसद्मनाम्" देवानाम् ।

[ 111 ] 5 "स्फुरदिन्दीवरराजिशोभया" विकस्वरकमलपङ्क्तिदीप्त्या ॥

[ 112 ] 6 "सरित्त्रिवेणिका" सरितां गङ्गा-यमुना-सरस्वतीनां त्रिवेणिका ।

[ 116 ] 7 "अलिकम्" ललाटम्, "भाले गोध्यलिकालीकललाटानि" इति हैमः [ अभि० चिं० कां० ३ श्लो० २३७ ] । 8 "कलिकन्दलच्छिदे" कलेर्कन्दलं नवाङ्कुरं छिनत्ति तस्मै; "कन्दलं तु नवाऽङ्कुरे कलध्वनौ" इति हैमः [ अने० सं० कां० ३ श्लो० ६६७ ] । 9 "समसन्तमसम्" समानरूपेण सततान्धकारम्, "समवान्धात् तमसः" इत्यत् [ सिद्धहेम० ७–३–८० ] ।

[ 117 ] 10 "आतपवारणम्" छत्रम् "छत्रमातपवारणम्" इति हैमः [ अभि० चिं० कां० ३ श्लो० ३८१ ] । 11 "वरनाश०" वरनाशः वृत्तिनाशः ।

अलिकं फलकं धनुर्भ्रुवौ स्मरतः संहरतेऽसिनाऽमुना ।
जगतीजनमोहनक्रिया विहिता कार्मणकर्मणेव किम् ॥ ११८ ॥
धनुषोऽद्रिभिदोऽन्तरस्थितं नभसः खण्डमखण्डशोभया ।
अलिकस्य करोत्यनुक्रियां यदि तत् पाटलवार्दलाऽऽवृतम् ॥ ११९ ॥
उदयाचलचूलयाऽऽवृतं यदि बिम्बस्य दलं विवस्वतः ।
उदितेन दलेन तुल्यता ध्रियते नाम तदाऽलिकश्रियः ॥ १२० ॥
घुसृणारुणरोचिषाऽलिके प्रतिभाति स्म विभातजा विभा ।
नवकेवलतीव्ररोचिषोऽभ्युदयं निर्दिशतीशितुर्ध्रुवम् ॥ १२१ ॥
भविता भुवनैकभास्करस्तमसां नाशयिताऽयमीश्वरः ।
इति दारदवर्णवर्णजोऽरुणिमाऽलीकपटे पटुर्बभौ ॥ १२२ ॥
घनकार्मणकाननं दहन् विमलध्यानमहानलः किल ।
हृदयेऽभ्युदियाय शाश्वतः प्रभुभाले तत एव रक्तिमा ॥ १२३ ॥

[ इति ललाटपट्टवर्णनम् । ]

भुजगाधिपतेः स्वतेजसां प्रसृताः किं नु गणाः फणामिषात् ।
प्रभुमूर्ध्नि बभुः सदोर्ध्वता ननु युक्तैव हि भक्तिकारिणः ॥ १२४ ॥
भगवानिह सप्तविष्टपीश्वरतालक्षणमेव सप्तधा ।
विपुलाऽऽतपवारणश्रियं निदधे तुङ्गफणागणाऽऽश्रयाम् ॥ १२५ ॥
भयसप्तकगन्धसिन्धुरद्रुतवश्यंकरणं फणाधिया ।
प्रगुणीकृतवान् निरङ्कुशान्महसाऽयं विभुरङ्कुशानिव ॥ १२६ ॥
जिनपृष्ठत एव जन्मिनामभिदित्सुः स्तवपाठवाग्मिनाम् ।
शिवशर्मबलात् णाच्छलात् सहसाऽऽकष्टुमिवोद्यता द्युतिः ॥ १२७ ॥

[ १२२ ] १ "दारद०" दरदं हिङ्गुलः ।
[ १२६ ] २ "निरङ्कुशान्" निरर्गलान् । ३ "महसा" तेजसा ।

[ 118 ] 1 "फलकम्" आवरणम् "अङ्कनं फलकं चर्म खेटकाऽऽवरणस्फुराः" इति हैमः [ अभि० चिं० कां० ३ श्लो० ४४७ ], "ललाटस्याष्टमीविधुः फलकं च" [ काव्य० प्र० ४ स्त० १ श्लो० २० ] इति ललाटस्यात्र फलकेनोपमानं दत्तम्, तथैवात्र भ्रुवोः धनुषा "भ्रुवोः खड्गधनुर्यष्टिरेखा" [ काव्य० प्र० ४ स्त० १ श्लो० २१ ] ।

[ 120 ] 2 "विवस्वतः" सूर्यस्य ।

[ 121 ] 3 "घुसृणारुणरोचिषा" लोहितचन्दनरूपसूर्यकिरणेन । 4 "नवकेवलतीव्ररोचिषा" नवीनकेवलज्ञानस्वरूपसूर्यस्य ।

[ 123 ] 5 "घनकार्मणकाननम्" निचितकर्मसमूहवनम् । 6 "विमलध्यानमहानलः" शुक्लध्यानस्वरूपाग्निः ।

[ 125 ] 7 "सप्तविष्टपीश्वरता०" सप्तावनीश्वरत्वम् ।

[ 126 ] 8 "भयसप्तकगन्धसिन्धुरद्रुतवश्यंकरणम्" सप्त भया एव गन्धसिन्धुराः मदोन्मत्तहस्तिनस्तान् द्रुतं शीघ्रं वश्यंकरणमाधीनकरणम् ।

अयि ! पल्लवितं सुरद्रुमं[1] जलधिं वोत्तरलं परिस्तुमः ।
अभिधारयते फणान्वितप्रतिबिम्बस्य जिनस्य[2] यः स्मृतिम् ॥ १२८ ॥
भगवद्वदनामृतद्युतेः किरणानामिव चारुमण्डलम् ।
परितः प्रसरत्फणामिषान्नभसः कार्ष्ण्यमपाचिकीर्षति ॥ १२९ ॥
ललितोदयमाप्य वेलया विशदध्यानमहोदधौ दधौ ।
अमृतद्रव एष पिण्डतां सुदृशां मोदयिता फणातनुः ॥ १३० ॥
[5]नवशारदवादलैः समं कृतसौहार्दमिवोदुयियासति ।
[6]स्फुटकैतवतः स्फुटं प्रभोरभिषेकोचितगाङ्ग[7]शम्बरम् ॥ १३१ ॥
भगवद्यशसां नु डम्बरं हृदि विद्मः क्षितियोषिदम्बरम् ।
परिभावयितुं दिगम्बरं समुदीतं विलसत्फणोपधेः ॥ १३२ ॥
वरदुग्धपयोनिधेर्लसल्लहरी कीदृगिति भ्रमं नृणाम् ।
अपनेतुमिवोत्थिताऽङ्गजा फटका पट्टपटुर्विभोर्विभा ॥ १३३ ॥
भगवद्वचनामृतं द्रुतं फणिराडुन्नमयन् पिपासति ।
समुपेत्य सभासु भासुरद्युति[8]रुत्सृष्टविषोऽनुपृष्ठतः ॥ १३४ ॥
[9]दिविषन्निवहं वहंस्तुलां भगवत्सेवनयोत्फणीभवन् ।
प्रभया किम[10]घश्चिकीर्षति [11]मणिरोचिःखचितः [12]फणीशिता ॥ १३५ ॥
भगवच्छिरसि स्फटावलेः पटुलालित्यमुपेत्य राजते ।
धवलः खलु तेजसा तनोः स [1]तमस्कायभरो लघूभवन् ॥ १३६ ॥
सुभगं भगवन्त[13]मन्तरं जगतः पूरयितुं प्रभाभरैः ।
भृशमुद्यतमङ्गसङ्गतैर्भजते को न सुरासुराधिपः ॥ १३७ ॥
[2]सुमनोमणिरामणीयकं [14]द्युमणेर्वा किरणाङ्गणं वपुः ।
रुचिराङ्गरुचिः सुरेशितोऽतिशयं नो लभते जिनद्युतेः ॥ १३८ ॥
तिलकाङ्गदमौलिमौक्तिकाऽऽवलिकण्ठाभरणादिभूषणैः ।
भगवत्तनुतेजसोऽञ्जसा पुनरुक्तिः क्रियतेऽपदूषणैः ॥ १३९ ॥

---

[ १३६ ] १ "तमस्कायभरः" तमस्काय एव भरः समूहः । | [ १३८ ] २ "सुमनोमणि०" चिन्तारत्नम् ।

---

[ 128 ] 1 "सुरद्रुमम्" पारिजातम् । 2 "जिनस्य" पार्श्वनाथस्य ।

[ 129 ] 3 "भगवद्वदनामृतद्युतेः" भगवतो मुखचन्द्रमसः । 4 "अपाचिकीर्षति" अपाकर्तुमिच्छतीति दूरीकरोति ।

[ 131 ] 5 "नवशारदवादलैः" नवीनशरदृतुसम्भवमेघैः । 6 "स्फटकैतवतः" फणाव्याजात् । 7 "°शम्बरम्" वारि, "नीरक्षीराम्बु शम्बरम्" इत्यमरः [ अमर० कां० १ श्लो०२३८ ] ।

[ 134 ] 8 "उत्सृष्टविषः" त्यक्तविषः ।

[ 135 ] 9 "दिविषन्निवहम्" देवसमूहम् । 10 "अघश्चिकीर्षति" तिरस्करोति । 11 "मणिरोचिःखचितः" मणिदीप्तियुक्तः । 12 "फणीशिता" भुजङ्गाधिपतिः ।

[ 137 ] 13 "अन्तरम्" हृदयम् ।

[ 138 ] 14 "द्युमणिः" सूर्यः ।

भुवनैकरविः कविद्विपैर्वसुधायां बहुधा सुधाशनैः ।
महसा ह्यभिभूयतेऽन्वहं वितथा नैव तथाऽप्यदःकथाः ॥ १४० ॥
कतिचिद्गुणभावनाऽप्यसौ तनुते भागवतीह पावना ।
स्मरणाऽऽदरणार्थधारणैर्भविनामीहितवस्तु वस्तुतः ॥ १४१ ॥

श्रीशङ्खेश्वरपार्श्वशाश्वतरवेः सर्वाङ्गशोभाभरः
प्राणम्रत्रिदशेन्द्रसान्द्रमुकुटज्योतिर्भिरभ्यर्हितः ।
दृष्टः स्पष्टतयाऽनुरक्तमनसा ध्यातः प्रभातप्रियां
ध्येयाद् ध्येयमहोदयश्रियमहो ! श्रीजैनभक्तिस्पृशाम् ॥ १४२ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
श्रीशिवपुरीस्थितश्रीशङ्खेश्वरपार्श्ववर्णनो
नामाष्टमः सर्गः ।

---

[१४०] १ "वितथा नैव" सत्या एव । २ "अदःकथाः" अमुष्य वार्ता ।

[१४२] ३ "ध्येयमहोदयश्रियम्" ध्येयो यो महोदयो मोक्षः पक्षे ध्येयः स्वाभीष्टस्तस्य महोदयस्य प्राप्तिः सैव संपत् ।

# नवमः सर्गः ।

अथोपदेशादनुदेशजाग्रन् महामहानन्दमयं गणेन्दुः ।
लेभेऽत्र लाभात् सुकृतस्य सत्यं सत्याकृतिः सा शिवपूर्व्वसत्याः ॥ १ ॥
परञ्जनो यत्र वसन् प्रचेताः सौधर्मभर्त्तुः प्रणयत्युपास्तिम् ।
रजत्यजस्रं न मनः प्रतीच्यामस्यां मुनीन्द्रस्य कथं विहस्य ॥ २ ॥
चित्रं प्रतीच्यामपि सौरभासां महोदयश्रीर्विजयिन्यसक्तम् ।
न किं द्वितीयादिवसे सुधांशोः कलाबलात् स्यादुदयप्रभाऽस्याम् ॥ ३ ॥
सौरप्रभाऽस्यामपि सर्वदिक्षु प्रबोधबीजं सुतरां तथापि ।
सुदूरभावादिव पूर्वभागे वैवर्ण्यमाविर्भवति स्म किञ्चित् ॥ ४ ॥
दोषाकरस्य द्विजनायकस्य मन्दस्य भासा बहुलक्षणेषु ।
क्रमेण रुच्या कमनो मनोऽथ व्यामोहजन्मा सुदृशा रुरोध ॥ ५ ॥
जनार्दनस्य प्रियताऽनृतानां वृत्त्या विताने पिशिताऽशिता च ।
लोकस्य रौद्रं प्रणिधानमासीन्मोहेन साऽब्रह्मनिषेवणाऽपि ॥ ६ ॥
श्रीपार्श्वभास्वानुदियाय यस्यामाभाति या देवपुरीवयस्या ।
शुद्धाऽपि रुद्धा शतमन्युबुद्धया सा तीर्थपृथ्वीषु पुरीधुरीणा ॥ ७ ॥

[ १ ] १ "महामहानन्दमयम्" महानन्दप्राप्तिरेव २ "सत्याकृतिः" सत्याऽऽकृतिः सत्यङ्कारो वा निर्णयः; सतीवाऽऽकृतिः "आकृतिस्तु जातौ रूपे वपुष्यपि" इति हैमः [ अने० सं० कां० ३ श्लो० २६२ ] । ३ "सा" इयं शिवपुरी एव । ४ "शिवपूर्व्वसत्याः" शिवपुरिनिवासस्य ।

[ २ ] ५ "परञ्जनः" वरुणः; "जलकान्तारः स्यात् परञ्जनः" इति हैमः [ अभि० चिं० कां० २ श्लो० १०२ ] ६ "प्रचेताः" पण्डितोऽपि । ७ सौधर्मभर्त्तुः" सुधर्मणो भावः सौधर्म तद्धारकस्य सौधर्मेन्द्रस्य । ८ "उपास्तिम्" सेवाम् ।

[ ३ ] ९ "कलाबलात्" "कला स्यात् काल-शिल्पयोः" ।

[ ४ ] १० "वैवर्ण्यम्" कालिकाः विरुद्धवर्णता ब्राह्मणादिव्यवस्थाहानिर्मांसाशनादिना ।

[ ५ ] ११ "दोषाकरस्य" रागद्वेषमोहानामाकरस्य रात्रिपतेर्वा । १२ "मन्दस्य" जडस्य पक्षे क्षीणस्य । १३ "भासा" कान्त्या दीप्त्या वा । १४ बहुलक्षणेषु बहुषु लक्षणेषु लक्षणशास्त्रेषु व्याकरणादिषु पक्षेऽसितपक्षसमयेषु । १५ "रुच्या" इच्छया दीप्त्या वा । १६ "कमनः" ब्रह्मा स्मरश्च । १७ "व्यामोहजन्मा" अज्ञानजन्यः । १८ "सुदृशाम्" सम्यक्त्ववतां स्त्रीणां वा ।

[ ६ ] १९ "जनार्दनस्य" जनपीडनस्य हिंसायाः कृष्णस्य वा । २० "अनृतानाम्" कर्षणानामलीकानां वा "अनृतं कर्षणेऽलीके" इति हैमः [ अने० सं० कां० ३ श्लो० २५० ] २१ "विताने" यज्ञे जनानां विस्तारे वा "वितानं कतुके यज्ञे विस्तारे क्रतुकर्मणि, तुच्छे मन्दे वृत्तशून्ये शून्यावसथयोरपि" ॥ इति हैमः [ अने० सं० कां० ३ श्लो० ४४२–४३ ] । २२ "पिशिताऽशिता" मांसभक्षणम्, "पिशितं मांसवाचकं पिशिता मांसिका" इति हैमः [ अने० सं० कां० ३ श्लो० २९८–९९ ] । २३ "रौद्रम्" प्राणातिपातादि रुद्रसम्बन्धि वा । २४ "मोहेन" अज्ञानेन । २५ "अब्रह्मनिषेवणा" अब्रह्म मैथुनं तत्सेवा 'ब्रह्मसेवा' इति पदविभागे ब्रह्मणः सेवा वा ।

[ ७ ] २६ "श्रीपार्श्वभास्वान्" श्रीः पार्श्वे यस्य स सूर्यः । २७ "देवपुरीवयस्या" देवपुर्या वयस्या सखी इन्द्रवासात् । २८ "शुद्धा" निर्मला । २९ "रुद्धा शतमन्युबुद्धया" शतमन्योरिन्द्रस्य बुद्ध्या रुद्धाऽपि मदीयेयमिति धिया चन्द्रः क स्थास्यतीति, शतमुपलक्षणात् सहस्रं वा तत्प्रमाणा ये मन्यवो यज्ञास्ते मनीषया रुद्धा । ३० "सा" बहिरेव प्राह्ममाशा दिक् पक्षे सा वाराणसी । ३१ "तीर्थपृथ्वीषु पुरीधुरीणा" तीर्थभूमिषु पुरीधुरीणा पुरीभिर्नगरीभिर्धुरीणा मुख्या, मुख्या पुरीत्यर्थः ।

"तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः ।
ऋषिजुष्टे जले सत्रिण्युपाये स्त्रीरजस्यपि ॥
योनौ पात्रे दर्शनेषु" इति हैमः [ अने० सं० कां० २ श्लो० २१९–२० ] ॥

[1] 1 "गणेन्दुः" गणेष्विन्दुरिव श्रीविजयप्रभसूरिः । 2 "सुकृतस्य" पुण्यस्य ।

[3] 2 "सौरभासाम्" सूर्यदीप्तीनाम् ।

पराणि तीर्थानि परःशतानि प्राच्याः प्रदेशे जलधेः सदेशे ।
सरित्प्रवेशे पुरसन्निवेशे तादात्म्यमीयुर्द्विजराजरुच्या ॥ ८ ॥
अर्हद्विहाराश्रयजा विहाराः सुरासुरेन्द्रैर्विहितोपहाराः ।
विनिन्यिरेऽदृश्यदृशां* द्विजेशप्रवेशजाग्रन्महसाऽत्र सद्यः ॥ ९ ॥
महानुभावा मुनयः स्वभावात् सिद्धाः प्रसिद्धाः खलु यत्र देशे ।
रौद्रस्वरूपं विनिधाय भौत्या वृत्त्यातिदौर्गत्यमधायि तत्र ॥ १० ॥
पुमान् पुराणोऽपि गृहानुरागाद् विश्वं चकाराऽऽदृतकामचारः ।
स्वयं महाभोगधरं सुरादेरादेशतो ब्रह्मनियोजनेन ॥ ११ ॥
स सोमसिन्धुः सुधयैव पूर्णां दिवं भुवं वा विदधत् समन्तात् ।
तमोविनाशेन जगज्जनानां जज्ञे कलाकेलिसमुद्भवाय ॥ १२ ॥
सुदर्शनेऽस्यैव महोपयोगः सद्यः प्रसादः सुदृशां यतः स्यात् ।
पयोधिजाया अपि नर्मकर्म प्रत्येयमस्मिन् समयं विभाव्य ॥ १३ ॥
प्रपेदिरे ब्रह्म परे प्रपञ्चं मायामयं तत्पुरतो निवेश्य ।
कादम्बरीवृत्तिमुपादधाना वामानुवृत्त्याऽऽत्मसुखाप्तिमन्ये ॥ १४ ॥
रसानुभावात् प्रियबुद्धवाचि साचिव्यमापुर्न रराज योऽन्याः ।
अनित्यतां तत्समयेऽधिगत्य व्यवायलीलासु निरन्तरायम् ॥ १५ ॥

---

[ ८ ] १ "द्विजराजरुच्या" चन्द्रकान्त्या; एकीकृतानि धवलितानि पक्षे ब्राह्मणानां मान्यानि तीर्थाणीतीच्छया जगन्नाथवत् तत्र हि श्रीऋषभमूर्त्तिरपि संप्रति द्विजराजैरधिष्ठितं तीर्थम् ॥

[ ९ ] २ "अदृश्यदृशाम्" अदृश्यं क्वापि न जैनतीर्थदर्शनं पक्षे धवलत्वेन न लक्ष्याणि ॥

[ १० ] ३ "रौद्रस्वरूपम्" शिवलिङ्गम् । ४ "भौत्या वृत्त्या" तद्गुणरूपभूतानामियं भौती वृत्तिस्तया पक्षे रात्रेः प्रवृत्त्या । ५ "°दौर्गत्यम्" दुर्गतेर्भावो दौर्गत्यं पक्षे दुर्दुःखेन गतं गमनं यत्र तद्दुर्गतं तद्भावो दौर्गत्यम् ॥

[ ११ ] ६ "पुराणोऽपि" वृद्धोऽपि । ७ "गृहानुरागात्" स्त्रीजनेऽनुरागात् । ८ "आदृतकामचारः" आदृतः स्वीकृतः कामचारो संभोगो येन सः पक्षे कृष्णः स्वेच्छः । ९ "महाभोगधरम्" अत्यन्तं भोगधरं विश्वं भुवनं चकार पक्षे विस्तारधरम्; अयमपि तथा मथुनवांस्तत्र काऽस्माकं यूनां वार्त्ता । १० "सुरादेरादेशतो ब्रह्मनियोजनेन" अकारप्रश्लेषेण, अब्रह्मनियोजनेन सुरादेर्मद्यादेराज्ञया पक्षे सुरादेर्देवादेरादेशतः विकल्पान्तरात्; ब्रह्मनियोजनेन ब्रह्मणो विधेर्योजनेन प्रेरणेन; केचित् कृष्णः स्वयं विश्वं कृतवानित्याहुः, केचिद्धातारं समादिष्टवेति विकल्पद्वयम् ॥

[ १२ ] ११ "सोमसिन्धुः" चन्द्ररूपः समुद्रः पक्षे कृष्णः । १२ "सुधयैव पूर्णां दिवं भुवं वा विदधत्" अमृतेन देवान् मनुष्यानपि संप्रीणयन् । १३ "तम°" तमस्तिमिरं राहुर्वा । १४ "कलाकेलिसमुद्भवाय" कलानां क्रीडाया उत्पत्त्यैकलाभैर्वा क्रीडाकारणं पक्षे स्मरोद्भवाय तज्जनकत्वात् ॥

[ १३ ] १५ "सुदर्शनेऽस्यैव महोपयोगः" अस्य चन्द्रस्य सुदर्शने सम्यक्कृतया दर्शने महोपयोगो महत् कार्यं यतो दृष्टीनां निर्मलता स्यात् पक्षे सुदर्शनं चक्रम् । १६ "सुदृशाम्" सुबुद्धीनाम् ।

[ १४ ] १७ "प्रपेदिरे" प्रपन्नाः । १८ "ब्रह्म" अब्रह्म इत्यकारप्रश्लेषे मैथुनं पक्षे ब्रह्म ब्रह्माद्वैतवादम् । १९ "प्रपञ्चं मायामयम्" मायामयं ममानुरागस्त्वयि त्वां विना मरिष्यामीति प्रपञ्चम् । २० "तत्पुरतः" तस्याः पुरतः । २१ "कादम्बरीवृत्तिम्" कादम्बर्या मदिराया वृत्तिम्; "अम्बरं व्योमवस्त्रयोः" इति हैमः [ अने० सं० कां० ३ श्लो० ५५० ] कुत्सिताम्बरं शतखण्डकन्थादि । २२ "वामानुवृत्त्या" स्त्रियानुवृत्त्याः वाममार्गेण देव्याराधनेन । जीर्णवस्त्रादिधारकत्वेन दरिद्रा अपि वाममार्गेण सुखभाज इति ॥

[ १५ ] २३ "प्रियबुद्धवाचि" प्रिया वा बुद्धस्य देवविशेषस्य वाक् तस्यां पक्षे प्रियो यो भर्त्ता तस्य बुद्धवाक् या स्त्री तस्याम् । २४ "व्यवाय०" विशिष्टो योऽवायो निश्चयज्ञानं मैथुनं वा ।

---

[13] 1 "पयोधिजायाः" लक्ष्म्याः । 2 "नर्मकर्म" क्रीडाकार्यम् ।

---

* P °दृशाम् ।

प्रभासु जाड्येऽपि महातपोऽभूद् वियोगभाजः प्रकृतेर्विकारात् ।
विधौ विधौतत्विषि कापिलीया प्रवृत्तिरासीत् कुमुदां विबोधे ॥ १६ ॥

महेश्वरस्यापि दिगम्बरत्वं विधोस्तदाऽधो भवनात् कलायाः ।
शिवाऽऽश्रितस्यातिपशुक्रियाभिः प्राकाशि काशिस्थजने न वन्द्यम् ॥ १७ ॥

इष्टेष्टबाधान् मतयो ह्यगाधाः प्राधान्यतो मोहमहीश्वरस्य ।
सोमागमादेव महो वितेनुर्भवस्य वश्या जनताः समस्ताः ॥ १८ ॥

निशम्य सूरिश्चरितं सचारैराचारचारुश्चरणप्रचारे ।
नियोगसेनान्यमुपादिदेश तद्देशतीर्थेशनिदेशसिद्ध्यै ॥ १९ ॥

सेनान्यमाश्रित्य समुन्नतश्रीर्वर्षन् परं गा मधुराः सुसीमाः ।
सदागमोल्लासविधासु मेघः सज्ञत्वमाधात् समुमुक्षुसङ्घः ॥ २० ॥

मिश्रांस्तमिस्राशनशासनेन जनानधः पातयतो विजेतुम् ।
श्रीवीरचर्याऽधिकधैर्यभाजः शिष्यान् विशिष्यानुदिदेश सूरिः ॥ २१ ॥

नियोगराजः श्रमणाधिराजः प्रसादमत्यादरतः प्रपद्य ।
अहो महोत्साह इव प्रशस्तः समस्तमामंस्त शुभं शुभंयुः ॥ २२ ॥

सेनान्ययं धैर्यधनेषु धुर्यः क्वचिन्न वैधुर्यधियं दधानः ।
प्रधानलोकं प्रतिभानिधानं स्वसंनिधानं विनयान्निनाय ॥ २३ ॥

---

[ १६ ] १ "जाड्येऽपि" कपिलमते बुद्धिर्जडरूपा । २ "महातपः" धूम्रपानादि । ३ "वियोगभाजः" विशेषेण योगवतः । ४ "विधौ" आचारे निर्मलेऽपि । ५ "विधौतत्विषि" विधिर्ब्रह्मविधानयोः, "विधिर्वाक्ये च दैवे च प्रकारे कालकल्पयोः" इति हैमः [ अने० सं० कां० २ श्लो० २५२–५३ ] । ६ "कापिलीया प्रवृत्तिः" पृथिव्यां हर्षाणां प्रकाशे कपिलस्यैव ऋषेः प्रवृत्तिः; "प्रवृत्तिर्वृत्तौ वार्त्तायां प्रवाहे प्रार्थिते हते । याचिते शत्रुसंरुद्धे" [ इत्यनेकार्थः ] । ७ "कुमुदां विबोधे" उत्पलविकासे परागैः कपिलत्वमासीत् ।

[ १७ ] ८ "महेश्वरस्यापि" शिवस्य धनिनोऽपि वा । ९ "दिगम्बरत्वम्" नग्नत्वम् । १० "विधोस्तदाऽधो भवनात् कलायाः" चन्द्रकलाया अधो नीचैर्भावात्; "नीचे चन्द्रे दरिद्र एव," पक्षे भवनाद् इदक् कलाया अधोऽर्वागेव; यावच्चन्द्रकला ज्योत्स्नया न गृहं प्राप ततः पुरोऽपि धनिनः पशुक्रियाभिर्दिगम्बरत्वं सुरतायेति शेषः; "विधुश्चन्द्रेऽच्युते वीरुल्लतायां विटपेऽपि च" इति हैमः [ अने० सं० कां० २ श्लो० २५३ ]; "कला स्यादंशशिल्पयोः कलने मूलरैवृद्धौ षोडशांशे विधोरपि" इति हैमः [ अने० सं० कां० २ श्लो० ४८८–८९ ] । ११ "शिवाऽऽश्रितस्य" शिवया भवान्याऽऽश्रितस्य; पक्षे शिवं मोक्षमर्थात् तन्मार्गमाश्रितस्य योगिनोऽपि । १२ "अतिपशुक्रियाभिः" पशुपतित्वात् बहुलं तद्विषयक्रियाभिः । १३ "प्राकाशि" प्रकटीकृतम् । १४ "काशिस्थजने न वन्द्यम्" काशिस्थजने न पाण्डित्यव्यञ्जनमेतत्; काशिस्थजनेऽनवद्यं निष्पापं स हि मैथुने न दोषमाह "न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानाम्" इति स्मृतेर्वाक्यात्; वन्द्यं स्तवनीयं नमस्करणीयं वा ॥

[ १८ ] १५ "इष्टेष्टबाधात्" इष्टं प्रत्यक्षमिष्टमनुमानादि तद्बाधात् । १६ "सोमागमाद्" सोमागमः कापालिकमतं चन्द्रोदयो वा । १७ "भवस्य" संसारस्य रुद्रस्य वा स्वधर्मस्य वा; "भवः सत्ताप्तिजन्मसु रुद्रे श्रेयसि संसारे" इति हैमः [ अने० सं० कां० २ श्लो० ५४५ ]—इति चन्द्रोदयवर्णनेन नानामतवर्णनम् ॥

[ २० ] १८ "गाः" वचांसि जलानि वा । १९ "सुसीमाः" शीता समर्यादाः; "सुषीमः शिशिरे रम्ये" इति हैमः [ अने० सं० कां० ३ श्लो० ५०५ ] । २० "सदागमो०" आगमाः सिद्धान्ता वृक्षाश्च; "आगमस्त्वागतौ शास्त्रे" इति हैमः [ अने० सं० कां० ३ श्लो० ४९१ ] । २१ "समुमुक्षुसङ्घः" सप्रतीतो यतिमण्डलः पक्षे यतिमण्डलयुक्तः ॥

[ २१ ] २२ "मिश्रान्" मिश्रा जातिविशिष्टास्तान्; उभयपक्षाश्रयान् वा । २३ "तमिस्राशनशासनेन" रात्रिभोजनाऽऽज्ञया । २४ "अधः" नरके नीचैर्वा । २५ "श्रीवीरचर्याऽधिकधीर्यभाजः" श्रीमहावीरचरित्रेष्वधिकपाण्डित्यवतः; शूरचरित्रेषु शमनशीला वा ॥

[ २२ ] २६ "अहः" दिनम् । २७ "शुभंयुः" शुभसंयुक्तः ॥

तत्साहसिक्यं गुणवृत्तिशि[1]क्यं सकर्णकैर्वर्णयितुम*शक्यम् ।
व्यामोहभेदाय महोद्यमेऽपि [2]व्यामोहमाधत्त जनस्य चित्रम् ॥ २४ ॥

स्वाध्याय[1]नान्दीनिनदः पुरोऽस्य जगर्ज गर्जद्घनिवद् गभीरः ।
प्रतिध्वनेरस्य वि[2]रस्य जग्मुर्लोभादयः क्षोभमिवैत्य देशात् ॥ २५ ॥

नत्वाऽथ [3]तत्त्वाध्यवसायधीरः श्रीमारुदेवाजिन-शान्तितीर्थम् ।
पार्श्वं [4]तमोभूरुहभेदिपार्श्वं तत्रैव शङ्खेश्वरनामधेयम् ॥ २६ ॥

गणाधिभर्त्तुश्चरणारविन्दं स्पृशन् स पञ्चाङ्गनतिप्रतीत्या ।
तद्गौरवेण द्विगुणीकृताङ्गः पुरः प्रतिष्ठासुरभूत् तदानीम् ॥ २७ ॥

[4]श्राद्धाङ्गनानां †[5]वरनागशब्दैरापूर्यमाणाः ककुभः प्रयाणे ।
मित्रेण तूर्यध्वनिनेव [6]नुन्ना नियोगराजो विजयं शशंसुः ॥ २८ ॥

[7]कृपाकृपाणाऽऽपणमेव पाणिं कुर्वन् जयार्हं [8]समयं विचार्य ।
[9]अङ्गै[10]रुपाङ्गैः सुभगं [11]सुबोधद्विपं नियोगप्रभुरारुरोह ॥ २९ ॥

[12]नयद्वयं प्रो[13]ञ्चयतः प्रजासु [14]शक्तित्रयीं भावयतः स्वचित्ते ।
शुद्धै[15]रुपायैर्नितरां चतुर्भिस्तस्या[16]र्थसिद्धिः सकला करस्था ॥ ३० ॥

‡[3]अस्वेऽ[4]श्ववारे [5]पुरुषोत्तमेऽस्य नृसिंहरूपे [6]नरकुञ्जरे वा ।
[7]रुचिर्य[8]थार्थाऽर्हति दार्ढ्यमा[9]प्तानुरागिणी दिग्विजये [10]त्रिसायम् ॥ ३१ ॥

---

[ २४ ] १ "°शिक्यम्" काचः "काचः शिक्यं तदालम्बः" इति हैमः [ अभि० चिं० कां० ३ श्लो० २८ ] । २ "व्यामोहम्" विस्मयम् ॥

[ ३१ ] ३ "अस्वे" परे । ४ "अश्ववारे" स्वकीये । ५ "पुरुषोत्तमे नृसिंहरूपे" शौर्यातिशयशालिनि । ६ "नरकुञ्जरे" प्रकृतिगभीरे । ७ "रुचिः" इच्छा दार्ढ्यमर्हति; रुचिः जिने दृढत्वं प्राप्ता । ८ "यथार्था" सत्या यथायोग्या वा । ९ "आप्तानुरागिणी" आप्तोऽत्र चारः, "अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्तः" इति वादिदेवसूरिः [ प्रमाणनयतत्त्वालोके परि० ४ सू० ४ ] आप्तस्तत्त्वानुरागिणी प्रणयिनी । १० "त्रिसायम्" त्रिसन्ध्यम् ।

---

[ 25 ] 1 "°नान्दीनिनदः" नान्दी पूर्वरङ्गाङ्गं तस्य निनदो घोषः । 2 "विरस्य" शब्दं कृत्वा ।

[ 26 ] 3 "तत्त्वाध्यवसायधीरः" जीवादितत्त्वचिन्तनपरायणः । 2 "तमोभूरुहभेदिपार्श्वम्" तिमिरवृक्षोन्मूलनपरशुम् ।

[ 28 ] 4 "श्राद्धाङ्गनानाम्" श्राविकाणाम् । 5 "वरनागशब्दैः" श्रेष्ठमेघाऽऽरवैः । 6 "नुन्नाः" क्षिप्ताः "नुन्ननुत्तास्तनिष्ठ्यूताव्याविद्धं क्षिप्तमीरितम्" इति हैमः [ अभि० चिं० कां० ६ श्लो० ११८ ] ।

[ 29 ] 7 "कृपाकृपाणाऽऽपणम्" दयाखड्गहट्टम् । 8 "समयम्" सिद्धान्तं कालं वा "समयः शपथे भाषासम्पदोः कालसंविदोः, सिद्धान्ताऽऽचारसङ्केतनियमावसरेषु च; क्रियाकारे च निर्देशे" इति हैमः [ अने० सं० कां० ३ श्लो० ५४१ ] । 9 "अङ्गैः" आचाराङ्गाद्यैः शरीरावयवैर्वा । 10 "उपाङ्गैः" औपपातिकादिभिरङ्गुल्याद्यैर्वा । 11 "सुबोधद्विपम्" ज्ञानगजम् ।

[ 30 ] 12 "नयद्वयम्" नयद्वितयम् "नीयते येन श्रुताऽऽख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः, स प्रतिपत्तुरभिप्रायविशेषो नयः" इति वादिदेवसूरिः [ प्रमाणनयतत्त्वालोके परि० ७ सू० १ ]; "स व्याससमासाभ्यां द्विप्रकारः" [ ७–२ ] "व्यासतोऽनेकविकल्पः" [ ७–४ ]; "समासस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्च" [ ७–५ ] ॥ 13 "प्रोञ्चयतः" उपदिशतः । 14 "शक्तित्रयीम्" मोक्षमार्गसाधिकां सम्यग्ज्ञान-दर्शन-चारित्रात्मिकां गुणत्रितयीम्; पदार्थस्य वा, उत्पाद-व्यय-ध्रौव्यात्मिकां गुणत्रयीम् । 15 "उपायैः–चतुर्भिः" धर्मार्थ-काम-मोक्षस्वरूपोपायचतुष्कैः । 16 "अर्थसिद्धिम्" हेतुसिद्धिम् ।

---

* P न । † A °नाग° । ‡ P अश्वे ।

यात्रासु यात्राऽऽशु परत्रसिद्ध्यै[1] संप्रार्थ्यते पत्त्ररथाङ्गचर्या[१] ।
सर्वाङ्गयोग्या समुपस्थिता सा प्रयाणके पुण्यवशाद् वरेण्या[2] ॥ ३२ ॥
शङ्खाः प्रणेदुः पटहा[3] जगर्जुरध्वर्युवाचो[4]ऽध्वनि दध्वनुश्च ।
हेषाविशेषः[5] कृतभूषणेऽश्वे बभूव भूवल्लभदुर्लभोऽपि ॥ ३३ ॥
कन्याऽप्यलङ्कारभरेण धन्या प्रदक्षिणाऽऽशीर्षु विचक्षणाऽगात् ।
चाषादिभाषा फलिता सुशाखास्वासीत् प्रवासी हितकार्यसिद्ध्यै ॥ ३४ ॥
पुरस्सरद्भिः कृतहस्त[२]लोकैरभिक्रम[6]स्तस्य पराक्रमार्हः ।
स्तुतिव्रतै[३]स्तीव्रतया प्रशस्यः कौशल्यतः शल्यमभूद् रिपूणाम् ॥ ३५ ॥
पुरः पुरोऽस्याः वृषभा[४] निरीयुस्तन्त्र[५]स्थितेर्हन्त ! भरं वहन्तः ।
सङ्घस्य योग्याः कृतसाधुरथ्यारम्भाः[६] परं भाविकसद्विभूत्यै[७] ॥ ३६ ॥
नदन् मदच्छेदकृते परेषां[८] गवां[९] स[१०] दैवानुगतो[११]ऽर्जुनीनाम्[१२] ।
धनेन तुल्यां स्वयशःप्रशस्तिं[१३] प्रकाशयन् भद्रगणे[१४] व्यहार्षीत् ॥ ३७ ॥
मरुप्रियाणां[१५] पथि मौनभाजां महाङ्गयोग्यं[१६] भरमाश्रितानाम् ।
राजी जगामाग्रत एव देवप्रयुक्त[१७]युक्तस्थितये जनानाम् ॥ ३८ ॥

---

[ ३२ ] १ "पत्त्ररथाङ्गचर्या" शकुनचेष्टा; पत्त्रं यानं रथः प्रसिद्धस्तयोरङ्गानां चेष्टा ॥

[ ३५ ] २ "कृतहस्त०" कृतहस्तो बाणयुक्तः पण्डितो वा । ३ "स्तुतिव्रतैः" भट्टाद्यैः ॥

[ ३६ ] ४ "वृषभाः" गणचिन्तका मुनयः । ५ "तन्त्र०" तन्त्रं कटकं परिवारो वा ॥

"तन्त्रं राष्ट्रे च सिद्धान्ते परच्छन्दप्रधानयोः ।
अगदे कुटुम्बकृत्ये तन्तुवाये परिच्छदे ॥
श्रुतिशाखान्तरे शास्त्रे करणे ह्यर्थसाधके ।
इतिकर्तव्यतातन्त्वोः" इति हैमः [ अने० सं० कां० २ श्लो० ४३५–३६–३७ ] । ६ "कृतसाधुरथ्याऽऽरम्भाः" कृतः साधुः श्रेष्ठो हितो वा रथ्यासु रम्भाः पथिषु कदल्यः कृतः साधुमार्गोऽऽरम्भो वा । ७ "भाविकसद्विभूत्यै" भाविनी कसन्ती विभूतिर्लक्ष्मीस्तदर्थं मङ्गलस्य सती विभूतिस्तस्यै वा ॥

[ ३७ ] ८ "परेषाम्" मतान्तरीयाणां शत्रूणां वा । ९ "गवाम्" वाचाम् । १० "सः" प्रसिद्धः । ११ "दैवानुगतः" दैवेन युक्तः; सदैव नित्यमिति पदाविभागे । १२ "अर्जुनीनां धनेन" अर्जुनीनां सुरभीणां धनेन व्रजेन "व्रजं गोकुलं गोधनं धनम्" इति हैमः [ अभि० चिं० कां० ४ श्लो० ३३९ ]; यद्वाऽर्जुनीनां गवामनुगतः । १३ "तुल्यां स्वयशःप्रशस्तिम्" धनानुसारियशोवृत्तिम् । १४ "भद्रगणे" साधुगणे "भद्रं तु मङ्गले, मुस्तकश्रेष्ठयोः साधौ काञ्चने करणान्तरे; भद्रो रामचरे हस्तिजातौ मेरुकदम्बके, गवि शम्भौ" इति हैमः [ अने० सं० कां० २ श्लो० ४५४–५५ ] ॥

[ ३८ ] १५ "मरुप्रियाणाम्" मरुप्रिया उष्ट्रास्तेषाम् "मरुः पर्वतदेशयोः" इति हैमः [ अने० सं० कां० २ श्लो० ४५८ ] स देशः प्रियो येषां पर्वतो वा योगप्राधान्यात् । १६ "महाङ्गयोग्यम्" महाङ्ग उष्ट्रस्तद्विशेषः, महान्ति यान्यङ्गान्याचाराङ्गादीनि तद्योग्यम् । १७ "देवप्रयुक्त०" देवेन राज्ञा "देवस्तु नृपतौ तोयदे सुरे" इति हैमः [ अने० सं० कां० २ श्लो० ५३८ ] ॥

---

[ 32 ] 1 "परत्रसिद्ध्यै" परलोकसाधनायै । 2 "वरेण्या" उत्कृष्टा ।

[ 33 ] 3 "पटहाः" दुन्दुभयः "भेरी दुन्दुभिरानकः पटहः" इति हैमः [ अभि० चिं० कां० २ श्लो० २०८ ] । 4 "अध्वर्युवाचः" अध्वर्युर्यजुर्वित् तस्य वाचः वचनानि । 5 "हेषाविशेषः" अश्वानां शब्दविशेषः, "हेषा ह्रेषा तुरङ्गाणाम्" इति हैमः [ अभि० चिं० कां० ६ श्लो० ४१ ] ।

[ 35 ] 6 "अभिक्रमः" "अभिक्रमो रणे यानमभीतस्य रिपून् प्रति" इति हैमः [ अभि० चिं० कां० ३ श्लो० ४५५ ] ।

श्रेणीमयानां हि यथाप्रवृत्ताऽनिवृत्तिरूपां सुगतिं गतानाम् ।
पुरोहितानां चतुरोहितानां बलात् कलाकौशलमांसलाऽऽभात् ॥ ३९ ॥
अवेक्ष्य तत्रावसरे सरेखश्रियाऽऽढ्यपत्त्राणि जनप्रियाणि ।
मुखाम्बुजे बोधकला न कस्य प्रादुर्बभूव ध्रुवधैर्यभाजः ॥ ४० ॥
मनोरथानां गतिराचकर्ष महात्मनः शुद्धपथं निवेद्य ।
निष्कण्टके भूवलये विहृत्याऽसौ धर्मशोभानुभवेऽतिलोभात् ॥ ४१ ॥
उच्चैरथाङ्गाध्ययनेन मार्गवैषम्यमाच्छिद्य जगाम सद्यः ।
नियोगराजो ह्यनुयायितन्त्रं मन्त्रं विनिश्चित्य हृदि स्वतन्त्रम् ॥ ४२ ॥
सेनान्यधीशानुगमागमानां वेत्ता विधाता समितिक्रियाणाम् ।
त्राता बहुन्यायविदां मुनीनां सङ्घोऽनतीचारतया चचार ॥ ४३ ॥
पञ्चाङ्गिकायामतिसारणेन वश्यो बभूवास्य कुशासनोऽपि ।
मार्गे मिलद्वाडववर्ग एष नियोगराजस्तपसां समाजः ॥ ४४ ॥
स वारणानां घटनाभिरैच्छत् कुमार्ग्गमुन्मथ्य पथः पटुत्वम् ।
गन्धर्ववृन्दैरनुगम्यमानश्चक्रीव सम्यग् नयचक्रगत्या ॥ ४५ ॥
शिक्षासु दक्षो बहुधा रणानां स हास्तिकानां विभवेन सेव्यः ।
चलन्नियोगाधिपतिर्विरेजेऽनेकान्तकान्ताऽऽतपवारणेन ॥ ४६ ॥

---

[ ३९ ] १ "श्रेणीमयानाम्" मयानां श्रेणीति पदविभागे मयानामुष्ट्रविशेषाणां श्रेणी पङ्क्तिः; पदाविभागे श्रेणीमयानां कालसंहतिप्राधान्यवताम् । २ "चतुरोहितानाम्" उष्ट्राकर्षकाणाम् । ३ "कलाकौशलमांसला" कला विज्ञानमुपकरणपट्टकरणे चातुर्यपुष्टाऽभात् ॥

[ ४० ] ४ "°पत्राणि" यानानि शिबिका सुखासनादीनि; पत्राणि पुस्तकरूपाण्यवेक्ष्य वा । ५ "मुखाम्बुजे बोधकला" मुखप्रसन्नता; मुखे ज्ञानकला वा । ६ "°धैर्यभाजः" धैर्य शौर्यं पाण्डित्यं वा ॥

[ ४१ ] ७ "मनोरथानां गतिः" मनोरथा यत्र चलन्ति तेषां मार्गः "गतिर्वहद्व्रणे ज्ञाने योन्त्रोपायदशाध्वसु" इति हैमः [ अने० सं० कां० २ श्लो० १६८ ] पक्षे रथानां गतिर्महात्मनो मन आचकर्ष । ८ "आचकर्ष" वशीचकार । ९ "महात्मनः" उदारलोकान् । १० "विहृत्या" विहारेण शोभानुभवे । ११ "असौ" सेनानीः ॥

[ ४२ ] १२ "उच्चैरथाङ्गाध्ययनेन" उच्चैः अथ अङ्गाध्ययनेन इति पदविभागे अङ्गाध्ययनेनाऽऽचारादीनां पठनेन; उच्चैः रथाङ्गाध्ययनेन इति पदविभागे रथाङ्गाध्ययनेन रथाङ्गं रथपादोऽस्याध्ययनेन बहुगमनेन । १३ "मन्त्रम्" गुप्तवादम् "मन्त्रो देवादिसाधने, वेदांशे गुप्तवादे च" इति हैमः [ अने० सं० कां० २ श्लो० ४५७ ] ॥

[ ४३ ] १४ "°अनुगमागमानाम्" अनुगमोऽनुसारः, सूत्रार्थानुगमो वाऽनुयोगद्वारम् । १५ "समितिक्रियाणाम्" ईर्यादिक्रियाणाम् "समितिर्युधि सङ्गमे, साम्ये सभायामीर्यादौ" इति हैमः [ अने० सं० कां० ३ श्लो० ३३२-३३३ ] ॥

[ ४४ ] १६ "पञ्चाङ्गिकायाम्" पञ्चाङ्गान्यवयवा यस्याः पञ्चाङ्गी खलीनं तस्याम् "कवी खलीनं कविका कवियं मुखयन्त्रणं पञ्चाङ्गी" इति हैमः [ अभि० चिं० कां० ४ श्लो० ३१६-१७ ] अतिसारणेन; पञ्चाङ्गिकायाः सूत्र-निर्युक्ति-भाष्य-चूर्णि-वृत्तिरूपायामतिसारणेन वा । १७ "कुशासनः" कुशानामशनं यस्य कुत्सितशासनो वा । १८ "वाडववर्गः" ब्राह्मणसमूहोऽश्वसमूहो वा ॥

[ ४५ ] १९ "वारणानाम्" हस्तिनाम्, स्मारणा-वारणानां स्वमार्गपरमार्गविधिनिषेधानाम् । २० "गन्धर्ववृन्दैः" गायनलोकैरश्ववृन्दैर्वा ॥

[ ४६ ] २१ "बहुधारणानाम्" बहुधा रणानामिति पदविभागे बहुधा युद्धानाम्; बहुधारणानामिति पदाविभागे धीगुणविशेषाणां वा । २२ "सहास्तिकानाम्" सः हास्तिकानामिति पदविभागे 'सः' प्रतीतः, हास्तिकानां हस्तिसमूहानाम्; सह आस्तिकानामिति पदविभागे सह युगपद् आस्तिकानाम् ।

सनिश्चयोऽयं व्यवहार्यमेवमनेन बालव्यजनद्वयेन ।
उन्नीयमानप्रभुताद्भुतश्रीरादेशभूभृज्जयसम्पदाऽऽगात् ॥ ४७ ॥
आचारयोगा[1]दधिगत्य लोके भावं स्वकीयं यदि वान्यदीयम् ।
विमर्शयन् द्रव्यगुणोपपत्तिं[2] रराज निर्व्याजतया स राजा ॥ ४८ ॥
यथास्थलं भावनया नयानां संभावयञ्शुद्धदृशा भृशार्थम् ।
सार्थं पटूकृत्य महोदयार्थमादेशदेशाधिपतिः प्रतस्थे ॥ ४९ ॥
आप्तोपहारा[3]नभिमन्यमानः सुखानुयोगप्रतिदानवृत्त्या[4] ।
स्थिरीचकार स्वजनान् जिनानां नानाङ्गवाचा[5] रुचिवर्द्धनेन[6] ॥ ५० ॥
अनेकपानां[7] बहुदानवृत्तिं प्रोद्भावयन् बोधितरौ[8] नियम्य[9] ।
साधोरणस्मारणमुक्तियुक्त्या[10] ररञ्ज चेतांसि महात्मनां सः ॥ ५१ ॥
तत्रेऽस्य कोदण्ड[11]गुणा[12]धिरोपलक्षेषु[13] दक्षो न रसे[14] नयार्च्यः[15] ।
सर्वो जनः क्षेत्रविभागवेदी नेदीयसीं सिद्धिमिवान्वमंस्त ॥ ५२ ॥
मुक्तेष्वमुक्तेषु[16] यथार्थसंज्ञां प्रज्ञापयन् शुद्धदृशा नियोज्ये ।
कृत्वाऽपराद्धेषु[17] जुगुप्सनानि स सज्जनानां[18] पटुतां[19] व्यधत्त ॥ ५३ ॥
मत्वा प्रचक्रं[20] विषयेषु[21] वक्रं[22] शक्रं पराकर्त्तुमिवात्तचक्रम् ।
आधाय[23] वाचंयमरूपमेष गुरोः पुरोऽस्या बहिराजगाम ॥ ५४ ॥
स निष्कुटान्तः पटवास्कुट्यां स्थित्वा गुरूद्दिष्टविधौ पटिष्ठः ।
आलोचयन्मन्त्रममात्रधैर्यै रात्रिं व्यतीयाय महोत्सवेन ॥ ५५ ॥*
श्रेणी विरेजे नवकेणिकानां[24] वेणीव लोलोर्मि सरिद्वरायाः ।
प्रमोदयन्ती नवराजहंसान्[25] सचक्रवालस्थितिकौशलेन[26] ॥ ५६ ॥

---

[४८] १ "आचारयोगाद्" चाराणां गूढपुरुषाणां सम्बन्धात् । २ "द्रव्यगुणोपपत्तिः" द्रव्यस्य गुणानां उपपत्तिः प्राप्तिः ॥

[५०] ३ "आप्तोपहारान्" आप्तः प्राप्त उपहारो येभ्यस्तान् जिनानां पूजा येषां ते तान् वा । ४ "सुखानुयोगप्रतिदान-वृत्त्या" सुखप्रश्ननिक्षेपप्रतिदानविधिना । ५ "नानाऽङ्गवाचा" अङ्गानां राज्याङ्गानां स्वाम्यादीनां वाचा, आचाराङ्गायुक्त्या वा । ६ "रुचिवर्द्धनेन" रुचेर्भटेच्छाया वर्द्धनेन, निसर्गरुच्यादेर्वा ।

[५१] ७ "अनेकपानाम्" अनेकान् पान्तीत्यनेकपा महात्मानो हस्तिनो वा तेषाम् । ८ "बोधितरौ" पिप्पले, सम्यक्त्वरूपे वा । ९ "नियम्य" नियम्य नियमं कारयित्वा वा । १० "साधोरणस्मारणमुक्तियुक्त्या" सा आधोरणस्मारण-मुक्तियुक्त्येति पदविभागे, आधोरणा हस्तिपालास्तेषां स्मारणेन युक्ता या मुक्तिर्बन्धनान्मोक्षस्तद्योजनेन, साधोः भणस्मारण-मुक्तियुक्त्येति पदविभागे साधोः सज्जनस्याणे सूत्रादिशब्दे स्मारणं तन्मुक्तिर्मौनं तयोर्योगिने वा ॥

[५२] ११ 'कोदण्ड'' कोदण्डं धनुः । १२ 'गुण°' गुणः प्रत्यञ्चा जीवा । १३ 'लक्षेषु दक्षः न' लक्षं संख्याविशेषस्तेषु न दक्षः, लक्ष्यं वेध्यं वा । अस्य तन्त्रे दण्डो व्यूहादिः गुणवृद्धिः । लक्षं कपटं तेषु को न दक्षः । "लक्षं व्याजशरव्ययोः संख्याया-मपि च" । १४ 'रसे' वीर्ये 'रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे देहे धातौ तिक्तादौ पारदेऽपि च ॥ १५ 'नयार्च्यः' नीत्या पूज्यः, न स्वकीयोऽयमिति बुद्ध्या ॥

[५३] १६ 'मुक्तेष्वमुक्तेषु' सिद्धेषु असिद्धेषु मुक्तममुक्तं शब्दभेदस्तेषु । १७ 'अपराद्धेषु' अपराद्धो विराधकः च्युतेषुर्वा । १८ 'सज्जनानाम्' सज्जनं तूपरक्षणं तेषाम् । १९ 'पटुताम्' पाण्डित्यं पाटवं वा ।

[५४] २० 'प्रचक्रम्' चलितं चक्रम् । २१ 'विषयेषु' मोहजन्येषु । २२ 'वक्रम्' प्रतिकूलम् । २३ 'आधाय वाचंय-मरूपमेष गुरोः' गुरोः वाचंयमरूपमाधाय यद्वाऽयमरूपं प्रचक्रं मत्वा गुरोर्वाचमाधाय ॥

[५६] २४ '°केणिकानाम्' केणिका पटकुटी तासाम् । २५ 'नवराजहंसान्' नृपमुख्यान् । २६ 'सचक्रवालस्थितिकौ-शलेन' सतां चक्रवाकं समुदायस्तस्य, सन् यः चक्रस्य चक्रवाकस्य बालः ॥

---

* षट्पञ्चाशत्तमश्लोकादेकनवतितमश्लोकपर्यन्तस्यैकं पत्रं A प्रतौ विनष्टमतोऽत्र P प्रतेरुद्धृतम् ।

अहर्निशाभ्रभ्रमखेदभाजां विश्राममूमीव शरद्घनानाम् ।
वाटी प्रपाटीपयसः किलाटी वाऽऽटीकते स्वाद्वतया तयाऽसौ ॥ ५७ ॥
पुर्यां महेभ्यालयशुभ्रभासा वनद्युतिर्न्यक्क्रियते स्म नीला ।
तद्वैरभावादिव केणिकाभिः सा निर्जितात्यूर्जिततया तयापि ॥ ५८ ॥
तत्रानुयाताऽऽर्हतसंघमध्ये भृशं प्रवृत्तैर्हयहेषितानाम् ।
विमिश्रितानां गजबृंहितेन न्यवेदि मेघाभ्युदयस्तदानीम् ॥ ५९ ॥
अथ प्रभाते प्रसृतेऽवदाते प्रसन्नवाते विकचाम्बुजाते ।
वियत्तरौ जीर्णतयेव जाते नक्षत्रपत्रव्रजसंनिपाते ॥ ६० ॥
सहस्ररश्मेरुदयाय धाता सर्वाधिकं धाम निधित्सुरस्मिन् ।
नक्षत्रलोकादिव संजहार तेजः समग्रं युगपत् प्रभाते ॥ ६१ ॥
भानोर्विभाऽस्तंगमने विकीर्णा नक्षत्रमूर्त्या शुशुभेऽन्तरिक्षे ।
महोदये स्वे पुनरुग्रधाम्ना ततः समाकृष्य कृताऽऽत्मसात् सा ॥ ६२ ॥
वियद्वनान्तर्विविशुर्नु पत्युर्वियोगदुःखाद् रुचयोऽभ्रदम्भात् ।
तद्दूरदेशादधिपेऽभ्युपेते समं ययुस्ता इव संप्रयोगम् ॥ ६३ ॥
विभा विभान्ति स्म नभोविभागे नक्षत्रलोके ननु तावदेव ।
अहर्पतिः क्षत्रतया प्रतीतः साम्राज्यभारं न बभार यावत् ॥ ६४ ॥
द्वीपेऽवनीपादिजनैः प्रदीपाः प्रकाशिताः खे त्रिदशैश्च ताराः ।
वैयर्थ्यमर्कादुभयस्य तस्मात् प्रभातवातादिव तद्विघातः ॥ ६५ ॥
साक्षात् कटाक्षा इव दिग्वधूनां द्विजाधिपे वैभवसंनियुक्ते ।
नक्षत्रलक्षाद् दिवसेऽथ सर्वे किं संहृतास्तत् क्षयवीक्षणेन ॥ ६६ ॥
रात्रौ नभःश्रीर्विधृताङ्गरील्या तस्थौ तदीयाऽऽभरणान्युडूनि ।
शोणांशुकेन त्रपितेव शूरे रागात् प्रगे तानि पुनोऽप्यधत्त ॥ ६७ ॥
दिशां बलिं यद् विदधे द्विजेशः स्वस्याधिपत्यार्थमुडुप्रसूनैः ।
सहस्ररश्मिस्तु करैः स्वकीयै रोषादिवामूनि पराचकार ॥ ६८ ॥
चित्रीयिता द्यौस्तमसेव लिख्वा तारास्वरूपान्निशयेशभक्त्यै ।
साम्राज्यमासेदुषि पद्मिनीशे शापात् तदुन्मृष्टमिवाम्बुजिन्या ॥ ६९ ॥
वर्द्धापना दिग्वनिताभिरिन्दोरकारि नक्षत्रधियाक्षतौघैः ।
तद्वारुणीसंगमनादिवैतान् वाताद् विनिन्ये विधिरेव दूरे ॥ ७० ॥
पत्युः प्रसादान्निशयाऽप्यलम्भि तारावताराबहुरूप्यऋद्धिः ।
निस्सार्य लोकादिव तां सनाथां सैवापजह्रेऽम्बुजिनीवरेण ॥ ७१ ॥
प्रकाशभावः कमलाकराणामाच्छिद्य राज्या भगणे न्यवेशि ।
तद्वैपरीत्यं दिवसश्रियाऽपि न विस्मयः स्यात् समयस्मयेऽस्मिन् ॥ ७२ ॥
काले कराले तमसान्तराले लोकस्य तेजो भगणांशुमात्रम् ।
तेजोनिधेरभ्युदये तमोऽपि दोषाकराङ्के शितिमावशेषम् ॥ ७३ ॥

[ ५७ ] १ 'किलाटी' दुग्धपिण्डविशेषः ।

निशीव पत्युर्विरहान्नभःश्रीर्हृदि स्फुटं छिद्रवतीव धिष्ण्यैः ।
रविप्रदत्तद्युतिशोणवासाः प्रसह्य सद्यः प्रगुणेव जज्ञे ॥ ७४ ॥
द्विजेशराज्ये ग्रहसंग्रहेण वराटिकानां गणनैव संपत् ।
सहस्रधाम्ना वसुधा सुवर्णमया च बालाऽऽतपतः प्रचक्रे ॥ ७५ ॥
जग्ध्वा मृगाङ्कं[1] क्रमतः प्रतीच्याः पत्या जिघत्सातिशयोपपत्त्या ।
नक्षत्ररूपाखिलशालिपुञ्जः पलादवृत्त्या बुभुजे क्षणेन ॥ ७६ ॥
भुक्त्वा तमःसूपयुतोडुशालिपिण्डान् सचण्डद्युतिरुद्यतोऽपि ।
ताम्बूलरागं वदने न्यधत्त कायेऽरुणस्तेन परं प्रमत्तः ॥ ७७ ॥
यत्प्राणनाथेन मदङ्गनानां हृतेन्दुना श्रीरिह पद्मिनीनाम् ।
तस्या हि रात्रेरुडुमौक्तिकस्रक् छिन्नेऽतिरोषाद्द्रविणेव मत्वा ॥ ७८ ॥
पत्युस्तदास्तंगमने हिमांशोस्तारास्त्रियस्तद्विरहेण दूनाः ।
प्रभातसन्ध्यारुणिमाऽनलान्तः सत्यो हि सत्यं विविशुर्विशुद्धाः ॥ ७९ ॥
कुमुद्वतीभिर्मधुपा विलेसुस्तारारुची[2] रागधरे ग्रहेशे[3] ।
न्यवीविशद् दुःखभरादितीव द्विजाधिपः श्यामरुचिः पयोधौ ॥ ८० ॥
वृषाज-मीनाद्युपभोगदोषो दोषाकरस्याभ्युचितो द्विजेशः ।
मा भून्ममेतीव विमृज्य ताराः सहस्रधामाऽभ्युदियाय शुद्धः ॥ ८१ ॥
प्रियाः प्रियाश्चन्द्रमसो हि ताराः स्पर्शो न तासामकलङ्किनोऽर्हः ।
एताः परामृज्य पुरः प्रभाभिः शूरः सुवृत्तः समुदेति तेन ॥ ८२ ॥
सहस्रभानावुदिते नभःश्रीस्तारासुमैर्न्युञ्छनकानि कृत्वा ।
निदर्शयन्ती नवरागमाधादामोदमालीष्विव पद्मिनीषु ॥ ८३ ॥
तपोधनानां बहुबोधनानां योगाभियोगाधिपतिर्धरित्रीम् ।
तदा पवित्रीकुरुते स्म लोके वृत्तिं यथासूत्रतया प्रयोज्य[4] ॥ ८४ ॥
तैः[5] सावधानैः प्रतिभानिधानैर्वशीकृता वाडवजातिरग्रे ।
चित्राणि धृत्वा सुखयन्त्रकाणि[6] चचार मार्गे कृतरश्मियोगा[7] ॥ ८५ ॥
चिन्वन् यशोनिर्जितपुष्पधन्वा तमो[8]विभेदे नवशार्ङ्गधन्वा ।
धुन्वन् मनःसंशयमङ्गभाजां नियोगराड् धन्वनि स व्यहार्षीत् ॥ ८६ ॥
स प्राप सौवर्णगिरिं गरीयः शृङ्गैरभङ्गैर्दिवमालिहन्तम् ।
जिनेन्द्रचैत्योज्ज्वलमौलिलक्ष्म्या शैलाधिपत्यश्रियमुद्वहन्तम् ॥ ८७ ॥

---

[ ७६ ] १ ‘मृगाङ्कः’ चन्द्रो भेषजविशेषो वा ।

[ ८० ] २ ‘तारारुचिः’ ताराणां रुचिरिच्छा । ३ ‘ग्रहेशे’ सूर्येऽभूदिति शेषः ।

[ ८४ ] ४ ‘वृत्तिं यथासूत्रतया प्रयोज्य’ वृत्तिमाजीविकां प्रयोज्य, यथासूत्रं व्यवस्थानतिक्रमेण “सूत्रं तन्तुव्यवस्थयोः” यथासूत्रं वृत्तिं टीकामनुयोगे प्रयोज्य ।

[ ८५ ] ५ ‘तैः’ तपोधनैः । ६ ‘सुखयन्त्रकाणि’ खलीनानि यद्वा सुखभूमिसमासार्द्धेत्यादि सिद्धयन्त्रकाणि । ७ ‘कृतरश्मियोगा’ कृतः रश्मेर्वल्गाया योगो यस्याः सा रश्मिर्दीधितिर्वा ।

[ ८६ ] ८ ‘तमः’ “तमो राहौ गुणे पापे ध्वान्ते” ।

विशालसाले कपिशीर्षराज्या राज्याश्रयं स्वर्गपतेर्जहास ।
गर्जन्निवाद्रिर्नरसिंहनादैस्संतर्जयन् वा कुलशैललक्ष्मीम् ॥ ८८ ॥
कुलाचलैः सप्तभिरस्य शोभा लीलाभिरेकेऽपि मनाग् न धार्या ।
यस्याभिधारूपविधानिधानं मित्रं पवित्रं सुरशैल एव ॥ ८९ ॥
द्वीपस्य जम्बूपपदस्य राज्यं लघोरपि द्वीपकुले यदस्मात् ।
सुवर्णशैलाद् भरतेऽपि तत्त्वं प्रतीयतां वर्षकुलेऽपि किं नो ॥ ९० ॥
परः शतैरुन्नतशृङ्गभागैर्नभोविभागस्य कृतावलम्बः ।
शिलोच्चयः स्वामभिधां यथार्थां समर्थयामास सुवर्णधाम्ना ॥ ९१ ॥
शूरा द्विजेशाः कवयो बुधा वा यत्संनिधाने निवसन्त्यनेके ।
तन्मङ्गलाऽऽख्या खलु रत्नसानुं किं नातिशेतामिदमीयलक्ष्मीः ॥ ९२ ॥
लघुर्गुरुर्वेति न चिन्तनीयं शंसन्ति सन्तो गुरुतां गुणेन ।
द्विधा सुवर्णाश्रयणान्महीयानयं विदेहे तु गिरिर्लघीयान् ॥ ९३ ॥
विद्याधराणां रमणीभिरद्रिर्धत्ते नितान्तं रमणीयभावम् ।
मणीभिरुद्भासितदिग्विभागे यत्कन्दरे सुन्दरमन्दिरश्रीः ॥ ९४ ॥
चैत्यादिवैतं नितमां तमांसि स्पृशन्ति नाद्रिं बहिरन्तरे वा ।
दिवा दिवाकृत्करसंनियुक्तं कान्त्यौषधीनां निशि चानुरक्तम् ॥ ९५ ॥
व्यालः शृगालं न युवाऽपि बालं प्रहर्तुमीष्टेऽत्र कदाऽपि रुष्टः ।
जिनेन्द्रबिम्बातिशयाच्छयालुं पार्श्वेऽप्यजं नैव मतङ्गजारिः ॥ ९६ ॥
राशिर्मणीनामिव तोयराशेराकृष्य तुष्यद्भिरकारि देवैः ।
क्रीडापदं संपदमाश्रितानां समुन्नयन्नेष गिरिर्गरीयान् ॥ ९७ ॥
पुरी सुरीणामिव विस्मयेत् का रसाऽऽतुरीभावमिवोन्नयन्ती ।
रेजे तदुत्सङ्गपदेऽङ्गनेव जालन्धराऽऽख्यातिधरा धरायाम् ॥ ९८ ॥
यस्यां विहारा विविधोपहारा हारावलीभिर्मणिमौक्तिकानाम् ।
दिव्याङ्गनानां नवगानशब्दैर्वितेनिरेऽमानविमानलक्ष्मीम् ॥ ९९ ॥
पाञ्चालिकानामथ बालिकानां चैत्यस्थचित्रेक्षणविस्मितानाम् ।
नेत्राम्बुजानामनिमेषवृत्त्या कः श्रद्दधाति स्म न देवलोकम् ॥ १०० ॥
चैत्येषु नित्याऽऽर्हतपूजनासु हल्लीसकैर्या जनरञ्जनाऽऽसीत् ।
तया दिदृक्षाऽऽगतदेवतानां व्यधायि तादात्म्यनिदानहेतुः ॥ १०१ ॥
देवीषु रूपातिशयो न पुण्यं लावण्यमङ्गे कमितुः सुखाय ।
तद्वैपरीत्यं भुजगाङ्गनासु वधूजनेऽस्यामुभयी प्रसिद्धिः ॥ १०२ ॥
कुलाङ्गनानां सकला कलाऽपि वैफल्यमाधास्यत चेज्जिनानाम् ।
पुरः स्फुरन्नर्त्तनगानवृत्तौ नैवाभविष्यत् सुरलोकमोहः ॥ १०३ ॥
सौभाग्यशोभाविभवेन यस्यां वधूः सुरीणामवधूतगर्वा ।
अस्मत्प्रियाणां प्रियताऽत्र माऽभूदितीव नैवाक्षिनिमेषभाजाम् ॥ १०४ ॥

यासां सदाऽऽसां प्रबभूव धीरः कामः समग्रावयवेषु देहे ।
हरक्रियाशुद्धिमिवाचिकीर्षुस्तासां मुखं किं जडजेन जेयम् ॥ १०५ ॥
अनक्षरेणाम्बुरुहाननानां न साक्षराणामुपमाप्रमाणम् ।
अस्मिन्नये सा श्रुतिरेव साक्षात् साक्षीबभूवाक्षयसंनिधानात् ॥ १०६ ॥
सुधाऽधरेऽधारि यथार्हवृत्त्या धीरेण धात्राम्बुजलोचनानाम् ।
तदाऽऽत्मकत्वेन मुधा सुधांशुः प्रांशुर्न तासां वदनोपमाप्तौ ॥ १०७ ॥
गोपात् प्रकोपारुणतः स्ववृत्त्यै यश्चाऽददे वासवभैक्षमिन्दुः ।
महेभ्यकान्तावदनप्रभाभिः सनाभिरुच्चैर्भविता कथं सः ॥ १०८ ॥
स्मरस्य सख्यस्मरणान्निकामकामान्धलोकैरुपमा व्यलोकि ।
छायाभृति स्त्रीवदनस्य तस्याः प्रामाण्यसाक्षी न हि साक्षरः स्यात् ॥ १०९ ॥
वधूजनानां शयने द्विजेशे प्रकाशतां वासवरूपलक्ष्मीः ।
प्रातस्तदास्यद्युतिवैभवस्य दास्येऽपि नास्याऽऽस्य विपाण्डुरस्य ॥ ११० ॥
लघूभवन्निन्दुरलीकबिन्दुश्रियाऽश्रयत् स्त्रीजनवक्त्रमेव ।
स्पर्द्धाऽपि वर्द्धापनहेतवेऽस्य प्राप्तस्य दुःप्रापमुखप्रसङ्गम् ॥ १११ ॥
मतिप्रमादु विभ्रमभूमिकान्तामुखे विधेया शशिनोऽपि शङ्का ।
प्रकाशमात्रादवकाशमाप्य क्षणादनङ्के क्षणतः समाप्त्या ॥ ११२ ॥
तुलाकृतैकत्रवधूमुखेन गुणैः प्रसिद्धेन जगद्विधात्रा ।
परत्र चन्द्रेण विनाङ्कभारमन्ये स्फुटं लाघवमुद्गमेन ॥ ११३ ॥
माधुर्यमासां वचनेषु धुर्यं वैधुर्यविच्छेदिसुधाशनादेः ।
सुधाकरेणेव मुखप्रसत्त्यै सुधानिधानादुपदाऽप्यदायि ॥ ११४ ॥
वचो विपञ्ची क्वणितेषु तासां माधुर्यमाधात् स्वभृतेषु किञ्चित् ।
तत्तुल्यता चेत् परपुष्टवाचः काचः समः किं न मणेर्गणे यः ॥ ११५ ॥
निर्नंसया तीर्थकृतां नितान्तमुपेयुषीभिर्विबुधाङ्गनाभिः ।
मिथः परावृत्तिविधिर्वधूनां भवत्यलङ्कारपरम्परायाः ॥ ११६ ॥
ध्रुवं सुवर्णाचलसंनिधानादु धनेश्वरानश्वरतां वदद्भिः ।
स्वजैरजेयत्वगुणः पुरोऽस्या व्रजैर्बुधानां मनसाऽभिधार्यः ॥ ११७ ॥
प्रविश्य तस्यां पुरि पौरलोकैः प्रस्तूयमानः स नियोगराजः ।
समाजमानन्दयदार्हतानां गवां विलासेन जयश्रियाऽऽढ्यः ॥ ११८ ॥
जेता स्मरादेश्चरणप्रवृत्त्या धर्मं दृढीकृत्य पुरश्चचाल ।
अयं प्रसादादु गणनायकस्यास्खलद्गतिस्तत्तिसमितिप्रतिष्ठः ॥ ११९ ॥
उद्भेदिनी स्वर्णपयोजराजी निवेदिनी सौरमहोदयस्य ।
पुष्णाति यस्यां कमलाविलासं तां मेदिनीपूर्वपुरीं ययौ सः ॥ १२० ॥
हंसावतंसा विबुधप्रशंसास्थानानि यत्राप्सरसां प्रदेशाः ।
उदीरयन्ते सुरसार्थलीलां सौधर्मलोकाभिगमप्रतीत्या ॥ १२१ ॥

जनः सहस्राक्ष इवातिदक्षः शुद्धार्थवृत्त्या शतकोटिधारी ।
रुच्यो[3] विराजज्जयवाहिनीनां सुपर्वभिर्यत्र विनोदशाली ॥ १२२ ॥
सहस्रशो यत्र वसन्ति शूराः कलाभृतः सौम्यदृशां प्रपन्नाः ।
मनीषया गौरवमावहन्तः काव्यानुभाव्यक्रियया[6]ऽनुषक्ताः ॥ १२३ ॥
यद्वाटिकानां परिपाटिकाभिरामोदसारेण वशीकृतानि ।
सदा रमन्ते मिथुनानि दिव्यान्यामुच्य कल्पद्रुमसौरभाशाम् ॥ १२४ ॥
रम्भागृहाण्यद्भुतसंप्रयोगारम्भाद् विरम्भाधिकरूपसंपत् ।
कान्तानुरागात् समुपेत्य कान्ता याथार्थ्यमेषां कुरुते द्विधाऽपि ॥ १२५ ॥
जातिः परेषां वपुषाविशेषादामोदमुत्पादयतीति युक्तम् ।
सुखाय नृणां क्रकच[7]च्छदोऽपि तस्याः प्रसङ्गादिव वाटिकायाम् ॥ १२६ ॥
फुल्लन्महामल्लिविसन्धगन्धाऽऽकृष्टा निकृष्टा अपि भृङ्गराज्यः ।
उद्भावयन्ते करवाललीलां स्मरस्य नश्यद्विरहार्त्तहत्यै ॥ १२७ ॥
गन्धैरनूनैः करुणप्रसूनैराकीर्यमाणोऽनुदिशं परागः ।
नरस्य वश्यंकरणं स्मरस्य दीक्षापरीक्षाविधये बभूव ॥ १२८ ॥
उन्निद्रपुष्पेक्षणवीक्षणेन व्यामोहयन्तीव लतास्मितास्याः ।
परिस्फुरत्पल्लवसंज्ञयैवाऽऽजुहोति विश्रान्तिकृते वनान्तः ॥ १२९ ॥
वन्दारुचारुद्युतिदम्पतीनां हासैः परं पावितपुष्पभासा ।
तद्वक्त्रसौरभ्यभरस्य चौरैर्वातैर्विवृत्ताऽपि लता वृतेव ॥ १३० ॥
जिनार्चनार्थं कुसुमोद्दिधीर्षा हर्षाद् वधूक्षिप्तकरैरजस्रम् ।
लतानिकुञ्जे मृदुलप्रवालश्रीः शाश्वतीवास्य वनस्य जज्ञे ॥ १३१ ॥
आरुह्य पुष्पावचयेऽङ्गवर्णसवर्णताऽऽलिङ्गितचम्पकान्तः ।
गुप्ताऽपि कान्ताऽऽभरणप्रभाभी रराज काचिद् वनदेवतेव ॥ १३२ ॥
पुष्पाण्यवाकीर्य तरोः शिरस्था बाला स्वशालान्तरमारुरुक्षुः ।
मूलस्थितालीस्मितहेतुरासीत् सौभाग्यशोभाऽनुभवस्य लोभात् ॥ १३३ ॥
स्रजामजस्रं रचनेन काचित् साचिव्यमाप स्वजने वनेऽस्मिन् ।
प्रियैः प्रियैस्तैर्वचसां प्रयोगैरामोद्यमाना रमणीसमाना ॥ १३४ ॥
हासप्रकाशप्रसरन्महोभिः पुष्पानवाप्तावपि तत्क्रमेण ।
व्यापार्यमाणा करमम्बुजाक्षी सखीं परं स्मेरमुखीं चकार ॥ १३५ ॥
जिनार्चनाशेषमशेषमन्या प्रसूनवृन्दं निजशेखरेषु ।
निवेशयन्ती हृदयेश्वराणां विवाहवेलास्मृतिरन्वकार्षीत् ॥ १३६ ॥

---

[ १२२ ] १ 'शुद्धार्थवृत्त्या' शुद्धाऽनुद्धारतया यथार्थस्य द्रव्यस्य वृत्तिस्तया । २ 'शतकोटिधारी' शतानां कोटिं धरति, शतकोटिर्वज्रं वा । ३ 'रुच्यः' स्वामी अभिलषणीयो वा । ४ 'जयवाहिनी' जयोपलक्षिता वाहिनी सेना वा । ५ 'सुपर्वभिः' देवैः शोभनोत्सवैः ।

[ १२३ ] ६ 'काव्यानुभाव्यक्रियया' काव्यैरनुभाव्या या क्रिया तया युक्ताः । नु वितर्के । काव्याः शुक्राः ।

[ १२६ ] ७ 'क्रकचच्छदः' "क्रकचः करपत्रे स्याद् ग्रन्थिलाख्यतरावपि" । "छदः पत्रे पतत्रे ग्रन्थिपर्णतमालयोः" । क्रकच एव च्छदः पक्षोऽस्येति वर्द्धकिः सूत्रधारः ।

अर्चाऽनुशिष्टा दयितैर्विसृष्टाः कृष्टाः सखीभिः कुसुमस्रजोऽन्याः ।
स्वं सौमनस्यं सह सौरभेण न्यधुर्मधुव्याप्ततया वधूषु ॥ १३७ ॥
तस्मिन् वनेऽर्हद्भवनेन रम्ये श्रीआश्वसेनिर्भगवान् चकास्ति ।
यन्नामवर्णामृतपानमुच्चैः करोति लोकेष्वजरामरत्वम् ॥ १३८ ॥
वन्येभ-सिंहाग्नि-भुजङ्गजन्येऽजन्येऽरिराजन्यकृतेऽप्यजन्ये ।
जन्येत चेतःस्खलना न भीत्या यन्नाममन्त्रस्मरणप्रतीत्या ॥ १३९ ॥
नाम्नाऽस्य साम्ना नृपतिः स्वधाम्ना समानमानन्दयती हितार्थैः ।
नरं जयन्तं युधि रञ्जयन्तं सैन्यानदैन्याँस्तरसा रसाऽऽढ्यम् ॥ १४० ॥
कलाकलापः सकलातिशायी स्फुरत्यमुष्य त्रिजगत्सु मुख्यः ।
सभाजनानां रसभाजनानां सभाजनं नाम जयेज्जनो यः ॥ १४१ ॥
तन्त्रैः स्वतन्त्रैरपि नैव मन्त्रैर्मित्रैः पवित्रैरपि यद्विचित्रैः ।
साध्यं प्रसाध्यं तदिहार्थपात्रैराराध्यमुद्भावयतेऽस्य नाम ॥ १४२ ॥
न नाम कामः समुपाजगाम कः सिद्धिमुद्बुद्धिभृतोऽस्य नाम्नि ।
चिन्तामणौ सत्यपि सत्यचिन्ता फलेग्रहिः स्यान्नहि का विकाशात् ॥ १४३ ॥
नाम्नाऽऽस्यदाम्ना च हृदो विभूषा यस्यास्ति वश्या मरुतो वयस्याः ।
विश्वे यशःसौरभमेतदीयं तन्वन्ति रुद्धेव महोऽन्यदीयम् ॥ १४४ ॥
नाम्नामिहाऽऽम्नायविदां जिनस्य विनश्यदापत्परितापवृत्त्या ।
नृत्यानि नित्यं कमलाविलासात् पुरः सुरस्त्रीनिवहस्तनोति ॥ १४५ ॥
नाम्नाऽस्य धाम्नां निधिनेव देवैरसह्यतेजः प्रसरीसरीति ।
सिद्ध्यङ्गनाऽप्यङ्ग ! वरीवरीति कीर्तिस्त्रिलोकीं प्रवरीभरीति ॥ १४६ ॥
नाम्नि स्फुरद्धाम्नि जिनेश्वरस्य जागर्ति कोऽपि प्रबलः प्रभावः ।
समुन्नयन् वैभवमङ्गभाजां लघूकरोति स भवानुभावम् ॥ १४७ ॥
ध्येयं परं तत्सुदृशां विधेयं देवाभिधेयं कमलाद्युपेयम् ।
प्रसाधयन्ती सुरसार्थगेयं पट्टूकरोत्येव यशोऽधिपेयम् ॥ १४८ ॥
अवश्यमेतस्य पदौ नमस्यन्नस्यन् विमोहस्य बलं विहस्य ।
तस्मिन् पुरेऽसौ कतिचिद् दिनानि निन्ये नियोगाधिपतिर्जयेन ॥ १४९ ॥
ग्रामादनुग्रामविहारतोऽयं त्यजन्नजस्रं निगमप्रदेशम् ।
मोहस्य तत्तद् विषयेऽतिचारं कुर्वन् न्यषेत्सीद् विषयेऽतिचारम् ॥ १५० ॥
स नासीरं धीरस्तपगणसुनासीरतपसा निरस्यन् मोहस्यावनिजनितजैनप्रभुतया ।
नयस्थित्या लोके कृतकरणचातुर्यविजयो नियोगेशः श्रीमानुदयमदधाद् धार्मिकविधेः ॥ १५१

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
प्रस्थानवर्णनो नाम नवमः सर्गः ॥

[ १३९ ] १ 'अजन्ये' अजन्ये उत्पाते युद्धे च ।
[ १४८ ] २ 'विधेयम्' कार्यम् । ३ 'देवाभिधेयम्' इयं देवाभिधा सुदृशां सम्यक्त्ववतां ध्येयम् ।
[ १५० ] ४ 'निगमप्रदेशम्' निगमो मार्गः, निगमानां वणिजां स्थानम् । "निगमाः पूर्वदिग्भेदनिश्चयाध्ववणिक्पथाः" ।
[ १५१ ] ५ 'नासीरम्' अग्रयानं मोहस्य । ६ 'कृतकरणचातुर्यविजयः' कृतः करणानां चातुर्येण विजयो येन सः । 'अकृतक°' इति पदविभागे अकृत्रिममरणे चातुर्येण विजयो यस्य ॥

## दशमः सर्गः ।

अब्जबन्धुरथ बन्धुररथ्यान् नोदयन् पथि यथेच्छमनन्ते ।
तत्पिपासुरिव वार्द्धिययासुः पश्चिमां भृशमुपास्पृशदाशाम् ॥ १ ॥
वारुणीमधिगतं द्विजराजं वीक्ष्य दुर्णयपदं विनिनीषुः ।
शेषकोष इव शोषकृतेऽर्कः प्राप पश्चिमदिगम्बरदेशम् ॥ २ ॥
पूर्वगोत्रविशदीकरणेन प्राप्तदिग्वरवधूपरिभोगः ।
ध्वस्तदुस्तमतमोभरपापक्षालनाय रविरब्धिमियाय ॥ ३ ॥
हंस एष गगनामरसिन्धौ संतरन्निव कराऽऽयतपाशैः ।
पाशिना ध्रुवमनीयत तीरं स्वाङ्गनागतिकलाऽध्ययनाय ॥ ४ ॥
प्रोल्लसत्सितपटैर्गगनाब्धौ यानपात्रमिव मित्रचरित्रम् ।
तेजसा निभृतमर्णवसद्माभ्यानयन्नयरुचिर्निजपार्श्वम् ॥ ५ ॥
फेनपिण्ड इव मण्डलमेतच्चण्डगोर्नु विधिना वियदब्धौ ।
प्रस्फुरन् वरुणलोकशिशूनां नर्मणेऽभिचकृषे सतृषेव ॥ ६ ॥
प्राग्धृतस्त्रिदशराजवधूभिरात्मदर्श इह भानुविमर्शः ।
तत्प्रतीपवरुणाम्बुजदृग्भिः स्पर्द्धया निजगृहे जगृहेऽसौ ॥ ७ ॥
प्रावृतः सितपटैः किमु पूर्वाधीशितू रविमिषेण शताङ्गः ।
आसदद् वरुणराज्यजिघृक्षोर्मायया परदिशोऽपि सदेशम् ॥ ८ ॥
यज्जलानि महसा खलु शुष्यत्येष शोषसमयात् सविशेषम् ।
तत्पतिर्वरुणराड्वरुणस्य सिन्धुपातबहुपातकमाधात् ॥ ९ ॥
उद्यतस्य गगनाम्बुधितारारत्नराशिहरणादरुणस्य ।
पश्यतोहरकलार्णवरत्नान्यास्तुमस्तगिरिगुप्तिमधत्त ॥ १० ॥
वैरिणीभिरवदातविधीनां स्वैरिणीभिरिव वारुणलोके ।
चुम्बनेऽस्य विहितेऽधररागाच्छोणतामवृणुतारुणबिम्बम् ॥ ११ ॥
अस्तभूधरशिलासु विभिन्नः शातकुम्भनवकुम्भ इवार्कः ।
तत्कणैर्ग्रहगणैरिव कीर्णं व्योम सोममहसा सहसाऽऽप्यम् ॥ १२ ॥
भानुरस्तगिरिगैरिकयोगाद् योगवानिव कषायितवासाः ।
दूरतो निजपरिग्रहमौज्झद् रूप्यका ग्रहगणास्त इमे खे ॥ १३ ॥
प्राविवेश जलधौ जलधौतं स्वं विधातुमरुणामरहस्ती ।
उच्छलद्भिरिव तस्य कपोलाद् व्यानशे नु तिमिरैर्भ्रमरैः खम् ॥ १४ ॥
दूरदेशमभिजग्मुषि पत्यौ पद्मिनीभिरचिराद् विरहार्त्या ।
विश्लथा विदधिरेऽलिकबर्यस्तत्कचैरिव तमोभिरुदीये ॥ १५ ॥
शूरदूरगमनान्मदपूराद् यन्निशाचरगणेन दिदीपे ।
माऽस्तु दर्शनमशुद्धममीषां पद्मिनीभिरिति मङ्क्षु निदद्रे ॥ १६ ॥

स्त्रीजनैर्निदधिरे मणिमुक्ता दिग्भिरुन्मुखतया निशि ताराः ।
स्पर्द्धया वसुधया विषमेषोर्मार्गणा इव लसद्रुचिदीपाः ॥ १७ ॥
स्नेहमुचशिखगेहमणीषु गेहिनी निदधती गुणवृत्त्या ।
कामिनां मनसि चापलतेवाऽकुञ्चिता मनसिजस्य बभासे ॥ १८ ॥
भूषणैर्वपुषि वेषविशेषैर्विभ्रमैरभिनवैर्विनतभ्रूः ।
मोहनेन मनसः खलु पुम्भिः काप्यपूर्ववनितेव निषेवे ॥ १९ ॥
लम्भितः स्फुटरमां चरमाद्रिमूर्ध्नि खण्डतनुचण्डरुचोच्चैः ।
दाववह्निजनितामिदमीयैर्व्यापिभूर्ननु तमस्तनुधूमैः ॥ २० ॥
साक्षिणारुणकृशानुभरेण संव्यवाह्य तनुना विजयश्रीः ।
तद्धृता ग्रहगणाक्षतवर्गैर्विस्तृता नभसि कुङ्कुमकान्तिः ॥ २१ ॥
निश्चिते भुविजये विजयेऽस्मिन् मूर्त्तधर्म इव धर्म्यमुहूर्त्ते ।
श्रीनिदेशनृपतिर्विशति स्म पातिसाहिपुरमुद्धुरधामा ॥ २२ ॥
यत्र चित्ररमणीजनभोग्या वाटिका वलयिताः परितस्त्रिः ।
शाटिका इव लसत्सुमनोभिर्व्यक्तभक्तिनिभृताः पुरवध्वाः ॥ २३ ॥
पाटिका इव मनोभवराजः शासनस्य सुमनोऽक्षरलक्ष्याः ।
वाटिकाः सुमनसामभिगम्या स्फाटिकाश्मघटितालिघटाभिः ॥ २४ ॥
आकुला द्विजकुलैर्बहुधाऽऽर्यबालकैः सुमधुरा मधुमत्तैः ।
शुद्धजातिसुमनःकमनीया राजधान्य इव ताः स्म रराज ॥ २५ ॥
झिल्लिकारणरणत्कृतिवेल्लद्वल्लिपल्लवनिकुञ्जपदैस्ताः ।
प्रोल्लसत्कुसुमतारकरूपाज्जज्ञिरे निवसतिर्वसतीनाम् ॥ २६ ॥
मल्लिकासुमनसां कलिकाभिर्वेश्म विस्मयदकन्दलिकाभिः ।
दम्पतीसुरतकर्मणि तासामानुकूल्यमिव शाश्वतमासीत् ॥ २७ ॥
शाखिनां घनतयाऽनलताऽऽसु पस्पृशे दिनकृता करयोगात् ।
पल्लवैः प्रकटितेऽपि च रागेऽस्याः विमृश्य रजसः समयं नु ॥ २८ ॥
चुम्बितां मधुकरैर्विटपेनाऽऽश्लेषमेष सविशेषमिवेक्ष्य ।
वल्लिमुल्लसितपल्लवहस्तामालिलिङ्ग दिनकृन्न करेण ॥ २९ ॥
उच्छलत्परिमलस्थलगुच्छः स्वच्छतीव्रकरमण्डललीलाम् ।
उत्परागपरभागपिशङ्गीभूतभूतलतयाऽप्यनुजह्रे ॥ ३० ॥
निर्गलन्मधुभरैर्घनवृष्टिः क्वापि नीरजरजोभिरदोऽन्तः ।
दीर्घिकाचपलवीचिसमीरैः क्वापि शीतमविनीतममूषु ॥ ३१ ॥
उच्छ्वसत् कुसुमगन्धभरेणाप्यासु *भासुरतरा सुरभिश्रीः ।
सौहृदादिव दिवस्पतिजेतुर्विस्मयो न रमणे स्मरराजः ॥ ३२ ॥
योगिनां निवसतां वनदेशे लीनमात्मनि परे हृदयं स्वम् ।
आचकर्ष सुमनःशरधारावर्षणान्मनसिजो विजयाय ॥ ३३ ॥

---

* P सा° ।

एत्य यत्सुरजनी रजनीषु मण्डपे सुमनसां सुमनोभिः ।
स्वीचकार सुरतं शुकवाचाऽमूषु तन्नृमिथुनान्यधिजग्मुः ॥ ३४ ॥
तालिकावलिचलाचलपत्रैर्मूर्च्छिता ह्युपवनात् पवनाऽऽली ।
पद्मिनी प्रमुदिताऽऽसु वधूनां द्राक् चकार रतखेदविभेदम् ॥ ३५ ॥

[इति वाटिकावर्णनम्]

उन्नमद्भिरभितस्तरुराज्या वाटिका सुविटपैरविलोक्या ।
सा विशालतरसालवरेण पर्यवेष्ट्यत पुरी गिरिणेव ॥ ३६ ॥
तत्पुरीशकृतभूतलभूयोवैरिराजधृतदुर्गविभङ्गात् ।
तुङ्गतां स नु गतः कपिशीर्षैरभ्रदुर्गकवलीकृतिमैच्छत् ॥ ३७ ॥
द्वेषिबुद्धिविषयाऽऽवरणेन भूतलाभरणवद् वरणोऽयम् ।
शीतगोः परिधिना कृतसख्यं शेषकुण्डलिकलाग्रहणाय ॥ ३८ ॥
शेष एष खलु शीर्षसहस्रं भूमिभारधरणाय बभार ।
तद्दिवोभरसहे वरणेऽस्याः शीर्षकोटिरपि साम्प्रतमेव ॥ ३९ ॥
कुण्डलीकरणकौशलवृत्त्या नागराज इह युक्तमधःस्थः ।
देवराजमपि किं नु विधित्सुस्तद्वदुच्चतरतां स जगाम ॥ ४० ॥
खातिकाऽऽकृतिबलाज्जलजन्यं पौरुषाऽऽवलिमिषान्ननु वन्यम् ।
सालमुच्चयधिया स्थलवर्ग्यं किं त्रिधा भजति दुर्गमिहैवम् ॥ ४१ ॥
वप्रविप्रमतिलुब्धतयैव सर्वतोऽवति दिगम्बरभागान् ।
तं जिघृक्षुमरुणद् वरुणः किं खातिकापदभृताम्बुधिनेव ॥ ४२ ॥
आलवालजलमप्यनिरुद्धं सालमेधयति किं न विशालम् ।
खातिकाजलनिरर्गलसेकाद् वप्रवृद्धिरुचिरताम्बरसीमा ॥ ४३ ॥
जन्मनैव हि निरावरणोऽयमम्बराय किमु धावति वप्रः ।
इत्यवेत्य विधिना ह्यनुकूलं निर्ममेऽस्य परिखाङ्कदुकूलम् ॥ ४४ ॥
पातिसाहिमहसा सहसाऽयं निर्गलन्निव जलैः परिखायाम् ।
भेजिवान् महिमवान् हिमवान् किं संनिधाय वरणाचरणेन ॥ ४५ ॥
प्रस्फुरद्भिरभितः कपिशीर्षैर्बद्धमौलिरिव सालनृपालः ।
वह्निशस्त्रजनितध्वनिसारैर्वारयन्नरिजनानिव रेजे ॥ ४६ ॥

[इति प्राकारवर्णनम्]

राजवर्त्म विरराज नगर्याः सर्वदिक्षु विपणिस्थललक्ष्यैः ।
खेलनाय किल मण्डललक्ष्म्याऽधायि शारिफलमस्य मिषेण ॥ ४७ ॥
सर्वतो मुखमिदं सविशेषं विस्तृतं कनकरत्नगणाऽऽढ्यम् ।
विश्वमण्डलसमापतदुद्यत्सिन्धुजाभिगमजातरुचीव ॥ ४८ ॥
तोरणीभवदुडुप्रतिबिम्बा धोरणीह शुशुभे विपणीनाम् ।
पङ्क्तियुक्तिधृतमानविमानखर्जयाय विहितोन्नतमौलिः ॥ ४९ ॥

वाससां क्वचन शुक्लतमानां तेजसा सुरधुनीव पुनीते ।
दर्शनोत्सुकनृणां नयनानि सोल्लसत्तुरगतुङ्गतरङ्गा ॥ ५० ॥
व्यक्तरक्तवसनास्तरणेन शोणतामधिगता क्वचनेयम् ।
वाहिनीं नु विधिना जनितां सा जेतुमुद्यततया ध्वनिमाधात् ॥ ५१ ॥
आपतद् गजघटाऽऽकुलभावाद् राशिभिर्मृगमदस्य तथोच्चैः ।
क्वापि सूर्यदुहितुर्द्युतिगर्वं सङ्कुलः सकलमप्यपजह्रे ॥ ५२ ॥
साधयन्तु चतुरः पुरुषार्थानत्र चित्ररुचयश्चतुरेभाः ।
सर्वतोमुखतया विपणीनां श्रेणयो बभुरितीव चतस्रः ॥ ५३ ॥
दूरतः प्रययुरापणराज्या आकृतिद्युतिभरैरनया द्राक् ।
निर्जिता इव हरिन्नृपतीनां लज्जया क्वचन राजनगर्यः ॥ ५४ ॥
आभिमुख्यजनितप्रतिबिम्बाद् रत्नभूमिषु पदार्थगणस्य ।
क्रायको भ्रमवशादितरस्मिन्नापणेऽत्र गमनेऽपि फलाढ्यः ॥ ५५ ॥
स्वर्णरूप्यमयपुञ्जितमुद्राव्याजतः किमिह राजसवित्रोः ।
रश्मयः सततविस्मयवृत्त्या सुस्थिता रुरुचिरे चिरमस्याम् ॥ ५६ ॥
सङ्कुलेऽतिविपुलेऽपि जनौघात् सङ्कुले किल मिथः परिमर्दात् ।
भूषणात् प्रपतयाल्लुमणीनां वृष्टिरेव निकरैर्निरधारि ॥ ५७ ॥
भूभुजामपि भुजार्जितवित्तैर्विस्मयाय वणिजो विपणिस्थाः ।
रेजिरे पुरि वरीतुमिवाप्तास्ते स्वयंवररमाः परमार्थात् ॥ ५८ ॥
श्रेणयः किमु परस्परशोभादर्शवन्मणिमया विपणीनाम् ।
तुल्यरूपविभवाद् भ्रमहेतुर्ग्राम्यविभ्रमवतीषु बभूवुः ॥ ५९ ॥
विस्तृता इव भुजाः पुरलक्ष्म्याः सर्वतोमुखतया जनरथ्याः ।
यत्र तत्र निदिशन्ति विमध्यं नागरं विविधवास्तववृत्त्या ॥ ६० ॥
दक्षिणादिशि दशास्यपुरीयं सुप्रभाऽपि नगरोत्तरदेशे ।
पूर्वतः स्फुरति पर्वतभेत्तुर्वारुणं पुरमिहापरभागे ॥ ६१ ॥
वर्णितं न कविना भविना वा केन नाश्रितमिदं पुररत्नम् ।
एवमाह सकलास्वपि दिक्षु विस्तरन्निह चतुष्पथघोषः ॥ ६२ ॥

[ इति श्रीजिहांनावादनगरचतुष्पथवर्णनम् ]

यत्र चित्रकृतचित्रपवित्रराजसौधधवलद्युतिवृन्दैः ।
निर्मलीकृतपयास्तनयार्कस्योन्मुखीभवति नामरसिन्धोः ॥ ६३ ॥
राजसौधशिखरैर्ननु हैमैस्तर्जितः सुरगिरिर्नु निनङ्क्षुः ।
शूरराजधिषणप्रमुखैः किं रुध्यतेऽस्य परितो भ्रमभङ्ग्या ॥ ६४ ॥
रत्नराशिरचितैर्नृपसौधैः प्रेक्षको हृतमना इव सर्वः ।
रोहणाचलरुचिं विमुमोच शोचते न लघुमभ्यधिकासौ ॥ ६५ ॥

उच्चतां नरपतेर्निलयास्ते शूरराजवसुसंपदमग्रे ।
संग्रहीतुमिव केतुकरैः स्वैर्भेजिरेऽजिरमणीरमणीयाः ॥ ६६ ॥
पातिसाहिसदनेष्वनुरूपं रूपमद्भुततयाऽप्रतिरूपम् ।
किं विमृश्य रविजातिगभीरा वीक्षते शफरिकापरिवर्त्तैः ॥ ६७ ॥
राजराजधृतराजतपट्टवेश्मविस्मयकरद्युतिपुञ्जैः ।
तर्जितो हिमगिरिर्गलतीव पूज्यतामुपगतोऽपि पुरारेः ॥ ६८ ॥
भूपसद्मनिवहः स्वसुरूपं न न्यरूपयदयं भुवनेऽपि ।
तद्दिदृक्षुरिव मङ्क्षु कलिन्दकन्यकापयसि बिम्बमधत्त ॥ ६९ ॥
सार्वभौमरविमुख्यगृहस्य छत्रतां कलयतेऽम्बुजबन्धुः ।
पूर्णिमा हिमकरद्युतिसाधुमाधुरी भजति चामरवृत्तिम् ॥ ७० ॥
पूर्वयोदयगिरिः परयाऽऽस्तभूभृदुत्तरदिशा हिमशैलः ।
आदधे मलय एवमपाच्या राजसौधमिति मध्यभुवाऽपि ॥ ७१ ॥
आगमेऽभ्युदयभूधरशृङ्गे ज्योतिषामहिमगुप्रभृतीनाम् ।
मङ्गलं भवति दर्पणरूपे पातिसाहिसदने स्वविलोकात् ॥ ७२ ॥
विस्तृतत्रिभुवनक्षितिभर्त्तुर्यद् यशः सुरतरुगरिमाढ्यः ।
तस्य मूलमनुकूलतयैतद् भासतां सदनमप्यलधीयः ॥ ७३ ॥

[ इति श्रीपातिसाहिगृहवर्णनम् ]

श्रेष्ठिनां सदनसंततिरस्यां भूपसौधपरिवारतयैव ।
रामणीयकमधाद् बहुधा तु धातुमुख्यमणिजन्ममयूखैः ॥ ७४ ॥
अस्ति यत्र विबुधः सकलोऽपि दिव्यरूपवसनाभरणेन ।
नेह गेहरचनासु विमानशोभया भजति कश्चन चित्रम् ॥ ७५ ॥
पर्वतैः किमिव पर्वतभेत्तुः सर्वतः सपदि शङ्कितचित्तैः ।
स्थापितानि शिखराणि विमृश्य निर्भयस्थलमिदं गृहरूपात् ॥ ७६ ॥
तुङ्गतामधिगताः स्वविभूनां जाति-धर्म-धन-भाग्यमहत्त्वैः ।
उज्ज्वला इव तदध्यवसाये रेजिरेऽत्र निलयाध्यवसायैः ॥ ७७ ॥
कामकेलिललितेष्वबलानां साहसाद्भुतरसेन निवासाः ।
स्थैर्यमभ्युपगता इव गुञ्जन्मर्द्दलध्वनिभिरेव विनेदुः ॥ ७८ ॥
दह्यमानबहलागरुधूपादुद्भवद्बलयसत्कलयेव ।
छत्रिणः स्फुटचलाचलकेतुचामरैर्बभुरमी नृपतुल्याः ॥ ७९ ॥
चान्द्रसान्द्रजलनिर्झरणेन क्षीरसागरतरङ्गनिषक्ताः ।
आलयाः कमलया सहयोगस्तेषु युक्ततर एव नरस्य ॥ ८० ॥
कामरागवशतः सुमनोभिः कामरा विदधुरालयलीलाम् ।
पामरा इव तदीक्षणलुब्धा नामरा विदधते दिवि वासम् ॥ ८१ ॥

सद्मनां शिखरवृद्धिविशेषैरम्बरेऽम्बरमणिर्दिनमध्ये ।
दृष्टनष्ट इव याति वधूनां भोगभङ्गभवशापभियेव ॥ ८२ ॥
आतपे प्रसृमरेऽपि गृहाणामुन्नतेर्भवति धार्मिकलोके ।
दीर्घिकाकमलकोमलकोशोद्धट्टनादिव दिवाकरबोधः ॥ ८३ ॥
पातिसाहिमहसामिव तैक्ष्ण्याद् भीतभीत इव शीतविनोदी ।
भास्करो न कुरुते करपातं भूतले सदनमूर्द्धनि रुद्धः ॥ ८४ ॥
सद्मनां कनकरत्नविभूतेर्द्रष्टृदृग्जनितदोषविघातः ।
बाललालनकपोतकपोतैर्न्युञ्छनभ्रमिभरेण विधेयः ॥ ८५ ॥

[ इति व्यवहारिगृहवर्णनम् ]

तस्थिवानिह निदेशनरेशस्तेजसाऽऽहृतसुखाभिनिवेशः ।
कारयन् नयपथप्रथिमानं वारयन् जगति दुर्ण्णयवृत्तिम् ॥ ८६ ॥
श्रीजिनेश्वरदिनेश्वररोचिःसंचयाद् धवलिताम्बररुच्या ।
वर्जिता जनदिगम्बरवृत्तिः स्त्रीविमोक्षसुमतिः प्रससार ॥ ८७ ॥
व्याहृतौ हि किल केवलभाजां निश्चयः प्रववृते श्रुतियोगात् ।
सर्वतः सुमनसां प्रतिबोधे सङ्गतैव मधुपायिनि वृत्तिः ॥ ८८ ॥
नोपरागविदशा* कमलानामाकरेषु धनवत्सु रसेन ।
नो जडात्मनि रुचिर्द्विजराजे नो पलादनमनःप्रतिचारः ॥ ८९ ॥
तत्र रात्रिभुजि कर्मविरामे प्रौढशीतलरुचेरपि रागः ।
साधुतोपकरणाऽऽश्रयभाजां सन्नयानयविवेकमधत्त ॥ ९० ॥
कामचारविरतिर्जनतायास्तन्निमित्ततमसां विलयेन ।
सङ्गमे सवयसां हि विभाषावेदिनां समभवद्धितबोधः ॥ ९१ ॥
पापकर्मणि परं बहुलाभे भाविताऽऽत्मसुधियो विनिवृत्ताः ।
ब्रह्मणो ह्युपनयान्निजशीले दार्ढ्यमेव स मधुर्मधुराङ्गाः ॥ ९२ ॥
सद्गुरोश्चरणभारविवोढुः पावनं विदधिरे स्ववराङ्गम् ।
प्रत्यहं भजन-वन्दनकृत्यैः श्रद्धयैव सुदृशोऽकृशरागाः ॥ ९३ ॥
आचकर्ष समयप्रतिपत्तेरङ्गचालनपटुः परमार्थम् ।
गोरसान्मथनिकामतिरुच्चैस्तत्क्षणेन गुरुदर्शनचारुः ॥ ९४ ॥
स्पष्टमार्गमधिगत्य धनस्य पुष्टयेऽस्य भवनेऽथ वने वा ।
रक्षकोऽपि निवसन्नसुभाजोऽपालयत् खलमुदस्य दयार्द्रः ॥ ९५ ॥
सर्वथाऽप्यशिवबुद्धिनिषेधः स्वीयधर्मविविधव्यवसायैः ।
आहृतः पुरजनेन दयायाः स्वोदयाय हृदयेऽभिनिवेशात् ॥ ९६ ॥
रेजुरुन्नतकरा नगरान्तःसंचरिष्णुवरदानि महेभाः ।
गर्जितैः प्रसृमरैरदसीयैस्तर्ज्यते जलधरोऽप्यतिधीरैः ॥ ९७ ॥

* P °दिशा ।

आतपः प्रववृते शुभकार्यमात्मनां समुपदेष्टुमिवेष्टम् ।
सिद्धसाधनधियः पुरलोकास्तद्‌व्रताय परमोद्यममीयुः ॥ ९८ ॥
काललब्धिवशतः परमार्थप्राप्तिरित्यलसदेहिमतार्थम् ।
सज्जनास्तमवमत्य कृतार्थं स्वं व्यधुर्जपतपोव्रतयोगैः ॥ ९९ ॥
देहिनां प्रतिहतं भुवि जाड्यं स्वार्थसाधनमहोद्यमयुक्त्या ।
व्याहृतेन किल बोधिकराणां स्वाप पापचरितं विनिवृत्तम् ॥ १०० ॥
सौरगौरमहसि प्रतिपन्ने गौरवं स नगरे प्रचकार ।
देशरूपमतिदेशसरूपः श्रीगुरोरिति निदेशनरेशः ॥ १०१ ॥
[ इति प्रातःकालविधेयधर्माचरणयोर्द्व्यर्थतया वर्णनम् ]
तत्र सोत्सवतया चतुरोऽयं तान् व्यतीत्य चतुरोऽपि च मासान् ।
पूर्वदिग्विजयसाध्यनियुक्तस्तत्पुरोऽथ पुरतः प्रचचाल ॥ १०२ ॥
अध्वनि ध्वनितजैनविधानः कापथप्रमथनप्रणिधानः ।
भव्यचेतसि महोदयदायि नन्दयन् सुकृतधाम जगाम ॥ १०३ ॥
उग्रसेनपुरमुग्रमहिम्ना तस्य दर्शनसमुत्सुकलोकम् ।
आगमश्रुतिरसाद् धृतरागमुल्ललास कमलाऽऽकरयुक्त्या ॥ १०४ ॥
अर्गलापुरमनर्गलतेजोनिस्सपत्नबहुरत्नसमूहैः ।
स्वर्गराजनगरस्मयवार्त्तास्वर्गलाकरणमेव विभाति ॥ १०५ ॥
सर्वतो जनपदैर्निजसारं प्रेष्यते शकटपूरणयाऽस्मिन् ।
प्रेष्यकानिव विशिष्य विभुषा काञ्चनैश्च बरिभर्त्ति पुरं तान् ॥ १०६ ॥
मण्डनं सकलदिग्युवतीनां स्वःपुरस्य दृढसौहृदपात्रम् ।
संगमस्थलमिदं कमलानां सर्वदेवनगरं प्रतिभाति ॥ १०७ ॥
राजराजनगरं नगरन्ध्राण्यध्युवास कृतकिन्नरवासम् ।
शोभया जितमनेन पुरेणाऽष्टापदैः प्रतिपदं निभृतेन ॥ १०८ ॥
या दशास्यनगरस्य पुराणां द्वापरे परिणते सुषमाऽऽसीत् ।
यादसाऽस्य नगरस्य पुराणामंशुजालजलधेः सदृशी सा ॥ १०९ ॥
यन्महे सकलभादिविशेषः प्रेक्ष्यते स तु न भोगिनगर्याम् ।
यन्महेशकलभादिविशेषस्तन्निमित्तमधिपः स हि तस्याः ॥ ११० ॥
द्रव्यभावघनवासनयाथैंः श्रावकैः परिचितं पुरमेतत् ।
द्रव्यभावघनवासनयाथैंस्तत्सतो न हृदतो विरमेत ॥ १११ ॥
आस्तिकाः सुकृतिकृत्यविविक्ताः सेविताः स्वसुरताशयभावैः ।
आस्तिकासुकृतिकृत्यविविक्ता सेविता स्वसुरताशयभावैः ॥ ११२ ॥
पूर्ववर्णितपुरं हि यदीया वर्णिकेव हृदि भाति कवीनाम् ।
तत्पुरस्य नु चिरस्य सदस्यः कः प्रपश्यति न वृत्तविशेषम् ॥ ११३ ॥
यत्पुरन्दरपुरं वपुरन्तः पुष्करं करकरम्बितमाधात् ।
तत्पुरस्त्रपितमेव पुरोऽस्याः सौष्ठवभ्रममिवावितुमेव ॥ ११४ ॥

सुन्दरं यदि पुरन्दरधाम स्यादितस्तदिह शून्यपदे किम् ।
तत्प्रजा अपि च मन्दरभूभृत्कन्दरेषु कृतमन्दिररागाः ॥ ११५ ॥
विभ्रमादिव पुरेक्षणजन्यान्निश्चला हि सकलावयवेषु ।
पुत्रिकाकपटतोऽप्सरसस्तन्निर्निमेषनयना इह तस्थुः ॥ ११६ ॥
राजधाम्नि भुवनेऽपि महत्त्वं तत्त्वतः प्रभवति स्म कुतस्त्यम् ।
शङ्कयेऽतिविगतं नगरेऽस्मिन् वीक्षणेन नृपवासवधाम्नाम् ॥ १०७ ॥
कौशिकः स खलु कौशिक एव यन्नृपस्य महसा सहसाऽऽसीत् ।
प्राप्य जीवति कथञ्चन भिक्षुर्दक्षिणां प्रतिदिनं यमराजः ॥ ११८ ॥
तन्निवासनगरस्य मयूखारोपमर्हति कदाऽपि न पूषा ।
स्पर्द्धते किमु सुराशनयूषा गोपयःप्रभृतिपेयविभूषा ॥ ११९ ॥

[इति आगरानगरवर्णनम्]

दर्शयन्ति फलदा इह बीजं मार्गणानुपवने पुरबाह्याः ।
शिक्षिताः पुरजनादिव दानं गौरवाय सुलघोरपि वक्तुम् ॥ १२० ॥
ब्रूमहे लघुफलानि गुरुत्वे लाघवेऽपि भवतां गुरुदानम् ।
उन्नमय्य विनमन्ति तटस्थान् पादपा इति धिया किमु पौरान् ॥ १२१ ॥
वीरुधस्तनुतरा अपि दध्युः काञ्चनाप्यतिमहान्ति फलानि ।
तद्गुणेन शिरसाऽपि रसालास्ताः परं निदधते फलभाजः ॥ १२२ ॥
शिक्षिताः क्षितिरुहः पुरलोकाद् दानधर्ममिव बाह्यवनस्थाः ।
उच्चतां ययुरतः सुमनोभिः शोभिताः परिवृता गुरुपात्रैः ॥ १२३ ॥
दानशौण्डचरिते किल पत्रालम्बनं विदधते वनतालाः ।
सर्वतोऽप्युपवनं क्षितिजानां तन्महोच्चशिरसो रसपूर्णाः ॥ १२४ ॥
पक्षिणामिव रुतेन वनालीरक्षिणां सबहुमानमनूद्य ।
दक्षिणां प्रददते फलपुष्पैः पक्षिणां कृतमुदस्तरवस्ते ॥ १२५ ॥
उच्छ्रिता इव दिवस्तरुवर्गं जेतुमीहितफलार्पणशक्त्या ।
शाखिनोऽर्थिनिवहे स्फुटरागाः पल्लवैरुपवनेषु विरेजुः ॥ १२६ ॥
ते द्रुमा अपि च विद्रुमभासः पल्लवैर्धृतविपल्लवभावाः ।
नीरसं पदमिताः सरसत्वान्मोदमादधुरतो मधुयोगे ॥ १२७ ॥
भोजनेषु सुहृदां विपिनान्तस्ते जनेषु मिलितेषु यथेच्छम् ।
मोदकार्पणकलामुपलभ्य शाखिनोऽपि ववृधुः फलराजिम् ॥ १२८ ॥

[इति उपवनवर्णनम्]

भूरुहामुपवनेषु महत्त्वं पात्रसंगतिरसे बहुशाखाः ।
वीक्ष्य दानरुचिरुन्नतयैव स्पर्द्धयेव ववृधे धनभाजाम् ॥ १२९ ॥
यत्र सौधशिखरेषु खरांशोर्वाजिनः स्खलनशङ्कितयोच्चैः ।
उत्प्लुतिव्यसनिनः प्रणालान्तर्लङ्घयन्ति ससुखं शुचि मासे ॥ १३० ॥

उल्लिलङ्घिषुरिव स्वरथस्य चक्रमेकममरोदहिमांशुः ।
वाजिसप्तकमुदीर्य्य बलेन यानमुष्य नगरस्य समीपे ॥ १३१ ॥
हर्म्यमूर्ध्नि विरहार्त्तवधूभी राज्ञि राहुरुचिसंस्करणाय ।
उज्झितो मृगमदस्य विलेपस्तेन नीलवपुषोऽर्कतुरङ्गाः ॥ १३२ ॥
यत्र तुङ्गगृहशृङ्गनिविष्टसुन्दरीक्षणभवस्मरतापात् ।
याति दक्षिणदिशं मलये चुरुत्तरां (?) हिमगिरिस्थितयेऽर्कः ॥ १३३ ॥
यत्र वाहनमृगान् मृगनाभेराग्रहाय कृतगीतवधूभ्यः ।
रक्षितुं कथमपीह तमिन्दुर्धत्तवान् द्विजप इत्यभिधां स्वाम् ॥ १३४ ॥
आलया ध्वजपटोद्धटनेनामन्त्रयन्ति जलदानिव दूरात् ।
उद्यते बहुजने वितरीतुं यत्र दानकरणाध्ययनाय ॥ १३५ ॥
दातृभिर्जलधरा इव धारायन्त्रवेश्मसुकृताः सुकृताऽऽढ्यैः ।
नर्मदा इव सदा जलमार्गैस्संनिपत्य विलुलन्ति पुरस्तात् ॥ १३६ ॥
चान्द्ररत्नविगलज्जलवेण्या यत्र पौरनिलया घनरूपाः ।
प्रस्फुरन्ति चपलाश्चपलाक्ष्यस्तेषु सांप्रतमितो घनरूपाः ॥ १३७ ॥
यत्र वेश्ममणिधोरणिभासा पीनतामुपनतां परियन्ति ।
ज्योतिषां वसतयो भ्रमिभावस्पष्टतष्टरुचयोऽपि तथैव ॥ १३८ ॥
निःसपत्नरविरत्नगणेभ्यो निस्सरद्धनधनञ्जययोगात् ।
जाड्यमीषदपि नात्र नराणां तेन तेजसि न संशयलेशः ॥ १३९ ॥

[ इति आगरानगरनागरभवनवर्णनम् ]

निर्जिता जलमुचः शुचिदानाभ्यासतः शतश एव महेभ्यैः ।
विद्युतां द्युतिभरस्य वधूनां तर्जनेऽङ्गमहसो न विकल्पः ॥ १४० ॥
निश्चयः प्रतिगृहं कमलायाः सर्वतोऽपि पुरुषोत्तमलाभः ।
चित्रमत्र मधुमित्रनिवासे नो मनागपि रतिप्रतिपत्त्या ॥ १४१ ॥
उल्लसत्सुमनसामिह वृन्दैः सौरभातिशयकार्यनियुक्तैः ।
बोधशालिभिरनुस्थलवृत्त्या धर्मकामविभवः परिभाव्यः ॥ १४२ ॥
मण्डलं जयति रत्नकराणां यत्र निस्तुलकलापरिपूर्णम् ।
मार्गसंगमधृतामृतयोगं पुष्टयेऽङ्गजमहोदयलक्ष्म्याः ॥ १४३ ॥
यत्र वैश्रमणसन्निधिभाजां शुद्धपुण्यजनमण्डलराजाम् ।
प्रास्तपूर्वदुरितं चरितं द्राग् दिव्यमोहमुपगीतमधत्त ॥ १४४ ॥
भोगिनः प्रतिपदं विलसन्त्यन्योऽन्यसौहृदजुषो विबुधास्ते ।
भूषणं परुषपौरुषभाजां तज्जगत्रयमयं पुरमेतत् ॥ १४५ ॥
ईश्वरा वपुषि कामविकल्पैः पार्वतीं निदधते दृढवृत्तिम् ।
या पिनाकसुषमाविषमा सा तैः श्रिता प्रतिदिनं गुणयोगात् ॥ १४६ ॥
लक्ष्मणा बलभृतश्च सुमित्रानन्दना विनयिनः सहरामाः ।
सज्जना हि निवसन्ति ततोऽस्यां नो कलिः कलयते किल वृत्तिम् ॥ १४७ ॥

आस्तिकाय सुविमर्शनदक्षा आस्तिका यतिकुलस्यसपक्षाः ।
नास्तिकानपि रयाद् विजयन्ते नास्तिका नयरुचिस्तदमीषाम् ॥ १४८ ॥
सौरभावनिचितैर्बहुशाखा विस्तृतैर्विविधपात्रसरागैः ।
आगमेषु विदितैर्बहुसद्भिर्यत्र भान्ति भवनानि वनानि ॥ १४९ ॥

रम्भाभिः परिशीलितं मृगदृशां दम्भाचिरं भावना-
हेतुः केतुशतैः शतक्रतुपुरं जेतुं श्रियाऽभ्युद्यतम् ।
वीक्ष्यैतन्नगरप्रपातजलधौ लङ्काकलङ्काप्लवद्
लीना किं नगरन्ध्रमध्यमलका माधुर्यवैधुर्यतः ॥ १५० ॥

सूरेः शासनपाकशासनमिह प्राप्तं विमृश्याऽऽदरात्
पौरा गौरवहेतवे समुदिताः सर्वेऽभिजग्मुस्तदा ।
तेन श्रीजयवाहिनीव समभूदुत्साहिनी भूषिते-
राजद्वाजिगजेन्द्रराजिविबुधश्रेणैः प्रसादोदयात् ॥ १५१ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
नगरवर्णनो नाम दशमः सर्गः ॥

॥ श्रीरस्तु प्रस्तुते वस्तुतः ॥

## एकादशः सर्गः ।

अथ जिनपथं तथ्यैः पथ्यैर्वचोभिरिहोन्नयन्
कथमपि नृणां मिथ्यामोहं विमथ्य समर्थधीः ।
सपदि सुदृशां द्वेधा चक्रे महोदयसाधन-
मयमतिशये सौरस्फारप्रभावविभावसोः ॥ १ ॥
असमतमसां नाशादाशाम्बरस्थितिरुज्झिता
ग्रहकरगणैः पद्मिन्योऽपि प्रबोधसुधामधुः ।
सदसि रसिकश्चक्रे वक्रेतरः समयक्रियां
रुचितमुचितं विश्वस्यान्तःसितच्छदमण्डलम् ॥ २ ॥
भणितमभवद् व्याहारस्य प्रियं त्रिजगत्प्रभोः
सहृदयजनोन्निद्रीभावः सुमागधभाषया ।
भवपरिणतान्नाट्यप्राकट्यतः स्वत एव सा
जगति जनता वृत्तिं मत्वा विरागदशामगात् ॥ ३ ॥
ललितगतयो मुक्ता स्थाणुं घना भवनाङ्गणे
प्रययुरमलां पातुं तीर्थेश्वरेरितगोसुधाम् ।
प्रकटितमहाकर्षात् तर्षाद् युता वरसौरभै-
स्तपसि महिषीरूपा नार्यः प्रपीनपयोधराः ॥ ४ ॥
ध्रुवमुपनते श्रित्वा मार्ग्गं कलाधरमण्डले
दिशमवसरज्ञानां मुख्ये परं जनवल्लभाम् ।
अनियततमां मत्वा तत्त्वाद् वसुप्रभुतां जना
इह सुमनसः सर्वे दानोद्यता द्युतिमूहिरे ॥ ५ ॥
उदयिनि गवां भारे स्फारे प्रभाकरसूचिते
भुवनवलये मार्गामार्गप्रकाशमुपेयुषि ।
सुकृतपटुतां सभ्या लभ्यां गुरोः परिचर्यया
समयनिपुणाः कारंकारं गुणाऽऽश्रयतां ययुः ॥ ६ ॥
मनसिजरसं सर्वं मत्वाऽवमत्य दृढव्रता
मनसिजरसं भव्या विश्वेऽनुभाव्य सदाऽनुगाम् ।
कमलसदृशां चेतोवृत्तिं विधाय विबोधिनीम्
कमलसदृशां सङ्गं मुक्त्वा न धर्ममशिश्रियन् ॥ ७ ॥
धरणिवलये सौरज्योतिर्भरैर्दृढरागता
भृशमुदयिनी जज्ञे प्राज्ञे ततो जिनपूजने ।
विषममगमच्छोषं दोषाकरस्य विजृम्भितं
निबिडजडताहेतुर्मारिप्रचारनिवारणात् ॥ ८ ॥

कतिपयदिनस्थित्याऽऽदेशप्रभुः सुमनःप्रियः
क्षणकरणतः सर्वानीतिं व्युदस्य सदस्यतः।
जिनमतमतः शिक्षाकल्पादिनाद्भुतमुन्नयन्
विनयिनयनाऽऽनन्दी वन्दीडितः शुशुभेतमाम् ॥ ९ ॥

[ इति आगरानगरविजयवर्णनम् ]

मधु मधुरिमप्रागल्भ्येन भ्रमद्भिरलिव्रजै-
र्विजयसमयप्रज्ञप्त्येवाभिनीतजयाऽऽरवैः।
स विभुरचलन्नुन्नः पुर्या जयश्रियमुद्वहन्
विविधनिनदद्वाद्यैः सद्यः समं कृतमङ्गलः ॥ १० ॥
अवसरवशात् प्राप्तं सौरं महः समहामह-
महमहमिकावेशादेशाद्विवेक्ष्य रवेः सुता।
चपलकलिकाहस्तैः शीर्षे विवोढुमिवोल्लसद्
वहनमुचितं तस्यादेशप्रभोः पुरतो ददौ ॥ ११ ॥
पुरजनवधूस्नानैः पानैः परोपकृतौ पटोः
कथमिव गतिर्नीचैर्नूनं ममेति पुरो गुरोः।
तरणितनया प्रष्टुं पादप्रसादमवाप्य किं
नमनमनसा भक्तेस्तवोल्ललास विलासिनी ॥ १२ ॥
जडपरिचयाज्जाग्रत्तेजोनिधेर्दुहितुर्मम
द्विजजनघनस्नानोद्भूतान्मलादिव कालिमा।
भवतु सहसा पूरे दूरे क्रमाम्बुजसंगमा-
दिति रसभराद् वीचीहस्तैर्ननर्त्त पुरोऽस्य सा ॥ १३ ॥
हरिरिह पुरा गम्यां रम्यां चिरं चकमे रसाद्
विषयविवशस्तद्देहस्य द्युतिः स्तुतिभाजनम्।
दृढतरबहुप्रीत्याऽद्यापि व्यमोचि न साऽनया
तदयमुदयत्यन्तर्नीरं परं नवनीलिमा ॥ १४ ॥
सुरपुररिपू कामं कामोदयेन सरिद्वरा-
मभिललषतुस्ताभ्यां रेमेऽनयांऽङ्घ्रिशिरःस्थया।
उपपतिसदृग् वेषाद् द्वेधाऽभिसारिकया ततो
द्वितयमभवत् कालन्द्येकाऽपरा हरशेखरा ॥ १५ ॥
गुणपरिणता वेणी वेणीदृशो वसुधाकृते-
स्तपनतनया हंसोत्तंसप्रसूनविदर्भिता।
रमणविषयप्रावीण्यं किं न दीपयति स्म सा
पुलिनजघनद्वैतं वेगक्रमात् स्पृशती सती ॥ १६ ॥

उभयतटयोर्हंसश्रेणी गरुच्चलचामरै-
र्जनितविभुताऽस्तोकैः कोकैरलङ्करणान्विता ।
मिलदलिपयोजन्मप्रेक्षाविचक्षणचक्षुषी
विबुधमनसां व्यामोहायोद्यतेव रवेः सुता ॥ १७ ॥
तटपरिसरस्नानक्रीडापराम्बुजलोचना
चलनकटकाऽऽरावैर्वादे जिता वरटाङ्गजाः ।
तृणमिव बिशं भोज्यव्याजान्मुदा दधते मुखे
कृतवसतयोऽमुष्यां चर्यां स्त्रिया इव शिक्षितुम् ॥ १८ ॥
मदकललसद्रामा कामाशयानुगपक्षिणां
बिशकवलनैः संभोगार्थं कृतोद्वलनैः शनैः ।
रसपरिणतिस्तस्यां वश्यां करोति मृगीदृशां
सपदि पदिकाः पार्श्वं तेन त्यजन्ति न कामुकाः ॥ १९ ॥
विहगमिथुनक्रीडावीक्षावशादिव सत्वरा-
न्तरपरिगतान् शैलान् मुञ्चत्यगम्यधिया रयात् ।
जलनिधिमधिप्राप्तुं स्मेरस्मराऽऽशयनोदिता
दिनकरसुता यान्ती लोकैर्व्यलोकि रसोद्धुरा ॥ २० ॥

[ इति यमुनानदीवर्णनम् ]

स्वयमपि तदादेशाधीशोऽध्यक्षदक्षधी-
र्वहनमचिरात् प्राप्तुं पारं जयी विजयान्वितः ।
ललितयुवतीगीतैः सूरेर्यशोभरदर्भितै-
र्निगदितमहामाङ्गल्यश्रीः सरिच्चरितोन्मनाः ॥ २१ ॥
सरसनयनप्रेक्षापादप्रसादततटस्थता-
हृदयधरणैः संभाव्यैनां हसत्कमलाननाम् ।
पुरमथ पुरः प्रादक्षिण्यात् प्रविश्य यथेप्सितं
विजयविधिनाऽऽदेशाध्यक्षस्तदा मुमुदेतराम् ॥ २२ ॥
परिकरयुतः प्राप्तं पारं विलोक्य तमञ्जसा
गगनजलधेः पारं लेभे सहस्ररुचिः समम् ।
विमलमनसां नैव न्याय्या निशाचरता सता-
मिति धृतमतिः स्वस्मिंस्तस्मिन् विमृश्य सुवृत्तताम् ॥ २३ ॥
मदननृपतिः सज्जीचक्रेऽश्विनीप्रभवद्युतिं
मदपरिणतेः पुन्नागानां वशाबलमग्रतः ।
द्विजपतिपुरस्काराद् दोषाशनैर्ध्रुववारुणी
रुचिपरिचयो नृणामासीत् ततः सुदृशां मतः ॥ २४ ॥

गतवति रथे भानोस्तस्मिन् क्षणे विशरारुतां
स्खलनकरणाद् वारुण्याशाधिपानवशाद् गिरौ ।
समुचितमतो लोके जज्ञे रथाङ्गविघट्टनं
कलकलरवस्तद्दुःखेनाऽऽकुले नु वयःकुले ॥ २५ ॥

सपदि विरहभ्रान्त्या स्त्रीभिः समं तरुमाश्रिते
द्विजवरगणे तत्स्पर्शोत्थाद् रसान्मिलितेक्षणे ।
द्विजपतिरपि छायान् पायान्मदारुणदीधितिः
स्मरपरवशो दिग्नारीषु ध्रुवं करमक्षिपत् ॥ २६ ॥

स्मरविलसितं राजन्येवं विमृश्य रसादिव
समयचतुराः कामिन्योऽपि प्रियाऽऽलयमाययुः ।
प्रकटितरसाऽऽश्लेषं वेषं विधाय मनोभुवो
भुवनवलये राज्यस्यैकातपत्रबलोदयात् ॥ २७ ॥

उपहितमिव द्वन्द्वाधानं विचिन्त्य मनस्विनाऽ-
भ्रियत हृदये प्रोत्साहश्रीस्तदा सुरताशये ।
करसरसिजप्राप्तां रम्भामिवाम्बुजलोचनां
समुदितरसोल्लासात् सद्योऽनुकूलयितुं धिया ॥ २८ ॥

मतिमनुनयन्नूनं प्राणप्रिया चरणाग्रहे
सरसवचनोद्गारं धीरः पिबन्नधरामृतम् ।
हृदयनिहितं मानं चूर्णीचकार स कञ्चुके
हततरकरक्षेपाद् भूमीपरिग्रहमण्डले ॥ २९ ॥

ललितवपुषैकान्ते कान्ते स्वकाननचुम्बिनि
पुलककलिकोन्मेषाऽऽश्लेषादिवैक्यमुपेयुषी ।
स्मरशरभरोद्भेदान्मूर्च्छाश्लथावयवा निशि
चतुररमणी कस्यावश्यं न वश्यमधान्मनः? ॥ ३० ॥

चिरविरहजं दुःखं प्रत्यादिदेश निदेशकृद्
विविधवचनन्यासैर्हासैर्विलासकरः प्रियः ।
सपदि हृदये तन्वावेष्टुं वधूरवधूतभी-
स्तत इव लघुर्लग्ना कण्ठे चिरं बुभुजेऽमुना ॥ ३१ ॥

कुसुमशयनादुच्चैर्नीत्वा धृता भुजयोर्युगे
मुदमुदवहद् भार्या विश्वाप्रियैरवलालिता ।
प्रणयविवशा भूषामाल्यादिके विगलत्यपि
न हि गणयति त्यागी रागी कदापि वसुव्ययम् ॥ ३२ ॥

† P "वे रत" ।

दृढतरगुणग्राहेऽन्योऽन्यं जने विषमेषु भू-
समरसहिते विद्धे सिद्धे ततस्त्रिजगज्जये ।
प्रतिगृहमधुर्दीपाद् द्वीपाधिपोत्सवसंभव-
त्तिलकललितं तारास्ताराक्षताचरणं दिवि ॥ ३३ ॥
जगति स गुणग्रामा रामा प्रसाधितकुन्तला
सजलजलरुण्मालाधाना समाश्रितकौशला ।
रुचितविषया मध्ये क्षामा लसन्मधुराधरा
सहृदयजनद्वन्द्वक्रीडारसे रुरुचे तदा ॥ ३४ ॥
रहसि हसितां सख्यो ब्राह्मीं प्रपद्य तया सह
प्रणयनिपुणः स्मारं स्मारं प्रयाणमनारतम् ।
विविधकरणाभोगाल्लभ्यं सभासुरताश्रमः
समयविधिनाऽऽदेशस्वामी भजन् बुबुधे सुखम् ॥ ३५ ॥
प्रवचनमहामातृस्थानानुजीविनि वल्लभाऽ-
नवरतसुखैर्दिग्यात्रायै जने विहिताऽऽदरः ।
कतिपयदिनान्यस्मिन् नीत्वा पुरे स पुरोऽचलद्
बलमविरलं पुष्णन् मोहप्रहारविहारधीः ॥ ३६ ॥

[ इति संप्रयोगमात्रवर्णनम् ]

परिणतगजः साक्षादुच्चैः सुमेरुरहर्निश-
मतिबलवतां नैवोल्लङ्घ्यः समाहितलक्षणः ।
गणपतिमनोऽभीष्टस्तस्य प्रयाणपुरस्सरः
समभवदलं गर्जन् मेघानुगामिरुचिस्ततः ॥ ३७ ॥
भुवि निहितदृग् जीवाघाताद् दिगम्बरमण्डले
ध्वनिजनितभीर्दुर्वादानामयं युवराजधीः ।
रविरिव पुरः पूर्वाचारप्रवृत्तिधरो बभौ
बलभरसहः संख्योऽसंख्योपदेशविधौ पटुः ॥ ३८ ॥
क्वचन विषमस्थानं मत्वाऽत्यजद् बहुधा वनं
क्वचन समतारागं नृणां विचार्य बहुस्थितिः ।
क्वचन वचनादेशाद् देशाधिपानपि मोदयन्
विदितसमयो धैर्यान्मेरुर्जगाम पुरःस्फुरन् ॥ ३९ ॥
करपरिगता सौरीयस्य प्रभा विशदस्थिते-
रुपनतगणोत्पत्तिर्भूयःकलाविकलाऽऽशयः ।
स दिनविषयां शुद्धिं राज्ञो गमागमसंमतां
मनसि विमृशन् स्पष्टीचक्रे समाननसाधनम् ॥ ४० ॥
चरणपटुतायोगाद् देशांस्तदेवमनेकशो
विषयविजयी न्यस्यंस्तत्त्वं वशीकुरुते स्म सः ।

मथितकुपथः सर्वां पूर्वाऽवनीमवनीपति-
प्रतिममहसा पुण्यां मार्गोदयादभिनन्दयन् ॥ ४१ ॥
पुरमथ पुरः पौरैर्गौरैर्यशोभिरलोभिभिः
परिसरसरद्गङ्गासंगादिवाऽऽश्रितमध्वनि ।
सुभगमगमन्नाम्ना धाम्ना प्रयागमनुत्तरं
मुदितमनसाऽऽदेशाधीशः प्रभोः प्रभयाऽभयः ॥ ४२ ॥
त्रिदशसरितोदीच्यां चञ्चत्तरङ्गपटाञ्चलैः
प्रणयकलया संभोगान्ते श्रमापगमे कृते ।
पुरि निवसतां यूनां नृत्यात् तरङ्गकरैर्मुदे
भवति तरणेः पुत्री भ्रातुः प्रियां दिशमास्थिता ॥ ४३ ॥
उभयभुजयोः स्थाने यस्याः पुरः सरितौ लस-
द्वलयकलया वीचीलक्षैः प्रपञ्चितकौशले ।
शिरसि वहते प्राकारोऽपि स्फुरन्मुकुटश्रियं
ननु तनुभृतस्तस्या वश्यात्मनो कुरुते न किम्? ॥ ४४ ॥
अलघुसदनैर्यत्रेभ्यानां कृताम्बरलम्बनै-
रुपगतरवेस्तापान्नैव क्षणं जनतासुखम् ।
इति कृतमतिर्वेधा द्वेधा सरिच्चलितोच्छल-
द्विमलसलिलैः शैत्यं तस्यां विधापयति स्वयम् ॥ ४५ ॥
दिवि सुरपुरं यन्माधुर्याद् विचार्य पराजितं
भुवि नरवपुर्देवैः स्थानं कृतं रुचिराजितम् ।
प्रणयवशतस्तेषामेषाऽन्वगादिव निम्नगा
तदिह तरवः क्रीडोद्याने बभुर्मरुतामगाः ॥ ४६ ॥
सकलहरितां मध्यं मेध्यक्रियाऽध्यवसायतः
समजनि पुरी तीर्थं व्यर्थीकृताखिलपातका ।
ऋषभचरणप्रत्यासत्त्या विवेकपरात्मनां
तुलयति न तद्दिश्या लङ्काऽलकाऽप्यनया नयात् ॥ ४७ ॥
नगरपटले धाम्नां सीम्ना पुरं नृपुरन्दर-
प्रतिममभितो लङ्कातङ्काऽलकादिनिषेवितम् ।
तदिह यमुना-गङ्गे सङ्गे प्रकीर्णकवैभवं
समनुभवतश्छत्रे साले विचालमुपस्थिते ॥ ४८ ॥
जिनदिनकरश्रेयस्तेजः प्रसृत्वरमद्भुतं
पुरि सुमनसां हृत्पद्मानां विबोधनतः श्रुतैः ।
परिणमयताऽऽदेशेशेन क्रमात् तटमीयुषा
सुरसरिदपि स्पृष्ट्या दिष्ट्याऽचिरादुपतुष्टुवे ॥ ४९ ॥

॥ अथ गङ्गाऽष्टकं यथा–

दीक्षायाः समयेऽभ्यषेचि विबुधाधीशैर्जिनेष्वादिमो
नाभेयो भगवान् पयोभिरमलैर्दुग्धाम्बुधेरुद्धृतैः ।
तद्धारा मधुराऽधरातलमलञ्चक्रेऽथ शक्रेडिता
सा गङ्गा जगतां मलापहृतये विभ्राजतेऽद्याप्यसौ ॥ ५० ॥
ईशानेन्द्रः शिरसि वहते तत्प्रवाहं जिनेन्द्रो-
र्भक्त्या ब्रह्माऽधिपतिरपि च स्वात्मपावित्र्यहेतुम् ।
हस्ते नीराऽऽचमनविलसद्भाजने संनिधत्ते
देवाः सेवारसपरवशा एवमस्याः प्रशस्याः ॥ ५१ ॥
येनास्याः पयसोऽधिपानवशतो राजाऽधिराजो बला-
ज्जेता बाहुबली बभूव भरतं भूवल्लभो वा न कः ? ।
सर्वज्ञेन परं व्रतं निदधता श्रीशम्भुनोवैर्धृता
सौभाग्येन सुमङ्गलाप्रणयिना गङ्गा सुनन्दा ततः ॥ ५२ ॥
सिद्धास्त्वज्जलपानतः कति यतिस्वाभाव्यभव्याऽऽशयाः
नो विद्यामनवद्यपद्यललितां प्रापुर्न बुध्याः कति ? ।
गङ्गे ! शुभ्रतरङ्गसङ्गसुभगे ! श्रीपार्श्वविश्वेशितु-
र्बाल्ये स्नानविधानपावनवने नैर्मल्यमापादय ॥ ५३ ॥
उद्भूताधिकुशस्थलक्षितिभृतः प्राप्ता वरीतुं स्वयं
काशीशाङ्गभुवं रसैः शुचितरैर्नाम्ना प्रभावर्द्धिभा ।
गाङ्गेयैकविभूषणा सुचरितैर्नाना पुनाना जग-
न्नैर्मल्याय सरस्वतीप्रियपदं ब्रह्मक्रियाणामियम् ॥ ५४ ॥
गाङ्गं साङ्गं हरतु दुरितस्तम्भमम्भः समस्तं
न्यस्तं स्वाङ्गे सुभगभगवद्भक्तिभाजां परं नः ।
विद्यानद्याश्रयमतिरयात् पूरयत्वन्तराय-
च्छेदाद् वेदादिव दिवसकृत् तुल्यकैवल्यसिद्ध्यै ॥ ५५ ॥
गङ्गासंगाद् विमलपयसा स्वात्मशुद्धिं विधत्तां
धीरे तीरेऽमरमणतो यातु मे ध्यातुरंहः ।
स्पष्टश्वेतच्छदपदमदस्तल्लहर्यामहार्य-
ब्रह्मस्थानैर्भवतु कमलैः राजहंसोचितायाम् ॥ ५६ ॥
त्वत्तीरे वसतस्त्वदम्बु पिबतस्त्वद्ध्यानमाध्यायतः
शुभ्रत्वं तव पश्यतः सुरधुनि ! श्वभ्रात् समुद्धारकम् ।
पङ्कं दर्शनतोऽचिराद् विनयतः स्नात्रेण गात्रेऽर्हतः
संतापं हरतः प्रयान्ति दिवसाः पुण्यात्मनां भास्व ।। ॥ ५७ ॥
देवानामभिषिञ्चने तव जलं स्वर्गे सुरैर्नीयते
सारस्यं च मुदेऽभ्युदेति वचसां पानाद् बुधानाम ? ।

सिद्धानां तटिनि ! स्फुटं विघटयस्यंहोघटामुत्कटाम्
विश्वायां स्वयमव्ययं सुमनसां दातुं प्रवाहस्त्वयम् ॥ ५८ ॥
राजद्राजमरालपङ्क्तिवलयैस्त्वद्वीचिहस्तैः सदाऽऽ-
श्लेषो मे सरसोऽस्तु वक्त्रकमला लोके न जाग्रन् मुदः ।
नित्यानन्दनसंपदः प्रतिपदं भूयासुराश्वन्मदैः
कोकानां निनदैः पदैश्च विशदैर्गङ्गेऽनुषङ्गे हितैः ॥ ५९ ॥
दर्शनात् स्पर्शनान्नांहो हरसे हर ! सेचति ।
विमलैः कमलैः कस्य गङ्गे ! त्वं गेयवीचिभिः ॥ ६० ॥

[ इति गङ्गाऽष्टकम् ]

गङ्गा महाभोगरसप्रसङ्गात् स्निग्धान्तरङ्गा धृतकान्तरङ्गा ।
सादेशभर्त्रा चलवीचिहस्ताभिनन्दितैवं भुवि वन्दमाना ॥ ६१ ॥
पत्रालिलालित्यमियं पयोजैः प्रकाशयन्ती नवविद्रुमाऽऽढ्या ।
सरस्वतीं सूर्यसुतां सखीं स्वां रयान्मिलन्ती ददृशेऽमुनाऽपि ॥ ६२ ॥

[ अथ त्रिवेण्या अष्टकम् ]

श्रीमन्नाभितनूजवार्षिकतपःपूर्तौ परं पारणा
श्रेयांसेन रसालनिर्मलरसैर्धारा बलात् कारिता ।
सिन्धुः सैव सरस्वती त्रिपथगा दिव्यामृता सारतः
श्रद्धालुप्रमदाश्रुकज्जलजलैस्तत्रार्कजाऽप्यापतत् ॥ ६३ ॥
सेयं त्रिवेणी प्रससार सारं सारस्वतं शाश्वतरूपतेजः ।
त्रिवर्णसंसृष्टिनिसृष्टभावं प्रोद्भावयन्ती भुवने दिद्वीपे ॥ ६४ ॥
समवसरणयोगे नाभिभूभर्तृसूनोरसुरसुरनृनाथैरागतैरागतैक्यात् ।
कृतमकृतकभक्त्या पूजनं तत्र नानास्थलजलजलवाहात् प्रादुरासीत् त्रिवेणी ॥ ६५ ॥
प्रकटतरजटाभिर्विस्मितस्येव लक्ष्म्या जिननिकटवटद्रोर्दुग्धवर्षेण गङ्गा ।
इह घुसृणरसेन ब्रह्मजाऽऽमोदमाद्यद्भ्रमरयुवतिराजी सूर्यजासंनियोगः ॥ ६६ ॥
काली कालन्दिकाऽऽख्या सलिलवलयितैर्दिव्यगङ्गाप्रसंगा-
न्नैर्मल्यं सानुरागं जगति विदधती मिश्रसारस्वताम्भा ।
पुष्पस्रक्संनियोगाद् धवलिमकलिता रक्तसूत्रानुषक्ता
वेणी वैणीदृशोऽसौ प्रभवतु सुरतानन्दहेतुस्त्रिवेणी ॥ ६७ ॥
कृष्णा कृष्णावताराऽऽश्रमरमणवशाद् देहभासाऽर्कपुत्री
सूत्राच्छक्तिर्व्यनक्ति त्रिभुवनभविनां भावनां वैष्णवीयम् ।
ब्राह्मी शक्तिः सरस्वत्यमलजलभरे शोणभावं दधाना
शैवी शक्तिः सुराणां सरिदरिकरिभीहारिणी वा विवेश ॥ ६८ ॥
सुधा श्रवन्ती वसुधातलेऽसौ सुधाभुजां सिन्धुरिति प्रतीमः ।
रागादिवागाद् भुजगीव पातुं तां नागलोकाद् यमुनाभ्रमेण ॥ ६९ ॥

विषं तदीयं किमिवापहर्तुं सरस्वतीयं विधिना नियुक्ता ।
जज्ञे त्रिवेणी त्रितयाऽऽश्रयेण श्रिया जयन्ती सुरवैजयन्तीः ॥ ७० ॥
उत्पत्ति-व्यय-संस्थितित्रयमयी तीर्थेशितुर्वाङ्मयी
भूता गौर्जगतां त्रयीं रसवशादामोदयन्ती ध्रुवम् ।
द्वेधा तापमपाकरोतु भविनां भास्वत्रिवेणीपदाद्
वेदानां त्रितयीव बोधनधवं सा व्यञ्जयन्ती नृणाम् ॥ ७१ ॥

[ इति त्रिवेणीवर्णनम् ]

भद्रिका विषयदुर्गममार्गं मार्गयन्नथ निसर्गमहौजाः ।
प्राचलत् स गुणरोपबलेन दूरतोऽपहृतकण्टकवर्गः ॥ ७२ ॥
शुद्धतत्त्वमधिवास्य समग्रं संपदा प्रतिपदं चतुरङ्गम् ।
श्रीनियोगनृपतिः प्रचचाल कौशले कृतमुखः समितीनाम् ॥ ७३ ॥
अध्वनि ध्वनितदिग्विजयश्रीः प्रध्वरेऽध्वरकृतां स कृतान्तः ।
ईश्वरः स्वरसतः परशक्त्या जग्मिवान् निहतमारविकारः ॥ ७४ ॥
त्रासयन्नसहनान् गहनान्तः क्वापि चापगुणकर्षणधैर्यात् ।
स क्षणेन विषमाऽऽगमबन्धं भेदयन् नयनसौष्ठवमाधात् ॥ ७५ ॥
पूर्वमार्गविशदीकरणेन दुर्णयव्ययकृताऽऽचरणेन ।
उन्नयन् स्वसमयं नयवृत्त्याऽऽदेशराट् सुमनसस्स ररञ्ज ॥ ७६ ॥
श्रेणिबद्धमणिराशिभासितां चित्रगन्धिशतपत्रवासिताम् ।
चान्द्रनिर्झरणवारिणा सितां स क्रमाच्छिवपुरीमवापताम् ॥ ७७ ॥
अहमहमिकयाऽयं गौरवैः पौरवर्गैरजनि जनितपूजस्तत्र सुत्रामधामा ।
पुरि दुरितविनाशात् पार्श्वसर्वज्ञभास्वज्जननजननतायामुद्यतः स्तोतुमेवम् ॥ ७८ ॥

[ अथ श्रीपार्श्वजन्मस्थानवाराणसीतीर्थवर्णनम् ]

पुरी सुरीणामपि माधुरीणामेषा विशेषाद् धुरि वर्णनीया ।
वाणारसी यत्र रसी वशी च जनो निवासी सुदृशां विलासी ॥ ७९ ॥
श्रीपार्श्वभास्वानुदियाय यस्यां प्राच्यामिवान्तस्तमसां विभेदी ।
तच्चित्तमद्यापि कविर्बुधश्च कलाधरोऽप्यभ्युदयी समग्रः ॥ ८० ॥
द्विजाधिराजः सकलः कलङ्कं बिभर्त्ति मेषोक्षझषालिभोगात् ।
निमज्जनोन्मज्जनतस्तदस्य गङ्गाप्रसङ्गादपि वृद्धिहानी ॥ ८१ ॥
नूनं निवासोऽपि सुरेश्वरस्य द्युलोकगर्वं हरतेऽत्र सर्वम् ।
तल्लेखशाला सविशेषबाला प्रतिस्थलं संप्रति दृश्यतेऽस्याम् ॥ ८२ ॥
महोदयोऽस्यां निवसज्जनस्य प्रतीयते साक्षरसंगतिश्च ।
शिवानुरागोऽर्हति पार्श्वरूपे पुरी तदेषा शिवसन्निधाना ॥ ८३ ॥
गाङ्गं पयः सन्निहितं यदस्यां पीयूषपूरं कुरुते विदूरम् ।
आद्यस्य योगाज्जडताविनाशः परस्य जाड्येऽग्निमुखास्सुरास्ते ॥ ८४ ॥

सुधाशनानां जडिमा न याति न लेखशालां यदमी त्यजन्ति ।
किमेवमामृश्य सुपर्वलोकः पुर्याममुष्यां विदधे स्वमोकः ॥ ८५ ॥
श्रीपार्श्वप्रभुणा स्वजन्मनि पुरा प्रेम्णा सुरा भाविता-
स्ते सर्वे किमुपाययुर्भगवतो मत्वाऽवतारं पुरे ।
तेनाऽऽनन्दमयी पुरी समवसद् वाणारसी मङ्गलै-
र्नित्याऽऽलोकविकाशिका शिवपदं नाम्नाऽप्यसौ काशिका ॥ ८६ ॥
यस्यां महेभ्यनिलया दिवि वृद्धिमीयुस्सौवर्णशैलशिखरालिजिगीषयेव ।
पत्रावलम्बनकृतः खलु वैजयन्तीव्याजान्नवाम्बरमणीरमणीयभासः ॥ ८७ ॥
सर्वे सुपर्वसुहिता विबुधा नगर्यां पर्यायमेत्य नु नृणामनृणं न्यवात्सुः ।
सौधश्रिया तदनुरागवशाद् विमाना मानातिगा भुवमयुर्मयुदर्शनीयाः ॥ ८८ ॥
देवाऽऽगमादनु ननु द्युपुरे कियन्तः शेषा विशेषरुचयो मरुतां विमानाः ।
आलोकितुं किमिति यत्र नृणां निवासा उच्चैर्ययासव इति प्रविभान्ति शृङ्गैः ॥ ८९ ॥
दिव्यां रुचिं निदधिरे दधिरेणुगौरामन्तर्वसज्जनतथारुचिनिश्चयेन ।
इभ्याऽऽलया निजशिरःस्थितकेतुहस्तैरामन्त्रयन्त इव मार्गणवर्गमस्याम् ॥ ९० ॥
यस्यां परं जनसुखं बहुधर्मराज्यं निष्कम्पसंपदपि वैश्रमणानुभावात् ।
ऐन्द्री स्थितिर्धनवतां द्विविधा तदत्र युक्ता दिगीशवरमन्त्रनिमन्त्रणाऽभूत् ॥ ९१ ॥
यत्राऽऽपतन्ति सदनानि सुधाशनानां ज्योतिर्भ्रमादिव दिवः परिवस्तुमैक्ष्य ।
शृङ्गैर्महेभ्यनिलया अधरश्रियां वो नात्रावकाश इति वक्तुमिवोद्व्रजन्ति ॥ ९२ ॥
नैपुण्यपुण्यधनवज्जनरूपसंपद् भूदेवरूपनियताऽऽश्रयणेन यस्याः ।
स्पष्टाचतुष्टयसुवर्णदशाऽवसायात् तुल्याऽलका भवति किंपुरुषाऽऽश्रिता नो ॥ ९३ ॥
उच्चैर्धनानि मनसा सममादधानाः पात्रेषु यत्र पुरुषा विभवप्रधानाः ।
मन्ये तदुच्चगतिसंगतिहेतवे स्वं तेषां गृहाणि पुपुषुर्दिवि वर्द्धमानम् ॥ ९४ ॥
पौरस्त्रियो निशितमस्त्रमिव स्मरस्य नृणां वशीकरणकर्मणि सावधानम् ।
यासां स्वरूपविजयेऽप्सरसां प्रियत्वं युक्तं सुरालयगतस्य सुराधिपस्य ॥ ९५ ॥
जाड्यस्पृशा जलरुहा यदिवेन्दुना नो वक्त्रं सकर्णविधिना तुलयेद् वधूनाम् ।
वैवर्ण्यमभ्युदयते द्वितयेऽप्यमुष्मिन् येन क्षणेन सुधियां स्फुटमीक्षणेन ॥ ९६ ॥
पत्रालिशालिचरितैः परितोऽपि पद्मे साम्यं विधेयमधुना मधुपायिपूर्णे ।
तन्नास्ति वस्तुविधया वनिताऽऽननानां यैर्निर्जिताऽधररुचाऽस्य सुपल्लवश्रीः ॥ ९७ ॥
रामाभिरामवदनैर्मदनैपुणेन स्वीयोपमापदविलोपविधिर्व्यधायि ।
साधर्म्यपङ्क्तिषु ततो नवबिन्दुरिन्दुर्दैवैन्यवेशि दिवि शून्यपदेऽरुणोऽपि ॥ ९८ ॥
वर्ण्यः सुराधिपसभासु सभासुरश्रीरिन्दुर्मदक्षतिरमुष्य विशिष्य कार्या ।
नार्याननैरिति गृहैर्ववृधे नगर्यां द्रष्टुं परस्परकृतामिव वादचर्याम् ॥ ९९ ॥
मुक्ता परव्यसनमभ्यसनं नराणां
शास्त्रस्य मृष्टमशनं वसनं यथेष्टम् ।

पुर्यां विमृश्य निलया धनिनां विमाना-
नुद्यन्ति शंसितुमिव प्रभया समानान् ॥ १०० ॥
उच्चत्वमेषु विषमेषु रसादिवास्यां वश्येषु दिग्युवतिवक्त्रनिरीक्षणेन ।
अन्योऽन्यमुच्चलितकेतुकरेणसंज्ञाप्रज्ञापकेषु भवनेषु विदूरतायाः ॥ १०१ ॥
मुख्यं सुमेरुशिखरैः सममस्ति सख्यं धाम्नां पुरे कुमुदबान्धवसाधुधाम्नाम् ।
निर्णीयते तदिदमद्भुतदानशौण्डकल्पद्रुकल्पपुरुषोत्तमसन्निधानात् ॥ १०२ ॥
नादृष्टदृष्टरुगनिष्टगरिष्ठरिष्टदुष्टामरादिजनितः परितापलेशः ।
पुर्यां तदुष्णमहसा विहितोऽपि तापो मा भूदितीव ववृधे जनसौधवृन्दैः ॥ १०३ ॥
सिद्धिर्द्धिधाऽपि नगरेऽङ्गभृतां सुसाधा बाधा न काचन वने भवनेऽवने वा ।
विश्वत्रयेऽपि महती वहतीह वृद्धिं ख्यातिर्न तद्गृहमहोदयविस्मयः स्यात् ॥ १०४ ॥
दध्रे जनैर्गिरिवरस्य चिरस्य धैर्यं लक्ष्मीः पुनर्विपणिभिर्मणिभिः प्रपूर्णैः ।
गोत्राऽऽश्रयश्च सचिवैरवशेष एष नूनं महेश्वरगृहैः परिवृद्धिवेषः ॥ १०५ ॥
ऊर्ध्वं दिवि स्थितिभृतोऽपि सुरानुरागादागामुका भुवि पुरे सुरभासुरेऽस्मिन् ।
देवालयाः खलु महेभ्यनिवासमूर्त्त्या तेषां तथापि स तथोच्चगतिस्वभावः ॥ १०६ ॥
उल्लङ्घ्य खेचरगणान् गगनेऽभ्ययास्यन् नूनं महेश्वरगृहाणि महान्ति शृङ्गैः ।
पादावनम्रशिरसा यदि नागलोकस्तेषां विलम्बकरणं भुवि नाग्रहीष्यत् ॥ १०७ ॥
पुण्यात्मनां परिचयान्नगरी गरीयःपुण्यैर्द्युलोकजयिनी जयनीतिपात्रम् ।
नृणां महोदयविधिं सहसाऽभिधत्तेऽसौ धैर्यधुर्यमणिनिर्मिततुङ्गसौधैः ॥ १०८ ॥

[ इति श्रीवाणारसीनगर-नागर-भवनवर्णनम् । ]

तत्राभिनम्य जिनपार्श्व-सुपार्श्वदेवतीर्थद्वयं सविजयं नमयन्ननम्रान् ।
श्रीजैनशासनजयं नगरे नियोगी शक्त्योदघोषयदयं हृदयं दयायाः ॥ १०९ ॥
अध्वान्तरेऽप्यसुतरां सुतरां तरङ्गैर्गङ्गां व्यतीत्य कृतमार्गबहुप्रयत्नः ।
गच्छन्नतुच्छमुनिगच्छविधेयवृत्त्याऽऽदेशप्रभुर्भुवि वनानि मुदाऽऽलुलोके ॥ ११० ॥

अथ उपवनवर्णनम्, यथा—

उपवनपवनश्रीसौरभानुष्णभावैर्मनसि मनसिजस्य प्रादुरासीद् विकारः ।
तमथ कथमपि स्वं शुद्धमार्गप्रपन्नं समयरसिकवृत्त्याऽऽवेत्य स द्रागरौत्सीत् ॥ १११ ॥
अनवधिविधिबोधान्निर्विरोधप्रबोधात् सहृदयहृदयेऽन्तर्नन्दयन् न्यायधर्मम् ।
अपथमथनकर्मा संकथाभिः सुधर्माऽधिपतिरुपवनान्तः श्रान्तभावेऽध्युवास ॥११२॥
स्फुरति मरुति मन्दे तस्य खेदं बिभेद किशलयवलयानां चालनैः काननाली ।
परभृतभृतकस्तत् साधुवादं जगाद भ्रमरमुखरबन्दिस्तोत्रपाठानुसारी ॥ ११३ ॥
सुरतरव इवामी रेजुरुच्चैर्विशाला बहुदलफलभारैर्नम्रसर्वाङ्गशालाः ।
उपवनसहकाराः स्पष्टपुष्पप्रकाराः परिणतसुरसार्थाऽऽमोदितक्ष्मापसार्थाः ॥ ११४ ॥
कनकघटितमौलिर्मञ्जरीभिर्बभासे प्रसृमरबहुवर्णभ्रामरै रत्नपूर्णः ।
सकलतरुकुलेषु प्राज्यसाम्राज्यशंसी रुचिररुचिनिसर्गस्यूतचूताकरस्य ॥ ११५ ॥

घनतरतरुशाखाच्छादनात् काननेषु न तरणिकिरणानां क्वापि संक्लेशलेशः ।
घन इव वनभूमौ संनिविष्टस्तदीयप्रकटकपटवृत्त्या विश्वविश्रान्तिखिन्नः ॥ ११६ ॥
प्रमदवनविशोकाशोकवृक्षेष्वधस्तान्मधुरमधुपदेन्नोज्झिन्नकन्दर्पसेना ।
जगति विजयलब्ध्या गीयमानाऽलिवृन्दैर्युवतिजनमनःस्थं मानभारं जहार ॥ ११७ ॥
भवति पटुरसूर्यंपश्यता राजदारेष्विति चतुरवचोभिः पूर्वभूचञ्चलाक्षी ।
गुरुतरतरुराज्या संवृणोतीव सर्वां तनुमनुपदगङ्गासङ्गमादेव साध्वी ॥ ११८ ॥
त्रिकरणदृढशक्त्या मातुरापन्निवार्या तनयविनयवृत्तिः सद्भिरेवं प्रधार्या ।
व्यपहृत इति भूमेर्भूमिजैः पूर्वगोत्राचरणचणमनोभिः सूर्यजन्योऽभितापः ॥ ११९ ॥

वनमिह बहुरम्भाऽऽरम्भसम्भावनीयं
  द्विजनिवहपरीताशोकलोकार्चनीयम् ।
भवनमपि च तादृक् पूर्वदेशे निवेशो
  भवति विभवसाम्ये प्रायशः संनियोगः ॥ १२० ॥

बहुसुमनसां स्मेरीभावः पुरेषु यथोत्सवे
  प्रभवति वयोयोग्यस्तालाकरः सुधियां मुदे ।
भजति सरसामालीं प्राप्याङ्गनारमणाऽऽदरं
  पथि विचरता तेनोद्याने तथा ददृशे स्थितिः ॥ १२१ ॥

ललितमसकृत् क्रीडाऽऽरामे कपेर्न वृषाकपेः
  क्वचिदपि न वै तालस्तालः परं धृतगौरवः ।
शुकपरिचयः पाठे नृणां नवांशुकसंचयः
  प्रमुदिततयाऽऽदेशेशेन व्यलोकि महौजसा ॥ १२२ ॥

सुरतरुचिता वाटीपाटी श्रियाः कचपद्धतेः
  सुरतरुचिताऽऽवेशे तस्याद्भुतं समजीजनत् ।
नवकुलरुचिप्रीत्येभ्यानां मिथो जनभोजनं
  नवकुलरुचिप्रौढोद्याने पुनर्न महोत्सवम् ॥ १२३ ॥

पुरि भटजनः सर्वो गर्वोङ्कुरो धृतकञ्चुक-
  स्तत इव वधूवर्गः पौरः पराकृतकञ्चुकः ।
उपवनगतौ तेनापायि स्फुरत् कलिका लता
  क्वचिदुपनता दैवान्नैवावनेः कलिकालता ॥ १२४ ॥
(दृढतरकुचप्रौढत्वेनावरीतुमशक्यतां
  प्रथयितुमिव स्पष्टीकुर्वन्न तद्गुणसंगतिम् ॥ १२४ ॥)
[इति वा उत्तरार्द्धपाठः ।]

स वनविषयं स्थाने स्थित्या यया वसुपायिनां
  सवनविषयं स्थाने गृह्णन् मनो वसुपायिनाम् ।
प्रसवकलिकालाऽऽस्यं पश्यन् क्वचिद् भ्रमरोचितं
  पथि न कलिकालाऽऽस्यं कश्चिन्नरं भ्रमरोचितम् ॥ १२५ ॥

श्रीफलैरविरलैर्मुवनानि नित्यमुत्सवहितानि वनानि ।
तानि वीक्ष्य कृतसंवननानि तुष्टुवे स जनुभृज्जननानि ॥ १२६ ॥
पूर्वं श्रीजिनवीरधीरचरितं दुर्गोपसर्गादिकं
ध्यायं ध्यायमुपायतः स्थिरतमास्तद्विस्मयाऽऽस्वादतः ।
स्वं पुष्पौघमवाकिरन्ति तरवस्तेऽद्यापि तीर्थस्थले
स्मारं स्मारममी समीरकपटात् किं घूर्णयन्तः शिरः ॥ १२७ ॥
क्वचनवननिकुञ्जे प्रत्ययी प्राप्तरूपैः
स्वयमिह समुपेत्याऽऽशिश्रिये देशभूपैः ।
अविकृतकृतहस्तैर्नीयमानः पुरस्तात्
समितिसहितवाचाऽऽदेशराजः प्रगल्भः ॥ १२८ ॥

[ इति पूर्वदेशमार्गवनवर्णनम् । ]

सुवर्णसावर्ण्यरुचिः सरोभुवां गलत्परागैररुणांशुपांशुभिः ।
तेनोल्लङ्घेऽथ सुवर्णवालुका सरिद्वरिष्ठैः करिभिः परिस्तुता ॥ १२९ ॥
देवदूष्यशकलं पुराऽहृतः स्कन्धतः शतमखेन धारितम् ।
संपपात जनपातकच्छिदे तद् दधार जलधारयेव सा ॥ १३० ॥
तमसि तरणिकल्पः कल्पविन्निर्विकल्पः कृतसुकृतविनोदः प्राप्ततीर्थप्रमोदः ।
मनसि निहितवीरस्तीरमस्याः प्रपेदे पटुवहनबलेनोत्तीर्य वेणीं सवीर्यः ॥ १३१ ॥
क्वचनवचनभङ्ग्याऽऽरोग्ययोग्यप्रयत्नः करणकरनियुक्तान् बोधयन् योधलोकान् ।
विदितविषयशुद्धिस्तेजसाऽऽदेशराजः प्रमुदितनृपचक्रः शक्रलक्ष्म्या रराज ॥ १३२ ॥
कतिपयविषयाणां निग्रहं विग्रहेण विदधदधिकबोधिस्सोऽधिकारेऽधिरूढः ।
यतिनृपतिरवापावापजापोदयश्रीरविरिव दिवसाऽऽस्ये पत्तनं पूर्वभूम्याः ॥ १३३ ॥
मत्वा तत्त्वविदस्तदागममिह श्रद्धाधनाः साधना-
न्यानीयोच्चतुरङ्गपुङ्गवगजादीनि स्वयं तैः समम् ।
प्रौढाऽडम्बरपूर्वमभ्ययुरतिप्रीता विनीताऽऽशयाः
पूर्वापत्तनवासिनः प्रशमिनः श्रीचित्रभानूदये ॥ १३४ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते
उदयश्रीकलिते पूर्वदिक्प्रयाणवन-भवन-नगरमार्गवर्णनो
नाम एकादशः सर्गः ॥

॥ श्रीः ॥ छः ॥ कल्याणवल्लिः पल्लववती भवतु ॥

## द्वादशः सर्गः ।

आनन्दमेदुरतया दुरितैर्दुरन्तैर्मुक्तेन तेन गुरुणा गुरुणाऽऽदरेण ।
संयुज्य पूज्यविधिना सुदृशस्तदेभ्या अन्तःपुरं तमथ निन्युरमन्युमान्यम् ॥ १ ॥
गर्जत्सु वाद्यनिवहेषु चलन् समित्याऽऽदेशप्रभुः प्रभुतयाऽन्वितपार्श्वनाथम् ।
चैत्ये समेत्य सह सङ्घजनेन वृत्तैस्तुष्टाव तुष्टमनसा परपुष्टभावात् ॥ २ ॥
स्वस्तिश्रियः प्रणयपात्रममात्रशक्तिश्चिन्तामणिर्दिनमणिर्जिनपार्श्वरूपः ।
यस्यां सदाऽभ्युदयवान् भुवनावभासी सा पूर्वदिग् विजयतां जयताण्डवेन ॥ ३ ॥
फुल्लत्फणीश्वरफणामणिशोणरोचिरुद्वीयमानमसमानममानमाह ।
यस्य प्रभोः शिरसि सेवकसेव्यभूतेर्नित्यं महोदयमिह द्विविधं प्रसह्य ॥ ४ ॥
प्राच्यामिवाभ्युदयिनो जिनपार्श्वमूर्त्तौ भक्त्यैव वश्यमनसः शशिमुख्यखेटाः ।
वक्त्रं शशीधरफणामणिकैतवेन भौमादयो दिनकरः कनकातपत्रम् ॥ ५ ॥
येन प्रबोधविभवः कमलाकराणामुत्पाद्यते द्युतिभरेण तमो विभिद्य ।
स्फूर्ज्जत्फणामणिरुचाऽरुणिमाऽनुभावश्चिन्तामणिर्दिनमणिस्तदयं प्रतीतः ॥ ६ ॥
सचक्रवालमपि मोदयति स्वभासाऽभ्यासात् करोति भुवने जडताविनाशम् ।
नास्तं प्रयाति सुमनस्सु कृतावबोधस्तेनेश ! एव विजयी भुवने दिनेशः ॥ ७ ॥
यः पूर्वगोत्रविशदीकरणे पटीयान् राज्ञे हितं वसु ददाति सदाऽतिशायी ।
कर्त्ता प्रभावविभवेन जगत्प्रभाऽऽढ्यं पार्श्वात् ततो न हि परः परमार्थभास्वान् ॥ ८ ॥
ख्यातिं यतः समभजद् भुवनेऽश्वसेनाह्वानः क्ष्मापतिरतिस्पृहणीयतेजाः ।
यद्वा मयाऽप्यधिगता सुगुणैः प्रशंसा प्राच्या स किं न सविता सविता विभूत्याः ॥ ९ ॥

पूर्वाहरिज्जननतः सकलादितेय-
  ध्येया बभूव नवभूवरवर्णनीया ।
काश्या प्रकाश्य निजरूपमतः स भास्वान्
  पार्श्वाऽख्यया विजयते जयतेजसाऽर्च्यः ॥ १० ॥

यस्य प्रभा प्रियतमाऽऽयतमानसस्य राजन्यजन्यमहिताऽवहितानुरागे ।
मुक्त्वा परं जनपदं सहचारचारुस्तस्मिन्निहार्हति किमर्हति नार्करूपम् ॥ ११ ॥
भोगीन्द्रनिर्मितसहस्रफणामणीनां रोचिश्चयैर्धवलयन् वलयं धरण्याः ।
क्षुद्रग्रहादिललितं हरते समग्रं तस्मिन् सहस्ररुचितानुचिता कथं स्यात् ॥ १२ ॥
यस्योत्तरायनमपि प्रकटं भुजङ्गं च्छत्राऽऽश्रये प्रतपतस्तपसाऽऽतपेन ।
तद्दक्षिणायनमहो कलिकुण्डतीर्थे साम्योदधेस्तरणिसाम्यममुष्य मुख्यम् ॥ १३ ॥
सूर्यः पुपोष जनने सति मासि पौषे धाम्नां सहस्रमधिकृत्य जिनस्य सेवाम् ।
नूनं तदूनमभवन्न कदाऽपि तस्य युक्तस्ततो भुवि सहस्ररुचिर्जिनोऽपि ॥ १४ ॥

दोषाकृतिर्विनिहता वपुषांशुपोषात् शोषाय वा प्रकटितं भुवि पङ्कराशेः ।
पद्मोदयं प्रणयता प्रणयेन येन चित्रं न तत्र वरतेजसि चित्रभानोः ॥ १५ ॥
पूर्वोदयं निदधता विधिनाऽधिमित्रं मित्रं विधाय ससृजे भुवनोपकारः ।
पार्श्वेन विश्वविभुना कमठप्रतिष्ठा प्रान्तं प्रकाश्य धरणीधरसंनियोगम् ॥ १६ ॥
यः पद्मिनीहृदयमध्यगतोऽपि कान्त्या तत्याज राजमहितो न सुवृत्तभावम् ।
कृत्वाऽऽतपप्रकटनं घटयन्नवन्यां पादप्रसादमुदितं भरतप्रदेशम् ॥ १७ ॥
पार्श्वं न मुञ्चति कदाऽपि कविर्यदीयं प्रीत्या पुरस्सरतया जनदर्शनीयः ।
तद्वद्‌बुधोऽप्यनुगतावपि तौ प्रभावात् प्राप्तोदयाविव ततः शुचिसंचयेन ॥ १८ ॥
उच्चैर्गिरः स्तुतिपदं जगदुर्न भोगा यस्याऽऽगमे भुवि सपक्षतयाऽतिदक्षाः ।
गावः पुनर्दिशि दिशि प्रसृता रसौघश्रुत्या प्रियाः सुमनसां रुचिवर्द्धनेन ॥ १९ ॥
सर्वस्य वश्यकरणे निपुणा गुणाढ्याः प्रादुर्बभूवुरिह बोधिकरस्य वाचः ।
उज्जागरः सकलनागरनागलोको यद्दर्शने स्फुरति साधयति स्वमर्थम् ॥ २० ॥
यस्याङ्गकान्तिविभवेन विसर्पतैव दर्पोऽपि कौशिककृतः परिसर्पति स्म ।
निद्राणतामनुबभूव परं कुवेलास्थानं सरोऽभिगमनीयमभूज्जनानाम् ॥ २१ ॥
विश्वप्रभाविह विवेश विधेर्निदेशात् सूरप्रभाऽरुणतयाऽभ्युदयप्रसक्ता ।
तेनाऽधरो धरति रागधुरं विशिष्य शेषः प्रभाकृति ततः सित एव वेषः ॥ २२ ॥
सौम्या रुचिर्मुखसरोरुहितीर्थभर्तुर्वप्रातपत्ररचनासु महेन्द्रलक्ष्मीः ।
मुक्तालतासु नवधिष्ण्यकलाविलासः शीर्षे फणामणिगणे तरणिप्रकाशः ॥ २३ ॥
सिंहासने समुपविश्य गवां विलासैर्विश्वं विभासयति विश्वविभौ जिनेशे ।
व्यर्थीभवँस्तदिह निर्मलधर्मचक्रमूर्त्त्या पुरः स्फुरति भृत्य इवोष्णकान्तिः ॥ २४ ॥
नैकः प्रकाशनपटुस्तरणिस्त्रिलोक्या न द्वादशापि विधिनावधिनाऽवगत्य ।
चक्रेऽस्य मूर्ध्नि फणिसप्तकमुत्फणासु पार्श्वस्य सप्तभुवनप्रतिभासनाय ॥ २५ ॥
ज्योतिर्भरे प्रसृमरे भगवान् स सूर्यद्वीपाधिपप्रतिकृतिः कृतिनां विभाति ।
जातिः सहस्रमहसां मणिभित्तिबिम्बश्रीचुम्बनेन कुरुते गुरुपादसेवाम् ॥ २६ ॥

रविद्वीपाधीशः प्रभुरिह विनिर्णीयत इतः
शतस्तोमैः स्तुत्यः प्रतिदिनमयं नाम शतशः ।
जिनः पार्श्वश्चिन्तामणिरिति मनोऽभीष्टकरणाद्
भुवि ख्यातः प्रातर्मम विषयतां यातु स नतेः ॥ २७ ॥

स्तुत्वेति पार्श्वतरणिं तरणिं भवाब्धेर्वाञ्छासुरद्रुकरणिं सरणिं शिवस्य ।
धर्माश्रये स्थितिमधाच्चतुरोऽपि मासानासाद्य पुण्यसमयं भगवन्नियोगी ॥ २८ ॥
उच्चैःसभामिव दिवः प्रसरत्सुधर्माऽऽख्यातां स साधुवसतेः शिखरे प्रपद्य ।
तत्रैक्षताऽखिलपुरः सुषमां स्वभासाऽऽदेशप्रभुस्त्रिभुवनेऽपि निदर्शनीयाम् ॥ २९ ॥

यत्रोत्तुङ्गविहारहारिललितैर्मानाद् विमाना दिवः
प्रच्युत्य प्रतिपत्तये धनवतां सौधश्रिया शिश्रियुः ।

तच्चिह्नं तु गवाक्षलक्षविलसद्रम्भानुरूपाङ्गना-
प्रेक्षाभिः सहसाऽनिमेषनयना देवा इवामी जनाः ॥ ३० ॥
यत्रोच्चैस्तरचैत्यकेतुचलनैस्त्रस्ता इवेतस्ततो
भ्राम्यन्तोऽपि मृगादयः प्रियतमा राज्ञः श्रमं नेयति ।
नक्षत्राण्यत एव ता ग्रहगणग्राहेण रात्रिंचरा
मेषोक्षायतराशिभिर्दृढतरं बद्धा सुधारश्मिना ॥ ३१ ॥
यस्मिन्निभ्यजनालयैर्नु विजिता देवालया व्योमनि
भ्राम्यन्ति स्म सविस्मयास्तदनुगाः सूरादिखेटा अपि ।
स्वर्णं स्वर्णगिरेर्जिघृक्षव इवोन्नीय स्वकीयान् करान्
क्षीणाक्षीणतयैव राज्ञि विदितं दारिद्र्यमेषां ततः ॥ ३२ ॥
सौधानां किरणैः पराजिततयाऽप्यावश्यकाभ्यागमा-
न्नक्षत्राणि समागतान्यपि समुत्तम्भ्य स्वहस्तं मदात् ।
न स्थातुं प्रभवन्ति तेन पुरतोऽश्विन्याः प्रचारे निशि
राज्ञः सार्धमपि त्यजन्ति न मनाक् शून्यस्थलस्यान्यहो ! ॥ ३३ ॥
मुख्यं सौख्यममुष्य सौधवसने मत्वा सुरैरुज्झिताः
किं तेषां निलयाः परिभ्रममधुर्निस्सारयोगादिव ।
निःश्रीका इव नीरसायनरता नित्यं तमःसंगता
नक्षत्रोपधिना क्वचिन्मृगशिरःस्थानेन शून्यास्ततः ॥ ३४ ॥
यत्रोत्तुङ्गनिवासशृङ्गनिवहव्यासङ्गसङ्घर्षत-
स्ताराणां सकलाऽप्यहारि सुषमा रौद्राकृतिस्तास्वतः ।
उद्वृत्तैव हि कृत्तिकाशतभिषक्सङ्गेऽपि तल्लोहिता-
स्त्याहर्निशविक्रियापरिणतिर्व्याहन्यते नान्यतः ॥ ३५ ॥
सेवायै जिनराजराजतलसच्चैत्यव्रजस्यानिशं
देवा यत्र पुरे सुरेशमहिते पौरच्छलादाययुः ।
तच्छेषः प्रतिभासते निशि कविः काणः कलङ्की शशी
वक्रः पङ्गुरथोऽशनिः स नियतं स्वर्गे निवासी जनः ॥ ३६ ॥
यद्गेहालिमहामहोभिरभितो विस्तारिभिस्तारका-
धीशः पाण्डुरितः कलङ्कविकलश्चित्राय यावद् भवेत् ।
तावत् तुङ्गगवाक्षसङ्गतवधूरास्योपमासंभ्रम-
च्छेदायेव सुखेन तं वितनुते नूनं तथैवाञ्जनात् ॥ ३७ ॥
प्रातर्भानुरयं तथाद्युतिभरैरभ्रेन विभ्राजते
श्रीरत्नाकरतोऽप्युपेत्य विवसुः कोपारुणः स्वात्मनि ।
संस्थाने करचालनादिह नृणां स्पष्टान् मणीनां गणान्
मन्ये प्राप्तरुचिः करोति भुवनप्रोद्भासनं सोऽचिरात् ॥ ३८ ॥

सौधादङ्कुरितैः करव्यतिकरैः स्वस्वामिनां कामिनी-
लोकस्याऽऽननसौहृदेन शशिनः कार्ष्ण्यं निहन्तुं रयात् ।
यावन्निर्मलता क्रियेत सुचिरं तावत् तदीयाऽऽनना-
म्भोजप्रेक्षणलज्जयेव स पुनः स्पष्टं कलङ्की विधुः ॥ ३९ ॥
उच्चैस्त्वेन महौकसां धनवतां ग्रीष्मेऽपि यत् केतनै-
र्वायुव्यञ्जनयाऽक्रियन्त हरयस्तीक्ष्णद्युतेः सुस्थिताः ।
तेनामी हरितत्विषाऽत्र परितः स्वर्णाचलं भ्रामुका
विस्मेरस्मरतोऽश्विनीमनुगता धावन्ति तत्कामुकाः ॥ ४० ॥
नक्षत्राणि कथं व्रजन्ति परमं पारं वियन्नीरधेः
प्राप्यं पादसहस्रधारिहरिणा वेगेन सप्तावताम् ।
पुर्यामिभ्यमहौकसां पथि न चेदालम्बनं सुन्दरं
हासाभ्यासविलासलालसवधूप्रेमाभिलाषेक्षणैः ॥ ४१ ॥
प्रोच्चैर्गन्तुमिवोत्सुकैर्जनगृहैर्या जेतुकामैर्दिवोऽ-
भ्याहूतेव किमश्विनी प्रतिपदं रत्नाङ्गणे बिम्बिता ।
भीतस्तच्चरिताद् विशिष्य सकलः स्वर्लोक एवापतद्
ज्योतिः संक्रमणच्छलेन पदयोस्तेषां स्फुरत्तेजसाम् ॥ ४२ ॥
स्वर्लोकं प्रभयाऽधरं विदधता नक्षत्रबिम्बोपधे-
स्तेनोदस्त इव ध्वजव्रजतनुर्हस्तः प्रशस्तः श्रिया ।
सौधानां निवहेन शुद्धरुचिना तत्रेन्दुसूर्यद्वयं
क्रीडाकन्दुकचारुचित्रचरितं धत्तेऽप्रमत्तेङ्गितैः ॥ ४३ ॥
स्फीर्तिं[1] सातिशयां विमृश्य हरिणा यत्रेभ्यलोकौकसां
नित्यं स्वर्गविघातिनीं प्रविदधे विज्ञाय तारास्थितिः ।
तेषामुच्छ्रितकेतनैः प्रचलितैः संघृष्य दूरीकृता-
स्ता अस्ताचलगण्डशैललुलिता गच्छन्ति विच्छायताम् ॥ ४४ ॥
सौधानामभिवर्द्धनेऽन्तरगतास्तारावतारा अपि
व्याधूयन्त कृतान्तरायकतया मूर्द्धन्यधन्यध्वजैः ।
तेनामी प्रतिभान्ति चञ्चलतया वार्द्धेस्तरङ्गा इव
नासूयाऽध्यवसायिनामिह भवेत् कुत्राऽपि नित्या स्थितिः ॥ ४५ ॥
सौधानां निकरैर्महोन्नतिधरैर्दण्डैरिहाभ्रंकषै-
रुत्खातादिविषद्द्रुमा वितरणैः स्पर्द्धिष्णवः स्वाधिपैः ।
तन्मूलं स्फुटमेव दूरपतितं चित्रा-विशाखा तथा
पत्राणि प्रतिभान्ति कान्तिविलसत्तारावतारश्रिया ॥ ४६ ॥

---

1 A "स्फार्तिं"

अत्युच्चैस्तरचैत्यमूर्द्धनि लसत् सिंहप्रसङ्गान्नभः
सिंही सूनुमसूत राहुमसितं प्राहुस्तमन्वीक्षकाः ।
अन्तःसंगतपुत्रिका जनमुखाम्भोजन्मलक्ष्मीभर-
स्पर्द्धिष्णोः शशिनोऽनुवाहनशशव्यादित्सुमस्मिन् पुरे ॥ ४७ ॥

अश्विन्यः प्रतिवेश्म विस्मयपदं ब्राह्मीप्रवृत्तिः परा
चारोऽप्याहितमङ्गलः श्रुतिरुचिः स्पष्टा बुधैः संगतिः ।
सूरः पूर्णकलाधरश्च सकलो लोकः कवित्वाश्रय-
स्तज्ज्योतिर्गणभासुरेऽत्र नगरे न्याय्या गुरोरादृतिः ॥ ४८ ॥

मा द्राक्षीन्नगरीजनः परिजनं रम्भादिकं स्वःपते-
स्तुङ्गत्वेन निजौकसामिति धृतान्तर्जालिका वेधसा ।
ताराणामवतारणेन सहसा तां नागरे जागरे
वायुर्दृष्टिसुखाय दृष्टविभवात् प्रातर्विदूरेऽकरोत् ॥ ४९ ॥

अस्माकं सुहृदः क्षमाधरवरास्तुङ्गश्रिया तान् द्विषन्
इन्द्रः कीदृगितीश्वराश्रयगणं वर्द्धिष्णुमालोकितुम् ।
द्यौर्मत्वाऽतिचलाचलग्रहमिषादुच्चैः श्रुतिश्चाश्वयुग-
वृत्त्याऽस्ताद्रिदरीर्विहस्तकलया सद्यो भजन्त्यन्वहम् ॥ ५० ॥

अत्युच्चैः श्रुतिसंपदामृषिरुचिव्यासङ्गतः प्रस्फुटं
ब्राह्मीनिर्मलताजुषां दृढतया सन्मार्गमासेदुषाम् ।
आदित्यद्युतिशालिनामिह भवेत् किं ज्योतिषां विभ्रमः
पातो चास्तगिरौ पुरोन्नतगृहैः पादाः स्खलेयुर्न चेत् ॥ ५१ ॥

ज्योतिर्हव्यभुजां कुतो दिवि भवेत् वक्रेऽतिचारेऽथवा
गत्वा मार्गविमुक्तिरत्र महसां राज्ञः प्रसारेऽप्यहो ! ।
अत्युच्चैस्तरसौधमूर्ध्नि विलसल्लोलेक्षणावेक्षणा-
वृत्त्यां चेन्नहि विभ्रमः प्रसरति द्वेधा प्रभाऽऽच्छादनात् ॥ ५२ ॥

सन्मार्गेण गुरोर्महोदयदशायुक्ताऽऽलयानां जने
क्षेत्रज्ञे बहुधान्यवृद्धिधरणप्रौढिः प्रसिद्धाऽऽगमे ।
सर्वाऽऽशासु फलाऽऽढ्यता क्षितिभृतां सारस्यमावश्यकं
नृणां कामनयाऽऽदरेण फलितं साभोगभोगश्रियाम् ॥ ५३ ॥

इभ्यानां गुरुदैवतं प्रियतरं चित्ते सचेता जनः
सर्वोऽप्यश्वयुगेन साऽऽभरणिता बाहुल्यमोजस्विनाम् ।
नेत्राभीप्सितसंगतिर्द्विजपतिः प्राभाकरीं वा रुचिं
धत्ते तत्र पुरे न चित्रविधये ज्योतिर्महत्त्वं गुरौ ॥ ५४ ॥

कान्तः शान्तविधेर्निशान्तममलस्वान्तः स्वसिद्धान्तविद्
न भ्रान्तः क्वचिदर्थसाधनकृतौ श्रान्तो न सत्कर्मणि ।

यस्मिन्निर्व्यसनः परं सुवसनः श्रद्धाऽतिशायी जनः
सौधर्मस्थितिलक्षणं समुचितं तस्मिन्नहो ! पत्तने ॥ ५५ ॥

विश्वाऽऽखण्डलमण्डलीमनुनयन् शोभाधनैः साधनै-
र्निःसामान्यवदान्यतादिसुगुणैर्यत्राऽऽस्तिकानां गणः ।
तत्रैश्वर्यकथां सदाऽप्यवितथां गङ्गाऽऽश्रयात् कुर्वति
सत्यः श्रीनगरेऽस्ति वर्णनविधिर्दिव्योऽभिनव्यश्रिया ॥ ५६ ॥

तत्र व्यतीत्य चतुरश्चतुरोऽपि मासानुद्बोधिबोधिनि जने जिनधर्मदार्ढ्यम् ।
कुर्वन् विमोहबलमुच्छलितच्छलेन वेगाज्जिगाय मुनियोगिनियोगिनागः ॥ ५७ ॥

प्रास्थापयद् विदिशि हव्यभुजो भुजौजाः पादातिचारबलमस्खलितं खलैः सः ।
सम्यग् मुहूर्त्तसमये समये प्रसिद्धं सम्मेततीर्थमथ नन्तुमना वनान्तः ॥ ५८ ॥

शुद्धाऽऽशयः स्वयमपि क्रमतश्चचाल वाचालयन् जयरवैर्दशदिक्ककदम्बम् ।
निर्वासयन् जनपदादनयप्रवृत्तिं कृत्वोपदेश-विनिवेशविधेः प्रबन्धम् ॥ ५९ ॥

सैवानुरागपरभक्तिरनेन धार्या स्मार्या स्मृतिश्च मनसा गुरुगौतमीया ।
शालेयसंवरपरिक्रमणेन मार्गमभ्यस्यता भुवि कृतोऽविकृतः प्रयत्नः ॥ ६० ॥

कृत्वा विशिष्य समितिं वचसा ररञ्ज स प्राकृतप्रतिपदस्थितिमादधानम् ।
भूपालवर्गमपवर्गनिसर्गरागाच्चर्यापरीषहसुहः सहसाऽध्वचारी ॥ ६१ ॥

अर्हद्विहारभवनाद् विविधोपहारप्राप्तां विहारनगरीं क्रमतो जगाम ।
सङ्ग्रामसाधुचरितैर्भुवि गीयमानैरादेशभूपतिरतिप्रतिपन्नधैर्यः ॥ ६२ ॥

तत्रापि चैत्यनमनान्न मनाग् विषण्णः स्तोतुं स्वतः प्रववृते जिनभास्वतोऽर्चाम् ।
प्रत्यक्षतः क्षततमस्तमपार्श्वनाम्नः सर्वार्थसाधनविधेर्जिततीव्रधाम्नः ॥ ६३ ॥

स्वस्तिश्रियां निवसनस्थलमाननाब्जमब्जं जिगाय कलयैव सदोदयेन ।
यस्य प्रभोः कमठदर्प्पहरस्य कामं कामप्रथाभरहरस्य मनोहरस्य ॥ ६४ ॥

स्वस्तिश्रियः सुभगसंगतशोणवासस्तुल्या स्फुरन्ति परितः खलु यस्य भासः ।
उद्यत्फणामणिभुवः किल भूर्भुवःस्वःस्वामी स कामितमुदे शिवधामगामी ॥ ६५ ॥

स्वस्तिश्रियां करणमाभरणं त्रिलोक्या अर्हज्जिनेन्द्रभगवत्प्रभुनामधेयः ।
ज्ञातार्थजातपटुबोधसदावदातस्तातः स सातविधयेऽस्तु सतां कृपातः ॥ ६६ ॥

स्वस्तिश्रियां समुदयोऽभ्युदयेन यस्य प्रादुर्भवत्यखिलदुर्भवसंनिरोद्धुः ।
अस्वप्नतो विदधतः प्रकटोपदेशव्याख्या महेन्द्रदिशमाश्रयतः प्रभाभिः ॥ ६७ ॥

यद्दर्शने भुवि विनश्यति चौर्यचर्या तत्त्वानि पश्यति परिग्रहमोक्षपक्षे ।
लोकः शिवाय नमति प्रतिबद्धचेताश्चिन्तामणिर्दिनमणिप्रकृतिस्स जीयात् ॥ ६८ ॥

पाणेस्तलेऽस्य नियतः कमलानुषङ्गः पादोपयोगजनितस्त्रिजगत्प्रकाशः ।
पार्श्वस्य तस्य समताऽभिमताऽहिमांशोरत्यद्भुतं यदिह देहभृतां न तापः ॥ ६९ ॥

अर्हन्महः स्वहृदयेऽभ्युदयेन रम्यं सन्मानसाऽम्बुजविबोधकरं निदध्मः ।
प्रोद्दामकामतमसां हि विरामहेतुर्वामाश्वसेननृपतिप्रतिभाऽभ्यनन्दि ॥ ७० ॥

स्युः संपदः प्रतिपदं विपदं निहत्य राज्यं विराजिगजवाजिशताङ्गराजि ।
सत्संगतिर्गतिरपि द्युसदां महेज्या यस्य प्रभाव-विभवानुभवाज्जनानाम् ॥ ७१ ॥
नूनं सहस्रगुसहस्रमहः प्रसह्य संपिण्ड्य शुद्धविधिना विधिना व्यधायि ।
तेजोभरः सकलपातकसंनिपातव्याघातहृज्जिनपतेः परमाश्वसेनेः ॥ ७२ ॥
यो वारुणीं न चकमे न तथोत्तराशां तद्वन्न दण्डधरदिग्गमनं कदाचित् ।
सोऽपूर्वभानुरिव पूर्वदिशं प्रपन्नः पार्श्वः सदाऽभ्युदयवानिति नात्र चित्रम् ॥ ७३ ॥
यस्य प्रभा सहचरी गिरिसानुरागा बालातपप्रकरणान्महिता महीशैः ।
दूरीचकार भुवने जडिमाऽभिमानं त्यक्त्वा पराश्रयतयाऽङ्गभृतां नितान्तम् ॥ ७४ ॥
त्रयी येनोद्गीर्णा समवसरणे यस्य पुरतोऽ-
हयः श्रेणीरम्या वियति दधते नृत्यललितम् ।
यतः पद्मोल्लासो भवति नियतस्तं धनकरं
नमामः श्रीपूर्वोदयिनमथ पार्श्वं दिनकरम् ॥ ७५ ॥
स्तुत्वा जिनं प्रतिजनं विहिताऽतिभक्त्याऽऽदेशप्रभुर्नगरमैक्षत शास्त्रदक्षः ।
साक्षात् तदीयसुषमा सुखमानिनाय चेतस्ततः स्तुतिमिमामचिरादुवाच ॥ ७६ ॥
यत्र चित्ररचना वचनानां गोचरात् पटुधियामतिशेते ।
वेश्मनां धनवतां सुरलोके लाघवं विदधतां विभवेन ॥ ७७ ॥
मानवाऽऽश्रयभवाच्छिवसिद्धिर्जायते दिवमतीत्य समस्ताम् ।
इत्यवेत्य किमु पौरगृहाणि तुङ्गतामधिगतानि विशिष्य ॥ ७८ ॥
अत्र कायमपहाय विवस्त्री भोगभाग् भवति वस्त्रमिवाङ्गी ।
यात्वतः सहतनुर्मनुजन्मेऽतीव यत्र भवनेष्वतिवृद्धिः ॥ ७९ ॥
भास्करोपलदलैर्जनिताग्नेस्तापतो न जडिमा शिशिरेऽपि ।
स्पर्द्धया शशिमणिक्षरदम्भः संभवान्नहि शुचावपि तापः ॥ ८० ॥
उद्यतद्युतिमता हिमवृत्तिर्नाश्यते भुवनमत्र विकाश्य ।
सौधपङ्क्तिरवसीयशरण्या जायते तपसि चान्द्रपयोभिः ॥ ८१ ॥
सान्द्रचान्द्रविगलज्जलधारा धौतशुद्धकलधौतसवर्णा ।
साङ्गगाङ्गपयसा ह्यभिषिक्तं पुण्यमेव कुरुते परलोकम् ॥ ८२ ॥
निर्दहद्भिरगुरुद्रुमसारैर्वान्तधूमकृतमण्डलयोगात् ।
आतपत्रमिव यत्र बभासे राजतां प्रकटयन् नगराणाम् ॥ ८३ ॥
यत्नबद्धशशिरत्नपयोभिर्जन्यते यदभिषेकविवेकः ।
बालसूर्यमहसा सहसा स्यात् सांप्रतं बहलचन्दनचर्चा ॥ ८४ ॥
केतनैर्धनिनिकेतनलक्ष्मीचेतनैः पुरपुरन्दरमूर्त्तेः ।
सा प्रकीर्णककला सकलाऽपि दृश्यतेऽपवनभूपवनेन ॥ ८५ ॥
भूभृतां भवनपङ्क्तिनिवेशः पेशलश्रियमधादिह मौलेः ।
तत्र रत्नभुवि बिम्बिततारामालया भवति मौक्तिकमाला ॥ ८६ ॥

श्रद्धया परिणतः स्वत एव तत्त्वविद्वचनभावितचेताः ।
अक्षतामिह सदाऽऽर्हतवर्गो दक्षतां वहति तत्त्वविमर्शे ॥ ८७ ॥
चेतसा वहति कश्चन रत्याऽऽशाम्बरीं स्थितिमलीनविबोधः ।
तस्य न व्यवहृतिष्वनुरागो निश्चितः शिवपदेऽपि निवासः ॥ ८८ ॥
पात्रसंगतिभृतः सुमनोभिः शोभितां दधति काश्चन वृत्तिम् ।
श्राविका इह लता इव दिव्या मोहनाय खलु वैश्रमणानाम् ॥ ८९ ॥
वर्द्धमानविभुनिर्वृतिधाम्नः सूपदेशरमणाच्छ्रुतनाम्नः ।
संभवन्ति वनितास्तदपापाः केऽपि सन्ति पुरुषा न च पापाः ॥ ९० ॥
प्राबोधयद् धृतविहारविहारकर्मा-
ऽऽदेशाधिपोऽप्यवनता जनताः समस्ताः ।
स्थित्वा दिनानि कतिचिद् विहितोपचाराः
स्फारानुरागवनिता ध्वनितार्थसाराः ॥ ९१ ॥
पुण्यपुण्यकथनैरथ नैःस्वं सज्जनस्य स निरस्य चिरस्य ।
स्पष्टतामुपगते वृषमार्गे प्रातरेव विजहार विहारात् ॥ ९२ ॥
तीर्थराजमभिवन्दितुकामे प्रस्थिते दिनकरोऽभ्युदयेन ।
निस्तमस्त्वमुदयेन सहास्मिन्नाह साहसवतामिह मुख्ये ॥ ९३ ॥
भानुमालिनि समीयुषि नृणां दृक्पयोरुहविकाशिनि पूर्वम् ।
पूर्वदिक्पथविलम्बिनि शैले तारका कुसुमलिप्सुतयैव ॥ ९४ ॥
रत्नपङ्क्तिपतयालु हि रत्नं न्यायमेवमधिगत्य जगत्याः ।
संयुयोज सहसा दिनरत्ने तारकामणिगणः प्रणयेन ॥ ९५ ॥
स्पर्द्धयाऽन्यहरितां समवेक्ष्य तारकाऽऽभरणभारमिवैन्द्री ।
दिक्स्वराज्यमदजातरुषेवाऽऽताम्रसूर्यनयनं समधत्त ॥ ९६ ॥
तेजसामतिशयं न सहन्ते हन्त ! केऽपि बलिनोऽन्यजनस्य ।
आचकर्ष तदमर्षसतर्षस्तारका करवसूनि विवस्वान् ॥ ९७ ॥
उद्यते द्युतिभरेऽहिमरश्मेस्तारकेक्षणनिमीलनमासीत् ।
लज्जया सकलदिग्युवतीनामिन्दुना सह विलासवतीनाम् ॥ ९८ ॥
मन्दतामुपययौ विषमेषुश्चित्रमत्र विजयिन्यपि रागे ।
तारकेक्षणकटाक्षविमोक्षान्मङ्क्षु दिग्युवतिभिश्च विरेमे ॥ ९९ ॥
कल्पवर्त्तमकरोन्ननु तारासंकरेण सह चन्द्रिकयैव ।
बालभानुरत एव तदीयज्योतिषां न विषयेऽद्भुतलेशः ॥ १०० ॥
व्यानशे नु तमसा निबिडेन सर्वतो भुवनमस्तविवेकम् ।
विष्णुचक्रमुदितं रविरूपं तद्विनाशनकृते ह्यनुरूपम् ॥ १०१ ॥
विश्वतोऽवधिविधा इव तारा रेजिरे दिवि यथास्थलचारा ।
केवलावगमजङ्गमरूपेऽभ्युद्गते दिनकरेऽस्तमयुस्ताः ॥ १०२ ॥

मूकतामुदवहद् यदुलूकोऽप्यत्रिहग्जरुचिराप विरामम् ।
मन्दतां खलु बृहस्पतिरागात् तत्सिताम्बररुचिः समुदीतः ॥ १०३ ॥
त्याजिता जगति मैथुनवृत्तिर्दिव्यकर्मणि नृणामनुयोगः ।
कारितो भगवता प्रभयैवाध्वाऽप्यदर्शि भुवि नाभिभुवेव ॥ १०४ ॥
लक्षदक्षजनभाजिनि वादे निर्जिते न हि दिवाऽपि निवादे ।
निष्करेऽपि करसङ्करपूर्णे सोऽध्युवास नगरे सविलासः ॥ १०५ ॥
लौकिकस्तदितरोऽपि च मार्गः सूत्रतश्चलति सार्थबलेन ।
आदृतः प्रथमतो वृषभाद्यैः सर्वदर्शिपरपारगतैस्तैः ॥ १०६ ॥
इत्यवेत्य हृदि चैत्यनिनंसुर्निश्चयात् स वृषभप्रभुयोगम् ।
सार्थमुख्यमवलम्ब्य शिवाय शैलशालिनि पथि प्रचचाल ॥ १०७ ॥
दुर्णयैरविनयं प्रतिपन्नैर्भीमदुर्गविषयप्रतिबद्धैः ।
स्खल्यमानगतिरध्वनि नीचैर्नातिचारमतिरेष बभूव ॥ १०८ ॥
वाडवेयनिवहैः सपरीतः प्रीतनिर्भयमना वनमध्ये ।
नैगमानुसरणेन रणेन निर्जितारिरचलद् बलशाली ॥ १०९ ॥
पार्वतीं श्रियमसावुपभुञ्जन् निर्ययौ गिरिशताऽऽक्रमणेन ।
पृष्ठतश्च पुरतः सहभद्रो दुर्गमोक्षपथलीनमनस्कः ॥ ११० ॥
केवलादुपनता उपदेशात् पार्वतीयमनुजा ननु जात्याः ।
तेन केचन कृताः सुकृतार्था दर्शने विषमबाणजयेन ॥ १११ ॥
विक्रमी क्रमपरिक्रमनील्या तीर्थराजगिरिपार्श्वमुपेत्य ।
तस्थिवानकपटः पटकुट्यां प्रस्फुटं सितपटः स नियोगी ॥ ११२ ॥

श्रीसंकेतनिकेतनं गिरिवरः सम्मेतनामा जिनै-
र्निर्वाणेन पवित्रितः परिचितः श्रीशक्रचक्राऽऽगमैः ।
तं संप्राप्तमहोदयश्रियमयं प्रीत्या नियोगीशिता
दर्श दर्शमिह स्वमेव मनसा मेने पुनस्तादृशम् ॥ ११३ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते उदयश्रीकलिते पूर्वापत्तनविहारनगरश्रीचिन्तामणिपार्श्वप्रभुस्तुतिवर्णननामा द्वादशः सर्गः ॥

## त्रयोदशः सर्गः ।

### अथ श्रीसम्मेताचलतीर्थराजवर्णनम् ।

मुक्ताचलाद् घटभुवाऽऽचरिता पवित्रीभूता हरिद् विमलशैलबलात् प्रतीची ।
पुण्योत्तरा ककुबसौ स्फुटिकाचलेन सम्मेदतीर्थगिरिणा गुरुणा दिगैन्द्री ॥ १ ॥

उच्चैर्वरारकखरैर्नखरप्रमाणै रेजे गिरिः स्वशिखरैरखरैः क्वचिच्च ।
रूप्यान् कपिद्धवलितैर्वलितैश्च तिर्यग् हेम्ना तथा कपिशताकुलितैर्द्विधाऽपि ॥ २ ॥

आपूरयन् दशदिशोऽपवनप्रसून-
श्रेणीगलत्परिमलैरमलैर्गिरीशः ।
दुर्गाऽऽश्रयेण फणिनां गणिनां वरेण्यैः
सेव्योऽस्य किं न महिमा स हिमाद्रिभाव्यः ॥ ३ ॥

उत्फुल्लमल्लितरुभिः कृतशेखरश्रीर्वेणुध्वनिध्वनितगोपवधूविलासः ।
नृत्यत्कलापिकुलपक्षरुचा विचित्रश्चित्राय सैष पुरुषोत्तमजैश्चरित्रैः ॥ ४ ॥

उच्चामरप्रभुतयाऽद्भुतया स साधुर्माधुर्यधुर्यरसनिर्झरणैर्नितान्तम् ।
सान्द्रद्रुमावलिकृताऽऽतपवारणेन भूभृत्पदं तदुचितं रुचितं विशेषैः ॥ ५ ॥

आपूर्यमाणविवरैर्मरुता स वंशैरापाद्य वाद्यगणनादमिहाऽऽदरेण ।
चारुप्रकारसहकारलताः स तालं सर्वत्र नर्त्तयति तीर्थसमर्थतायै ॥ ६ ॥

शत्रुञ्जयस्फुटिकभूधररैवताद्रिसम्मेदकार्बुदगिरिप्रमुखैश्च दुर्गैः ।
सार्वत्रिकं विजयते भरते प्रसिद्धमेकातपत्रमिहमार्हतधर्मराज्यम् ॥ ७ ॥

एकस्य निर्वृतिपदं यदि तीर्थभर्त्तुः स्यादुज्जयन्त इति लोकहिताय नाम्ना ।
विंशाऽऽर्हता मयि महोदयलब्धिधामसम्मेदकस्तदुचितः किल वैजयन्तः ॥ ८ ॥

पञ्चापि मेरुगिरयः किल पञ्चतीर्थाऽऽकृत्या स्थिता भरतवर्षजमध्यखण्डे ।
धैर्यक्रियां समुपदेष्टुमिवाधिमैत्र्या वेलाबलोच्छलितनीरनिधेर्जडस्य ॥ ९ ॥

सर्वाङ्गपुण्यभरलिप्सुतया सुरेशस्तीर्थेशजन्मसमये कृतपञ्चरूपः ।
तच्छिक्षयेव कलधौतगिरिस्तथाऽस्यात् श्रीपञ्चतीर्थतनुभिर्ननु भिन्नपापः ॥ १० ॥

अस्मिन् गिरावधिगते जिनभावनेन पुण्यस्य विंशतिविशोपबलं फलं स्यात् ।
आवेदितुं किमिति विंशतिशृङ्गभङ्गीमङ्गीचकार शिवकारणमेष शैलः ॥ ११ ॥

दानं फलैरविरलैः कलयन् नगानां तीव्राऽऽतपात् कृततपा इव साक्षमालः ।
शैलाश्रयेण घटयन् बहुधातुदार्ढ्यं श्रीभूधरो धरति किं न गिरीशलीलाम् ? ॥ १२ ॥

प्रख्यापयद्भिरिव काञ्चनसिद्धिवीथीमभ्युन्नतैः सशिखरैः समहौषधीकैः ।
प्रीत्या गतागतकरैरमरैर्निषेव्यः किं स्यान्न निर्वृतिपदं विविधाऽऽगमार्थैः ? ॥ १३ ॥

योगैरनेकफलदैर्विहितेष्टसिद्धिर्गम्यो न जातु करिभिर्हरिभिर्बलाऽऽढ्यैः ।
ध्यायन्निव स्थिरतया किमपि स्वरूपं स ब्रह्मलीनमनसां न कथं निरीक्ष्यः ? ॥ १४ ॥

जन्माभिषेकपयसाऽस्मि पवित्रितो यैराजीवितं भवतु तत्सविधे स्थितिर्मे ।
देवाद्रिरित्यवगमात् कृतपञ्चमूर्त्तिः श्रीतीर्थपञ्चकमिषाद् भरतेऽध्यवात्सीत् ॥ १५ ॥
तीर्थङ्करा हि परिनिर्वृतिमीयुरस्मिन् शैत्यं ततः कनकचैत्यवति प्रसिद्धाः ।
भावं विभावयति नित्यपयोदवृष्टिः सृष्टिं विनाऽभ्रपटलस्य किमद्रिमूर्ध्नि ? ॥ १६ ॥
जन्मोत्सवेऽहमभवं भगवन्निषेवी कल्याणके जिनपनिर्वृतिजेऽपि तादृग् ।
भूयासमित्यभिनिविष्टमनास्सुमेरुः सम्मेदशैलवपुषा भरते समेतः ॥ १७ ॥
प्रोत्साहयन् पथि नटानवटातिगत्याऽदृष्टप्रपातहृतपातकसन्निपातः ।
वादित्रचित्ररवसंभवपूर्वमद्रिं वीर्योद्भटैः सहभटैरभजन्नियोगी ॥ १८ ॥
आरुह्य गुह्यकशतैः कृतसन्निधानस्तं तीर्थशैलमनुशीलितशालिशीलः ।
लीलावती जननिगीतयशा ववन्दे सङ्घेन चैत्यमनघेन समं समघ्री ॥ १९ ॥
अभ्यर्च्य चन्दनसिताभ्रककुङ्कुमाद्यैर्माद्यन्मनोरथपथप्रतिपन्नसिद्ध्या ।
जाग्रत्प्रभावजिनभावनयाऽविलम्बं स न्यस्तबिम्बनयनः स्तुतिमाततान ॥ २० ॥

जयति भगवाञ्श्रीनाभेयप्रभुर्जगदीश्वर-
  स्त्रिभुवनमहासाम्राज्यश्रीवशीकरणं परम् ।
कनकरुचिकृत् सर्वाऽऽशासु स्वभासुरदीप्तिभि-
  रभिनवरविध्वान्तध्वंसश्रियां समुपाश्रयः ॥ २१ ॥
भजत रजतक्ष्माभृत्पीठे तमासनभासिनं
  शिवमिव जना दुर्गाकारस्फुरद्गिरिभूषितम् ।
स्फुटतरजटाभारस्फारत्विषादविजित्वरं
  श्रमणगणभृत्पूज्यं सिद्धं शिवालयसंगतम् ॥ २२ ॥
विजयमनिशं देयान्नाम्ना जिनोऽजितयार्चितः
  परमपदभाक् शर्मे वाप्तौ द्रुमैरतिविद्रुमे ।
विजयिविजयासूनुर्नूनं सुवर्णसवर्णभा-
  स्त्रिजगति परं साम्यं मूर्त्त्यान्तरं परिभावयन् ॥ २३ ॥
कमनदमनः सौभाग्येन ध्रुवं जनरञ्जन-
  स्त्रिदशवनिताभावोल्लासी प्रभुर्ननु शम्भवः ।
सकलकलया शुद्धः सिद्धः सम्मेतगिरौ गुरु-
  र्गुरुरिव दिवः शास्ताशास्ताः प्रपूरयतां हि नः ॥ २४ ॥
अनुदिनमयं भूयाद् भूत्यै जिनो ह्यभिनन्दनः
  समितिमतिमान् मानी मानं जयन्नयिशाश्वतः ।
विबुधललनालालित्येनाप्यविक्रियमानसः
  शिरसि रसिकः सिद्धेः सिद्धः समेतमहीभृतः ॥ २५ ॥
उदयशिखरि श्रीमन्मौलौ यथा दिवसप्रभु-
  र्भवति कमलाऽऽनन्दी बन्दीकृतप्रभुताऽद्भुतः ।

सुमतिभगवाँस्तद्वच्छैले समेत्य समेतके
समगमदयं शैवं रूपं शिवाय स नः सना ॥ २६ ॥
दिशतु विशदां पद्मां पद्मप्रभः प्रभुरार्हतीं
गिरिशिरसि यः सिद्धावस्थाऽवलम्बितबिम्बभाक् ।
दधदिव दृढं मूर्त्तं मूर्त्तौ विमुक्तिनितम्बिनी
हृदयनिहितं रागं सद्योऽभ्युदितरविच्छविः ॥ २७ ॥
विपदवनिजच्छेदः पार्श्वे सुपार्श्वजिनेश्वरः
स्वतनुमहसां भारैस्तारैर्जितोऽग्रदिनेश्वरः ।
जगति जयताद् यस्यावद्यं स्तुतीस्त्रिदशेश्वरः
प्रमुदितमना भक्त्याऽऽसक्तः करोति विकस्वरः ॥ २८ ॥
कुवलयमुदे चन्द्रश्चन्द्रप्रभः प्रभयाऽऽभयः
शशधरसुधासारस्फारप्रकाशियशोमयः ।
मनसि लसितं शुक्लध्यानं बहिः प्रथयन्निव
शिव इव सितः शैवं दैवं प्रकाशयतां मयि ॥ २९ ॥
सुविधिरधिकं श्रेयः पुष्णात्वनुष्णरुचिप्रभः
स भवनमुमाप्रज्ञादीनां विधेः सविधे स्थितेः ।
निरवधिसुखस्थानं दानं ददद् भुवि वार्षिकं
सपदि भगवान् यो दारिद्र्यं जहार कृपादृशा ॥ ३० ॥
मनसि वचसि स्वाङ्गे शैत्यं परं कथयन्नथ
शिवपथरथः सेव्यो भव्यैः कृतार्थमनोरथः ।
दशमभगवान् गीतः प्रीतैः सुरैर्जिनशीतलः
सफलयतु मे वारं वारं मनीषितमञ्जसा ॥ ३१ ॥
उपशमवधूप्रेयान् श्रेयान् जिनोऽञ्जनवार्जितः
शिवनवरमाऽऽश्लेषी मौलौ समेतमहागिरेः ।
दनुजमनुजैः पूज्यो नाम्ना ह्यनन्तचतुष्टयी
परिणतमयी भावं धेयान्मयीहितपूरणः ॥ ३२ ॥
वसुपरिवृतस्त्रेधा मेधा दधातु मनस्विनां
जिनपतिरतिप्रीत्या पूज्यः सुरैर्वसुपूज्यभूः ।
शिव इव जने नित्यं मृत्युं जयन् विजयप्रदः
शिवपरिणतेश्चम्पाऽकम्पापरैरपुनाद् यकः ॥ ३३ ॥
विमलभगवान् पुष्यान्मुख्यां सुखश्रियमाश्रयः
प्रशमविनयादीनां दीनाङ्गिनां कमलाऽऽकरः ।
करणविजयी दाता भक्ताऽऽत्मनां नृपसंपदः
पदसलिलजन्यासाच्छैलं समेतमिहोन्नयन् ॥ ३४ ॥

जनयतु सुखाऽऽनन्त्यं नित्यं जिनोऽनृजिनोऽङ्गिनां
शिवपदमिति ध्यानाच्छैलं समेतमुपेयुषाम् ।
शिवमनुनयन् नाम्नाऽनन्तः सतां विषमेष्वपि
नटनघटनाकौशल्येनार्चितस्त्रिदशैरपि ॥ ३५ ॥
हृदयकमले श्रद्धाभाजां जिनो रमतां मतां
रतिमनुनयन् दिष्ट्याऽभीष्टप्रधानविधानतः ।
उपवनघटारम्ये सम्यक् समेतगिरौ शिवं
समधिगतवान् धर्मः शर्मश्रियाः समुपाश्रयः ॥ ३६ ॥
अशिवनिवहे शान्तिः कान्तिर्भृशं जगतीभुवा-
मरिपरिभवे श्रान्तिः क्षान्तिः परस्परसङ्गरे ।
भुवि भगवतो यस्यावश्यं बभूव जनुर्दिने
दिशतु स शिवं सिद्धः शान्तिः समेतनगोत्तमे ॥ ३७ ॥
अतिशयरमापात्रं गात्रं यदीयमदीप्यत
शिखरिणि ययौ यो निर्वाणं समेदकसंज्ञिते ।
तदनु भजनासक्ते व्यक्ते दधन्मधुरश्रियं
स जयतु जिनः काकुत्स्थाख्यस्तथाऽपरकुन्थुवाक् ॥ ३८ ॥
शमरसपयोराशिर्नूनं विकाशि(सि)तसन्नना
अरजिनवरः कुर्याद् धुर्यां महोदयसंगतिम् ।
विजितसमरः कर्मारीणां भरेऽपि स सङ्गरः
करपरिकरव्यासाद्भासाऽऽश्रयीकृतभास्करः ॥ ३९ ॥
सुकृतविलसद्वल्लीफुल्लक्रियासु पयोधरः
करिहरिभयव्यापत्पल्लीविनाशनृपोद्धुरः ।
दिशतु भगवान् मल्लिर्मल्लीप्रसूनलसद्यशाः
रसपरवशा मुक्तिप्राणप्रियासुरतेर्दशाः ॥ ४० ॥
यदुकुलनभोभास्वान् भूयान्मुदे मुनिसुव्रतः
क्षपितदुरितस्तीव्रैर्भूरिव्रतैर्घनभूघनः ।
अमृतसमये मूर्द्धन्यद्रेः संमेतवरस्य यः
स्थिरतरतनुर्वैडूर्यस्य श्रियं चिरमाश्रयत् ॥ ४१ ॥
दमितविषयः स्वेष्टं दद्यादवद्यविभेदनः
प्रशमितजगद्दोषः श्रीमान् नमिर्जिनपुङ्गवः ।
परमपदवीलाभे यस्याऽचलस्थलमन्वभूत्
सुरसमुदये वेदीभावं समेतमहाह्वयम् ॥ ४२ ॥
विजयकमलां यस्याऽऽदेशाल्लली कमलापतिः
परिणयमिषाद् राजीमत्या विबोधविधायिनः ।

जयतु स शिवानन्दी योगीश्वरः परभूतिमान्
यदुकुलरविर्नेमिः सिद्धिं गतः खलु रैवते ॥ ४३ ॥
पार्श्वः शाश्वतबोधनेन भगवान् भाखानिवाभ्युद्यतः
शैलेश्या शिवमाप तापरहितः शैले समेताभिधे ।
तीर्थं तत् प्रथितं मुनीन्द्रकथितं जातं सुजातं नृणां
पुण्यायेव महोदयाय सुदृशां योगाय भोगाय च ॥ ४४ ॥
माहात्म्यं निजगाद यस्य भगवाँस्तीर्थस्य तीर्थङ्करः
सिद्धार्थक्षितिपाङ्गजः शिवपुरीसार्थस्य वै पार्थिवः ।
श्रीपापापुरि सिद्धिभाक् स जयताच्छैलः समेतश्चिरं
छत्रीभूत इव क्षमातलललल्लक्ष्म्याः प्रभासंभृतः ॥ ४५ ॥
स्थित्वा दिनानि कतिचित् तदुपत्यकायां कुर्वन् मरुत्तरुरिवार्थिसमर्थभक्तिम् ।
निर्णीय शुद्धवृषभप्रभुमार्गनीतिं भीतिं विमुच्य पुनरावबृते स धीमान् ॥ ४६ ॥
भूभृत्प्रकम्पनरतिः कटकाधिवासैः कूटस्थितिं पथि निरस्य जने स्ववृत्त्या ।
धृत्वाऽथवा नरवरान् स बलं नवादाख्यानं विशिष्टनगरं स समाप दिष्ट्या ॥ ४७ ॥
तीर्थाभिवन्दनबलाद् भरते दधानः सामान्यमन्यनिजयोर्विजयोऽर्जितश्रीः ।
सान्द्रद्रुमाद्रिनिवहाद् बहिराजगाम सूरः स सूर इव वार्दलचारुवृन्दात् ॥ ४८ ॥
निर्माय निर्मलयशा बहुसङ्घभक्तेरत्यादरं गतदरः स दरीनिवासे ।
वीरार्हतोऽपि परिनिर्वृतिभूप्रदेशे पादद्वयीनमनतः प्रमदं प्रपेदे ॥ ४९ ॥
सारं सुरासुरनिखातसरः प्रतीर्य पारंगतः सरभसा बहुबाहुवीर्यैः ।
स्वं तीर्णदुस्तरभवार्णवमेव मेने सेनेश्वरः स्वरसभास्वरशाश्वतश्रीः ॥ ५० ॥
अन्तर्वणं गणपतिः परितः परीतं वैभाररत्नविपुलोदयहेमशैलैः ।
संप्राप्य राजगृहसीम्नि स तीर्थभक्तस्तीर्थाधिनाथमुनिसुव्रतमाननाम ॥ ५१ ॥
उल्लासिपद्मवनमण्डनकुण्डनीरैर्नित्योष्णतामनुभवन्नवनीविभागे ।
वीराभिवन्दनसमागतचन्द्रसूर्याख्यानां कथामवितथां सरसादमंस्त ॥ ५२ ॥
श्रीशालिभद्रभवनोत्तमवप्रसौधैर्योधैस्तथा गुणशिलावनजातबोधैः ।
अद्यापि यत्र जिनशासनराज्यमेकच्छत्रं पवित्रमनसां प्रतिभाति चित्रम् ॥ ५३ ॥
व्यालोक्य राजगृहनामपुरं त्रिलोक्यां दूरस्थिता अपि जिनैः कथिताः पदार्थाः ।
साक्षात्कृता इव रुचिं द्रढयन्ति बाढं पुंसां भवन्ति च ततः खलु ते कृतार्थाः ॥५४॥
शाखापुरं पुरत एव महत्तदीयं गत्वा नियोगपतिरर्चितवीरमूर्त्तिः ।
नाभेयचैत्यगृहमेत्य कृतप्रणामस्तत्याज मानसमलं समलङ्कृताङ्गः ॥ ५५ ॥
नत्वेन्द्रभूतिपदयोः सदयोदयश्रीर्युग्मं पदे विमलकेवलबोधसिद्धेः ।
श्रीगौतमोत्तमगुरुप्रतिबिम्बरत्नं तुष्टाव भाववशतः शतशुद्धवृत्तैः ॥ ५६ ॥
राजतां गणपतिः सुरराजां वन्दनीयचरणः शुभमूर्त्तिः ।
यत्पुरस्सरतयाऽनुगतैव शाश्वती विजयभृद्गणलक्ष्मीः ॥ ५७ ॥

मन्द्रगर्जितकलाऽपि यदीया देशनादिविषया गुरुरेव ।
मङ्गलाय भवति श्रुतिमार्गसंगता व्यसनवारणकर्मा ॥ ५८ ॥
साधुसिन्धुरमुखस्य निनादश्चूलिकादिपदभूर्गणभर्तुः ।
सागरान् विजयते स्म विशेषैरङ्गसाधनमयैः शुभवृत्त्या ॥ ५९ ॥
दुर्द्धरान्तररिपोर्विजयोऽस्याश्रित्रितः समितिशूरनराणाम् ।
पूर्वसाधुगणभृद्गजराजां बृंहितं महितमेव महीन्द्रैः ॥ ६० ॥
कालिकाङ्गजमतिर्वमति स्म मानमाश्रयति संगतिरागम् ।
सिन्धुजा गणपतेर्ध्वनितेनाप्यूर्मिकाप्रणयिनीव रसेन ॥ ६१ ॥
गन्धहस्तिललितान्यतिशेते यः प्रवृत्तिनिहितप्रभयैव ।
तेन कश्चरणगौरवरीत्या स्पर्द्धते गणभृताऽनिभृताऽऽत्मा ॥ ६२ ॥
सिंहजध्वनिधरप्रतिशब्दं यो जिगाय दृढधैर्यवचोभिः ।
सर्वतोऽभ्युदितपद्ममहागोनिर्व्ययायविधिसाधननिष्ठः ॥ ६३ ॥
यः करेऽतिशयभृन्महिमानं मानवैरभिमतं निदधाति ।
विश्रुतः श्रुतिधरेषु गुरुत्वे भद्रजातिकलभाधिकृताङ्गः ॥ ६४ ॥
आनने स्फुरति यस्य महेभाऽऽकार एव सुभगो ध्वनिसौम्यः ।
मानसे परिणताऽऽकृतियुक्तिः साहसाय निहिताऽप्यसुभाजाम् ॥ ६५ ॥
पार्श्वमेव सततं धरते यस्तेजसां विहितविघ्नविनाशम् ।
वर्धमानवरशासनमुच्चैः स्पष्टयन् नयनमङ्गलकारी ॥ ६६ ॥
सामजन्म नियतं वदनेऽस्य सौष्ठवं सकललोकहिताय ।
निश्चितैव समरोचितलक्ष्मीर्भासतेऽनुपदवृत्तविधाने ॥ ६७ ॥
दुर्द्विजिह्वशतः सकलोर्व्या निश्चिताऽऽदरभृता बिलवृत्त्या ।
यद् विशुद्धचरणद्वयभाजा स्थीयते बहुसुखेन वृषेण ॥ ६८ ॥
यो द्विमातृतनयप्रभुवीरख्यातिमत्र निदधे पदवृत्त्या ।
ब्रह्मचारिविधिबान्धवधर्मा पोषयन् जगति काञ्चनसिद्धिम् ॥ ६९ ॥
याऽङ्गजास्य रुचिराशु जिगाय शुद्धधौतकलधौतविभासम् ।
चित्रभानुशरणं प्रतिपन्नं प्राकृतयाऽभ्युदयने भुवि शुद्ध्यै ॥ ७० ॥
दृष्टताऽस्य न शिवाङ्कनिवेशात् क्वापि वस्तुनि परे परमार्थात् ।
ब्रह्मणा परिचितेऽप्युचिता तच्छाम्भवी प्रतिकृतिर्गणनाथे ॥ ७१ ॥
आनने प्रसरति स्फुटमेव दानवृत्तिरतिशायितयाऽस्य ।
सेव्यते प्रतिदिनं नृपनागैः पार्श्वमुल्लसितशाश्वतबुद्ध्यै ॥ ७२ ॥
सर्वदेव परमोदकभावो मानसेऽभिरमते गणभर्तुः ।
पीनदीर्घयुगबाहुसमृद्धेरादिमङ्गलमिह प्रणिधानम् ॥ ७३ ॥
स्थाप्यते सुकृतकर्मसुसिद्ध्यै यः पुरः सुरवरैरपि नाम्ना ।
लब्धिरूपपयसां भरतोऽब्धिरेष कस्य गणभृन्न नमस्यः ॥ ७४ ॥

जीयते यदमुना यमुनाभितेजसाङ्गनिहितेन हितेन ।
श्रीसुदर्शनभृताऽप्यनुगम्ये सम्यगेव गणभृत्पदमस्मिन् ॥ ७५ ॥
ब्रह्मणादिमतया प्रथितोऽपि न्यस्यतेऽन्त्यपद एव कुमारः ।
येन साधुचरणेन स वज्रः ख्यातिमान् असुरदुर्गजयेन ॥ ७६ ॥
स्थूलभद्रवदनेन धरायां प्रापि निर्मलयशः शशलक्ष्म्या ।
द्राग् यथासमयमर्थविशेषसाधनेन शुचिशीलधनेन ॥ ७७ ॥
वाञ्छितार्थकरणेन सुरद्रोरप्यधः स्थितिकृता गणराजा ।
भिक्षवो विभवभोगविलासं निन्यिरे सुमनसामभिमान्याः ॥ ७८ ॥
सा विनायकमुपेत्य शिवश्रीर्जायते नवसुधाऽशनसौख्यम् ।
एतमेव घनलब्धिसमेतं निश्चयाद् गणपतिं प्रणिदध्मः ॥ ७९ ॥
येऽसिन्दूरमुपादधुर्मधुरिमा नित्यं गवां यान् पुनः
शिश्रायातिशयेन यैश्च सुषमा संपादिता वैभवे ।
येभ्यो दानमहोहितं च विहितं देवैः सदैवानुगैः
येभ्यो ब्रह्मरुचिः सतां समुचिता जज्ञे व्यवायव्ययात् ॥ ८० ॥
येषामङ्गमहोदयः प्रतिपदं सिद्धिः स्वहस्ते परा
शुद्धानेकपता मुखे परिणता येषु स्थिरा श्रीर्वरात् ।
सर्वाऽऽशापरिपूरकैर्गणधरैः प्राप्तप्रतिष्ठैरिति
तैर्धार्या प्रभुभिः स्वचेतसि शिशौ भक्ते कृपा शाश्वती ॥ ८१ ॥
यैरैन्द्रभूतिरयमित्युपलक्षितोऽपि तेषामपि त्वमिह साधयसे हृदीष्टम् ।
दत्त्वेन्द्रभूतिपदमुत्तमगौतमेशः मूर्खे बुधेऽपि महतां समदृष्टिरेव ॥ ८२ ॥
स्तुत्वाऽऽदिमं गणधरं बहुधोपलब्ध्याऽऽदेशप्रभुः पुनरमुष्य स देशभाजम् ।
मूर्तिं सुधर्मगणभर्तुरुदीक्ष्य साक्षात् [1]पूजापुरस्सरमदःस्तुतिमप्युवाच ॥ ८३ ॥
यदीयकीर्त्तिः प्रससार गौरी गौरीकृताऽशेषपदार्थरूपा ।
भूपालमौलिष्वपि माल्यवेषाऽऽश्रयेण नित्याऽऽहृतसौमनस्या ॥ ८४ ॥
गौरीमुखे वाग् धृतशुद्धवर्णावासस्थकान्तिस्तत एव गौरी ।
गौरीयशःश्रीस्तत एव देहे भासा स गौरीमय एव देवः ॥ ८५ ॥
गौरीगुरोश्चापि महेश्वरस्य विमुच्य पार्श्वं गुणरागवश्या ।
नास्य प्रभोरुज्झति सन्निधानं गौरी नु देवी सुधियां निधानम् ॥ ८६ ॥
गौर्याः कुतः स्याद् भुवि गौरवाप्तिर्न गौरवं संनिधिमेत्यसौ चेत् ।
स्याद् भारती नात्र कृतावतारा न भारती अप्यनया तदाप्ये ॥ ८७ ॥
औदार्यमाचार्यरविं प्रपद्य स्वनामनामाऽलभताऽन्वितार्थम् ।
परोपकारादिवरेण्यपुण्यैश्चकार पुण्यं स्वमिहोपयुज्य ॥ ८८ ॥
प्रागल्भ्यमभ्यस्यति भाग्यलभ्यं विस्तारमन्यत्र सुपात्रभावैः ।
निधाय मूलं गुरुपादमूले परप्रबोधप्रतिभाऽनुकूले ॥ ८९ ॥

1 A °मदोदितम् ।

माधुर्यमेषामुचितं सुवृत्तप्रवृत्तिभाजां गुरुराजराजम् ।
मनोवचःकायनिकाययोगात् त्रैलोक्यतः पिण्डितमेकदेशे ॥ ९० ॥
धैर्यस्थितेरक्षयसेवधिर्यः स्वर्णाचलं चालयति स्म वादे ।
प्रदक्षिणा लक्षणतस्ततोऽमी ग्रहास्तमारुह्य दिवि भ्रमन्ति ॥ ९१ ॥
शोभातिलोभादिव सद्गुणानां यः संग्रही कार्मुकवत् सुवंश्यः ।
सौरस्य जाग्रन्महसो निदानं शुद्धोपजापं तनुतेऽवदानम् ॥ ९२ ॥
यदङ्गरेगत्तरदीप्तिजालैर्जितप्रवालैरभितो विशालैः ।
कृते सुवर्णस्य रुचामवर्णे वह्नौ ह्रियाऽह्नाय तदा विवेश ॥ ९३ ॥
व्रतेन गौरी रमणस्वभावं दधौ द्विजाधीशकलामलीके ।
गौरीगुरोः कान्तिमधश्चकार गणेश्वरः स्वीययशःप्रशस्त्या ॥ ९४ ॥
जीयादयं श्रीगणभृत् सुधर्मा यत्कीर्त्तिगानेन सभा सुधर्मा ।
मनोवचःकायमलं निरस्य सदस्यलोकं कुरुते स्ववश्यम् ॥ ९५ ॥
त्वं सात्त्विकत्वेन विधिस्वरूपं प्राकाशयः श्रीपुरुषोत्तमोऽपि ।
मत्याऽवमत्याऽखिलमन्युभावं बिभर्षि विश्वानि शिवानुरागी ॥ ९६ ॥
गणाग्रणीस्त्वं जिनवर्धमानपट्टस्य भूषाकरणेन पूषा ।
द्विधाऽपि पूर्वातिशये समाशाभरप्रकाशाद् वपुषाऽपि धत्से ॥ ९७ ॥
त्वं पञ्चमोऽपि प्रथमः परम्परागणेशिनां विश्वपरोपकारिणाम् ।
दृष्टोऽद्य दृष्ट्या धवलस्वभावतस्तद्ध्यानतः स्वः प्रभुणा सदानतः ॥ ९८ ॥
एवं श्रीजिनशासनोन्नतिमधाद् यात्रापवित्राशयाऽऽ-
देशेशो ह्युपदेशपेशलतया मोहव्यपोहं सृजन् ।
नुन्नः पत्तनवासिनागरजनैः श्रीवर्धमानोद्भव-
स्थानं तीर्थमथ प्रणन्तुमचिरादभ्युद्यतः संयतः ॥ ९९ ॥
प्राप्ते क्षत्रियकुण्डनाम्नि नगरे कृत्वोपवासं तदाऽऽ-
देशस्य प्रभुराप्तमागधमहातीर्थेशवन्द्यक्रमः ।
चक्री वाचलदुर्गमार्गं विषयान्तश्चारचारुः पुनः
श्रीवीरप्रतिपत्तिनिश्चितमना रेजे शुभे राजितः ॥ १०० ॥
यत् सेव्यते नु मथुराख्यपुरं सुरार्च्यं तीर्थं जिनेन्द्रजननाञ्जननाथवर्ण्यम् ।
तेनाऽऽश्रितेह मधुरा मधुराज्यभेत्रा जज्ञे प्रिया समधुरा मरुतां पुरस्य ॥ १०१ ॥
एवं देवनिषेवणं प्रणयिना सर्वाऽपि पूर्वा हरित्
तीर्थानामभिवन्दनेन सुदृशा संभाविता तेन सा ।
संप्राप्तेन महोदयश्रियमहो पुण्यैरगण्यैस्तत-
श्चातुर्मास्यविधानतः पुनरपि श्रीपत्तनान्तस्थितम् ॥ १०२ ॥

इति श्रीदिग्विजयनाम्नि महाकाव्ये महोपाध्यायश्रीमेघविजयगणिविरचिते उदयश्रीसंकलिते श्रीतीर्थराजगिरिश्रीगौतमस्वामिश्रीसुधर्मस्वामिस्तुतिवर्णनो नाम त्रयोदशः सर्गः ॥

॥ श्रीरस्तु ॥

# परिशिष्टम् ।

## महोपाध्यायश्रीमेघविजयगणिरचितं श्रीतपगच्छपट्टावलीसूत्रवृत्त्यनुसन्धानम् ।

ऐं वीतरागाय नमः ।

अथ प्राक्तनपट्टावलीसूत्रान्तसंहितगाथात्रयव्याख्या यथा–

श्रीविजयसेणसूरी पट्टे गुणसट्ठिमे सुगुणसिट्ठे ।
वाए साहिसहाए जेण ट्ठविओ स जिणधम्मो ॥ १ ॥

सिरि त्ति–श्रीमज्जगद्गुरुबिरुदधारि-महाराजाधिराजपातिसाहिश्रीअकब्बरप्रबोधकारि-श्रीहीरविजयसूरि-पट्टे एकोनषष्ठितमे श्रीविजयसेनसूरिर्भगवान् जज्ञे । किंविशिष्टः ? 'सुगुणसिट्ठे' सुगुणैः श्रेष्ठः–गुणाः स्वभावजा ज्ञानादयो विभावजा औदार्यादयस्तैरतिशयेन प्रशस्यो वर्णनीयः । येन स्वामिना वादे उपस्थिते श्रीसाहिसभायां स जगत्प्रसिद्धो जिनधर्मः प्रमाणयुक्त्या साधितोऽर्हतां शासनं च स्थापितम् ।

तस्य च प्रभोर्विक्रमात् १६०४ वर्षे नारदपुर्यां वृद्धोपकेशशाखीयघोषागोत्रभृत् सा० कमा तद्भार्या कोडिमा, तयोर्गृहे जन्म । सं० १६१३ वर्षे मात्रा पित्रा च सह श्रीविजयदानसूरिहस्ते श्रीहीरविजयसूरिनिश्रया दीक्षा । सं० १६२६ पंन्यासपदम्, सं० १६२८ वर्षे फाल्गुणसितसप्तम्यां श्रीअहम्मदावादनगरे उपाध्याय-पददानपूर्वकं आचार्यपदम् । सं० १६५२ वर्षे भाद्रसितैकादश्यां तिथौ भट्टारकपदम् । ते च श्रीगुरवो भट्टा-रकत्वं विंशतिवर्षाणि प्रपाल्य श्रीस्तम्भतीर्थे सं० १६७१ वर्षे ज्येष्ठशुक्लैकादश्यां स्वर्गमलञ्चक्रुः । एतच्चरितं विस्तरतो विजयप्रशस्तिकाव्याद् वेद्यम् । किञ्चिल्लिख्यते–

श्रीगुरुभिः सं० १६३२ वर्षे चांपानेरदुर्गे समहोत्सवमनेकार्हत्प्रतिमाशतानां प्रतिष्ठा कृता । तथा सूरति-बन्दिरे श्रीचिन्तामणिप्रमुखानेकसभ्यभट्टसमक्षं श्रीभूषणनामा दिगम्बराचार्यो निर्जितः । तथा 'नमो दुर्वार-रागादि' इत्यस्य श्रीयोगशास्त्राद्यश्लोकस्य सप्तशतान्यर्थाः सूक्तावल्यादिग्रन्थाश्च कृताः । राजनगरे श्रीखानखाना-ऽऽख्यनवाबपर्षदि जैनधर्मव्यवस्थापनेन जयश्रीरलङ्कृता । तत्रैव च श्रीविद्याविजयनाम्ना स्वपदयोग्यं शिष्यं प्रव्राज्य श्रीसाहिबदेकारिता प्रतिष्ठा चक्रे । ततो गन्धारबन्दिरे सा० इन्द्रजीकारितां प्रतिष्ठां श्रीवीरस्य कृत्वा स्तम्भतीर्थे श्रीधनाईकारितां प्रतिष्ठां विधाय श्रीसूरयस्तत्रैव चतुर्मासीं चक्रुः ।

अत्रान्तरे श्रीहीरविजयसूरिषु विद्यमानेष्वपि एषां श्रीसूरीणां गुणातिशयाऽऽकर्णनादुत्कण्ठाभाजः पाति-साहिश्रीअकब्बरसम्राजः श्रीसूरीन् लाभपुरे आकार्य श्रीहीरसूरीश्वरकुशलप्रश्नपूर्वं धर्मवार्त्तां पप्रच्छुः । तत्र गुरुवचश्चातुर्यरञ्जिता मुख्यशिष्यकृताष्टावधानदर्शनाच्चमत्कृताः साहिपादाः श्रीगुरूणां बहुगौरवं चक्रुः । तदा केनचिद् भट्टेन 'अमी जैना जगदीश्वरं सूर्यं गङ्गां च न मन्यन्ते' इत्युक्ते श्रीसाहिसमक्षं पञ्चशतभट्टैः सार्द्धं श्रीगुरुभिर्विवादः प्रारेभे ।

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो बौद्धा बुद्ध इति प्रमाणपटवः कर्मेति मीमांसकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्त्तेति नैयायिकाः सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥ १ ॥

इति श्रीहनुमन्नाटकोक्तेन। तथा—

अधाम धाम धामेदं वयमेव स्वचेतसि। यस्याऽस्तव्यसने प्राप्ते त्यजामो भोजनोदके॥ २॥

तथा गङ्गोदकं विना नास्माकं देवप्रतिष्ठा स्यात्। इत्यादियुक्तिभिस्तदा भट्टा विजितास्तेन श्रीसाहिपादास्सप्रसादाः श्रीगुरूणां कालीसरस्वती इति बिरुदं दत्तवन्तः। गो-वृषे-महिष-महिषीवध-मृतद्रव्याऽऽदान-बन्धरोध-निषेधरूपषड्जलपस्फुरन्मानं श्रीसाहिभिर्दत्वा लाभपुरेऽत्याग्रहेण चतुर्मासिकद्वयं श्रीगुरूणां कारितम्, ततः श्रीहीरविजयसूरिभिरबाधावशाद् विजयसेनमुखान्निर्यामनामिच्छद्भिराकारिताः। श्रीसाहिपादानापृच्छ्य श्रीसूरयश्चतुर्मासिकमध्येऽपि चलन्तः पट्टननगरं प्रापुः। तदा सं० १६५२ वर्षे भाद्रसितैकादश्यां प्रातर्जातं श्रीहीरसूरीश्वरस्वर्गमनं श्रुत्वा तत्रैव तस्थुः, भट्टारकत्वेन सुमुहूर्ते समहोत्सवं श्रीगुरुपट्टमलञ्चक्रुः। ततः क्रमेण श्रीगुरुभिः स्तम्भतीर्थे राजिआ-वजिआऽऽख्यकारितां श्रीचिन्तामणिपार्श्वबिम्बप्रतिष्ठां कृत्वा सं० १६५४ वर्षे अहम्मदावादे भूमध्यान्निर्गतश्रीविजयचिन्तामणिपार्श्वबिम्बस्य शकन्दरपुरे स्थापना चक्रे, तथाऽहम्मदपुरे सा० मोटाकारिता तथा सा० लहुयाऽऽख्यकारिता च प्रतिष्ठा विदधे। समये च लाडोलिग्रामे सूरिमन्त्रध्यानं विधाय श्रीस्तम्भतीर्थे श्रीविजयदेवसूरीणां सूरिपदं दत्त्वा पत्तननगरे तेषां गणानुज्ञां नन्दिं श्रीगुरवः कृतवन्तः, तत्र च पञ्चसप्तत्याद्यङ्गुलार्हत्प्रतिमानां पदप्रतिष्ठाश्च। तदा सङ्घपतिहेमराजसङ्घो मरुस्थलीतः श्रीशत्रुञ्जयतीर्थयात्रार्थं व्रजन्, सप्तशताश्ववारकटकद्वादशशतशकटसंयुक्तः श्रीगुरूंस्तत्राभ्येत्य वन्दितवान्, स्वर्णरूपमुद्राभिरर्चितवांश्च। तद्दर्शनाद् राजनगरवास्तव्य-सा० सूराऽऽख्यः श्रीगुरूपदेशेन मार्गे प्रतिश्राद्धगृहं महमुदिकालभनिकां कुर्वन् श्रीअर्बुदाचल-श्रीराणपुरादितीर्थेषु मरुदेशेऽनेकनगरसङ्घेन समं तीर्थयात्रां विधाय निर्विघ्नं प्रत्यागत्य श्रीगुरून् ननाम। तद्वत्सरे श्राद्धैर्लक्षमहमुदिकाव्ययश्चक्रे। तदनु श्रीगुरवो राजधान्यपुरे प्रतिष्ठाद्वयम्, पुनः स्तम्भतीर्थे प्रतिष्ठात्रयम्, गन्धारबन्दिरे प्रतिष्ठाद्वयं विधाय सुराष्ट्रदेशे विजह्रुः। तत्र चतुर्मासकत्रयं प्रतिष्ठाष्टकं श्रीसिद्धाचल-श्रीगिरनारप्रमुखमहातीर्थयात्रास्तत्रत्यसङ्घेन सह कृतवन्तः। ततो हल्लारदेशे नवानगरे चतुर्मासीं विधाय तद्देशपति जामराजोऽपि धर्मोपदेशैः श्रीगुरुभिः प्रमोदितः। इत्येवं नानादेशविहारैः भूतलं पवित्रयन्तः श्रीगुरवोऽनेकजीवान् प्रत्यबुधन्, पञ्चाशज्जिनप्रतिष्ठाश्चक्रुः। अष्टौ वाचकपदानि, सार्धशतं पण्डितपदानि ददुः। द्विसहस्रयतिपरिवृताः सवाईश्रीहीरविजयसूरय इति बिरुदं बिभ्राणाः श्रीविजयसेनसूरयः प्रवचनं बहूनि वर्षाणि प्रभावयामासुः।

प्रान्ते च विजयदेवसूरीश्वरान् विश्वलनगरे च सङ्घाऽऽग्रहात् समनुज्ञाप्य स्वयं श्रीस्तम्भतीर्थे सर्वातिचारालोचनपूर्वं कृतानशनाः समाधिना सं० १६७१ वर्षे ज्येष्ठसितैकादश्यां श्रीगुरवः स्वर्गमलञ्चक्रुः। तत्राऽद्यापि बहुवित्तव्ययेन सङ्घकारितं स्तूपं जयतीति गाथार्थः॥ १॥

> तप्पट्टे सूरसमो सट्ठितमो विजयदेवसूरिगुरू।
> साहिजहांगीरेणं महातवस्सि त्ति बद्ध····हो····॥ २॥

तप्पट्टे इति—तत्पट्टे प्रकाशकत्वात् सूर्यसमः तपस्तेजसा षष्टीतमः श्रीविजयदेवसूरिनाम्ना गुरुर्बभूव। किंविशिष्टः? साहिना पातिसाहिना श्रीअकब्बरभूपालजन्मना श्रीजहांगीरेण महातपा इति कृतनामा इत्यनेनाऽऽस्य सूरेः तपःप्राधान्यं व्यञ्जितम्। अनेकशः षष्ठाष्टमादिभिः विंशतिस्थानकाद्युत्कृष्टतपश्चरणात् यावज्जीव-

मुपवासाऽऽचाम्ल-निर्विकृतिक-स्थानभक्तपानरूपनित्यतपःकरणात् तस्य च प्रभोर्विक्रमात् सं० १६३४ वर्षे ईडरदुर्गे वृद्धोपकेश-ओछतवालगोत्रभृत् सान्धिरा तद्भार्या रूपा, तयोर्गृहे जन्म । सं० १६४३ वर्षे जनन्या सह दीक्षा । सं० १६५५ वर्षे पण्डितपदम् । सं० १६५६ वर्षे वैशाखशुक्लषष्ठ्यां उपाध्यायपदपूर्वमाचार्यपदम् । सं० १६७१ वर्षे भट्टारकपदम् । सं० १७१३ वर्षे श्रीऊनानगरे आषाढदेवशयनैकादश्यां प्रातःकालेऽष्टमभक्तेन स्वर्गप्राप्तिः । तत्र स्तूपं भणशाली-रायचन्द्रकारितं श्रीहीरगुरोर्मुख्यस्तूपपार्श्वे समुद्रतीरेऽस्ति । तस्य भगवतो द्वितीयस्वर्गोत्तरदिशि देवत्वेनावतरणम् । इष्टदेवेन निजाराधकानामुक्तं श्रद्धेयमेव । यतो नाम्ना देवः सर्वत्र नर-देवमान्यः । प्रकृत्याऽपि देवपट्टादर्शादिषु देवाऽऽराधकः देवसांनिध्यवान् । अतस्तदुक्तस्य युक्तत्वात् । अत एव देवशयनैकादश्यां देववेलायां स्वर्गतिरिति ।

एतच्चरितं खरतरमतीय-श्रीवाचनाचार्य—श्रीवल्लभकृत-विजयदेवमाहात्म्यकाव्यात् तथा मत्कृतमाघसमस्यारूप-देवानन्दकाव्याद् ज्ञेयम् । समासस्त्वेवम्—

श्रीमतामेतेषां गुरूणां सूरिपदोत्सवे स्तम्भतीर्थेऽनेकदेश-ग्राम-नगरसङ्घाऽऽह्वानेन सप्तशतीमुनिपरिवृतान् विजयसेनसूरीन् बहुधा विज्ञप्य स्ववेश्मनि द्विधाऽपि विमानश्रियं दधाने सुपर्वशोभाभासुरे प्रचण्डमण्डपाडम्बरेण विविधराजवादित्रनिर्घोषैर्नभसि गर्जति सति सर्वसङ्घभोजनपरिधापनादिभिः श्रीमल्लनामश्रेष्ठिना स्वभार्यासोमा-न्वितेन दशसहस्ररूप्यकव्ययेन महती प्रभावना चक्रे । सुमुहूर्ते श्रीगुरुभिः सूरिपदं प्रदाय श्रीविजयदेवसूरिरिति नाम संदधे । तदा पुनस्तदुत्सवनिमित्तमेवाष्टसहस्ररूप्यकव्ययेन ठक्कर-कीकाऽऽख्येन प्रतिष्ठा कारिता पुनश्चैषां सं० १६५८ वर्षे परीक्षकसहस्रवीरेण पञ्चसहस्रमहमुदिकाव्ययेन कृतोत्सवपत्तने गणानुज्ञानन्दिमहो महान् जज्ञे । तथा श्रीविजयदेवसूरिभिः प्रतिष्ठाद्वयं राजनगरे, प्रतिष्ठाचतुष्टयं पत्तने, प्रतिष्ठात्रयं स्तम्भतीर्थे सातिशय-महोत्सवपूर्वं चक्रे ।

इलादुर्गे च कल्याणमल्लराजप्रबोधनात् तत्सभास्थितान् भट्टान् पं० श्रीपद्मसागरगणिनामाऽऽज्ञादानेन जापयित्वा राजाऽऽग्रहात् तत्र चतुर्मासीं चक्रे । तदा च तत्रत्यगिरिशिरसि प्रभूपदेशात् श्रीऋषभदेवबिम्बं नवीनचैत्योद्धारपूर्वं श्राद्धैर्नटीपद्रे महदाडम्बरेण प्रतिष्ठायां श्रीगुरुभ्य एव प्रतिष्ठाप्य स्थापयामास ।

अत्रान्तरे सं० १६७३ वर्षे कतिचिदुपाध्यायैः संभूय कतिचिल्लोकान् स्वायत्तीकृत्य आग्रहबुद्ध्या स्वकीयमतं प्रादुष्कृतम् । तन्मतवासिते च स्वकीये भार्ये द्वे सा० देवचन्द्रेण स्तम्भतीर्थवास्तव्येन मृत्वा देवीभूतेन तन्मतश्राद्धजेमनवारायां पाषाणवृष्ट्या संतर्ज्य 'अहं भवत्योर्भर्त्ता देवचन्द्रः सप्तदशभिर्देवैः श्रीविजयदेवसूरीणां सांनिध्यं कुर्वाणोऽस्मि, तद्भवतीभ्यामप्ययमेव पारम्पर्याऽऽगतः श्रीगुरुः सेव्यः' इत्युक्त्वा श्रीगुरुभक्ते कृते इत्यद्भुतदेवसांनिध्यादनेकशो लोकाः कुमतानि परितत्यजुः ।

तथा घोघाऽऽख्यबन्दिरवास्तव्य-सा० सोमजीनाम्ना स्वकुटुम्बं पूर्वं धर्माद् भ्रष्टं देवीभूय प्रागुक्तवत् प्रबोध्य श्रीगुरोर्भक्तं चक्रे । तदतिशयश्रवणान्महाराज-श्रीजहांगीरपातिसाहिः श्रीसूरीन् सबहुमानमाकार्य श्रीमण्डपाचले श्रीगुरुभिः समं धर्मप्रश्नादिवार्तां विदधे । तदा सुधासमानदेशनाश्रवणेन तपस्तेजोमयमूर्तिदर्शनेन भृशं तुष्टः श्रीसाहिराजोऽयं गुरुर्महातपा इति बिरुदं दत्तवान् । तदनुलब्धयशोवादाः श्रीसूरिपादाः श्रीसाहिना स्वयमनु-ज्ञापितस्वकीयदक्षिणीयमहावाद्यवादनादिभिः श्रीचन्द्रपालादिसमृद्धश्राद्धैः सोत्सवं प्रतिपदं सुवर्णमुद्राणां न्युञ्छनकेषु क्रियमाणेषु भट्ट-चारणादिमार्गणानां मार्गे याद्दच्छिकदानेन सहर्षमुपाश्रये पादावधारणं चक्रुः ।

किं बहुना ! श्रीजिनप्रवचनप्रासादे कलशाऽऽरोपणमिदमद्भुतं प्रासीसरत् । ततो गूर्जरत्रां पवित्रीकृत्य सुराष्ट्रादेशे द्वीपबन्दिरे फिरङ्गीपातिसाहिप्रदत्तव्याख्यानानुज्ञापूर्वं चतुर्मासकद्वयम्, हल्लारदेशे तद्देशस्वामिभक्त्यनुरोधेन कतिचिद्दिनावस्थानं च कृत्वा स्तम्भतीर्थे चतुर्मासकं तस्थुः । अत्रान्तरे उपाध्यायपाक्षिकैः सागरपाक्षिकैश्च क्रियमाणं जनव्युद्ग्राहमवेक्ष्य श्रीसावल्यां श्रीगुरवो ध्यानं विदधुः । मासत्रयं ध्यानेनाधिकप्रवृद्धधामानः परेषां द्रष्टुमपि दुष्प्रेक्षास्तत्रैव प्रतिष्ठाद्वयं चतुर्मासीं कृत्वा इलादुर्गे प्रतिष्ठात्रयं सङ्घेन समं तद्देशतीर्थयात्रां कृत्वा क्रमेण आरासणे मूलनायकप्रतिष्ठां चक्रुः । कालान्तरे च इलादुर्गेऽभ्येत्य सा०सहजूकृतमहोत्सवेन सं० १६८१ वर्षे वैशाखसितषष्ठ्यां श्रीविजयसिंहसूरीन् यौवराज्येऽस्थापयत् । तदा तद्देशभूपेन रणमल्लचोकीनामकं गिरिशृङ्गं गुरूपदेशाभव्यचैत्यस्थापनाय सङ्घस्य प्रसादीकृतम् । ततः सीरोह्यां चतुर्मासककरणादनु जाबालकपुरे समागत्य श्रीगुरुराजाः सादडीग्रामे गीतार्थानतुज्ञाप्य लुम्पाकपाक्षिकान् श्रीउदयपुरे राणाश्रीकर्णसिंहसमक्षं सभायां वादपूर्वं निरुत्तरान् कारयामासुः । ततः श्रीतपागच्छप्रौढिर्महती बभूव । तत्र च योधपुराधीश्वर-श्रीगजासिंहराजस्य मुख्यमान्य-श्रीजयमल्लनाम्ना जालोरदुर्गे प्रतिष्ठात्रयमन्तराऽन्तरा चतुर्मासकत्रयं श्रीगुरूणामत्याग्रहेण कारयित्वा स्वर्णगिरौ चैत्यं स्वकारितं प्रतिष्ठापयामास ।

सं० १६८४ वर्षे सहस्रशो रूप्यकव्ययेन श्रीविजयसिंहसूरीणां गणानुज्ञानन्दिमहोत्सवः कारितः । तदनु मेडतानगरे प्रतिष्ठाद्वयं विधाय वन्ध्यनगरे चतुर्मासीस्थितान् श्रीगुरून् श्रुत्वा तन्माहात्म्यश्रवणेन तुष्टो राणाश्रीजगत्सिंहजीनामा श्रीवरकाणकपार्श्वयात्रार्थाऽऽगतानां लोकानां पोषदशम्यां शुल्कमोचनं चक्रे । पारणायां च त्वरितमेव स्वप्रधानझाला-श्रीकल्याणजीकस्य सन्मुखप्रेषणेन श्रीगुरून् दर्शनोत्कण्ठया चाऽऽजुहाव ।

ततः श्रीगुरुपादाः खमणोरग्रामे प्रतिष्ठाद्वयम्, देवकुले चैकप्रतिष्ठाम्, ततो नाहीग्रामे आघाटपुरे चेति प्रतिष्ठापञ्चकं कृत्वा श्रीउदयपुरे राणाजी[ सहित ]सङ्घाग्रहाच्चतुर्मासीं विदधुस्तदा गुरूपदेशाद् राणाश्रीजगत्सिंहजीनाम्ना चतुरो जल्पाः प्रपन्नाः । तद् यथा—

[ १ ] अद्यप्रभृति पीछोला-उदयसागरनामसरोद्वये मीनग्रहणजालनिषेधः ।

[ २ ] राज्याभिषेकदिने गुरुवारे जीवाऽमारिः कार्या ।

[ ३ ] जन्ममासे भाद्रपदे च जीवहिंसा न कार्या ।

[ ४ ] मचिन्ददुर्गे श्रीकुम्भाराणाकारितजिनचैत्योद्धारश्च कार्यः । ततोऽत्यन्तं श्रीजिनशासनोन्नतिर्जज्ञे ।

तदनुक्रमेण गूर्जरधरायां द्वि-त्रीणि वर्षाणि विहृत्य सुराष्ट्रादेशेन तत्सिद्धाचल-रैवतकादितीर्थयात्रां सङ्घावगमनेन कुर्वाणाः परमगुरवः प्रतिष्ठात्रयं चतुर्मासीद्वयं च कृत्वा हल्लारदेशे नवानगरे तद्देशेश्वरलाक्षाभिधानजामप्रतिबोधनेन चतुर्मासीं कृतवन्तः ।

अत्रान्तरे दक्षिणप्रदेशे कन्नडदेशे श्रीबीजापुरादिनगरसङ्घेन श्रीपूज्यपादानामानयनविज्ञप्तये प्रेषिता महेभ्या श्राद्धी चतुरानाम्नी श्रीगुरून् ववन्दे । प्रतिष्ठां चैकां महोत्सवेन कारयामास । वर्षचतुष्टयं यत्र श्रीगुरवो विहरन्ति सा तत्र तत्रान्वियाय ।

ततो दाक्षिणात्यसङ्घात्याग्रहात् पुनर्गूर्जरात्रायामभ्येत्य कतिचिद्वर्षाणि तत्र स्थित्वा दक्षिणदेशं विजिहीर्षवः प्रभुपादाः सूरतिबन्दिरे समहोत्सवं समाजग्मुः ।

तत्र च सं० १६८७ वत्सरे समुत्पन्नसागरमतवासितैः श्राद्धैः स्वमतस्य श्रीगुरुमुखात् सत्यमिदमिति कथनाय बहुद्रव्यव्ययेन मीरमोजाऽऽख्यभूपं स्ववशीकृत्य स्वपाक्षिकगीतार्थानाहूय वादः प्रारब्धः । श्रीगुरुभिरपि सागरमतप्ररूपणा उत्सूत्रत्वान्न सत्येति प्रामाणिकपर्षदि राजसमक्षं गीतार्थाननुज्ञाप्य वादेन सागरपाक्षिकाँस्तिरस्कारयाञ्चक्रिरे । ततो लब्धजयवादाः श्रीगुरुपादाः सप्रसादाऽवनिनायकेन सम्मानिताः परे च पराभवं प्रापिता इति ।

ततो दक्षिणदेशे विहृतवन्तः, तत्र वीजापुरेऽन्तरा चतुर्मासकचतुष्टयीं चक्रुः । श्रीगुरुपादतपोमाहात्म्यप्रसरद्यशःपरिमलानुभवेन तत्रत्यपातिसाहि-श्रीईदलसाहिर्दर्शनोत्सुकः श्रीगुरूनाहूय सबहुमानं धर्मस्वरूपं पप्रच्छ । ततः श्रीगुरूणां वचःपीयूषमासाद्य माद्यन्मना यावद् गुरुस्थिति गोवधनिषेधं प्रपन्नवान्, जिनप्रवचनमानन्दमेदुरं स्फातिमायाति स्म ।

पारणायां च बीजापुराद्यनेकनगरसङ्घेनान्वीयमानाः श्रीगुरवः पयोधितटनिकटस्थ-श्रीकरहेडपार्श्वनाथ-श्रीकलिकुण्डपार्श्वनाथादितीर्थयात्रां कुर्वाणास्तत्तद्देशराजप्रभृतीन् लोकान् धर्मे स्थापयाञ्चक्रुः ।

ततश्चावरङ्गावादनगरे चतुर्मासकमेकं सोत्सवं विधाय खानदेशे बर्हानपुरे चतुर्मासकद्वयं सान्तरं चक्रुः । ततः प्रचलय्य सङ्घेन सह श्रीअन्तरीकपार्श्व-श्रीमाणिक्यस्वामितीर्थयात्रां सृजन्तस्तिलिङ्गदेशे गलकुण्डप्रत्यासन्नभाग्यनगरे पातिसाहि-श्रीकुतुबसाहिना सङ्गत्य तत्सभायां तैलङ्गभटान् वादे विजित्य जैनधर्मव्यवस्थापनया श्रीपातिसाहिं प्रमोदितवन्तस्तद्वशानुज्ञाश्च तत्रार्हत्प्रतिमानामनेकासां प्रतिष्ठां चक्रुः । एवं च विविधोत्सवैः प्रतिपदं राजप्रबोधादिना सर्वत्र दक्षिणमण्डले विहृत्य प्रतिष्ठासप्तकं चतुर्मासकसप्तकं च कृत्वा श्रीमज्जिनशासनमयं तन्मण्डलं विदधुः ।

बीजापुरे सा० देवचन्द्रेण प्रथमं प्रतिष्ठा कारिता । तत्र षोडशसहस्ररूप्यकव्ययश्चक्रे । द्वितीयस्यां प्रतिष्ठायामष्टसहस्रीरूप्यकव्ययश्चक्रे । तत्र पं० श्रीवीरविजयानां सं० १७०१ वर्षे पंन्यासपदं ददुः । दक्षिणमण्डले च सर्वाण्यशीतिपण्डितपदानि, एकमुपाध्यायपदं च प्रसादितवन्तः । ततः पुनः सङ्घाऽऽग्रहाद् गूर्जरात्रां श्रीगुरवः पवित्रीचक्रुः ।

इतश्च श्रीविजयसिंहसूरयोऽपि गुर्वाज्ञया मरु-मेवात-मेदपाटादौ विहृत्य राणाश्रीजगत्सिंहजीनामानं प्रबोध्य विशेषतो जीवदयासु देशस्थितजैनतीर्थेषु सप्तदशभेदपूजाकरणोपदेशादिभिश्च दृढीकृत्य श्रीजिनधर्मं प्रभावयन्तः श्रीमरुदेशे एकां प्रतिष्ठां मेडतानगरे आगरावास्तव्यपातिशाहिरत्नव्यवहारिमुख्य-सा० हीरानन्दभार्यया श्राविकामनीत्यभिधानवत्या कारितां निर्माय श्रीकृष्णदुर्गे राठौडवंशीय-श्रीरूपसिंहमहाराजस्य महामात्य-श्रीरायचन्द्रनाम्नोऽत्याग्रहाच्चतुर्मासकं चक्रुः । तत्पारणके सहस्रशो रूप्यकव्ययेन मन्त्रिणा कारितप्रतिष्ठायां बहूनि बिम्बानि जिनानां महतोत्सवेन प्रत्यतिष्ठपन् ।

तत्रैवाऽऽह्लणपुरादागतेन श्रीमहेशदास-मन्त्रिश्रीसुगुणाऽऽह्वयेन बहुवित्तव्ययपूर्वं सुवर्णमुद्रार्चादिना महोत्सवेन श्रीगुरवो वन्दिताः । ततः क्रमान्मालपुर-बुन्दी-चत(व)लेरपार्श्वप्रमुखतीर्थयात्रां संघेन सह कुर्वन्तः श्रीजयतारणनगरे चतुर्मासीं विधाय श्रीस्वर्णगिरौ यात्रां कृत्वा क्रमात् श्रीअहम्मदावादनगरे श्रीगुरून् नेमुः ।

तैः सहिताः श्रीपरमगुरवः सं० १७०५ वर्षे इलादुर्गे पत्तनवास्तव्य-श्रा० श्रीवन्त्या कारितां प्रतिष्ठां विदधुः । तत्र चतुःषष्टिविबुधेन्द्रान् देवसूरय इव स्थापयामासुः । क्रमेण पत्तन-राजनगरादिषु चतुर्मासककरणेन लोकाननुगृह्य स्तम्भतीर्थे चतुर्मास्यां तस्थुः ।

श्रीविजयसिंहसूरीणां सं० १६४४ वर्षे जन्म, सं० १६५४ व्रतम्, सं० १६७२ वाचकपदम्, सं० १६८१ सूरिपदम् । ते सूरयः परमक्षमापात्रं यावज्जीवं गुर्वाज्ञाराधका विवेकाद्यनेकगुणोदधयोऽष्टाविंशति-वर्षाणि सूरिपदं प्रपाल्य, सर्वातिचारालोचनपूर्वमनशनेन सं० १७०८ वर्षे अहम्मदावादपार्श्वस्थनवीनपुरे आषाढसितद्वितीयायां श्रीविजयसिंहसूरयः स्वर्जग्मुः ।

तत्श्रवणाद् भृशं दुःखार्त्ताः परमगुरवोऽपि संसारानित्यतां विमृश्य क्रमाद् विगतशोका बभूवुः ।

एषां च श्रीगुरूणां तपस्तेजसा देवकृतसांनिध्येन च निरन्तरायतया भूयांसस्तीर्थयात्रासङ्घाः साडम्बराः श्रीशत्रुञ्जयादितीर्थेषु जीर्णोद्धाराश्च जाताः । देवसांनिध्यं चैषां स्फुटमेव मण्डपाचलप्रस्थाने कमाऽऽख्यपरमारस्य भूतार्त्तस्य लोकानां मारणात् पित्रा निगडितस्य श्रीगुरुवासक्षेपेण सज्जीभवनात्, एवं राजनगरवास्तव्यवणिक्-पुत्रोऽपि सप्तवर्षाणि प्रागुग्रथिलः सोऽपि, तथा मेडतानगरे सा० धानाऽऽख्यक्षेत्रपालाधिष्ठितश्च वासक्षेपात् प्रादुर्बभूव । एवं चैते भगवन्तः स्वविहारेण गूर्जरात्रा-सुराष्ट्रा-हल्लार-मरु-मेदपाट-लाट-दक्षिणदेशेषु धर्मबीजानि वपन्तः तद्देशसुभिक्षादिभवनेन स्फुटतरयुगप्रधानातिशयाः शुद्धाशयाश्चिरं भरतभुवि प्रवचनं प्रभावयामासुः । समये च निजायुःशेषं वर्षचतुष्टयं ज्ञात्वा सं० १७१० वर्षे स्वपट्टे श्रीवैशाखसितदशम्यां श्रीविजयप्रभसूरीन् स्थापयामासुः । तद्व्यतिकरस्त्वनन्तरमेव वक्ष्यते—

"सिरिविजयदेवपट्टे पढमं जाओ गुरू विजयसीहो ।
सग्गगए तम्मि गुरू पट्टे विजयप्पहो सूरी" ॥ १ ॥ इति गाथार्थः ।

तप्पट्टंबुजपहकरसरिसो हरिसेण दरिसणिज्जमुहो ।
इगसट्ठियमोऽणुवमो विजयप्पहणाम गच्छगुरू ॥ २ ॥

व्याख्या—तप्पट्टंबुज इति—तस्य श्रीविजयदेवगुरोः पट्टलक्षणेऽम्बुजे प्रकाशकत्वात् प्रभाकरः सूर्यः, तत्सदृशस्तुल्यः । एकोत्तरषष्टितमः श्रीविजयप्रभनामा गच्छगुरुर्भगवान् सूरिर्विजयवान् । किंविशिष्टः ? हरिसेण—हर्षेण दर्शनीयमुखः । इत्यनेनास्य नित्यप्रसन्नता ख्यापिता । तया चास्य भगवतो भाग्यविस्फूर्जितस्य नित्योदयत्वं प्रशान्तत्वं च ध्वन्यते । कुपाक्षिकानां प्रत्यर्थिनां मनसाऽप्येतस्य गुरोरहितचिन्तकानां स्वत एव नाशात्; घनस्याभ्युदये शरभानामिव । यद्वा हरिः कृष्णः सेनायां यस्य स हरिसेनो देवानामिन्द्रः ।

"सेनाचरीभवदिभाननदानवारिवासेन यस्य जनितासुरमी रणश्रीः" इति नैषधीयकाव्यवचनात् । एवं हरिशब्दस्य तुरग-गजाद्यर्थे हरिसेना नृपाः । अहीनामर्थे धरणेन्द्राद्या नागकुमारा प्राह्याः । तेषामपि दर्शनीयं मुखं यस्य स तथा । इत्यत्रार्थे त्रिजगद्वन्द्यत्वं भगवतो दर्शितम् । पुनः किंविशिष्टम् ? अनुपमोऽतुल्यः । एतेनास्य सूरेः सर्वसूरिभ्यो धैर्यौदार्य-गाम्भीर्य-सौभाग्यता-निस्तन्द्रता-पाण्डित्य-क्षमादिगुणानामधिकता ज्ञाप्यते ।

अस्य च प्रभोः सं० १६७७ वर्षे माघसित-एकादश्यां श्रीकच्छदेशे श्रीमनोहरपुरे वृद्धोपकेशवंश-घोषा-गोत्रभृत् सा० सिवगण-भार्याभानुमतीगृहे जन्म । सं० १६८६ वर्षे दीक्षा । सं० १७०१ वर्षे पंन्यासपदम् । सं० १७१० वर्षे आचार्यपदम् । सं० १७१३ वर्षे भट्टारकपदम् । ते चामी श्रीगुरुपादाः साम्प्रतमपि प्रत्यक्ष-लक्ष्यलक्षप्रभावा नितरां ज्ञानाभ्यास-पुस्तकशोधन-अनेकभव्यजनविबोधनविविधक्रियामग्नमनसो दुस्तपतपन-निर्जीर्यमाणतमसो गच्छस्य स्मारण-वारणादिविधाभिरधिकश्रियं पुष्णन्तः सत्यसन्धाः कल्पान्तेऽप्यविचलवाचः स्वप्रतिपन्नगच्छगीतार्थसङ्घाभ्युदयदायिनो विजयन्ते । एतेषां महिमाऽतिमहान्, न कार्त्स्न्येन वर्णयितुं शक्यः । तथाऽपि किञ्चिदुच्यते—

एकस्मिन् समये परमगुरुतपागच्छाधिपाः श्रीविजयदेवसूरयः स्वामिनो जिनशासनपट्टपरम्पराप्रवाहं प्रवर्धयितुं श्रीसूरिमन्त्रेण ध्यानं चक्रुः; यदस्मदग्रे कः शासनाधिनाथो भविष्यतीति । तदा च प्रवर्धमानतपःपूर्वकजपावधानाऽऽकृष्टो मन्त्राधिराजाधिष्ठायको देवोऽभ्येत्य नमस्कुर्वन् विज्ञप्तवान्—"स्वामिन्! अद्यापि शासनाधिशीतुर्न दीक्षाऽपि प्रवृत्ता, भगवतामपि युष्माकं चिरायुष्कता, तत् किमनया चिन्तयाऽधुना? समये स्वल्पेनाऽपि तपसाऽहं स्मरणीयः, तदैवाऽऽगत्य वक्ष्यामि" इत्युक्त्वा सुरस्तिरोबभूव ।

कालान्तरे च स्वकीयपट्टे श्रीजिनशासनस्वामिस्थापनाऽवसरं निभाल्य श्रीगन्धपुरे गत्वा श्रीगुरुभिर्ध्यानं प्रारेभे । तदा तत्क्षणादेव मन्त्राधिष्ठायको देवः समेत्य निवेदितवान्—"हे स्वामिनः! पण्डितः श्रीवीरविजयनामा सौभाग्यनिधिः विद्यामहोदधिः निरुपधिः चारित्रगुणानामवधिः, अजिह्मब्रह्मविधिः विधिरिव सा····भुवनोपकारकः, केशव इव पुरुषोत्तमः, नरकान्तकृत् कुमोदकः, शिव इव महाव्रती, कामासहनो दक्षजातिस्निग्धः, त्रिदशगुरुरिव निर्मलमतिः, सुमनसामग्रणीरसौ स्वपट्टे स्थाप्यः, यतोऽस्याग्रे महिमा हि मानाधिको भावी" इत्युक्त्वा देवे तिरोभूते श्रीगुरुभिः गाम्भीर्यशालिभिः जनप्रत्ययनाय बहिः शकुनगवेषणादावपि देवोक्तानुवादे दृढीभूते सति राजनगरात् त्वरिताभ्यागत-सा० रत्न-प्रमुखराजनगरीयसङ्घाग्रहेण श्रीस्तम्भतीर्थ-श्रीपत्तन-श्रीसूरतिबन्दिरप्रमुखानेकदेश-ग्राम-नगरसमक्षं श्रीमहावीरस्वामिसातिशयमूर्तेः पुरः पत्रिकाविलोकनाऽऽनन्दितसकललोके श्रीगन्धारबन्दिरे विक्रमात् सं० १७१० वर्षे वैशाखसितदशम्यां भृगुवासरे पुष्यनक्षत्रे सुमुहूर्त्ते रङ्गदुत्तुङ्गमण्डपाऽखण्डशोभादिदृक्षयेवाभ्यागतेषु मुक्तानिकरदम्भान्नक्षत्रपक्षेषु वाद्यमानविविधाऽऽतोद्याडम्बरेण गर्जयत्यम्बरे दह्यमानासु दुर्जनमनःशकटिकास्विव धूपघटिकासु रसेनाऽऽपूर्यमाणासु सर्वसङ्घप्रमोदतटिकास्विव घटिकासु प्रसरद्यशोभिरिव पुष्पप्रकरैराकीर्णे भूवलये श्रीवीरपट्टाधिपत्यज्ञापनायेव श्रीवीरजिनभवनाऽऽसन्नदेशे मण्डपेऽभ्यागत्य पं० श्रीवीरविजयाः श्रीविजयदेवसूरिभिः स्वपट्टे स्थापयाञ्चक्रिरे । तदा साधुश्रीअखईनाम्नः सुतेन श्रीवर्द्धमानसंज्ञेन स्वमातृसाहिबदेवीसहितेन प्रतिगृहं सरूप्यमुद्रस्थालिकालम्भनिका चतुर्विधसङ्घवस्त्रपरिधापनादिना भूरिद्रव्यव्ययेन महानुत्सवश्चक्रे । श्रीगुरुणा स्वयं चिन्तितम्, इष्टोपदेशेन उ० श्रीकमलविजयगणिभिर्ज्ञापिताचार्यपदं प्रदाय 'श्रीविजयप्रभसूरिः' इति नाम निर्ममे ।

विजयी जगदाराध्यो यशस्वी च प्रभाववान् । भगवन्नाद्यवर्णैस्तन्नाम्नाऽभूद् विजयप्रभः ॥ १ ॥

तदनु श्रीगुरुः श्रीविजयप्रभसूरिणा सह सूरतिबन्दिरे एकं चातुर्मासकं विधाय, श्रीराजनगरे चतुर्मासीं कृतवान् । तत्पारणायां सङ्घमुख्य-सा० सूरापुत्र-सा० धनजीनाम्ना विज्ञप्य श्रीगुरूणां वन्दनकमहोत्सवः प्रारेभे । तत्र च मिलिताऽस्तोकलोकस्थानाय कमनीयप्रकटपटमण्डपैर्मा शून्यदर्शनं भूद्, इतीवाऽऽच्छादिते वियति सुवर्णखचितनिचितश्रुतिपञ्चवर्णचन्द्रोदयप्रभासङ्करेण रात्रिंदिवातीतविमानोपमानतायामुपनतायां जगति सुसीमताकारिशमैकसाम्राज्यविजयमाने तत्र न तपनकरप्रचार इतीव सहस्रकरकरेषु भूमिमस्पृशत्सु विविधधवलगानश्रवणैकाम्येन चित्रतुल्यनिश्चलनरामरोरगैः शोभितेषु पटकुलेषु विश्वविश्रान्तिशारदाभ्रपटलेषु इवाऽत्युच्चमण्डपेषु सिंहासने श्रीविजयप्रभसूरिं निवेश्य भगवान् स्वयं स्वतुल्यताज्ञापनार्थं पुरः स्थित्वा सुमुहूर्त्ते वन्दनकानि दत्तवान् । जातश्च महान् प्रमोदः । तदनु सर्वसङ्घसमक्षं श्रीपरमगुरुणाऽभाणि—"यथाऽहं तथाऽयं सर्वसङ्घेन सेवनीयः । संसारसागरे प्रवहणमयं कदापि न मोक्तव्यः" ।

ततः कृतसंस्कारो मणिरिव, घननिर्मुक्तः सूर्य इव, आहुत्युद्दीपितः पावक इव, भावप्रतिबिम्बनाद् दर्पण इव, प्रोक्षालितः कनककलश इव, तैलापूर्णः प्रदीप इव, कृताऽलङ्कारः क्षितिपतिरिव, घननिर्धौतः कनकगिरिरिव, शोधितो ग्रन्थ इव, अधिकं सञ्जातवन्दनकोत्सवपरिकर्मा स श्रीविजयप्रभसूरिर्भूरितेजसा दिदीपे ।

तदा सा० श्रीधनजीनाम्नाऽष्टसहस्रमहमूदिकानां यशोबीजानामिव प्रभावना चक्रे, सर्वसङ्घपरिधापनिका च । ततश्चैकं चतुर्मासकं अहम्मदपुरे विधाय श्रीपरमगुरुभिः सहैव श्रीविजयप्रभसूरि··················· युगादिदेवयात्रायां द्वीपवास्तव्यभणसालीयसा० रायचन्द्रप्रमुखसङ्घेन सह···················नालोच्य सुराष्ट्रसङ्घाग्रहेण श्रीउन्नतपुरमलञ्चक्रे ।

क्रमेण देवशयनैकादश्यां·········श्रीविजयप्रभसूरिभिः कृतनिर्यामनाविधयः श्रीविजयदेवसूरयः स्वर्जग्मुः । ततः श्रीवीरनिर्वृते श्रीगौतमस्वामीव श्रीपरमगुरौ स्वर्गतेऽत्यन्तदुःखाऽऽवेशात् श्रीविजयप्रभप्रभुरपि कतिचिद् दिनानि विमनस्कतया निन्ये ।

तदनु चतुर्विधसङ्घाग्रहेण संसारस्वभावमनुभाव्य विगतशोकाः सुमुहूर्ते श्रीविजयप्रभसूरिपादाः भट्टारकपदोद्भूतशोभाप्राग्भारभासुराः श्रीगुरुपट्टं विभूषयामासुः । तद्दिन एव शिवपुरीदेशे यतीनां विहारस्य प्राग् वर्षद्वयं यावन्निषेधस्य मुत्कलता जाता, तद्वर्धनिका आगता । तद्वर्षे च श्रीद्वीपवास्तव्यसा० नेमिदासनाम्नाऽष्टसहस्रमहमूदिकाव्ययेन श्रीगुरून् सार्धमादाय श्रीशत्रुञ्जयतीर्थयात्रासङ्घो महान् चक्रे ।

एवं श्रीगुरुभिः सुराष्ट्रायां चतुर्मासदशकं चक्रे । तत्प्रभावात् सं० १७१५, सं० १७१७, सं० १७२० वर्षसत्कास्त्रयोऽपि दुष्कालाः सुराष्ट्रदेशे न प्रसारमापुः । तच्चिह्नं तु जीर्णदुर्गादिभ्यो गूर्जरात्रायां धान्यागमनं प्रतीतमेव । सं० १७२३ वर्षे घोघाबन्दिरे श्रीजसूनाम्न्या कारिताऽनेकजिनप्रतिमानां श्रीसूरिभिः प्रतिष्ठा चक्रे ।

एषु च गुरुषु विपक्षभावमावहन्तः केचिद् बालिशाः स्वत एव लोकापवादविडम्बिता अधुना दृश्यन्ते । ततः श्रीअहम्मदावादनगरसङ्घाग्रहेण श्रीगुरवो गूर्जरात्रायामाजग्मुः । तत्प्रभावाल्लोकानां सुभिक्षेण महान् हर्षो बभूव । इत्यादि परमर्षीणामेषां महिमा प्रकट एव । तेन निश्चीयते, एतदाज्ञावर्तित्वमेव उभयथाऽपि शिवाय ।

**सिरिविजयरयणसूरिपमुहेहिं णेगसाहुवग्गेहिं ।**
**परिकलिआ पुहविअले सूरिवरा दिन्तु मे भद्दं ॥ ४ ॥**

श्रीगूर्जर-मरु-मालव-मेदपाट-मेवात-कच्छ-हल्लार-सुराष्ट्र-दक्षिणादिदेशेषु श्रीगुरुतपस्तेजसा साम्प्रतं धर्मकर्माणि निरन्तरं जायन्त इति ।

सोऽयं वीरपरम्पराप्रणयिनीप्राणप्रियः सत्क्रियः, जीयात् श्रीतपगच्छपः सुरवरैः संसेव्यमानक्रमः ।
नाम्ना वीर इति क्षमाधरवरप्रोम्भीतनृत्यक्रियः, प्रत्यक्षं विजयप्रभो गणपतिः श्रीवर्द्धमानप्रभः ॥ १ ॥

श्रीवीरतीर्थान्तिकलब्धराज्यः श्रीवर्द्धमानेन कृतोत्सवश्रीः ।
देवाभियुक्तोऽभिधयाऽपि वीरः श्रीवीरतीर्थे गुरुरेष जीयात् ॥ २ ॥

श्रीविजयप्रभसूरेरुपासकः श्रीकृपादिविजयानाम् । विदुषां शिष्यो मेघः सम्बन्धमिमं लिलेख मुदा ॥ ३ ॥

॥ इति श्रीपट्टावलिसूत्रोपरिक्षिप्तगाथात्रयविवरणं सम्पूर्णम् ॥

# दिग्विजयमहाकाव्यान्तर्गतविशेषनाम्नां सूचिः।

## [अकाराद्यक्षरानुक्रमेण]


अकबर [सम्राद्] ३०,२१,१३४,१३५
अक्षपाद [आचार्य] ५९
अखइ [श्रावक] १४०
अचलगिरि [तीर्थ] ४४
अजितदेवसूरि २९
अतिशीता [नदी] ८
अन्तरीकपार्श्व [तीर्थ] १३८
अपापपूः [तीर्थ] २७
अभिनवनगर ३३
अमरचन्द्र [वाचक] ३५
अर्गलापुर [आगरा] १००
अर्बुदगिरि [तीर्थ] १२६
अर्बुदाचल [,,] १३५
अवरङ्गपूः [नगर] ३३
अहमदावाद [,,] ३२,३५,१३४, १३८,१३९,१४१
अहम्मदपुर [,,] १३५,१४१
अहिमदवाद [,,] ३९
आगरा [,,] १३८
आघाटपुर [ग्राम] १३७
आरासण [तीर्थ] १३७
आनन्दविमलसूरि ३०
आर्यमहागिरि २८
आर्यसुहस्ती २८
आह्लणपुर [नगर] १३८
इन्द्रजी [श्रावक] १३४
इन्द्रदिन्नसूरि २८
इन्द्रभूति ६,१३२
ईडरदुर्ग १३६
ईदलसाहि [पातसाह] १३८
ईलादुर्ग १३६,१३८,१३९
उग्रसेनपुर [आगरा] १००
उज्जयन्त [तीर्थ] १२६
उत्तरकुरु [क्षेत्र] १३
उदयनगर ४४,४६,५४
उदयनगराधीश [नृप] ४८
उदयपुर ५२,१३७
उद्योतनसूरि २९
उदयसागर [तटाक] १३७
उन्नतपुर [आगरा] १४१
उपाध्याय [पद] १३८
ऊना [नगर] १३६
ऐरावत [क्षेत्र] १३
ओछतवाल [गोत्र] १३६
औरङ्गाबाद [नगर] १३८
कच्छ [देश] १३९,१४१
कन्नड [,,] १३७
कमलविजय [गणि] १४०
कमा [श्रावक] १३४,१३९
करहेडापार्श्व [तीर्थ] ३४,१३८
कर्णसिंह [राणा] १३७
कलिकुण्डपार्श्व [तीर्थ] ३४,११७,१३८
कलिन्दकन्यका [नदी] ९८
कल्याणजी [मन्त्री] १३७
कल्याणमल्ल [नृप] १३६
कालिन्दिका [नदी] १११
कालिन्दी [,,] १०५
कालीसरस्वती [बिरुद] १३५
काशि [काशी] ८३
काशिका [,,] ११३
काशी [नगरी] ११०,११७
कीका [श्रावक] १३६
कुतुबसाहि [पातसाह] १३८
कुम्भा [राणा] १३७
कुशस्थल [देश] ११०
कृपाविजय [मुनि] १४१
कृष्णदुर्ग १३८
कैलास [पर्वत] १९
कोडिमा [श्राविका] १३४
कोशला [देश] १७
क्षत्रियकुण्ड [नगर] १३२
खडगपुर ५२
खमणोर [ग्राम] १३७
खरतर [गच्छ] १३६
खानखाना [नवाब] १३४
खानदेश [देश] १३८
गङ्गा [नदी] १५,१८,१०९,११०,१११
गजसिंह [नृप] १३७
गन्धपुर [गन्धार] १४०
गन्धार बन्दिर [नगर] १३४,१३५,१४०
गलकुण्ड [,,] १३८
गिरिनार [तीर्थ] १३५
गुणशिला [वन] १३०
गुर्जरात्रा [देश] १३७
गूर्जर [,,] ३२,३५,१३७,१४१
गूर्जरत्रा [,,] १३७
गूर्जरात्रा [,,] १३८,१३९,१४१
गौतम ६,५७
घनौघपुर [घोघा] ३९
घोघा [नगर] १३६,१४१
घोघा [गोत्र] १३४,१३९
चत(व)लेरपार्श्व [तीर्थ] १३८
चतुरा [श्राविका] ३४,१३७
चतुरिका [चतुरा] ३३
चन्द्र [गच्छ] २९
चन्द्रपाल [श्रावक] १३६
चन्द्रसूरि २८
चांपानेर [नगर] १३४
जगच्चन्द्रसूरि २९
जगत्सिंह [राणा] ३२,१३७,१३८
जम्बू [गणधर] २८
जम्बू [वृक्ष] १३
जम्बूद्वीप ८,१२,९०
जयतारणी [तीर्थ] १३८
जयदेव [सूरि] २८
जयानन्दसूरि २९
जसू [श्राविका] १४१
जहांगीर [सम्राद्] १३५,१३६
जावालकपुर १३७
जाम [नृप] १३७
जालन्धर [देश] ९०

मेघविजयोपाध्यायविरचित

# देवानन्दमहाकाव्य

टिप्पणी-आदि समलंकृत तथा ग्रन्थकार-परिचय,

सरल हिंदी सारार्थ आदि समन्वित


सम्पादक

पं० बेचरदास जीवराज दोशी।

[ जैनन्याय-व्याकरणतीर्थ; भूतपूर्व प्राकृतसाहित्याध्यापक गूजरातपुरातत्त्वमन्दिर;

भगवतीसूत्रादि अनेकागमग्रन्थानुवादक-संशोधक-सम्पादक-इत्यादि ]



प्रकाशन-कर्ता

## संचालक-सिंघी जैन ग्रन्थमाला

अहमदाबाद-कलकत्ता

विक्रमाब्द १९९४ ] प्रथमावृत्ति, पञ्चशत प्रति। [ १९३७ क्रिष्टाब्द

# SINGHI JAINA SERIES

A COLLECTION OF CRITICAL EDITIONS OF MOST IMPORTANT CANONICAL, PHILOSOPHICAL HISTORICAL, LITERARY, NARRATIVE ETC. WORKS OF JAINA LITERATURE IN PRĀKRIT, SANSKRIT, APABHRAṂŚA AND OLD VERNACULAR LANGUAGES, AND STUDIES BY COMPETENT RESEARCH SCHOLARS.

FOUNDED AND PUBLISHED
BY
ŚRĪMĀN BAHĀDUR SIṄGHJĪ SIṄGHĪ OF CALCUTTA
IN MEMORY OF HIS LATE FATHER

## ŚRĪ DĀLCHANDJĪ SIṄGHĪ.

GENERAL EDITOR

JINA VIJAYA MUNI

HONORARY MEMBER OF THE BHANDARKAR ORIENTAL RESEARCH INSTITUTE OF POONA AND GUJRAT SAHITYA SABHA OF AHMEDABAD; FORMERLY PRINCIPAL OF GUJRAT PURATATTVAMANDIR OF AHMEDABAD; EDITOR OF MANY SANSKRIT, PRAKRIT, PALI, APABHRAṂŚA, AND OLD GUJRATI WORKS.

## NUMBER 7


TO BE HAD FROM

VYAVASTHĀPAKA, SIṄGHĪ JAINA GRANTHAMĀLĀ

ANEKANT-VIHAR
9, SHANTI NAGAR,
PO. SABARMATI, AHMEDABAD.

SINGHI SADAN
48, GARIYAHAT ROAD
BALLYGUNGE, CALCUTTA

Founded ] [ 1931 A. D.


All rights reserved

## ॥ सिंघीजैनग्रन्थमालासम्पादकप्रशस्तिः ॥

स्वस्ति श्रीमेदपाटाख्यो देशो भारतविश्रुतः । रूपाहेलीति सन्नाम्नी पुरिका तत्र सुस्थिता ॥
सदाचार-विचाराभ्यां प्राचीननृपतेः समः । श्रीमच्चतुरसिंहोऽत्र राठोडान्वयभूमिपः ॥
तत्र श्रीवृद्धिसिंहोऽभूत् राजपुत्रः प्रसिद्धिमान् । क्षात्रधर्मधनो यश्च परमारकुलाग्रणीः ॥
मुञ्ज-भोजमुखा भूपा जाता यस्मिन्महाकुले । किं वर्ण्यते कुलीनत्वं तत्कुलजातजन्मनः ॥
पत्नी राजकुमारीति तस्याभूद् गुणसंहिता । चातुर्य-रूप-लावण्य-सुवाक्सौजन्यभूषिता ॥
क्षत्रियाणीप्रभापूर्णां शौर्यदीप्तमुखाकृतिम् । यां दृष्ट्वैव जनो मेने राजन्यकुलजा त्वियम् ॥
सूनुः किसनसिंहाख्यो जातस्तयोरतिप्रियः । रणमल्ल इति ह्यन्यद् यन्नाम जननीकृतम् ॥
श्रीदेवीहंसनामात्र राजपूज्यो यतीश्वरः । ज्योतिर्भैषज्यविद्यानां पारगामी जनप्रियः ॥
अष्टोत्तरशताब्दानामायुर्यस्य महामतेः । स चासीद् वृद्धिसिंहस्य प्रीति-श्रद्धास्पदं परम् ॥
तेनाथाप्रतिमप्रेम्णा स तत्सूनुः स्वसन्निधौ । रक्षितः, शिक्षितः सम्यक्, कृतो जैनमतानुगः ॥
दौर्भाग्यात्तच्छिशोर्बाल्ये गुरु-तातौ दिवंगतौ । विमूढेन ततस्तेन त्यक्तं सर्वं गृहादिकम् ॥

तथा च–

परिभ्रम्याथ देशेषु संसेव्य च बहून् नरान् । दीक्षितो मुण्डितो भूत्वा कृत्वाऽऽचारान् सुदुष्करान् ॥
ज्ञातान्यनेकशास्त्राणि नानाधर्ममतानि च । मध्यस्थवृत्तिना तेन तत्त्वातत्त्वगवेषिणा ॥
अधीता विविधा भाषा भारतीया युरोपजाः । अनेका लिपयोऽप्येवं प्रत्न-नूतनकालिकाः ॥
येन प्रकाशिता नैका ग्रन्था विद्वत्प्रशंसिताः । लिखिता बहवो लेखा ऐतिह्यतथ्यगुम्फिताः ॥
यो बहुभिः सुविद्वद्भिस्तन्मण्डलैश्च सत्कृतः । जातः स्वान्यसमाजेषु माननीयो मनीषिणाम् ॥
यस्य तां विश्रुतिं ज्ञात्वा श्रीमद्गान्धीमहात्मना । आहूतः सादरं पुण्यपत्तनात्स्वयमन्यदा ॥
पुरे चाहम्मदाबादे राष्ट्रीयशिक्षणालयः । विद्यापीठ इतिख्यातः प्रतिष्ठितो यदाऽभवत् ॥
आचार्यत्वेन तत्रोच्चैर्नियुक्तो यो महात्मना । विद्वज्जनकृतश्लाघे पुरातत्त्वाख्यमन्दिरे ॥
वर्षाणामष्टकं यावत् सम्भूष्य तत्पदं ततः । गत्वा जर्मनराष्ट्रे यस्तत्संस्कृतिमधीतवान् ॥
तत आगत्य सँल्लग्नो राष्ट्रकार्ये च सक्रियम् । कारावासोऽपि सम्प्राप्तो येन स्वराज्यपर्वणि ॥
क्रमात्तस्माद् विनिर्मुक्तः प्राप्तः शान्तिनिकेतने । विश्ववन्द्यकवीन्द्रश्रीरवीन्द्रनाथभूषिते ॥
सिंघीपदयुतं जैनज्ञानपीठं यदाश्रितम् । स्थापितं तत्र सिंघीश्रीडालचन्दस्य सूनुना ॥
श्रीबहादुरसिंहेन दानवीरेण धीमता । स्मृत्यर्थं निजतातस्य जैनज्ञानप्रसारकम् ॥
प्रतिष्ठितश्च यस्तस्य पदेऽधिष्ठातृसञ्ज्ञके । अध्यापयन् वरान् शिष्यान् शोधयन् जैनवाङ्मयम् ॥
तस्यैव प्रेरणां प्राप्य श्रीसिंघीकुलकेतुना । स्वपितृश्रेयसे चैषा ग्रन्थमाला प्रकाश्यते ॥
विद्वज्जनकृताल्हादा सच्चिदानन्ददा सदा । चिरं नन्दत्वियं लोके जिनविजयभारती ॥

# देवानन्दमहाकाव्य-विषयानुक्रम ।


| | | पृ० |
|---|---|---|
| | किंचित् प्रास्ताविक [ मुख्य सम्पादक लिखित ] .... .... .... .... | १– ४ |
| | प्र स्ता व ना–ग्रन्थकारपरिचय, समस्यापूर्तिवर्णन, सरल हिंदी सारार्थ .... .... | ५–१२ |
| १ | कथानायक-उत्पत्तिवर्णननामा प्रथमः सर्गः .... .... .... .... | १–१० |
| २ | नायकाभ्युदयवर्णननामा द्वितीयः सर्गः .... .... .... .... | १०–१२ |
| ३ | युवराजस्थापन-मरुधर-मेदपाट-सुराष्ट्राविहारवर्णन-नानापादसमस्याङ्कितः तृतीयः सर्गः | २२–२९ |
| ४ | यमकरम्यः चतुर्थः सर्गः .... .... .... .... .... .... | ३०–४८ |
| ५ | दक्षिणदिग्विजयनामा पञ्चमः सर्गः .... .... .... .... .... | ४९–५७ |
| ६ | पट्टधरस्थापन-षड्ऋतुवर्णनो नाम षष्ठः सर्गः .... .... .... .... | ५७–६९ |
| ७ | श्रीविजयदेवसूरीश्वरनिर्वाणगमन-तत्पट्टप्रभाकरश्रीविजयप्रभसूरीश्वराभ्युदयवर्णननामा सप्तमः सर्गः .... .... .... .... .... .... .... | ६९–७७ |
| ८ | ग्रन्थकर्तृप्रशस्तिः .... .... .... .... .... .... .... | ७८ |
| ९ | देवानन्दमहाकाव्यान्तर्गतानां विशेषनाम्नां संग्रहः .... .... .... .... | ७९–८० |

# किंचित् प्रास्ताविक

जिन विजयदेव सूरिका काव्यमय चरित-वर्णन प्रस्तुत देवानन्द महाकाव्यमें किया गया है, वे सूरि जैनधर्मके बहुत अच्छे प्रभावक पुरुषोंमेंसे एक हो गये हैं। एक प्रकारसे जैन समाजके ये अन्तिम समर्थ और तेजस्वी आचार्य थे। इनके बाद आज तक वैसा कोई प्रभावशाली, प्रतापवान् और प्रतिभापूर्ण आचार्य नहीं हुआ। जिस प्रकार मुगल सम्राटोंमें अकबर, जहांगीर और शाहजहाँ ये तीनों सम्राट् भारतवर्षके गौरवके उत्कर्षक हुए उसी प्रकार, जैनाचार्यों में भी हीरविजय सूरि, विजयसेन सूरि और विजयदेव सूरि ये तिनों आचार्य जैन समाजके गौरवके उत्कर्षक हुए। इन तीनों आचार्योंका मुगल सम्राटोंने खूब सत्कार किया था और इनके ज्ञान और चारित्रसे प्रभावान्वित हो कर म्लेच्छ कहे जानेवाले उन अनार्य सम्राटोंने भी जैन धर्मके प्रति अपना ऊंचा आदरभाव व्यक्त किया था।

उन मुगल सम्राटोंकी तरह इन जैनाचार्योंका इतिहास भी बडा विस्तृत और महत्त्ववाला है। ये आचार्य भी, अपने समाजके एक प्रकारके सम्राट् थे। सम्राटोंकी ही तरह इनकी आज्ञा भी, जैन समाजके धार्मिक विधानोंमें, अनुल्लंघनीय समझी जाती थी। सम्राटों-ही-की तरह जैन समाजमें इनका शासनतंत्र चलता था। जिस तरह, सम्राट् अपने साम्राज्यकी रक्षा और वृद्धिके प्रयत्नमें आजन्म तल्लीन रहते थे और भारतवर्षके इस कोनेसे उस कोनेतक घूमते रहकर अपने शासनकी सुव्यवस्थामें व्यस्त रहते थे उसी तरह ये आचार्य भी जैन धर्म और जैन संघकी रक्षा और वृद्धिके प्रयत्नमें आजन्म दत्त-चित्त रहते थे और जहां जहां इनके अनुयायी जन-गण और धर्म-स्थान होते थे वहां वहां ये सतत परिभ्रमण करते रहते और अपने शासनकी सुव्यवस्थामें लगे रहते थे। यद्यपि ये आचार्य बडे निरीह, निष्परिग्रही, तपस्वी, आत्मदर्शी और जितेन्द्रिय थे – कंचन और कामिनीसे सर्वथा अलिप्त थे – तथापि अपने धर्म और समाजकी उन्नति और प्रतिष्ठाके निमित्त ये राजा-महाराजाओं और सम्राटोंके दरबारोंमें उपस्थित होते थे, अपने शिष्योंको उनकी इच्छानुसार उनके हितोंमें प्रवृत्त करते थे और उनके सुख-दुःखोंमें समवेदना और सहानुभूति भी प्रकट करते थे। और उसके बदलेमें, ये और कुछ न चाह कर सिर्फ भूतदया, प्राणीरक्षा और अहिंसाका उनसे प्रचार और पालन करवाते थे; अधर्मी और अत्याचारी द्वारा सताये जानेवाले प्रजाजनों और धर्मनिष्ठ मनुष्योंकी रक्षा करवाते थे और आत्मकल्याण करनेके साधनभूत धर्मस्थानोंकी पूजा और पवित्रताका सुप्रबन्ध करवाते थे।

न ये किसी प्रकारकी सवारी पर चढते थे, न किसी पर अपना बोज लादते थे। न किसीके यहां भोजनका भार डलवाते न किसीके घर पर जा कर मान-पान करवाते। चाहे सियाला हो चाहे उन्हाला – ये नंगे सिर और नंगे पैर ही सदा घूमते फिरते। चौमासेके ४ महिने ये एक जगह स्थिरवास करके रहते और फिर आठ महिने इधर-उधर परिभ्रमण करते रहते। कभी ये दक्खिनमें हैदराबाद और उससे आगे तक चले जाते और फिर वहांसे उत्तरमें लाहोर और उससे भी आगे तक पहुंच जाते; कभी पच्छिममें ठेठ समुद्रके किनारे दीवबन्दर तक चले जाते और कभी पूर्वमें पटना और उससे भी परे पार्श्वनाथपहाड (सम्मेतसिखर) तक सफर कर आते। भिक्षाके समय, हाथमें झोली ले कर, गृहस्थके घर अज्ञात रूपसे जा पहुंचते और धर्मलाभका आशीर्वाद दे कर, अपने उचित लूखा-सूका जैसा आहार मिल गया, उसे ले कर अपने मकान पर चले आते और एकान्तमें बैठ कर बिना किसी प्रकारके आस्वादका उपभोग करते हुए, उसे निगल जाते। पानी ये हमेशा गरम किया हुआ पीते। सूर्यास्तके बाद न कभी कुछ खाते न कभी कुछ पीते। रातको कोरी जमीनपर एक पिछोडी बिछा कर सो जाते। न धूलकी पर्वाह करते न पत्थर-कंकड की। न सख्त गर्मीमें कभी पंखा हिलाते और न सख्त सर्दीमें कभी आग सुलगाते। बडे बडे धन-कुबेर इनके दृढ उपासक थे–पक्के भक्त थे; इनके एक एक शब्द पर लाखों

रूपये न्यौछावर कर देते थे; पर ये अपने लिये किसीसे कभी कुछ एक कौडी भी नहीं मांगते थे। स्वर्गकी अप्सरायें जैसी रूपवती और लक्ष्मीवती हजारों स्त्रियां प्रतिदिन इनके सामने १०–१० वार ऊठबैठ कर नमन करती और घंटों हाथजोडे बैठकर इनका धर्मोपदेश सुनतीं; लेकिन निमेषमात्र भी इनकी आँखमें, कभी किसी प्रकारके विकारकी, कोई रक्तिमा उद्भूत नहीं होती थी। ऐसी तो इनकी चर्या थी; और ऊपर बतलाया वैसा इनका उदात्त ध्येय था। साधुताका यह परम आदर्श था।

प्रस्तावित काव्यके नायक विजयदेव सूरिके प्रगुरु आचार्य हीरविजय सूरिकी ऐसी परम साधुताका हाल सुनकर अकबर बादशाहने बडे आदरके साथ उन्हें अपने दरबार–फतहपुर सीकरीमें बुलवाये। सूरिकी प्रशान्त मूर्ति, भव्य आकृति, उत्कृष्ट विरक्ति और अमृतोपम वाणीका अनुपम अनुभव कर वह महान् मुगल सम्राट् अत्यंत प्रमुदित हुआ। अकबर जैसा उत्कट जिज्ञासु था, परीक्षक भी वैसा ही उत्कट था। उसकी परीक्षामें उत्तीर्ण होना आसान नहीं था। बडे बडे धुरन्धर विद्वान् और त्यागी-वैरागी उसकी कठोर परीक्षामें निष्फल हो जाते थे और उसके तेजमें वे अपना अस्तित्व लुप्त कर या तो उसके सेवक बन जाते थे या उसके शिष्य हो रहते थे। एक ही नजरमें वह अपने सन्मुख आनेवाली व्यक्तिका हीर परख लेता था और एक-ही-दो शब्दोंमें वह उसका मूल्य भी कर देता था। अपने समकालीन संसारका वह सबसे श्रेष्ठ चतुर और तेजस्वी पुरुष था। हीरविजय सूरिकी साधुताकी उसने यथेष्ट परीक्षा की और उसमें वे सोलह आने संपूर्ण सफल निकले, तब उसने उनको अपना परम पूज्य हितोपदेशक माना और 'जगद्गुरु' की पदवी देकर उनका उत्कृष्ट सम्मान किया। कोई ३-४ वर्ष हीरविजय सूरि फतहपुर सीकरी और आगरेके आसपास घूमते रहे और वारंवार अकबरको अपना धर्मोपदेश सुनाते रहे। बादशाहने उनके उपदेशसे स्वयं मांसभक्षण आदि बहुत कम कर दिया और पशु-पक्षियोंका शिकार करना भी बहुत कुछ छोड दिया। जैनधर्ममें परम पवित्र माने जानेवाले पर्युषणा पर्वके ८–१० दिन तक सारे ही साम्राज्यमें किसी भी प्राणीकी कोई कतल न की जाय ऐसी बादशाही आज्ञा भी जाहीर की गई। जैनधर्मके पवित्र स्थानोंको कोई किसी प्रकारकी हानि न पहुंचावे इसके लिये भी कई फरमान उसने निकाले और उन्हें हीरविजय सूरिके स्वाधीन किये। बादमें वृद्धावस्थाके कारण सूरिजी तो गूजरातमें वापस चले आये, लेकिन बादशाहकी इच्छासे अपने विद्वान् शिष्य उपाध्याय शान्तिचन्द्रजीको उसके दरबारमें रख आये। पीछे से भानुचन्द्र, सिद्धिचन्द्र, विवेकहर्ष आदि और भी सूरिजीके प्रभावशाली शिष्य वारंवार अकबरी दरबारमें आने–जाने और रहने लगे। यह सब इतिहास बहुत बडा है और उसका विशेष वर्णन करना यहांपर आवश्यक भी नहीं है।

हीरविजय सूरिके गूजरातमें चले आने बाद, पीछेसे बादशाहने, उनके पट्टधर आचार्य विजयसेन सूरिको भी अपने दरबारमें, जब वह लाहोरमें था, बुलवाये और उनका भी उसने यथेष्ट सम्मान किया और उन्हें 'सवाई हीरजी' की पदवीसे विभूषित किया। हीरविजय सूरिकी वृद्धावस्था और शारीरिक अस्वस्थताका समाचार पाकर विजयसेन सूरि अकबरके दरबारमें अधिक नहीं ठहर सके और अपने गुरुकी सेवा करने निमित्त गूजरात लौट आये। वे गूजरात पहुंचे भी नहीं थे कि, इधर काठियावाडके ऊना गांवमें सं० १६५२ में हीरसूरिका स्वर्गवास हो गया। इन्हीं विजयसेन सूरिके पट्टधर ये विजयदेव सूरि हुए। इनको आचार्य पद सं० १६५५ में, खंभातमें दिया गया था। उस समय इनकी उम्र कोई २१-२२ वर्षकी थी। सं० १६७२ में इनके गुरु श्रीविजयसेन सूरिका स्वर्गवास हो गया और उस समयसे ये अपने संघके सर्वप्रधान नायक बने।

हीरविजयसूरि के समयमें ही, उनके शिष्योंमें परस्पर कुछ विचार-भेद उत्पन्न हो गया, और वह धीरे धीरे बढता गया। विजयसेन सूरिके सामने उसने कुछ उग्र रूप धारण किया और फिर इन विजयदेवके समयमें वह पूर्णरूपसे वृद्धिगत होकर आखिरमें इनके गच्छमें तीन भेद पड गये। हीरविजय सूरिके जिस विशाल गच्छके विजयसेन सूरि अकेले ही गणनायक थे और जिनका एकच्छत्र शासन था उसी गच्छके, विजयदेव सूरिके सामने तीन पक्ष होकर, उसमें ३ गणनायक हो गये; और एक ही

गुरुके शिष्य-प्रशिष्य परस्पर एक-दूसेरेके विरोधी बन कर गच्छ और संघके संगठनमें शिथिलता उत्पन्न करनेके निमित्त बन गये। गच्छके इस विरोधी वातावरणका प्रतिघोष ठेठ जहांगीरके दरबार तक जा पहुंचा। हीरविजय सूरिके शिष्योंमेंसे कईयोंके साथ जहांगीरका बचपनसे ही काफी परिचय था और वह अपने स्वर्गस्थ पिताकी, इन धर्मोपदेशकोंके साथवाली नीतिका यथोचित पालन भी करना चाहता। इस लिये उसने जब यह सुना कि हीरविजय सूरिके शिष्य, आपसमें अनबन हो जानेके कारण परस्पर एक दूसरेके विपक्षी बन रहे हैं और जिन विजयदेव सूरिको, हीरविजय सूरिके पट्टधर विजयसेन सूरिने अपना उत्तराधिकारी बनाया है उसके बारेमें कई शिष्य-प्रशिष्य अपना विरोध व्यक्त कर रहे हैं; तब उसने सोचा कि देखना चाहिए कि यह विजयदेव सूरि कौन हैं और कैसे हैं?। नियमानुसार उसने अपना फरमान भेज कर इन सूरिको अपने दरबारमें बुलवाये। जहांगीर उस समय मालवेके मांडू शहरमें था और विजयदेव सूरि खंभातमें चातुर्मास रहे हुए थे। बादशाहकी आज्ञा आते ही सूरिजी मांडू की ओर चलदिये और आश्विन सुदि १४ के दिन वहां पहुंच कर बादशाहसे मिले। जहांगीर इनकी विद्वत्ता, तेजस्विता और क्रियानिष्ठा को देख कर बहुत प्रसन्न हुआ; और इनके विपक्षियोंने जो जो बातें, इनके विषयमें उसके सामने कही थीं उनका इनमें विपरीतभाव जान कर, उसने इनको खूब सत्कृत किया और यह जाहिर किया कि—हीरविजय सूरिके ये ही यथार्थ उत्तराधिकारी हैं; और इस लिये इनको **जहांगीरी महातपा**की उपाधि दे कर उस गच्छके सच्चे अधिनायक प्रमाणित किये।

इस प्रकार, यद्यपि इन्हीं के गुरुभ्राता आदि कहे जानेवाले कितनेएक यतिजनों द्वारा इनके ऐकाधिपत्यमें कुछ विक्षेप उपस्थित किया गया और गच्छवासी यतिजन दो-तीन पक्षोंमें विभक्त हो गये; तो भी तत्कालीन जैन समाजमें इनका प्रभाव सर्वाधिक रहा और ये सबसे अधिक ख्यातिलाभ करते रहे। बादशाह जहांगीर के सिवा, मेवाडपति राणा जगत्सिंह, जामनगराधीश लाखा जाम, ईडरनरेश राय कल्याणमल आदि बहुतसे राजा-महाराजा भी इनका खूब आदर-सत्कार करते थे। जैन समाजके तो हजारों ही बडे बडे श्रीमान् और सत्तावान् श्रावकगण इनके परम भक्त थे। ये बडे बुद्धिमान् और प्रभावशाली तो थे ही, साथमें क्रियावान् भी पूरे थे। छठ, अट्ठम आदि उपवास तथा आयंबिल, निवी आदिकी तपस्या ये निरंतर किया करते थे। भोजन जिस दिन करते उस दिन भी प्रायः एक ही वक्त करते।

इन्होंने अपनी सारी उम्र में, २ शिष्योंको आचार्य बनाये, २५ शिष्योंको उपाध्याय पद दिये और ५०० को पंडित पद दिये। इनके निजके हाथसे २०० शिष्य दीक्षित हुए और १०० साध्वीयां दीक्षित हुई। सब मिला कर २५०० यति-साधु इनके आज्ञानुवर्ती थे और ७००००० (सात लाख) श्रावक-श्राविकाओंका विशाल समूह इनकी उपासना करता था। इनके उपदेशसे सेंकडों ही नये जैन मन्दिर बने, और पुराने सुरक्षित हुए। हजारों जिन मूर्तियोंकी इन्होंने प्रतिष्ठा की। जहां जहां ये गये वहां वहां श्रावक लोकोंने जैनधर्मकी प्रभावना करनेके लिये संघयात्रा, प्रतिष्ठामहोत्सव, साधर्मिकवात्सल्य और दान-पुण्य आदि अनेकानेक सत्कृत्य कर लाखों-करोडों रूपये खर्च किये।

अपने गच्छनायक गुरु विजयसेन सूरिकी मृत्युके बाद कोई ४०-४१ वर्ष तक ये इस प्रकार अपने संघका शासन करते रहे। पहले इन्होंने अपने कनकविजय नामक सुयोग्य शिष्यको, पाटणमें, सं० १६८१ में आचार्यपद देकर विजयसिंह सूरिके नामसे उद्घोषित कर उन्हें अपना उत्तरधिकारी निश्चित किया था; परंतु दुर्भाग्यवश इनके जीवितकाल-ही-में, सं० १७०९ में उनका स्वर्गवास हो गया; इससे फिर, वीरविजय नामक एक दूसरे योग्य शिष्यको, सं० १७१० में, गन्धार बन्दरमें रहते हुए नया आचार्यपद देकर विजयप्रभके नामसे उनको अपना सर्वाधिकारित्व समर्पण किया। इनका आज्ञानुवर्ती सारा जैन समुदाय, **देवसूरसंघ**के नामसे प्रसिद्ध हुआ और आज भी यह नाम जहां तहां प्रचलित है।

सं० १७१३ में, उसी ऊना नगरमें, जहां इनके प्रगुरु हीरविजय सूरिका स्वर्गवास हुआ था, वहां इनका भी स्वर्गवास हुआ और उसी जगद्गुरुके समाधिस्थानके पास श्रावकोंने इनका भी पवित्र समाधिस्थान बनाया।

इस प्रकार इन सूरिके जीवन-वृत्तान्तके साथ संबंध रखनेवाला इतिहास बडा विस्तृत है और वह तत्कालीन जैन समाजकी परिस्थितिका ज्ञान करानेमें बहुत ही अधिक महत्त्व रखता है।

इनके जीवनका विस्तृत वर्णन जिसमें दिया गया है वह **विजयदेवमाहात्म्य** नामका संस्कृत ग्रंथ है। इस ग्रंथको हमने कोई १०-१२ वर्ष पहले सम्पादित कर जैनसाहित्यसंशोधक-ग्रन्थमालामें प्रकाशित किया था। उसकी छोटीसी भूमिकामें उस समय हमने लिखा था कि—

'यह विजयदेवमाहात्म्य १७ वीं शताब्दीके जैन धर्मके इतिहासकी दृष्टिसे एक बहुत ही महत्त्वका ग्रन्थ है। जैन आचार्योंमें विजयदेव सूरिको अन्तिम प्रभावशाली आचार्य गिन सकते हैं। इनके समयमें जैन यतिसमुदाय और श्रावकवर्गमें बहुत घटनायें घटीं और क्रान्तियां हुईं। धार्मिक और सामाजिक परिस्थितिके अवलोकनकी दृष्टिसे इन घटनाओंका इतिहास बहुत ही रोचक और सूचक है। इसलिये यह सारा इतिहास इस ग्रन्थके—विजयदेव माहात्म्यके—दूसरे भागके रूपमें प्रकट करनेका विचार रखा है।'...इत्यादि।

हमारा वह विचार अभीतक सफल नहीं हुआ; सम्भव है वह कार्य इसी ग्रन्थमालाके लिये निर्धारित हुआ हो। उक्त विजयदेवमाहात्म्य अब प्रायः अप्राप्यसा हो गया है। इच्छा है कि उसकी पुनरावृत्ति की जाय और उसके साथका यह सारा इतिहास खूब विस्तारके साथ लिखा जाय।

प्रस्तुत देवानन्द महाकाव्यमें जो इन सूरिका चरित-वर्णन है वह तो बहुत ही संक्षिप्त है। यह तो एक चमत्कृति बतलानेवाला अलंकारमय काव्य है,—वर्णनात्मक चरित्र ग्रंथ नहीं;—इसलिये इसमें विस्तृत वर्णनकी कोई गुंजाईश भी नहीं है और अपेक्षा भी नहीं है। इसका उद्दिष्ट रस तो कवित्व है। तो भी काव्यकारने सूरिजीके जीवनकी प्रधान प्रधान घटनाओंका संक्षिप्त सूचन ठीक ठीक कर दिया है।

इसके सम्पादक सुहृद्वर पं० श्रीबेचरदासजीने अपनी प्रस्तावनाके साथ इस काव्यका जो परिचय और सरल सार दिया है उससे संस्कृत नहीं जाननेवाला जिज्ञासुवर्ग भी काव्यका आशय ठीक समझ सकेगा और अपनी जिज्ञासा-तृप्ति कर सकेगा। जो संस्कृतज्ञ हैं उनको तो इसके पाठमें विशिष्ट आनन्द प्राप्त होगा ही।

**अनेकान्त विहार**
शान्तिनगर, अहमदाबाद।
कार्तिकशुक्ला १५, सं० १९९४

**जिनविजय।**

## ॥ प्रस्तावना ॥

### §१. देवानन्दमहाकाव्यके संपादनका साधन

प्रस्तुत देवानन्द महाकाव्यका संपादन करनेमें हमें मात्र एक ही प्रति प्राप्त हुई है, और वह प्रति खुद ग्रन्थकारके निजी अक्षरसे लिखित प्रथम प्रतिके ऊपरसे लिखी हूई मालूम होती है। ग्रन्थकार देवानन्दकी अंतिम प्रशस्तिमें लिखते हैं कि—

"गोपालगिरिदुर्गेऽस्य लेखनं लेखनन्दनम्। वाचकैर्मेघविजयैः कृतं सुकृतहेतवे" ॥

अर्थात्—वाचक मेघविजयजीने प्रस्तुत ग्रन्थका लेखन गवालियरमें किया है। उपयुक्त प्रस्तुत प्रति, ग्रन्थकार लिखित प्रथम आदर्शके आधारसे लिखी होने पर भी प्रतिमें कहीं कहीं अशुद्धियां रह गई हैं, जिसका सूचन संपादकीय टिप्पणमें किया गया है। प्रतिके पत्र सब मिलाकर ४६ हैं। प्रत्येक पत्रमें ११–१२ पङ्क्तियां हैं और प्रत्येक पङ्क्तिमें ३५–३७ अक्षर हैं। आजु-बाजु और ऊपरके हांसियेमें ग्रन्थकारकृत टिप्पणीयां भी लिखी गई हैं। प्रतिमें प्रायः सर्वत्र पदच्छेद किया गया है। संधिद्वारा अदृश्यताको पाये हुए इ, ई, उ, ऊ वगैरह स्वरोंको भी खास खास चिन्होंसे बताये हैं। टिप्पणीमें कई जगह कोशोंके नामों का भी उल्लेख किया गया है। उल्लिखित कोशोंके स्थल शोध कर हमने उसके कांड पृष्ठ आदि भी दे दिये हैं। कई जगह व्याकरणके सूत्रोंका भी उल्लेख आता है। वे सूत्रादि कौनसे व्याकरणके हैं यह बात भी टिप्पणीयोमें हमने यथाप्राप्त बताई है। प्रति, अभीतक अच्छी हालतमें है। प्रतिकी दीर्घता लगभग १३ अंगुल है और पृथुता ६–७ अंगुल है। यद्यपि ग्रन्थका संपादन बडी सावधानीसे किया गया है फिर भी यदि कोई अशुद्धियां दृष्टिगोचर हों तो विज्ञ पाठक उन्हें सूचित करने की कृपा करें। संवत् १७५५ में श्रीमेरुविजयजीके शिष्य श्रीसुन्दरविजयजीने प्रस्तुत ग्रन्थकी लिपि कराई थी। यह उल्लेख देवानन्द महाकाव्यकी अंतिम प्रशस्तिमें है—

"शरेन्द्रियाद्रीन्दुमितेऽत्र वर्षे चालीलिखत् काव्यमिदं सुशिष्यः।
श्रीमेरुशब्दाद् विजयज्ञराजां श्रीसुन्दरादिर्विजयाभिधानः" ॥ —अंतिम प्रशस्ति।

कवि श्रीमेघविजयजीके जीवन-परिचयके विषयमें लिखनेके लिए अधिकाधिक साधन हमें श्रीमान् मोहनलाल दलीचंद देशाई बी. ए. एल् एल् बी. द्वारा प्राप्त हुए हैं; एतदर्थ श्रीदेशाईजी धन्यवादार्ह है। हमने आजसे कोई २३ वर्ष पहले श्रीमेघविजयजीके संबंधमें एक लेख जैनशासन समाचार पत्रमें प्रकट किया था उसका उपयोग भी प्रस्तुत प्रस्तावनामें किया गया है।

### §२. काव्यकारका परिचय

इस देवानंद महाकाव्यके प्रणेता उपाध्याय मेघविजयजी है। उनके जीवनका समस्त वृत्तांत तो उपलब्ध नहीं है अर्थात् उनके माता-पिता, मूल निवासस्थान, मूल नाम, साधु होनेके बाद उनका विहारक्षेत्र, उनके विशिष्ट उपासक इत्यादिका वृत्तांत जाननेका कोई साधन नहीं है। परंतु साधुदशाका जो कुछ थोडा बहुत वृत्तांत प्राप्त होता है वह उनकी निजकी कृतियोमेंसे है; और इस प्रकार है—

'उपाध्याय मेघविजयजी श्वेताम्बर जैन संप्रदायानुसारि तपागच्छके यति थे और वे प्रसिद्ध सम्राट् अकबरके कल्याणमित्र श्रीहीरविजयसूरिजीके संतानमें से थे। उनके दीक्षागुरु पंडित कृपाविजय थे और श्रीविजयदेवसूरिके

पट्टधर श्रीविजयप्रभसूरिजीने उनको वाचक पदवी देकर उन्हें उपाध्याय बनाये थे'। इतनी हकीकत मेघविजयजीके बनाए हुए सब ग्रन्थोंकी अंतिम प्रशस्तिमें मिलती है[१]।

ग्रन्थकार श्रीशंखेश्वरपार्श्वनाथके बडे [२]भक्त मालूम होते हैं। यह बात उनकी कृतियोंसे मालूम होती है। ग्रन्थके आरंभमें और ग्रन्थान्तर्गतप्रकरणोंमें भी उन्होंने जहां तहां[३] 'ऐं' का निर्देश किया है इससे मालूम होता है कि उनका श्रद्धा-मंत्र 'ऐं' बीजमूलक है। प्रस्तुत काव्यकी आदिमें श्लोक नवमेमें[४] 'सिद्धि' शब्दका निर्देश करके ग्रन्थकारने अपने प्रगुरु मुनिसिद्धिविजयजीका भी स्मरण किया है। और यह बात 'सिद्धि' शब्दके टिप्पणमें स्पष्ट भी की है। ग्रन्थकारको श्रीविजयप्रभसूरिके द्वारा उपाध्याय पद मिला था[५]। १७२७ में प्रस्तुत समस्यापूर्तिकी रचना की[६]। १७४७ में मातृकाप्रसादग्रंथका[७] निर्माण किया और १७५७ में चंद्रप्रभा[८] नामक व्याकरणविषयक ग्रंथ बनाया। तथा १७६०[९] में सप्तसंधानमहाकाव्यकी रचना की। इससे ग्रन्थकारका समय १८ वीं शताब्दीमें होना निश्चित है। ग्रंथकार व्याकरण-शास्त्र, ज्योतिःशास्त्र और अध्यात्मशास्त्रके अच्छे विद्वान् थे। साहित्य और अलंकारके विद्वान् तो थे ही। उनकी अनेक कृतियोंसे उनका तत्तद्विषयक पांडित्य प्रकट होता है। ग्रन्थकारनिर्मित ग्रंथसूचि इस प्रकार है—

---

१ "जयतु विजयदेवश्रीगुरोः पट्टलक्ष्मी-प्रभुरिह विजयादिः श्रीप्रभः सूरिशक्रः ॥
तत्सेवासक्तचेता अनवरततया प्राप्तलक्ष्मीर्विशिष्य शिष्यः श्रीमत्कृपादेर्विजयपदभृतः सत्कवेर्वाचकश्रीः।
मेघः पद्माप्रसादाद् विशदमतिजुषां श्राव्यकाव्यं चकार ॥" —देवानन्दमहाकाव्यप्रशस्ति।

"तदनु गणधरालीपूर्वदिग्भानुमाली विजयपदमपूर्वं हीरपूर्वं दधानः ॥ ६६ ॥
कनकविजयशर्माऽस्यान्तिषत् प्रौढधर्मा शुचितरवरशीलः शीलनामा द्वितीयः।
कमलविजयधीरः सिद्धिसंसिद्धितीरस्तदनुज इह रेजे वाचकश्रीशरीरः ॥ ६७ ॥
चारित्रशब्दाद् विजयाभिधानस्त्रयः सगर्भा धृतशीलधर्माः। एषां विनेयाः कवयः कृपायाः पयास्वरूपाः समयाम्बुराशौ ॥ ६८ ॥
तत्पादाम्बुजभृङ्गमेघविजयः०—"। —श्रीशांतिनाथचरित्र।

वंशावली—

हीरविजय
|
कनकविजय
|
शीलविजय
|
कमलविजय – सिद्धिविजय – चारित्रविजय
|
कृपाविजय
|
मेघविजय

२ देवानन्दमहाकाव्य, सर्ग चतुर्थ-पञ्चम-षष्ठ और सप्तमका प्रारंभ। देखो पृ० ३९, ४९, ५७, ६९।

३ देवानन्दमहाकाव्य, देखो पृ० ५७, ६९।

४ "स्वसाध्यसिद्धिं श्रयिताऽस्मि निःश्रमम्"। "सिद्धिम् इति च श्रीसिद्धिविजयं श्रयिताऽस्मि।" —देवानन्दमहाकाव्य, पृ० २ टिप्पण ११।

५ "प्राप्तस्फुरद्वाचकख्यातिः श्रीविजयप्रभाख्यभगवत्सूरेस्तपागच्छपात्।" —शांतिनाथचरित्र।

६ "मुनि-नयन-अश्व-इन्दुमिते वर्षे हर्षेण सादडीनगरे। ग्रन्थः पूर्णः समजनि विजयदशम्यामिति श्रेयः॥" देवानन्दमहाकाव्यप्रशस्ति।

७ "ओं नमः सिद्धमित्यादेर्वर्णाम्नायस्य वर्णनम्। चक्रे श्रीमेघविजयोपाध्यायो धर्मसाधनम्॥"
"संवत्सरे अश्व-वार्धि-अश्व-भूमिते पोष उज्वले। श्रीधर्मनगरे ग्रन्थः पूर्णश्रियमशिश्रियत्॥" —मातृकाप्रसाद।

८ "विजयन्ते ते गुरवः शैल-शर-ऋषि-इन्दुवत्सरे तेषाम्। आदेशाद् देशपतेः स्थितिः कृता राजधान्यन्तः॥
चातुर्मास्यामस्यां नाम्ना श्रीआगरावराख्यायाम्। नानायोगैरुचितै रचिता चन्द्रप्रभा सुधिया॥" —चन्द्रप्रभाका प्रांतभाग।

९ "वियद्-रस-मुनि-इन्दूनां प्रमाणात् परिवत्सरे। कृतोऽयमुद्यमः पूर्वाचार्यचर्याप्रतिष्ठितः॥" —सप्तसंधानमहाकाव्यप्रांतभाग।

१ **देवानन्दमहाकाव्य**[1] – रचनासमय सं० १७२७। यह काव्य मारवाडके **सादडी** नगरमें बनाया था ऐसा ग्रन्थकारने स्वयं लिखा है और उसकी प्रतिलिपि गवालियरमें स्वयं ग्रन्थकारने की है, यह भी स्वयं लिखा है।

२ **मातृकाप्रसाद** – रचनासमय १७४७। यह ग्रन्थ अध्यात्मविषयक है। इसमें 'ॐ नमः सिद्धम्' के वर्णाम्नायपर विवरण किया है और 'ॐ' शब्दका रहस्य स्पष्टरूपसे बताया है। प्रस्तुत ग्रंथ **धर्मनगर**[2] (धरमपुरी) में बना है ऐसा स्वयं ग्रन्थकारने लिखा है।

३ **चन्द्रप्रभा** – रचनासमय १७५७। यह ग्रन्थ व्याकरणका है। हेमचंद्ररचित सिद्धहेमचंद्र नामक व्याकरणको कौमुदीके रूपमें बनाकर प्रस्तुत ग्रंथ बनाया है। इसकी रचना **आगरामें** हुई थी ऐसा खुद ग्रन्थकारने [3]ग्रन्थांतमें कहा है। ग्रन्थका परिमाण आठ हजार श्लोक है।

४ **शांतिनाथचरित्र** – रचनासमय नहीं लिखा है। इस ग्रन्थमें नैषध काव्यकी[4] समस्यापूर्ति है। विषय, भगवान् श्रीशांतिनाथजीका जीवन वर्णन है। यह ग्रंथ **विजयप्रभसूरिके** शासनमें बनाया गया था, इससे प्रतीत होता है कि ग्रंथका निर्माण काल १७१० के बादका है। क्यों कि **वीरविजयमुनि**, १७१० में आचार्य होकर **विजयप्रभसूरि** बने थे।

५ **दिग्विजयमहाकाव्य** – रचनासमय नहीं ज्ञात हुआ। तो भी इसमें विजयप्रभसूरिका जीवन-वर्णन है, इससे यह ग्रन्थ भी १७१० के बादका ही होना चाहिए। इसमें तेरह सर्ग हैं; और ग्रन्थकारके बनाए हुए सब काव्योंमें यह सबसे बडा है।

६ **सप्तसन्धानमहाकाव्य** – रचनासमय १७६०[5]। यह काव्य बडा चमत्कारी है। इसमें एक ही श्लोकमें सात पुरुषोंकी कथा कही गई है। ऋषभदेव, शांतिनाथ, पार्श्वनाथ, नेमिनाथ, महावीर स्वामी, कृष्णचंद्र और रामचंद्र – इन सात महापुरुषोंका जीवन चरित्र इस काव्यके प्रत्येक श्लोकमें वर्णित हैं। ग्रन्थप्रमाण अनुष्टुप् श्लोक ४४२[6] है। ग्रन्थकार कहते हैं कि – "आचार्य[7] **हेमचंद्रका** बनाया हुआ सप्तसन्धानकाव्य था परंतु वह अब नहीं मिलता है इस कारण हमने यह नया बनाया है"। महाकवि **धनंजयने** द्विसन्धान महाकाव्य बनाया है। परंतु द्विसन्धानकाव्यसे यह सप्तसन्धानकाव्य विशेष चमत्कृतिपूर्ण है।

---

१ "मुनि-नयन-अश्व-इन्दुमिते वर्षे हर्षेण सादडीनगरे। ग्रन्थः पूर्णः समजनि विजयदशम्यामिति श्रेयः" ॥–देवानन्दमहाकाव्य, प्रान्तप्रशस्ति।

२ देखो सातवां टिप्पण।

३ देखो आठवां टिप्पण।

४ नैषधकाव्यकी उक्त समस्यापूर्तिका नमूना इस प्रकार है–

"श्रियामभिव्यक्तमनोऽनुरक्तता विशालसालत्रितयश्रिया स्फुटा।
तया बभासे स जगत्रयीविभुर्ज्वलत्प्रतापावलिकीर्तिमण्डलः" ॥ १ ॥
–शांतिनाथचरित्र, प्रारम्भिकश्लोक।

"गच्छाधीश्वरहीरहीरविजयाम्नाये निकाये धियां प्रेष्यः श्रीविजयप्रभाख्यसुगुरोः श्रीमत्तपाख्ये गणे।
शिष्यः प्राज्ञमणेः कृपादिविजयस्याशास्यमानाग्रणीश्चक्रे वाचकनाममेघविजयः शस्यां समस्यामिमाम्" ॥–शांतिनाथचरित्र, प्रतिसर्गप्रान्तप्रशस्ति।

५ देखो नवम टिप्पण।

६ "सूत्रतः सूत्रिता ग्रन्थे द्विचत्वारिंशदन्विता। चतुःशतीह काव्यानां सप्तसन्धाननामनि" ॥

७ "श्रीहेमचन्द्रसूरीशैः सप्तसन्धानमादिमम्। रचितं तदलाभे तु स्तादिदं तुष्टये सताम्" ॥ –सप्तसंधानमहाकाव्यप्रांतभाग।

**७ मेघदूतसमस्यालेख** – रचनासमय अज्ञात । यह काव्य मेघदूतकी समस्यापूर्तिरूप[1] हो कर, एक पत्र-रूप है। कविने भाद्रपद शुदि पांचमके बाद यह पत्र अपने आचार्य श्री**विजयप्रभसूरि**, जो उस समय **देवपाटण**में स्थित थे, उनको लिखा था । इससे इसका समय भी १७१० के बादका ही है । मेघदूतसमस्यालेखके अंतमें लिखा है कि **विजयदेव** गुरुकी भक्तिके लिए माघकी समस्यापूर्ति द्वारा उनकी प्रशंसा की और **विजयप्रभ** प्रभुकी भक्तिके लिए मेघदूतकी समस्यापूर्ति द्वारा उनकी प्रशंसा की । इस कथनमें ग्रंथकारने अपनी दो कृतियोंका जो अनुक्रम बताया है उससे यह ज्ञात होता है कि पूर्व माघसमस्यापूर्ति बनी और पीछे मेघदूतसमस्यापूर्ति । यह अनुमान सच हो तो मेघदूतकी समस्यापूर्ति १७२७ के पीछे बनी है ।

**८ विजयदेवमाहात्म्यविवरण** – रचनासमय अज्ञात । परंतु उस ग्रंथकी लिपि सं० १७०९ में हुई है[2] इससे मालूम होता है कि मूल ग्रंथ उसके पहिले बना हो और विवरण, मूलग्रंथके साथ वा पीछे बना हो। मूल ग्रंथ बृहत्खरतरगच्छीय श्री**जिनराजसूरिसंतानीय** श्री**ज्ञानविमल**शिष्य श्री**वल्लभोपाध्याय**ने बनाया है । उसमें मुख्य विषय श्री**विजयदेवसूरिजी**के जीवनका सविस्तर-वर्णन है । उपाध्याय **मेघविजयजीने** तो इस मूल ग्रंथका विवरण किया है–याने कठिन शब्दोंका अर्थस्फोट किया है। इस ग्रंथसे प्रतीत होता है कि उस समय खरतरगच्छ और तपागच्छके यति-मुनियोंमें गुणप्रेमके साथ विशालभाव था । यह भाव आज कल तो खास अनुकरणीय है।

**९ वर्षप्रबोध** – रचनासमय अज्ञात । परंतु ग्रन्थके प्रांतभागकी [3]प्रशस्तिमें **विजयप्रभसूरिके** पट्टधर **विजयरत्नसूरिकी** शासनधुरामें यह ग्रन्थ बना है ऐसा स्वयं ग्रन्थकारने लिखा है । इससे प्रतीत होता है कि 'वर्षप्रबोध' की रचना १७३२ के बाद की है। ग्रन्थमें तेरह अधिकार है और उनमें ग्रह, शकुन, वर्षफल इत्यादिकका अच्छा विवेचन

---

१ "माघकाव्यं देवगुरोर्मेघदूतं प्रभप्रभोः । समस्यार्थं समस्यार्थं निर्ममे मेघपण्डितः ॥" –मेघदूतसमस्यालेख, प्रांतभाग ।

२ श्रीवल्लभोपाध्यायकृतविजयदेवमाहात्म्यके अंतभागके श्लोक–

"यदन्यगच्छप्रभवः कविः किं मुक्त्वा स्वसूरिं तपगच्छसूरेः । कथं चरित्रं कुरुते पवित्रं शङ्केयमार्यैर्न कदापि कार्या ॥ २०० ॥
आत्मार्थसिद्धिः किल कस्य नेष्टा सा तु स्तुतेरेव महात्मनां स्यात् । आभाणकोऽपि प्रथितोऽस्ति लोके गङ्गा हि कस्यापि न पैतृकीयम् ॥२०१॥
तस्माद् मया केवलमर्थसिद्ध्यै जिह्वापवित्रीकरणाय यद्वा । इति स्तुतः श्रीविजयादिदेवः सूरिः समं श्रीविजयादिसिंहैः ॥ २०२ ॥
× × × जीयाच्चिरं स्ताद् मम सौख्यलक्ष्म्यै श्रीवल्लभः पाठक इत्यपाठीत् ॥ २०३ ॥
इति श्रीबृहत्खरतरगच्छीयश्रीजिनराजसूरिसंतानीयपाठकश्रीज्ञानविमलशिष्यश्रीवल्लभोपाध्यायविरचिते०" ॥ इत्यादि ।

लिपिकारलिखितपुष्पिका–

"लिखितोऽयं ग्रन्थः पण्डितश्री५श्रीरङ्गसोमगणिशिष्यमुनिसोमगणिना । सं० १७०९ वर्षे चैत्रमासे कृष्णपक्षे एकादशीतिथौ बुधौ लिखितं श्रीराजनगरतपागच्छाधिराज भ० श्रीविजयदेवसूरीश्वरविजयराज्ये"। –विजयदेवमाहात्म्य, सर्ग १९, पृ० १२६–१२७ ।

३ "श्रीमत्तपागणविभुः प्रसरत्प्रभावः प्रद्योतते विजयतः प्रभनामसूरिः । तत्पट्टपद्मतरणिर्विजयादिरत्नः स्वामी गणस्य महसा विजितद्युरत्नः ॥
तच्छासने जयति विश्वविभासनेऽभूद् विद्वान् कृपादिविजयो दिविजन्मसेव्यः ।
शिष्योऽस्य मेघविजयाह्वयवाचकोऽसौ ग्रन्थः कृतः सुकृतलाभकृतेऽत्र तेन ॥"

किया है। ग्रन्थकारने उक्त ग्रंथका संबंध 'स्थानांग' नामक तीसरे अंगसे बताया है। यह ग्रंथ संस्कृत प्राकृत दोनों भाषाओंमें मिश्रित है।

१० **युक्तिप्रबोध नाटक**, ११ **हस्तसंजीवन** और उसकी वृत्ति (रेखाशास्त्र) १२ **उदयदीपिका**[1] (प्रश्न निकालनेकी पद्धति), १३ **पंचाख्यान**, १४ **वीसायंत्रविधि**,[2] १५ **अर्हद्गीता** (तत्त्वगीता[3]), १६ **पंचमीकथा**, १७ **लघुत्रिषष्टिशलाकाचरित्र**–इत्यादि और भी अनेक ग्रंथ मेघविजयजी उपाध्यायके बनाए हुए हैं।

इसके उपरांत गुजराती भाषामें भी उनकी कितनी एक रचनाएं विद्यमान हैं। १ स्वाध्याय **जैनशासन**[4] **दीपक**, २ स्वाध्याय **जैनधरमदीपक**, ३ स्वाध्याय **आहारगवेषणा** ये तीन सज्झायें कविराज श्री**मेघविजयजीने** बनाई है। '**विजयदेवनिर्वाण रास**' भी इनकी एक गुजराती कृति है। इससे ग्रन्थकारकी मातृभाषाभक्ति प्रतीत होती है। ग्रन्थकारका एक स्वहस्तलिखित पत्र भी विद्यमान है और वह पत्र ग्रन्थकारने सं० १७६० भादरवा[5] शुदि० १ को **गवालियरसे** अपने शिष्य मुनि सुंदरविजय जो **जिहानाबाद** (दिल्ली) नगरमें चातुर्मास थे उन पर लिखा हुआ है।

इस प्रकार ग्रंथकारका अनेक विषयोंमें प्रकांड पांडित्य प्रकट होता है।

प्रस्तुत ग्रंथ, श्रीसिंघीजैनग्रन्थमालामें मेरे द्वारा संपादित होकर प्रकट होता है, इसके लिए में आचार्य श्रीजिनविजयजीका और ग्रंथमालाके प्राणरूप श्रीमान् बहादूरसिंहजी सिंघीका ऋणी हूं। आशा करता हूं कि इस प्रकार और भी श्रीसिंघीजैनग्रंथमालामें नवीन नवीन ग्रंथोंका संपादन कर श्रुतज्ञानकी उपासनाका भागी बनूं।

अमदावाद
भारतीनिवास
नं. १२, ब.

**बेचरदास।**

---

१ उदयदीपिकाके प्रारंभका भाग–

"नत्वार्हन्तं पार्श्वभास्वद्रूपं शङ्खेश्वरस्थितम्। श्रीश्राद्धमदनात् सिंहे धर्मलाभः प्रतन्यते ॥ १ ॥
श्रीकेशवकृतार्चस्य श्रीपार्श्वस्य प्रभावतः। प्रभासभाजनानन्दहेतुरत्रास्तु वस्तुतः ॥ २ ॥
कृपामूलेऽर्हतां धर्मे श्रीमेघविजयोदयः। गवां रसप्रसारेण भूयाद् जीवनसम्पदे" ॥ ३ ॥

२ अन्तभाग–

"श्रीमेघविजयः प्राप्तोपाध्यायपदविश्रुतः। भूविश्वेत्यादिकाव्यस्य व्याख्यानं चकृवानिदम्" ॥

३ "इतोऽधिकं किञ्चन मातृकाया व्याख्यानमादेशि मया वितत्य। श्रीतत्त्वगीताहितसत्प्रतीताध्यायेषु सज्ज्ञेयधियोत्तरेषु"॥ –मातृकाप्रसाद।

४ श्रीमेघविजयजीकी गूजराती भाषाका नमूनाः–

"इम जैन धरम शुद्ध जाणो नाणउ संका तेहनी, धुरि भले भणतां शास्त्र गणतां शुद्ध मति हुइ जेहनी।
तपगच्छनायक सुगुणग्राहक श्रीविजयप्रभगणधरो, तस पट्टधारी ब्रह्मचारी विजयरत्नसूरीसरो ॥
तस आण नित्य प्रमाण राखि कवि कृपाविजया तणउ। कहे सीस वाचक मेघविजया सेवक वाणी सवि भणउ।"
—स्वाध्याय जैनशासनदीपक।

५ पत्रका अंतिम भाग–

"श्राद्ध सर्वनैं बिहुं पारइं धर्मलाभ कहवो। वलता लेख सविशेष समाचारइं लिखवा।
अत्र जलद चारु छइ। गोहु दोढ मण। चिणा बे छइं। सुगाल छइं। साता मानयो।
संवत १७५६ भाद्र सुदि १।

पत्रका आदि भाग–

"अत्र शर्म कर्म छइं। तत्रनो ताहरो लेख श्रावण सुदि १२ नो लिख्यो लेख आव्यउ। समाचार जांण्या। तथा क्षेत्र आश्री लिख्युं ते तो काल एहवो ज छे। सर्वत्र क्षेत्र दुर्भिक्षरूप थया छे। प्रचग व्याप्त छइं। तेणे जिम तिम निर्वाह करवो ॥"
–यह पत्र सारा गद्यमें है।

## § ३. देवानन्द महाकाव्यकी समस्यापूर्तिका परिचय

प्रस्तुत सप्तसर्गात्मक महाकाव्य, माघकी समस्यापूर्तिरूप है । समस्यापूर्ति वा पादपूर्तिका स्वरूप इस प्रकार है–**"या समासार्था पूरणीयार्था कविशक्तिपरीक्षणार्थम् अपूर्णतयैव पठ्यमानार्था वा सा समस्या"**–अमरकोश-टीका प्रथमकाण्ड, शब्दादिवर्ग श्लो० ७; अथवा **"भिन्नाभिप्रायस्य श्लोकादेः तदीयत्वेन प्रत्यभिज्ञायमानानां भागानां स्वकृतेन परकृतेन वा भागान्तरेण समसनं सन्धानं समस्या"**–माधवी, शब्दकल्पद्रुमकोश। अर्थात्–कविकी शक्तिके परीक्षणार्थ जिसका अर्थ पूरणीय है ऐसा पाद वा पादोंका उच्चारण, जिसको सुनकर प्रतिभाशाली कवि पूरणीय अर्थको पूरा कर देवें । अथवा जिसका अभिप्राय भिन्न भिन्न है ऐसे श्लोकादिकका अपनी वा परकी कृतिसे सन्धान करना याने भिन्न भिन्न अभिप्रायवाले अपूर्ण श्लोकको अपने अभिप्रायसे संगतरीतिसे पूरा करनेका नाम समस्यापूर्ति वा पादपूर्ति है । माघकी पादपूर्तिरूप प्रस्तुत देवानंदमहाकाव्यमें समस्यापूर्तिका उक्त लक्षण ठीक ठीक घटमान है । काव्यकार उपाध्याय मेघविजयजी प्रस्तुत समस्यापूर्तिमें सर्वथा सफल हुए हैं इतना ही नहीं किन्तु इस समस्यापूर्तिमें उनकी नवनवार्थशालिनी प्रकांड सर्वतोमुखी प्रतिभाका भी पता चलता है । माघका मुख्य विषय कृष्णवासुदेवकृत शिशुपाल-वध है और प्रस्तुत काव्यका नायक वासुदेव कुमार–जो पीछेसे विजयदेवसूरि बनता है–है । माघके और देवानंदकाव्यके नायक वासुदेवपदाङ्कित है । कृष्णवासुदेवको दिल्ली जाना पडता है इसी तरह हमारे चरित्र नायकको भी जहांगीर बादशाहके पास दिल्ली जाना पडा हैं और कृष्णवासुदेवने रैवतक पर्वतके दर्शन किये थे इसी प्रकार हमारे चरित्रनायक भी तीर्थयात्राके लिए रैवतकगिरिको गए थे । इस प्रकार माघके नायकमें और प्रस्तुत काव्यके नायकमें थोडा बहुत साम्य है । प्रस्तुत समस्यापूर्तिमें माघके सात सर्गोंका ही संबंध है । समस्यापूर्तिके लिए माघके श्लोकका अंतिम चरण–चतुर्थ चरण–अधिकतासे लिया गया है और कहीं कहीं आद्य चरण, द्वितीय चरण और तृतीय चरण भी उपयोगमें लाया गया है । संपादककृत टिप्पणोमें यह बताया गया है कि प्रस्तुत समस्यापूर्तिरूप काव्यमें कहां माघका प्रथम चरण है, कहां द्वितीय, तृतीय और चतुर्थ चरण है; और साथमें माघके श्लोकका पाठभेद भी दर्शाया गया है । विसर्ग, अनुस्वार, पृथक्पद, समस्तपद, विभक्तिके वचनका भेद, क्रियापदभेद, 'श' 'स' 'न' 'च' का भेद, अत्यंत सदृश समानार्थक शब्दका निक्षेप, समानार्थक शब्दका न्यास, संधिभेद, शब्दस्थानभेद, लिपिकारभेद–इत्यादि पर उक्त पाठभेद निर्भर है, और संपादकीय टिप्पणोमें जहां जहां वैसा पाठभेद हुआ है यह सब माघके श्लोकोंका प्रमाण देकर स्पष्टतया बताया गया है । समस्यापूर्ति भी पद्मबंधादिकी तरह एक प्रकारका चित्र–आश्चर्यकर–काव्य है; इसी कारणसे उसमें विसर्ग, अनुस्वारका अधिक महत्त्व नहीं, माघमें कहीं 'ललनाः' पाठ हो और इसमें 'ललना' पाठ हो इससे समस्यापूर्तिकी लेश भी क्षति नहीं। माघमें कहीं 'दिवम्' पाठ हो और यहांपर 'दिव' पाठ हो तब भी समस्यापूर्तिमें कमी नहीं आ सकती । समस्यापूर्तिमें पूरणीय चरणके शब्दोंको नहीं बदलकर अर्थकी पूर्ति करनी होती है । कहीं कहीं 'द्युति'के स्थानमें 'च्युति', 'हव्यवह'के स्थानमें 'हव्यभुज' 'पयोज' के स्थानमें 'सरोज' इस प्रकारका परिवर्तन प्रस्तुत समस्यापूर्तिमें आया है परंतु यह परिवर्तन समस्याकारका खुदका किया हुआ है वा माघके ही पाठांतर है यह निश्चय नहीं हो सकता। और इस प्रकारका क्वचित् क्वचित् परिवर्तन समस्याकारका हो, तब भी समस्यापूर्तिके लिए बाधक नहीं, क्यों कि जहां सर्गोंके सर्गों तक समस्यापूर्ति चलती हो वहां इतना परिवर्तन अवश्य हो जाता है । प्रस्तुत समस्यापूर्तिमें खास खूबी यह है कि माघके चरणोंका नया ही अर्थ समस्याकारने निकाला है । अर्थकी यह खूबी काव्यकारने अपनी टिप्पनीमें दी है । माघमें जहां जहां श्लोकके प्रथम, द्वितीय, तृतीय और चतुर्थ चरणमें यमक है वहां वहां समस्याकारने यमक रखकर बडी चातुरीसे अर्थानुसंधान किया है। जैसी चमत्कृति माघमें है ऐसी ही चमत्कृति प्रस्तुत काव्यमें हैं । समस्याकारका मुख्य उद्देश कविताके द्वारा गुरुभक्तिको प्रगट करनेका है; इसी कारणसे प्रस्तुत काव्यमें नायकका संपूर्ण चरित्र सविस्तर नहीं बताकर

मात्र मोटी मोटी बातें दिखलाई हैं और अपनी सारी प्रतिभा समस्यापूर्तिके कार्यमें लगाकर काव्यजगतमें चमत्कृति पैदा कर गुरुकी महिमा बढाई है। काव्यकारने और भी प्रसिद्ध प्रसिद्ध काव्योंकी समस्यापूर्ति बनाई है इससे उनकी प्रतिभापूर्ण कवित्वशक्तिका पता चलता है। कविकुलकिरीट कालिदासके मेघदूतकी और श्रीहर्षरचित नैषध काव्यकी भी समस्यापूर्ति काव्यकारने बनाई है; इससे प्रतीत होता है कि काव्यकार एक अद्वितीय सिद्धहस्त समस्यापूरक थे। काव्यकार एक अद्वितीय कवि होने पर भी कहते हैं कि–

"नोद्रेकः कविनामदस्य न पुनः स्पर्धा न साम्यस्पृहा
श्रीमन्माघकवेस्तथापि सुगुरोर्मे भक्तिरेव प्रिया।
तस्यां नित्यरतेः सुतेव सुभगा जज्ञे समस्याऽद्भुता
सेयं शारदचन्द्रिकेव कृतिनां कुर्याद् दृशामुत्सवम् ॥
माघः सान्निध्यकृद् भूयाद् मल्लिनाथैस्तथैक्ष्यताम्। हास्येन मम दास्येऽस्मिन् यथाशक्त्युपजीविते ॥
अस्या न मधुरा वाचो नालंकारा रसावहाः। पूर्वसङ्गतिरेवास्तु सतां पाणिग्रहश्रिये ॥"

अर्थात्–किसी प्रकारके कविताके मदसे प्रस्तुत समस्यापूर्ति नहीं बनाई है। एवं श्रीमान् माघकविके साथ हमारी स्पर्धा भी नहीं है, तथा उनके समान होनेका भी हमारा दावा नहीं है। मात्र हमारे सुगुरुकी भक्तिको प्रस्तुत समस्यापूर्तिसे व्यक्त की है। हमारे प्रस्तुत कार्यमें यशःशरीरी माघकवि भी सहाय करें, टीकाकार मल्लिनाथ प्रभृति हमारी तरफ निगाह रक्खें। हमने तो यथाशक्ति यह दास्य कार्य किया है। प्रस्तुत समस्यापूर्तिकी वाणी मधुर नहीं अलंकार भी रसावह नहीं मात्र पूर्वसंगति मात्र है। तो भी गुरुभक्तिप्रदर्शक हमारी यह कृति सज्जनोंके करकमलमें हो ऐसी हमारी मनःकामना है।

ये संस्कृत पद्य समस्याकारने देवानन्द महाकाव्यकी अंतिम प्रशस्तिमें दिये हैं। देखिए तो सही, इन पद्योंसे कर्ताकी सरलता, नम्रता, निरभिमानिता और गुरुभक्तिका रस किस प्रकारसे टपक रहा है। वर्तमान कालके मुमुक्षु लोक, कविराज मेघविजयजीके इन गुणोंका अनुकरण करें और काव्यरसके पिपासु गण प्रस्तुत काव्यको पढ कर माघके पढनेका आनन्दानुभवके साथ एक सुप्रसिद्ध जैनाचार्यके वृत्तान्तसे भी परिचित बनें। इति शुभम्।

## §४. देवानन्दमहाकाव्यका सरल और संक्षिप्त सारार्थ।

[१] सब द्वीपोंमें उत्तम **जंबूद्वीप**। उसमें **गंगानदीसे** सुशोभित **भारतवर्ष**। भारतवर्षमें सर्वोत्तम देश **गूजरात**। वह समीपवर्ती समुद्रसे सुशोभित है। उसमें विकस्वर कमलयुक्त अनेक सरोवर हैं। उसके अनेक खेतोंमें संख्यातीत हल रात-दिन चलते रहते हैं। उन खेतोंमें उत्तमोत्तम ईख पकती है। गूजरात देशमें पार्श्वनाथ भगवानका **शंखेश्वरनामक** अद्भुत तीर्थ है, और दूसरे भी अनेकानेक पवित्र तीर्थोंसे वह देश अलंकृत है। गूजरात देशमें गौओंका क्षीर नित्य प्रति झरता रहता है इससे उसका 'गूर्जर' नाम यथार्थ है। इस प्रकार अनेक शोभासे विभूषित गूर्जर देशमें पहाडकी तलहट्टिकाके पास **इलादुर्ग (ईडर)** नामक श्रेष्ठ नगर है। उस नगरका राजा **नारायण** है। नारायणके पिताका नाम **पुंज** और पितामहका नाम **भाण** था। राजा सुप्रसिद्ध **राठोड** वंशका था। उस नगरमें **स्थिर** नामका सर्वोत्तम व्यवहारी रहता था। स्थिरके पिताका नाम **माधव** था। स्थिरकी पत्नी **रूपा** थी जो बडी सुरूप और पतिव्रता थी। जब रोहिणी नक्षत्र शुभयोगयुक्त था तब विक्रम संवत्[१] १६३४ के पोष शुक्ल त्रयोदशी रविवारके शुभ दिन, **रूपाबाईने** एक अद्भुत पुत्रको जन्म दिया। अद्भुतताके ही कारण पुत्रका नाम **वासुदेव**[२] रक्खा गया।

---

१ "चतुस्त्रिंशत्तमे वर्षे षोडशस्य शतस्य हि। पौषे मासे सिते पक्षे त्रयोदश्यां दिने रवौ" ॥–विजयदेवसूरिमाहात्म्य, सर्ग १, श्लो० १८।

२ **वासकुमार**–विजयदे० मा०।

[ २ ] बालक **वासुदेव** युवान हुआ तब माताकी इच्छा उसको विवाहित करनेकी हुई । परंतु, पुत्र तो जैनी दीक्षाको वरना चाहता था । पुत्रके दीक्षा लेनेके विचारको जानकर माताने, पिताने और भाईयोंने उसकों खूब समझाया, दीक्षाके दुःख बतलाए और दीक्षा न लेकर गृहस्थ बननेको कहा, परंतु युवक **वासुदेव** अपने विचारसे लेश भी चलित न हुआ; किंतु मातापितादिकको दीक्षाका परमार्थ समझाकर, अपना विचार सविशेष दृढीभूतकर दीक्षाके लिए उसने मातापिताकी संमति प्राप्त की । पुत्रस्नेहसे उसकी माताने भी दीक्षा लेनेका संकल्प किया । पुत्र **वासुदेवने** दीक्षा लेनेके पूर्व तीर्थयात्राका विचार किया । दीक्षाके लिए गुरुको भी ढूंढना तो था ही । तीर्थयात्राके निमित्तसे वह कार्य अधिक सुकर हो गया । अपने राजाके द्वारा यात्राप्रवासके लिए स्थल-स्थलमें सुप्रबंध करनेके हेतु नगरके राजाकी संमति लेकर **स्थिर** व्यवहारीका पुत्र **वासुदेव** तीर्थभ्रमणार्थ चल पडा ।

उस समय जैन धर्मके महान् आचार्य श्री**विजयसेनसूरि राजनगर** (अमदावाद) में विराजमान थे । **अकबर** पादशाहको प्रतिबोध करनेवाले महान् तेजस्वी आचार्य श्री**हीरविजयजीके** वे पट्टधर शिष्य थे ।

तीर्थयात्रा करते करते युवक **वासुदेवकुमार, अमदावादमें** आ पहुंचा और श्री**विजयसेनसूरि**जीके उपाश्रयमें गुरुवंदनके लिए गया । गुरुकी उपदेशपूर्ण वाणी सुन कर **वासुदेव** कुमारने गुरुको कहा कि–"मुजको दीक्षा दीजिए"। **वासुदेवकुमार**की सोल्लास विनंती सुन कर गुरुने कहा कि–"वत्स ! तेरे ही निवास स्थलमें तेरेको दीक्षा देना उचित है, अर्थात् तेरी दीक्षाविधि ईडरमें करना समुचित है; परंतु तेरे अत्याग्रहसे तेरी दीक्षाविधि यहांपर–अमदावादमें–भी करना अनुचित नहीं । **राजनगर**के श्रावकोंने मिलकर **वासुदेवकुमार**का दीक्षोत्सव किया और **अमदावाद**की **हाजापटेल**की पोलमें **प्रियालवृक्ष**के नीचे सकलसंघ-समक्ष श्री**विजयसेनसूरि**ने युवक **वासुदेव**को संवत् १६४३ के माघ शुदि दशमीको दीक्षित करके उसका '**विद्याविजय**' नाम प्रकट किया । दीक्षोत्सवके समय सारे देशमें अमारि रखनेका प्रबंध हुआ था और दानका प्रवाह अविरत बहता था । अब **वासुदेवकुमार** नहीं परंतु मुनि **विद्याविजय** पांच व्रतोंको धारण कर उनका यथाशक्ति पालन करने लगे और शास्त्रोंका अध्ययन करनेके लिए तत्पर हुए । अपने प्रबल प्रयत्नसे मुनि **विद्याविजय** ज्ञान और क्रिया दोनों मार्गके पारगामी हुए ।

एक समयकी बात है कि बादशाह **अकबरने** श्री**विजयसेनसूरि**जीको अपने दरबारमें आनेका आमंत्रण भेजा । [3]**राधनपुरसे** विहार करते हुए सूरिजी **लाहोरमें**[4] बादशाहके दरबारमें पधारे और धर्मके स्वरूपकी चर्चा की । सूरिजीने बादशाहको कहा कि–'दयामय धर्म ही सर्व श्रेयका असाधारण कारण है' । उस समय कई ब्राह्मणोंने बादशाहको कहा कि–'हुजूर ! खुदाकी बनाई हुई परमपवित्र श्री**गंगा** माताजीको ये जैनाचार्य नहीं मानते' । इसका उत्तर देते हुए आचार्यने कहा कि–'राजन् ! ऐसी बात नहीं है । हम जैन लोक **गंगाजी** को बडी पवित्र मानते हैं और इसी कारण हमारे जैन मंदिरोंकी प्रतिष्ठामें गंगाजलके विना चल ही नहीं सकता' । ऐसा कहकर दरबारमें आए हुए ब्राह्मणोंको आचार्यजीने निरुत्तर कर दिए । फिर आचार्यजी, भूतल पर विहार करने लगे और जैन धर्मके उपदेशका प्रचार करने लगे ।

---

१ **विजयदेवमाहात्म्य**में श्रीवल्लभोपाध्यायने लिखा है कि—"**राजनगर**में अपने पुत्रको और अपनी पत्नीको दीक्षित करानेके लिए **स्थिर शेठ** खुद आया था और किरायेके मकानमें रहता था" ।

"अथ श्र्यहम्मदावादे स्थिरः श्रेष्ठी समाययौ । पुत्रस्य स्वस्य पत्न्याश्च दीक्षाग्राहणहेतवे ॥"–सर्ग ५ श्लो० १ ।

२ "षोडशस्य शतस्यास्मिन् त्रिचत्वारिंशवत्सरे । दशम्यां माघशुक्लस्य दीक्षाऽभूद् यस्य सोऽवतात् ॥" सर्ग ५ श्लो० ५२ ।

३–४ विजयदेवमाहात्म्य, सर्ग ६, श्लो० १३–२१ ।

[[1] "बादशाहके आग्रहसे सूरिजीने लाहोरमें दो चातुर्मास किए और बाद अपने गुरु श्रीहीरविजयजीको ऊना-नामक ग्राममें रोगग्रस्त जानकर वे लाहोरसे गुरुजीके पास आनेको निकल पडे। गूजरात तरफ आते आते रास्तेमें सादडीमें चोमासा करना पडा और वहां ही श्रीविजयसेनसूरिजीने सुना कि श्रीहीरविजयजी गुरु, स्वर्गको सिधार गए। गुरुजीका स्वर्गगमन सुनकर आचार्यजीको बडी ग्लानि हुई। सादडीसे आचार्यजी पाटण पहुंचे, वहांसे खंभात होकर अमदाबादको गए। अमदाबादमें और उसके पास सिकंदरामें श्रीसंघके आग्रहसे आचार्यजीने एक एक चातुर्मास किया। वहांसे लाटापल्ली (लाडोलपुर) में और वहांसे अपने गुरुके निर्वाण स्थल उन्नतपुर (ऊना) में आए। वहांसे विहार करते करते और अनेक ग्राम और नगरोंको अपने सदुपदेशसे पावन करते हुए आचार्यजी सूरतको गए। वहांसे फिर ऊनाको गये।

श्रीविजयसेनसूरिजीके एक श्रेष्ठ शिष्य नन्दिविजयमुनि बडे पंडित थे और अनेक भाषाओंके ज्ञाता थे। उस समय दीव बंदरमें फिरंगीयोंका राज्य था। वे फिरंगी लोक दुरात्मा थे। उन फिरंगीयोंके गुरु 'पादरी' कहलाते थे। उक्त नन्दिविजय मुनिने अपने कौशलसे फिरंगीयोंको बडे प्रसन्न कर लिये। अतिप्रसन्न होनेसे फिरंगीलोक जिन-धर्ममें भक्ति रखने लगे, जिनप्रवचनको जानने लगे और जैन साधुओंकी सेवामें तत्पर भी रहने लगे। फिरंगीयोंने अपने गुरु पादरीको कहा कि–'जैन मुनियोंको दीवबंदरमें आनेके लिए निमंत्रण भेजा जाय' 'जैन मुनियोंको देखनेकी तीव्र इच्छा सब फिरंगीयोंमें व्यक्त हुई है'। पादरीने श्रीविजयसेनसूरिको दीवबंदरमें आनेके हेतु अपने हाथसे पत्र लिख भेजा। परंतु दीवके अग्रणी मुनिभक्त श्रावक मेघजीकी संमति जब तक न मिले तब तक सूरिजी दीवमें जानेको उत्सुक न हुए। क्यों कि उक्त मेघजीश्रावक फिरंगीयोंका बडा प्रियमित्र था और दीवका फिरंगी राजा क्रूर था। इधर पादरीका पत्र पाकर सूरिजी न आए तब मेघजीके कहनेसे फिरंगीयोंके राजाने स्वयं पत्र लिख भेजा और उस पत्रसे सूरिजी दीवको पधारे। आचार्य और फिरंगीयोंके राजाके बीच धर्म-वार्ता हुई, फिरंगीयोंका राजा प्रसन्न हुआ और उसने आदरके साथ जैन मुनियोंको दीवमें रहनेकी संमति दी। अब सूरिजीने दीवसे विहार किया और फिरते फिरते वे अमदावादके पास शकंदरामें आ पहुंचे। वहां मार्गशीर्ष शुक्ल पंचमीको मुनि विद्याविजयको पंडित पद दिया।]

बाद खंभातके अग्रणी श्रावक और सोमश्रेष्ठिके बडे भाई श्रीमल्लके आमन्त्रणसे आचार्यजी खंभात आए। श्रीमल्ल बडा धनाढ्य था और गुरुभक्त भी। आचार्यजीने खंभात आकर संवत् १६५७ वैशाख शुदि चोथके दिन अपने प्रिय शिष्य पंडित विद्याविजयको आचार्य-पद दिया और अपनी गद्दीका समर्पण किया। आचार्य-पद देनेके साथ ही विद्याविजयमुनिका नाम विजयदेवसूरि प्रकट हुआ और वे विजयसेनसूरिके पट्टधर बने। यही विजय-देवसूरि प्रस्तुत काव्यके नायक हैं। आचार्यपदके प्रसंग पर खंभातके श्रावक श्रीमल्लने बडा उत्सव किया और उत्सवमें दान भोजन वगैरहके लिए बडा भारी खर्च करके, अपने समानधर्मियोंकी अधिकाधिक सेवा की। [2]पाटणमें सं० १६५८ पौष वदि ६ गुरुको श्रीविजयदेवसूरिका वंदना-महोत्सव हुआ। उस महोत्सवके खर्चका सारा भार सहस्रवीर श्रावकने अपने ऊपर लिया। कनकविजय और लावण्यविजय यह दो मुनि विजयदेवसूरिके शिष्य थे। एक समयकी बात है कि, जहांगिरशाह बादशाहने चरित्र नायक सूरिजीको अपने दरबारमें सादर बुलाए। सूरिजी

---

१ [ ] इस कोष्ठकके अंदरका भाग विजयदेवसूरिमाहात्म्यसे लिया गया है। वहां यह भाग, सर्ग ६, श्लो० ४५ से ११६ श्लोक तक है। ऊपर, इस भागका सार मात्र दिया गया है।

२ "श्रीमत्पत्तनसद्रङ्गे निरमाद् वन्दनोत्सवम्। सहस्रवीर आनन्दाद् यस्य द्रव्यव्ययाद् घनात्" ॥ ९३ ॥

"षोडशस्य शतस्यास्मिन् अष्टपञ्चाशवत्सरे। षष्ठ्यां पौषस्य कृष्णायां गुरुवारे शुभावहे" ॥ ८४ ॥–श्रीविजयदेवसूरिमाहात्म्य, सर्ग ७।

विहार करते हुए दिल्लीको पहुंचे। धर्म-चर्चा और वार्ता-विनोदसे सूरिजीने बादशाहको प्रमोदित किया। सूरिजीकी तपप्रधान उग्र क्रियाओंसे विशेष प्रसन्न होकर बादशाहने सूरिजीको 'महातपा' का बिरुद दिया। बादशाहके सन्मानसे सूरिजीके विपक्षी-कुपक्षी लोक श्याममुख हो गये।

[ ३ ] अब विहार करते करते सूरिजी ईडर को आए। वहांके राजा कल्याणमल्लने ईडर आए हुए सूरिजीका बडा स्वागत किया और सूरिजीके प्रवेशोत्सवमें भी अग्र भाग लिया। ईडरके चतुर्विध संघमें सर्वत्र आनंदका उल्लास छा गया। ईडरका राजमंत्री सहजू श्रेष्ठी सूरिजीका उपासक था और बडा धनाढ्य था। सहजू शाहने सूरिजीके पास आकर भक्तिविनम्र शब्दोंमें कहा कि 'गुरुजी! आपके पधारनेसे आपकी जन्मभूमि धन्य हुई है। आपके पूर्वज बडे धार्मिक थे। गुरुजी! अब आपको मेरी विनंती है कि आप अपने योग्य शिष्यको ईडरमें अपना पट्टधर बनाकर-अर्थात् आचार्यपद देकर ईडरनगरको विशेष धन्य कीजिए। आपके होनहार पट्टधरके आचार्यपदका उत्सव करनेकी मेरी बडी तीव्र भावना है'। सूरिजीने, सहजू शाहकी बात ध्यानपूर्वक सुनी और यथासमय उसकी भावना पूर्ण करनेको कहा।

ईडर आनेके पूर्व ही सूरिजीने अपने योग्य शिष्यको पाठक याने उपाध्याय पद, सं० १६७३ माघमासके शुक्ल पक्षमें उत्तम दिन आनेपर, पाटणमें[१] ही दे दिया था। उपाध्याय कनकविजय प्रकांड पंडित थे। उपाध्याय होनेके पूर्व ही मुनि कनकविजय अपने गुरुसे चौदह विद्या पढ चूके थे, उपांगसमेत एकादशांगीका अवगाहन कर चूके थे और चौदह पूर्वोका[२] (?) भी अध्ययन कर सारे जैन प्रवचनके पारगामी बन चूके थे। ईडरके पास साबली नामका ग्राम है, वहां जीवहिंसाकी अधिक प्रवृत्तिको देखकर वहांके श्रावक रत्नसिंह[३] पारखने सूरिजीसे साबली आनेकी विनंती की; और कहा कि-'आपके आनेसे साबलीमें चलती हुई जीवहिंसा रुक जायगी और जैन धर्मकी महिमा भी होगी'। सूरिजी साबली आए और वहांके ठाकुरको प्रतिबोधित कर जीवहिंसाको रुकवा दी। वहांसे फिर सूरिजी ईडरको पधारे। ईडरके[४] नाकरशाहके पुत्र शाह सहजूने आचार्य-पदका बडी धामधूमके साथ उत्सव किया और सूरिजीने अपने शिष्य उपाध्याय श्रीकनकविजयको सं० १६८२ वैशाख शुदि छठके दिन आचार्य-पद देकर अपना पट्टधर बनाया और उसका नाम विजयसिंहसूरि प्रकट किया। अब दोनों सूरिजी महाराज-अर्थात् श्रीविजयदेवसूरि और श्रीविजयसिंहसूरि दोनों गुरुशिष्य-ईडरसे विहार करके सीरोहिका (शीरोही) नगरको पहुंचे, तब पुंजाशाहके पुत्र पोरवाडशिरोमणि शाह तेजपालने बडा प्रवेशोत्सव किया था। शीरोही पहुंचनेके पहले शाह तेजपालकी विनंतीसे सूरिजी आबुकी यात्राके लिए गए, साथमें शाह तेजपालका[५] संघ भी था। सूरिजीने शीरोहीमें सुखपूर्वक चातुर्मास बिताया। उस समय जालोरका मंत्री श्रीजयमल्ल सूरिजीके पास पहुंचा तब सूरिजी विहार योग्य समय होनेपर स्वर्णगिरिको चले। वहांका राजा जालंधरसिंह था। स्वर्णगिरिमें पहुंचने पर राजाने और लोगोंने सूरिजीका बडा आदर किया। उस समयके अधिकाधिक आदर-सत्कारको देखकर श्रीविजदेवसूरिजीको खंभातनगर याद आ गया जहां कि अपने आचार्य-पदका बडा भारी उत्सव हुआ था। इधर ही श्रीविजयसिंहसूरिका वंदनामहोत्सव हुआ अर्थात् श्रीविजयदेवसूरिजीने अपने शिष्य श्रीविजयसिंहसूरिको सिंहासनके ऊपर विराजमान करके संघसमक्ष वंदन

---

१ "अथास्ति पत्तनं नाम पत्तनं पत्तनोत्तमम्। रत्नयोनिं यतो लोकास्तद् ब्रुवन्ति च नापरम्" ॥ ३४॥
"षोडशस्य शतस्याब्दे त्रिसप्ततितमे रमे। माघमासावदातस्य पक्षस्योत्तमवासरे" ॥ ५६ ॥-विजयदेवमाहात्म्य, सर्ग ९।

२ "अथ शश्वद् गुरोः पार्श्वे सर्वा विद्याश्चतुर्दश। सोपाङ्गैकादशाङ्गीयुक् पूर्वाण्यपि चतुर्दश" ॥ १ ॥-विजयदेवमाहात्म्यसर्ग ९।

३ "विजयदेवसूरीन्द्रं वसन्तं तत्र सांप्रतम्। प्रणत्य रत्नसिंहोऽयं श्राद्धो विज्ञपयत्यथ" ॥ ८४ ॥-विजयदेवमाहात्म्य, सर्ग ९।

४ "व्यवहारी सदाहारीश्वरेश्वरपुरस्कृतः। तत्र पावित्रभृद्गात्रः श्रेष्ठी वसति नाकरः" ॥ ६८ ॥-विजयदेवमाहात्म्य, सर्ग ९।

५ "प्रत्यर्बुदाचलं तीर्थं तेजपालस्ततोऽचलत्। प्रत्यहं वन्दमानोऽमा समायान्तं गणाधिपम्" ॥ २५३ ॥-विजयदेवमाहात्म्य, सर्ग ९।

किया—और श्रीविजयसिंहसूरिजीको सं० १६८४ पौष शुदि छठके रोज वंदन करके संघसमक्ष भट्टारकरूपसे घोषित किया तथा अपना सर्वाधिकारित्व उन्हें समर्पण कर दिया। प्रस्तुत वंदना-महोत्सव निमित्त मंत्री जयमल्लने बडी उदारताके साथ खूब धन खर्च किया, खूब दान दिया और साधर्मिकोंको मिष्टान्न भोजनादिके द्वारा खूब प्रसन्न किए।

वहांसे अब सूरिजीने मारवाड देशकी तरफ विहार किया। यहां पर चंद्रशाखीय, रुचिशाखीय और हंसशाखीय मुनियोंने मारवाडमें पधारते हुए सूरिजीका बडा सन्मान किया। सूरिजीके प्रभावसे मारवाडका दुर्भिक्ष नष्ट हुआ, अच्छी वृष्टि हुई, और वह शुष्क प्रदेश भी नदीमातृक हो गया। मारवाडमें घूम कर धर्मका प्रचार करनेके बाद अब सूरिजीका प्रयाण मेवाडदेशकी तरफ हुआ। मेवाडका महाराजा श्रीजगत्सिंह, सूरिजीको वंदन करनेको आया। आचार्यजीने राजा जगत्सिंहको अहिंसाधर्मका बोध दिया और सूरिजीके उस बोधसे उसने मेवाडके बडेसे बडे सरोवर पींछोला और उदयसागरमें मत्स्योंका मारना रोक दिया। मेवाडसे सूरिजी गुजरातदेशमें आए। गुजरातमें दो वर्ष बिताकर सूरिजी विमलाचलकी यात्राके लिए सोरठदेश ( काठीयावाड ) तरफ पधारे। वहांसे अज्झाहरपार्श्वनाथकी यात्राको गए। वहांसे अपने गुरु श्रीहीरविजयजीकी समाधिके दर्शनार्थ सूरिजी उन्नतपुर ( ऊना ) गामको गए। सूरिजीके वंदनके लिए दीवबंदरसे बहुत लोग ऊनाको आए। ऊनामें चातुर्मास पूरा करके सूरिजीने देवपत्तन तरफ विहार किया। वीरविजय नामक मुनि सूरिजीका विशेष रीतिसे उपासक था और उसमें सद्गुणोंका आविर्भाव देख कर उसके प्रति सूरिजीका अधिक प्रेम रहता था। देवपत्तनसे सूरिजी गिरनारकी यात्राको गए।

[ ४ ] बडी श्रद्धा और भक्तिसे सूरिजीने रेवतक तीर्थका दर्शन किया। गिरनारसे सूरिजी जामवंशीय देवराजके नवानगरको पधारे। वहांसे सूरिजी सिद्धाचलकी यात्राको पधारे। सिद्धाचलकी यात्रा करके सूरिजीने दक्षिणदेश तरफ जानेके संकल्पसे सूरत तरफ विहार किया। सूरतमें आनेके बाद वहांके राजभवनमें सागरपक्षीयोंके साथ सूरिजीने शास्त्रार्थ किया और विजयश्री प्राप्त की। सूरतमें शास्त्रार्थमें प्राप्त विजयश्रीका स्मारक भी बना। एक ऐसा स्थान बना जहां सूरिजी और उनके परिवारके ही यतिगण ठहर सकते हैं और अन्य कोई वहां नहीं ठहर सकता। यह ही स्थान उक्त विजयका स्मारक था। सूरिजीने सूरतको छोडकर अब दक्षिण तरफ विहार किया। मार्गमें कई भक्त श्रावक-श्राविकएं भी सेवाके लिए साथ चलतीं थीं। उनमें चतुरांबाई प्रमुख अनेक श्राविकाएं सूरिजीकी बहुत भक्तिमती थीं। विहार करते करते सूरिजी बगलांणा(बागलाण)के पास पहुंचे। बागलाण पर्वतकी चोटी पर वसा था। वहां शाहजादा औरंगजेबका शासन था। वहांसे सूरिजीने शाहपुर जाकर उसके उपवनमें चातुर्मास किया। शाहजादेने सूरिजीका बडा गौरव किया और अपने शासित प्रदेशमें जीवरक्षाके लिए पक्की व्यवस्था की। अब सूरिजी संघके साथ तीर्थाटनके लिए चले। मार्गमें कलिकुंडपार्श्वनाथ तीर्थका और करहेडपार्श्वनाथ तीर्थका सूरिजीने दर्शन किया।

[ ५ ] देवचंद्र श्रावकने यात्रादिकी विधिमें अग्रभाग लिया और उदारतासे धनका खर्च भी किया। वहांसे सूरिजी पहाडके पास बसे हुए औरंगाबादमें आए। वहांसे अंतरिक्षपार्श्वनाथकी यात्राको गए। वहांसे बर्हानपुर (बुरानपुर) को पहुंचे। वहांसे मल्लिकापुर (मलकापुर) जाकर और फिर अंतरिक्षपार्श्वनाथकी यात्रा कर सूरिजी तिलिंग (तैलंग) देशको गए। रास्तेमें भाग्यनगरीके संघने सूरिजीका स्वागत करके बडी आवभगत की। चलते चलते सूरिजी आदिनाथ भगवानके तीर्थ श्रीकुल्लपाकजीको पहुंचे। कुल्लपाकतीर्थके आदिनाथका प्रसिद्धनाम माणिक्यदेव है। यह माणिक्यदेवकी मूर्ति जटासे सुशोभित है। वहांपर श्रीअमरचंद्र मुनिको वाचक पद दिया और चतुरांबाईने बडा

---

१ "चतुर्भिरधिकैर्वर्षैर्वर्षेऽशीतितमे शुभे। षोडशस्य शतस्याह्नि षष्ठे पौषसितस्य हि" ॥ ३६३ ॥—विजयदेवमाहात्म्य, सर्ग ९।

उत्सव किया। तैलंगदेशके बादशाहने श्रीसूरिजीके उपदेशसे गौहत्याका निषेध किया। वहांसे सूरिजी फिर भाग्य-नगरीको आए और वहां अनेक प्रकारके नये नये उत्सव हुए। वहांसे सूरिजी बीजापुरको गए और वहां भी धर्मका बडा प्रभाव हुआ। बादशाहने बंदियोंको छोड दिए। यहां भी साथमें आए हुए श्रावक देवचंद्रने बडा भारी दानप्रवाह बहाया। सूरिजीने कवि श्रीवीरविजयजीको 'पंडित'का पद दिया। अब फिर श्रीअंतरिक्षपार्श्वनाथके दर्शन कर सूरिजी बुरानपुरको आए और वहां चातुर्मास बिताया। गूजरातके संघका आग्रह होनेसे फिर वहांसे सूरिजी गूजरातको चले। विहार करते करते सूरिजी सूरतको आए। गूजरातदेश तो मोरकी तरह सूरिजीके आगमनकी प्रतीक्षामें था ही।

[ ६ ] अब विहार करते करते सूरिजी गन्धपुर (गंधार) बंदरको पहुंचे। वहां अमदावादसे और अणहिल्ल-वाडसे अनेक लोक सूरिजीके वंदनको गए। धनजी शाह और रतनजी शाहके आग्रहसे सूरिजी वहां ठहर गये। साहिबदेतनयने और अखेशाहने बडा उत्सव किया और सूरिजीने अपने प्रिय शिष्य पं० वीरविजय मुनिको[1] सं० १७१० वैशाख शुदि १० मीके दिन आचार्यपदसे विभूषित करके उसका नाम विजयप्रभसूरि प्रकट किया। इसके बाद सूरिजी फिर सूरतको चले। वहांसे सूरिजी अहमदपुरको (अमदावादको ?) गए। धनजी शाह नामका श्रावक सूरिजीका बडा उपासक था।

[ ७ ] धनजी शाह और उसकी पत्नी धनश्रीने मिल कर बहुत बडा उत्सव किया। महमूंदिकाकी (रुपये रुपयेकी) प्रभावना की। विजयदेवसूरिजी और विजयप्रभसूरिजी दोनों शाहपुरमें आए। शाहपुर अमदावादका एक विभाग है। अमदाबादमें चातुर्मास करके सूरिजीने विमलगिरिकी यात्राके लिए प्रस्थान किया। साथमें रायचंद्र वगैरह भक्तिमान् श्रावक भी चले थे। वहांसे सूरिजी ऊनाको गए और वहां अपने प्रगुरु श्रीहीरविजय-जीकी समाधिका दर्शन किया और यहां ही श्रीविजयदेवसूरिजीने भी समाधि ली। संवत् १७१३ आषाढ शुक्ल एकादशीके दिन प्रातःकालको श्रीविजयदेवसूरिजी स्वर्गधामको गए। अपने गुरुके विदेहवाससे श्रीविजयप्रभसूरिजीको बडा खेद हुआ। श्रावक रायचंद्रने वहां एक बडा विहार बनवाया और उसके ऊपरके ध्वजदंडमें धजा चढाई। ऊनाके पास दीवबंदरमें श्रीविजयप्रभसूरिजीने संघके आग्रहसे दो चातुर्मास बिताये। अब श्रीविजयप्रभसूरि देव-पाटण और जूनागढमें चातुर्मास करके पोरबंदरमें आए। फिर वहांसे अब्धिकूल (वेरावळ) को गए। वहांसे सूरिजी विमलगिरिकी यात्राके लिए प्रस्थित हुए। साथमें वेरावळ और पोरबंदरका श्रावक-समूह भी था। यहांसे सूरिजी घनौघ (आधुनिक घोघा ?) नामक ग्राममें आए और पर्युषणाका महापर्व वहां ही बिताया। वहांपर जसूनामकी एक भक्त श्राविकाने प्रतिष्ठोत्सव किया। यहांसे सूरिजी गूजरातकी ओर चले और अमदावाद पहुंचे। वहां, सूरिजीने बीबीपुर नामके अमदावादके उपपुरमें रहकर पर्युषणाके महापर्वकी आराधना की। यहांसे सूरिजी श्रीशंखेश्वर-पार्श्वनाथके दर्शनके लिए प्रस्थित हुये।

---

१ "पट्टे न्यस्तः स इह गुरुणा बन्दिरे गन्धपुर्याम्, खैकाद्रीला १७१० शरदि समहं राधसम्यग्दशम्याम्" ॥–मेघदूतसमस्यालेख, श्लो० १०६।

२ प्रस्तुत देवानंदाभ्युदयमहाकाव्यमें सात सर्गमें मुख्यरूपसे श्रीविजयदेवसूरिजीका और आनुषङ्गसे श्रीविजयप्रभसूरिजीका वृत्तांत आया है। काव्य, माघकी समस्यापूर्तिरूप है इससे इसमें समस्याके पूरणका ही मुख्य लक्ष्य रक्खा गया है। इसी कारणसे श्रीविजय-देवसूरिजीका वृत्तांत भी इसमें बहुत संक्षेप से आया है। सविस्तर जिज्ञासुओंको सूचना है कि–वे, विजयदेवसूरिजीका विशालवृत्तांत देखनेके लिए खरतरगच्छीयश्रीश्रीवल्लभपाठकविरचित श्रीविजयदेवमाहात्म्यको आद्यन्त पढें।

महोपाध्यायश्रीमन्मेघविजयविरचितं

[ माघमहाकाव्यसमस्यारूपं ]

# ॥ देवानन्दमहाकाव्यम् ॥

## प्रथमः सर्गः ।

श्रियः प्रियः पार्श्वजिनेश्वरः श्रियं तनोतु पूर्णैन्दवमण्डलाननः ।
ननाम वामां समवेक्ष्य यं श्रितं हिरण्यगर्भाङ्ग[१]भुवं मुनिं[२] हरिः[1] ॥ १ ॥
जयत्ययं श्रीविजयादिदेववाक्-प्रभुर्दधत् तीव्रमहातपोमहः ।
श्रिया परब्रह्मसमं स्मरेन्धने प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः[2] ॥ २ ॥
किमैन्द्रवज्रं रविमण्डलं त्विषा किमेतदित्याकुलमीक्षितं जनैः[3] ॥

[ षट्पदी ]

सरस्वतीं पीनपयो[३]धरां स्तुमः क्रम[४]द्वयाम्भोजलसत्सित[५]च्छदाम् ।
[६]यदाश्रये स्यान्नृपतेः कविर्वचः-क्रमादमुन्ना[७]रद [८]इत्यबोधिसः[4] ॥ ३-४ ॥

### ग्रन्थकारकृतानि टिप्पणानि

१ 'हिरण्यगर्भाङ्गभुवम्' हिरण्यं सुवर्णम् तद्वन्निर्मला गर्भावयवभूः—ताम् । "तित्थयरमायरो पच्छन्नगब्भाओ जर-रुहिर-कल्लाणि य न हवंति" इति आवश्यकचूर्णौ निर्युक्तौ ।

२ 'मुनिम्' ज्ञानयुतम् "समणे भगवं महावीरे" इत्यादिपाठात् ।

३ 'पीनपयोधराम्' जिनवाक्पक्षे पीनः पुष्टः पयोधरो मेघः ग्रन्थकृत् यया ।

४ 'क्रमद्वयाम्भोजलसत्सितच्छदाम्' क्रमद्वयम्—परंपरया सूत्रा-ऽर्थग्रहणरूपम् ।

५ सितच्छदाः श्वेताम्बराः ।

नदीपक्षे पीनं पयो-जलम्-धरति इति । क्रमद्वयेन पद्मे क्रीडन्मरालाम् ।

६ 'यदाश्रये' यस्याः सरस्वत्याः आश्रयः यदाश्रयः ।

७ '-क्रमादमुन्नारद' अमुद् अहर्षः तस्य नारः विक्षेपः ध्वंसः हर्षः तं दत्ते इति ।

८ 'इत्यबोधिसः' इत्या प्राप्तव्या बोधिसा ज्ञानलक्ष्मीर्यस्य सः । इण् गतौ धातोः क्यप् ।

### संपादककृतानि टिप्पणानि

1 हिरण्यवत् समुज्ज्वला गर्भाङ्गभूः गर्भाशयस्थानं यस्याः ताम्—'ईदृशीं वामां मातरं श्रितम्—आश्रितं यं पार्श्वजिनं मुनिं समवेक्ष्य हरिः—इन्द्रः ननाम—इति ।

'हिरण्यगर्भाङ्गभुवम्' इत्यादि माघे प्रथमे सर्गे प्रथमश्लोके चतुर्थः पादः ।

2 'महः' इति कर्मकारकम् ।

'प्रसिद्धमूर्ध्वज्वलनम्' इत्यादि मा० प्र० स० श्लो० २ द्वितीयः पादः ।

3 'किमेतदित्या-' इत्यादि मा० प्र० स० श्लो० २ चतुर्थः पादः ।

4 अत्र 'पयोधर' शब्दोल्लेखेन ग्रन्थकृत् स्वाभिधां सूचितवान् पयोधरो मेघः, ग्रन्थकारश्च मेघविजयः ।

'षट्पदी' नाम छन्दः । माघकाव्यटीकाकृत् पण्डितमल्लिनाथकोलचलः कथितवान् यत्—"दिवाकरस्तु वृत्तरत्नाकरटीकायां प्रथमपठितेन ।

"द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः"

इति चरणद्वयेन सह इममेव श्लोकं षट्पदच्छन्दस उदाहरणमाह" । इति समस्याकृताऽपि 'षट्पदी' इति सूचितम् ।

यस्याः सरस्वत्याः आश्रये वचःक्रमात् कविः, नृपतेः अमुन्नारदः—हर्षदः स्यात् पुनश्च इत्यबोधिसः—यस्य बोधिसा ज्ञानलक्ष्मीः इत्या प्राप्तुं योग्या अस्ति ईदृशः कविः । [ अमुद्+नार+द–अमुन्नारद ] [ इत्य+बोधि+सा–इत्यबोधिस ]

माघे तु 'क्रमादमुं नारद इति-अबोधि सः' [ प्र० स० श्लो० ३ चतुर्थः पादः ] इति पदविभागः ।

सदक्षजातिप्रणयं कलाधरं धरन्तमुच्चैर्भुवनोपकारकम् ।
यशोऽर्जुनं सज्जनमाश्रये श्रिये स्फुटोपमं भूतिसितेन शम्भुना[1] ॥ ५ ॥
असज्जनं प्राप्य गुणाधिकाऽपि गौर्भवेदसोमालतयाऽतिदुर्गमा ।
सुसीमतां नैति रसेऽपि बिभ्रतं धरा धरेन्द्रं व्रततीततीरिव[2] ॥ ६ ॥
प्रभोः प्रणेतुं गुणगौरवं स्तवं गुरुं कविं वा न वितर्कये क्षमम् ।
सदा-सुरासक्तमतिं स्वकान्तिभिर्विडम्बयन्तं शितिवाससस्तनुम्[3] ॥ ७ ॥
तथापि गौरं चरितैर्गुरुं स्तुवन् स-मौक्तिकश्रीफललिप्सुरस्म्यहम्[4] ।
तपोमहोभिः सहितं समुन्नतं घनं घनान्ते तडितां गुणैरिव ॥ ८ ॥
कृपाश्रयात् स्वीयगुरोः प्रसादतः स्वसाध्यसिद्धिं श्रयिताऽस्मि निःश्रमम् ।
समीरणाद् रेणुरुपैति सञ्जितं कुथेन नागेन्द्रमिवैन्द्रवाहनम्[5] ॥ ९ ॥
अथात्र जम्बूपपदेऽस्ति भारतं प्रभारतं द्वीपकुलप्रदीपके ।
महोदयं ध्यायदिवाऽस्य गङ्गया विभातमच्छस्फुटिकाक्षमालया[6] ॥ १० ॥

---

१ 'सदक्षजातिप्रणयम्' दक्षजातिः पण्डितः, पक्षे पार्वत्याम् अतिप्रणयः स्नेहः ।

२ 'गौः' गीर्वाणी भूर्वा ।

३ 'असोमालतया' असोमालतया जातौ एकवचनम् । असोमालता कठिनता तया ।

४ 'सुसीमताम्' शैत्यम् ग्रामसीमतां वा ।

५ 'रसेऽपि' रसे जले शृङ्गारादौ वा ।

६ 'गुरुम्' गुरोः देवसेव्यत्वेन उपमा ।

७ 'कविम्' शुक्रस्य गौरत्वेन ।

८ 'सदा-सुरासक्तमतिम्' देवाः सुराः, पक्षे असुराः, बलभद्रपक्षे सुरा मद्यम् ।

९ 'स मौक्तिकश्रीफललिप्सुरस्म्यहम्' स अहम्-जाड्यपात्रम् । मुक्तिसंबन्धिश्रिया युक्तफले । यद्वा समग्र-औक्तिकस्य वाचिस्यक फले लिप्सुः । "तृन्नुदन्त-" [ २।२।९०। हैम० ] इत्यादिना षष्ठीनिषेधात् ।

१० 'कृपाश्रयात्' कृपा इति स्वीयगुरोः श्रीकृपाविजय इति नामसूचा ।

११ 'स्वसाध्यसिद्धिम्' सिद्धिमिति च श्रीसिद्धिविजयं श्रयिताऽस्मि ।

१२ 'कुथेन' "कुथः स्यात् करिकम्बलः"-इत्यनेकार्थ० श्लो० १४ । [ "कुथः कुशः, कुथः कीटः, प्रातःस्नानी द्विजः कुथः" इति अनेकार्थमञ्जरी श्लो० १४-श्लोकाधि० । ]

---

1 'स्फुटोपमम्' इत्यादि मा० प्र० स० श्लो० ४ चतुर्थः पादः

2 यथा व्रततीततीः बिभ्रतं धरेन्द्रं प्राप्य गुणाधिकाऽपि धरा अतिदुर्गमा रसरहिता भवति तथा गुणाधिकाऽपि वाणी असज्जनं प्राप्य असोमालतया अतिदुर्गमा भवति पुनश्च रसेऽपि सुसीमतां न एति ।

माघे तु 'धराधरेन्द्रम्' इति एकं पदम्—प्र० स० श्लो० ५ चतुर्थः पादः ।

3 बलभद्रो हि सुरायां सदा आसक्तः इति प्रसिद्धम् अतः सदासुरासक्तमतिं बलदेवम् इति भावः ।

विडम्बयन्तमित्यादि—मा० प्र० स० श्लो० ६ चतुर्थपादः ।

4 'समौक्तिक-' इति पदस्य १ 'सम+औक्तिक-' अथवा २ 'स+मौक्तिक-' अथवा ३ 'सः+मौक्तिक-' इति त्रिधा पदविभागः । १ समानि समग्राणि औक्तिकानि, २ मौक्तिकेन सहितम्, ३ सः—अहम्—ग्रन्थकारः मौक्तिकयुक्तश्रीफललिप्सुः इति च अनुक्रमेण अर्थो बोध्यः ।

'घनं घनान्ते तडितां गणैरिव' इति मा० प्र० स० श्लो० ७ चतुर्थपादः । अत्र तु 'गणैः' स्थाने लिपिकारप्रमादात् 'गुणैः' पाठः प्रतिभाति ।

5 'कृपा' शब्देन ग्रन्थकारः स्वं गुरुं कृपाविजयं स्मरति ।

'कुथेन' इत्यादि मा० प्र० स० श्लो० ८ चतुर्थपादः । माघे अत्र पादे 'इन्दवाहन' शब्दः प्रयुक्तः । अत्र तु 'ऐन्द्रवाहन' शब्द इति भेदः ।

6 'विभान्तमच्छस्फटिकाक्षमालया' इति मा० प्र० स० श्लो० ९ चतुर्थपादः । अत्र तु 'विभान्त-' स्थाने 'विभात-' इति तथा 'स्फटिक-' स्थाने 'स्फुटिक-' इति च दृश्यते । चित्रकाव्ये अनुस्वार-विसर्गयोः सतोरपि अनुच्चारणं न दोषावहम् इति कविसमयात् 'विभान्त-' पदं सानुस्वारं सदपि अत्र समस्यायां ग्रन्थकारेण तत् निरनुस्वारं विवक्षितम् । 'स्फुटिक' शब्दोऽपि स्फटिकपर्यायो भवेत् अथवा प्रमादात् 'स्फटिक' स्थाने 'स्फुटिक' इति जातम् ।

स[१] गूर्जरत्रा इति नीवृतां वरश्चकास्ति तस्मिंस्त्रिदिवं सचित्रयन् ।
सदोडुनेत्रैरदसीयभासनामवेक्षमाणं महतीं मुहुर्मुहुः[1] ॥ ११ ॥
[२]अनन्तपट्टे खटिकाक्षरैर्ग्रहच्छलादमुष्येव विलिख्य संस्थितिम् ।
संस्कर्तुमभ्यस्यति विश्वकृत् सदा पदं महैन्द्रालयचारुचक्रिणः[2] ॥ १२ ॥
सरस्यतिस्मेरपयोजकाननान्निशास्थितोऽलिप्रकरः समुत्पतन् ।
इहाऽऽबभौ किं रविनारदागतेर्जवेन पीठादुदतिष्ठदच्युतः[3] ॥ १३ ॥
यदीश्वरस्यारिनिसूदनात्मसु श्रुतेषु गीतेषु बुधैरधःकृतौ ।
सुरैः समं वा दनुजैर्विसर्जितौ सुतेन[३] धातुश्चरणौ भुवस्तले[4] ॥ १४ ॥
समुद्रमारान्मणिढौकनाकृतेऽभ्युपेतमेषोऽर्चयति द्रुमैः सुमैः ।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नाऽपुण्यवतां मनीषिणः[5] ॥ १५ ॥
वदन्ति केदारगणाः खरेखणै[४]रितीव सद्रेखितविश्ववास्तवं ।
दिवः समादाय मदाद[५]मुं[६] पुमांश्चिरंतनस्तावदभिन्यवीविशत्[6] ॥ १६ ॥
विशामसौ श्रीतनयाभिनन्दनः[७] समुन्नतज्योतिरपास्ततापनः ।
महौषधिप्रत्तरुचिः समुद्गतेरचूचुरचन्द्रमसोऽभिरामताम्[7] ॥ १७ ॥
स्त्रीराज्यभूमौ युवतीजना इवोद्गृहीतपत्रासय[८] इक्षुयष्टयः ।
प्रीणन्ति सौवाङ्गनिपीडनै रसैर्महानुभावा हि नितान्तमर्थिनः[8] ॥ १८ ॥
इहास्ति शङ्खेश्वरतीर्थमद्भुतं सनायकं पार्श्वजिनाभिभूभुजा ।
भुजंगमानां यमुपप्लवे भजन् नतेन मूर्ध्ना हरिरग्रहीदपः[9] ॥ १९ ॥
श्रियं स शङ्खेश्वरपार्श्वतीर्थकृद् दधेऽर्थितार्थप्रथनाद् मरुत्तरोः ।
अचूचुरचैत्यमचर्च्यचारुतां सुमेरुश्रृङ्गस्य तदा तदासनम्[10] ॥ २० ॥

---

१ 'स' स इति प्रसिद्धः ।

२ 'अनन्तपट्टे' अनन्तम् नभः ।

३ 'सुतेन धातुश्चरणौ' धातुः सुतेन ब्रह्मदत्तेन नारदेन वा—देवैः सह कृतः नारदेन हेतुभूतेन सुरैः असुरैः समं कृतः तथा असुरैः सुरैः समं कृतः तौ द्वावपि ।

४ 'खरेखणैः' हलोल्लेखनैः ।

५ 'मदादमुं' मदाद् अहंकारात् ।

६ अमुं देशं विधिर्मदात् दिवः अभिनिवेशितवान् ।

७ 'श्रीतनयाभिनन्दनः' कन्दर्पः, पक्षे श्रीः लक्ष्मीः, तनयाः पुत्राः तैर्वर्धनः ।

८ 'उद्गृहीतपत्रासयः' उद्गृहीताः पत्राणि एव असयः खड्गाः यैस्ते ।

---

1 सचित्रयन्–त्रिदिवं सचित्रं साश्चर्यं कुर्वन् इति भावः—सह चित्रेण सचित्रः–सचित्रं करोति सचित्रयति, अस्य वर्तमानकृदन्ते प्रथमैकवचने सचित्रयन् ।

'अवेक्षमाणम्' इत्यादि मा० प्र० स० श्लो० १० चतुर्थपादः ।

2 'खटिका' गूजरातीभाषायां 'खडी' इति प्रसिद्धा या बालैर्लेखशालायां स्वलिपिपरिकर्मणि उपयुज्यते ।

'पदं महेन्द्रालयचारु चक्रिणः' इति मा० प्र० स० श्लो० ११ चतुर्थपादः । अत्र तु 'महेन्द्र' स्थाने 'महैन्द्र' इति तथा 'महैन्द्रालयचारुचक्रिणः' इति एकं पदम् इति विभेदः ।

3 'जवेन' इत्यादि मा० प्र० स० श्लो० १२ चतुर्थपादः ।

रविनारदागतेः रविवत् तेजस्वी पूज्यो वा यो नारदः तस्य आगतेः–आगमनात् इति भावः ।

4 'सुतेन' इत्यादि मा० प्र० स० श्लो० १३ चतुर्थपादः ।

5 अत्र श्लोके पादद्वयं समस्यारूपेण गृहीतं कविना । तच्च मा० प्र० स० श्लो० १४ तृतीय–चतुर्थपादौ । माघे 'नापुण्यकृताम्' इति पाठभेदः ।

6 मा० प्र० स० श्लो० १५ चतुर्थपादः ।

7 मा० प्र० स० श्लो० १६ चतुर्थपादः ।

8 मा० प्र० स० श्लो० १७ चतुर्थपादः ।

9 मा० प्र० स० श्लो० १८ चतुर्थपादः ।

10 मा० प्र० स० श्लो० १९ चतुर्थपादः ।

जिनप्रभुः संकटकोटिकिंद्द(?)कृत् पुरःस्थदीपैः प्रतिबिम्बितैस्तनौ ।
विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाऽम्भसां निधिः[1] ॥ २१ ॥
करम्बिताः पादनखांशुराशिभिर्बभुः प्रभोर्गौरवपुःप्रभाभराः ।
प्रदीपदीप्रद्युतिपुञ्जसंयुजस्तुषारमूर्तेरिव नक्तमंशवः[2] ॥ २२ ॥
प्रसादयन् मर्त्यगणः सविस्मयस्तथाऽपरोऽमर्त्यगणोऽनिमेषदृक् ।
प्रभोः पुरोऽन्योऽन्यनिषक्तरोचिषौ तदेकवर्णाविव तौ बभूवतुः[3] ॥ २३ ॥
अयं हि कैवल्यधरः स्वसेविनां ददाति कैवल्यपदं न तन्महत् ।
तदद्भुतं यद्ददते नृणां सृजँस्तपोधनाभ्यागमसम्भवा मुदः[4] ॥ २४ ॥
दशावतारः कमलोपमाननः फणीश्वरोत्सङ्गविनिर्मितासनः ।
जिनः प्रभावान्नरकान्तकारकः स पुण्डरीकाक्ष इति स्फुटोऽभवत्[5] ॥ २५ ॥
जगत्पवित्रे विषयेऽत्र सन्त्यतः पराणि तीर्थान्यथ किं पुनर्विधिः ।
[१]अमुं चकारेति धियेव मा हरः शुचिस्मितां वाचमं[२]-वोचदच्युतः[6] ॥ २६ ॥
मदादनम्राननमार्जुने[३]ऽर्जुनी[४] पयः किरन्ती चरति प्रतिस्थलम् ।
पिबन् यथा[५]र्थाभिध एष तन्महैर्व्यनक्ति कालत्रितयेऽपि योग्यताम्[7] ॥ २७ ॥
अथास्त्यमुष्मिन् नगरं गुरोर्गिरेरिलादिदुर्गाख्यमुपत्यकाश्रितम् ।
त्रिविष्टपस्यापि च यन्मणीगृहैरदस्त्वया[६] नुन्नमनुत्तमं तमः[8] ॥ २८ ॥
कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना ।
पुरप्रदेशः स ऋचामिव ध्वनिर्निधिः श्रुतीनां धनसम्पदामिव[9] ॥ २९ ॥
हरिप्रियां या नगरी गरीयसीं सदा समव्याप्यतयेव[७] शिश्रिये ।
कथञ्चिदैकात्म्यवशात् तया पुनर्गिरोऽथवा श्रेयसि केन तृप्यते[10] ॥ ३० ॥
पुरन्दरस्यापि पुरं प्रणूयते पुराणविद्भिर्निजवृत्तिसिद्धये ।

१ 'अमुं चकारेति धियेव मा हरः' विधिः अमुं देशम्— इति धिया इव चकार । 'इति' इति किम् ? अच्युतः कृष्णः, हरो रुद्रः, मा शुचिस्मितां हास्यवाणीम्, अवोचत् अवादीत् ।

२ 'माङ्' योगे अडभावेऽपि 'अ' इति अव्ययं विस्मये । यद्वा 'मा' इति अव्ययं भिन्नम् ।

३ '–नम्राननमार्जुने' आर्जुनं तृणगणः ।

४ 'अर्जुनी' गौः ।

५ 'यथार्थाभिध एष' गूर्जराणां गोप्रधानत्वेन तत्राणात् यथार्थनामा ।

६ '–रदस्त्वया' अया लक्ष्म्या ।

७ 'समव्याप्यतयेव' या नगरी लक्ष्मीं शिश्रिये, पुनः गिरः २–३ शिश्रिये । तया लक्ष्म्या वाणीनामैक्यात् सर्वपदार्थानामभिधेयत्वात् । यत्र यत्र निषिद्धत्वं तत्र तत्र अधर्मत्वम्, यत्र यत्र अधर्मत्वं तत्र तत्र निषिद्धत्वम् इति समव्याप्तिः । तथा यत्र लक्ष्मीः स्वर्णादिर्भावः तत्र तन्नामशब्दः, यत्र यत्र शब्दः तत्र तत्र तद्वाच्योऽर्थः इति समव्याप्तिः । वागर्थयोः सदा संपृक्तत्वात् ।

1 मा० प्र० स० श्लो० २० तृतीय–चतुर्थपादौ अत्रापि तावेव तृतीय–चतुर्थपादौ ।

2 मा० प्र० स० श्लो० २१ चतुर्थपादः ।

3 मा० प्र० स० श्लो० २२ चतुर्थपादः ।

4 मा० प्र० स० श्लो० २३ चतुर्थपादः ।

5 मा० प्र० स० श्लो० २४ चतुर्थपादः ।

6 मा० प्र० स० श्लो० २५ चतुर्थपादः ।

7 मा० प्र० स० श्लो० २६ चतुर्थपादः ।

8 मा० प्र० स० श्लो० २७ चतुर्थपादः ।

9 मा० प्र० स० श्लो० २८ माघस्य पूर्वार्धम् अत्रापि पूर्वार्धम् । माघस्य चतुर्थपादः अत्रापि स एव ।

10 मा० प्र० स० श्लो० २९ चतुर्थपादः ।

न चास्त्यमुष्या नगरीति मेऽकरोत् [१]गुरुस्तवैवागम एष धृष्टताम्[1] ॥ ३१ ॥

सुवर्णसालोज्ज्वलयोगपट्टभृत् कृताभिषेकं निशि चान्द्रवारिभिः ।
स्वबिम्बिताकाक्ष[२]गुणं दधत् पुरं किमस्ति कार्यं गुरुयोगिनामपि[2] ॥ ३२ ॥

उदीर्णरागप्रतिरोधकं जनैर्विहारवृन्दं विहितं सुदर्शनैः ।
उपेयुषो मोक्षपथं मनस्विनः स्वमुच्चकैर्दर्शयतीव केतुभिः[3] ॥ ३३ ॥

न[३]भोगभावात् त्रिदिवं मुनीश्वरैर्गृहीतमध्यात्मदृशा कथञ्चन ।
अतोऽधिकं यत्र ज[४]भन्तमुज्जगुः पुरातनं त्वां[५] पुरुषं पुराविदः[4] ॥ ३४ ॥

यदाश्रयश्रेणिशिखासुखाश्रयात् सदा वसन्ति द्युसदामिहाश्रयाः ।
दधात्यतोऽधः कथमप्यतिश्रमैरहीश्वरः स्तम्भशिरस्सु भूतलम्[5] ॥ ३५ ॥

शि[६]वैकसौहार्दधरैर्धनाधिपैर्भृतापि या पुण्य[७]जनैरलङ्कृता ।
प्र[८]भाविशेषादरणैर्वृषा[९]श्रयैर्भवान्[१०] भवोच्छेदकरैः करोत्यधः[6] ॥ ३६ ॥

वसद्भिरस्यां मनुजैर्विसर्जितः स्रगादिनिर्माल्यभरोऽपि यत्र सा ।
सुगन्धदानात् पवनैर्विदेशगैर्गुरुर्धरित्री क्रियतेतरां त्वया[११][7] ॥ ३७ ॥

पुरं पुरन्ध्रीचललोचनाञ्चलैः स्मरं यदुज्जीवयते हरार्दितम् ।
फणाभृतां पूस्त्वमिहेदृशं मुदः पदं दृशः स्याः[१२] कथमीशमादृशाम्[१३][8] ॥ ३८ ॥

यदम्बुजाक्षीर्निशि चन्द्रशालिकाविलासिनीर्भोक्तुमिव स्मरातुराः ।
सुराः श्रयन्तेऽन्वहमृक्षलक्षतः क्षपातमस्काण्डमलीमसं नभः[9] ॥ ३९ ॥

स[१४]रोभिरुन्निद्रपयोरुहाननैर्व्यधायि याऽऽमोदधरैर्धरश्रियः ।

---

१ 'गुरुस्तवैवागम एष धृष्टताम्' अमुष्याः पुर्याः गुरुस्तवा अधिकवर्णनयोग्या नगरी नास्ति इति आगमः सिद्धान्तः धृष्टताम् अकरोत् ।

२ 'स्वबिम्बिताकाक्षगुणम्' स्वस्मिन् संक्रान्तसूर्यानुबिम्बरूपाक्षमालां दधत् ।

३ 'नभोगभावात् त्रिदिवं मुनी–' भोगविचारे त्रिदिवम् अतः पुराद् नाधिकम् यतः तत्र नभोगभावः स्पष्टः—नभोगा देवाः तेषां भावः अस्तित्वम् ।

४ तदेव आह–'यत्र जभन्तमुज्जगुः' यत्र पुराणपुरुषं कृष्णम् आं लक्ष्मीम् भजन्तम्—जभन्तम्—पुराविदः उज्जगुः । एतेन भोगचातुर्यं तत्र नास्ति इति भावः ।

५ 'त्वाम्' तु+आं लक्ष्मीम् ।

६ 'शिवैकसौहार्दधरै–' शिवं मोक्षः सदाशिवो वा ।

७ 'पुण्यजनै–' पुण्यजनाः धार्मिकाः यक्षा वा ।

८ 'प्रभाविशेषा–' प्रभावी यः शेषो नागराजः तस्य आदरैः ।

९ 'वृषाश्रयै–' वृषः धर्मः वृषभश्च ।

१० 'भवान्' भवान् एकादशरुद्रान् जयति ।

११ 'त्वया–' तु+अया—अया विरुद्धा भूमिः, सुगन्धलक्ष्म्या वा ।

१२ 'स्याः' हे भोगावति ! त्वम् ईदृशं नेत्रमुदः स्थानं कथं स्याः । 'स्याः' इति क्रियापदम् ।

१३ 'कथमीशमादृशाम्' ईशस्य रुद्रस्य माया लक्ष्म्या दृक् दर्शनं येभ्यस्ते–तेषां फणाभृताम्—ईशालंकारकारिणाम् ।

१४ 'सरोभि–' सरोभिः या पर्वतलक्ष्म्याः तिरस्क्रिया व्यधायि, तया पर्वतश्रिया सा तिरस्क्रिया प्रत्युत व्यधायि । किंभूतया तया ? द्विपद्विषः उपास्यया सेव्यया ।

---

1 मा० प्र० स० श्लो० ३० चतुर्थपादः ।

2 मा० प्र० स० श्लो० ३१ चतुर्थपादः ।

3 मा० प्र० स० श्लो० ३२ माघस्य प्रथम–तृतीयपादौ अत्रापि प्रथम–तृतीयपादौ ।

4 मा० प्र० स० श्लो० ३३ माघस्य द्वितीय–तूर्यचरणौ अत्रापि तावेव ।

5 मा० प्र० स० श्लो० ३४ चतुर्थपादः ।

6 मा० प्र० स० श्लो० ३५ चतुर्थपादः ।

7 मा० प्र० स० श्लो० ३६ चतुर्थपादः ।

8 मा० प्र० स० श्लो० ३७ चतुर्थपादः । माघे तु 'मीश ! मादृशाम्' इति पदविभागः, अत्र तु 'मीशमादृशाम्' इति समस्तं ज्ञेयम् ।

9 मा० प्र० स० श्लो० ३८ चतुर्थपादः ।

तया द्रुमाणां कुसुमैरुपास्यया द्विपद्विषः प्रत्युत सा तिरस्क्रिया[1] ॥ ४० ॥
चतुष्पथे पण्यमगण्यमुचितं श्रितैः प्रभाकृत्[१]कृतसत्यकर्मभिः ।
उपेत्य देवैः क्रियते क्रयिव्रजैर्मिथस्त्वदा[२]भाषणलोलुपं मनः[2] ॥ ४१ ॥
पुरीं पुरन्ध्रीजनरूपसम्पदा सदा जयन्तीं जयवाहिनीजनम् ।
स्थितस्य दूरे दिशति स्वनिन्दनामहिद्विषस्तद्भवता[३] निशाम्य ताम्[४][3] ॥ ४२ ॥
अथ स्फुरद्विक्रमभूमभूरभूत् सुराष्ट्रकूटान्वयभूर्भुवः प्रभुः ।
रवीन्दुदम्भान्नभसे यदर्पितं हिरण्यपूर्वं कसिपुं[५] प्रचक्षते[4] ॥ ४३ ॥
स भानुभानुर्भुवि भानुसंज्ञया बभौ बृहद्भानुविभानुभावभृत् ।
प्रतापरूपं[६] श्रयताऽऽयतार्थभी[७]र्मनस्सु येन द्युसदां न्यधीयत[5] ॥ ४४ ॥
तदङ्गजः पुञ्ज[८] इति श्रियाऽऽख्यया जयंश्च मुञ्जं नृपवर्ग आदिमः ।
यदाश्रयादाह हरिश्चलेत्यमुं प्रवाद[९]मुच्चैरयशस्करं श्रियः[6] ॥ ४५ ॥
रणेऽतिरीणै[१०]र्बहुदृष्टपिङ्गलै[११]स्सदाऽसुरी[१२]भासनयाऽऽस्यसन्निधौ ।
स्वजीवनार्थं जवसानि[१३] यावनैर्गणैस्तमाशङ्क्य तदादि चक्रिरे[7] ॥ ४६ ॥
समञ्जसेनैष[१४] जनार्दनं जयन् यया प्रजारञ्जनमार्जयज्जयी ।
व्यधायि तस्यै शिरसा रसान्मिलत्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे[१५] नमः[8] ॥ ४७ ॥
चमूप्रचारैरचलाप्रकम्पिना द्विषां गणो येन रणाङ्गणे क्षणात् ।
प्रकोपकम्पादरुणैरिवारुणैरुरोविदारं प्रतिचस्करे नखैः[9] ॥ ४८ ॥
तदात्मजन्माङ्गजमञ्जिमा जने द्विधापि नारायणशब्दविश्रुतः ।
पुरं वलक्षं विदधद् यशोधनैर्बभूव रक्षः[१६]क्षतरक्षणं दिवः[10] ॥ ४९ ॥

---

१ 'प्रभाकृत्' सूर्यरूपः रूप्यकः सत्यंकारपदे दिवि न्यस्तः ।
२ '–थस्त्वदाभाषण–' त्वत् समुच्चयवाची ।
३ '–द्विषस्तद्भवता' स एव भवः तद्भवः तस्य भावः तद्भवता ।
४ 'ताम्' तां पुरीं निशाम्य अहिद्विषः इन्द्रस्य मद्भवता निन्दां दिशति दत्ते–पुर्या अहं दूरे स्थितः तेन मद्भवो न प्रशस्य इति भावः ।
५ 'कसिपुं' "कसिपुर्भोजना–ऽऽच्छादौ" इति हैमः । [ "कसिपुर्भोज्य–वस्त्रयोः" है० अने० सं० कां० ३ श्लो० ४३३ ]
६ 'प्रतापरूपं' 'प्रताप–कीर्ती' इति वा पाठः ।
७ 'श्रयतायतार्थभी–' आयता दीर्घा अर्थभीः देवानां चित्तैर्निहिता ।
८ 'पुञ्ज' पक्षे नृषु पवर्गेषु ज आद्यः । मुञ्जस्तु अन्त्यः ।
९ 'प्रवाद–' प्रवादकथनेन हरेः असामर्थ्यं व्यञ्जितम्–यद् अयं हरिः तस्माद् राज्ञः श्रियं प्रत्याहर्तुमक्षमः तदा अपवादं चकार ।
१० '–रीणै–' रीणैः भग्नैः ।
११ '–दृष्टपिङ्गलै–' दृष्टं स्वपरचक्रजं भयम् तेन पिङ्गला व्याकुलाः तैः–भृशमाकुलैः ।
१२ 'सहासुरी' इति वा पाठः ।
१३ 'जवसानि' तृणानि ।
१४ 'समञ्जसेनैष' "न्याय–सुदेशरूपं समञ्जसम्" इति हैमः ।
१५ '–दिशे नमः' दिक्शब्देन लक्षणया रीतिः नीतिमार्गो वा ।
१६ 'रक्षःक्षतरक्षणं दिवः' रक्षोभिः क्षता भग्ना रक्षणं रक्षा यस्य तत् दिवः पुरम्––उज्ज्वलयन् । रक्षसां क्षतानि प्रहाराः तेभ्यो रक्षणं यत्र तत् । रक्षोभिः कृतं भग्नम् लक्षणं दर्शनं यस्य तत् ।

---

1 मा० प्र० स० श्लो० ३९ चतुर्थपादः ।
2 मा० प्र० स० श्लो० ४० चतुर्थपादः ।
3 मा० प्र० स० श्लो० ४१ चतुर्थपादः ।
4 मा० प्र० स० श्लो० ४२ चतुर्थपादः । माघे तु कशिपुनामा राक्षसः, अत्र तु तत्स्थाने 'कसिपु' पदं भिन्नार्थकम् । शकार–सकारयोरैक्यमत्र ज्ञेयम् ।
5 मा० प्र० स० श्लो० ४३ चतुर्थपादः ।
6 मा० प्र० स० श्लो० ४४ चतुर्थपादः ।
7 मा० प्र० स० श्लो० ४५ चतुर्थपादः । माघे तु 'गणैर्यमाशङ्क्य' इति पाठभेदः ।
8 मा० प्र० स० श्लो० ४६ चतुर्थपादः ।
9 मा० प्र० स० श्लो० ४७ चतुर्थपादः ।
10 मा० प्र० स० श्लो० ४८ चतुर्थपादः । माघे तु 'रक्षःक्षतरक्षणं दिवः' इति पदच्छेदभेदः ।

स शास्ति शास्ता जगतीं हरेः श्रियं हरन् विहारैर्बलिराजबन्धनात् ।
भक्तेर्भरात् कारयते बलेन यः प्रसादमिच्छ(च्छा)सदृशं पिनाकिनः[1] ॥ ५० ॥
जवान्निगृह्णन्नरिमण्डलं बलादुपाददे मण्डलमग्रणीः सताम् ।
ददौ पुनस्तस्य सुराङ्गनाजनस्वयंग्रहाश्लेषसुखेन निष्क्रयम्[2] ॥ ५१ ॥
नभोनिविष्टानुडुरूपिणः सुरान् भयात् प्रगेऽ[१]नाशयदाद्यनिःस्वनैः ।
प्रतापमा[२]धाय रविच्छलाद् व्यधाद् य इत्थमस्वास्थ्यमहर्निशं दिवः[3] ॥ ५२ ॥
वदान्यभावादधरीकृतामरद्रुमस्य राज्ञः पटहध्वनेस्त्रसन् ।
स्वपादयोः कन्दरमन्दिरोदरे बलस्य[३] शत्रुः प्रशशंस शीघ्रताम्[4] ॥ ५३ ॥
निविह्नुवानोऽस्य भियाऽभ्रकुम्भिनं विधुच्छलादुच्छिर[४]सं नभोऽम्बुधौ ।
दिवं विहायैकदिगंशमाश्रयन्निनाय बिभ्यद् दिवसानि कौशिकः[5] ॥ ५४ ॥
जगन्नयैः सन्नयनं नयन्नयं दरिद्रताद्रावकदानमुद्रया ।
ररञ्ज लोकानपि हातु[५]माहितं न चक्रमस्याऽऽक्रमताधिकं धरम्[6] ॥ ५५ ॥
उवास तत्र व्यवहारिणां वरः स्थिराभिधो मा[६]धवदेहसम्भवः ।
वपुस्त्विषा श्रीहरणान्मनोभुवः प्रकम्पयामास न मानसं न सः[7] ॥ ५६ ॥
गिरः श्रियः क्षान्तिवदान्यतादयो गुणाश्च मुक्त्वा त्रिजगत् समं समे ।
तदीयमस्थानतयेव दुष्कलेर्ज[७]वेन कण्ठं सभयाः प्रपेदिरे[8] ॥ ५७ ॥
पदे पदेऽर्हन्निलयैः स्वकारितैर्यशःसगर्भैरथ सङ्घयात्रया ।
त[८]था स गां चक्रिरहीशितुर्यथोदुवाह दुःखेन भृशानतं शिरः[9] ॥ ५८ ॥
पतिव्रता प्राप्तवपुःस्वरूपतः शचीव रूपा इति रूपरू[९]पिणी ।

---

१ '–नाशयदाद्य–' इत्यस्य स्थाने 'नाशय वाद्य' इत्यपि पाठः । वाद्यनिःस्वनैः–प्राभातिकवाद्यशब्दैः ।

२ 'प्रतापमाधाय' यः राजा इत्थं रविच्छलात् प्रतापम् आधाय इत्थमिति हे प्रताप! त्वं सुरान् नाशय इत्यर्थे 'वाद्यनिःस्वनैः' इति पाठः ।

अन्यस्यापि भूपस्य प्रतापाद् वैरिणां ग्रामेषु रात्रौ निवासः, प्रातः प्रणाशः स्याद् इति भावः ।

३ 'बलस्य शत्रुः' शत्रुः पादयोर्बलस्य शीघ्रतां प्रशशंस ।

४ '–लादुच्छिरसं' उच्छिरसम् उन्मस्तकम् ।

५ 'हातुमाहितं न चक्र–' पर्वतं त्यक्तुम्–आहितं चक्रं न आक्रमत–न चचाल ।

अस्य राज्ञः आहितं चक्रम् । अहितानामिदम् आहितं चक्रम्–रिपुगणः अधिकं महान्तम्, पर्वतं धरम्, हातुम्–त्यक्तुम्, न आक्रमत–न उद्यमं चकार ।

६ 'माधवदेहसंभवः'–माधवपुत्रतया कान्त्या च स्मरं जिगाय ।

७ 'जवेन कण्ठं सभयाः' कण्ठम्–उपकण्ठम्, "सत्यभामा भामा" इति न्यायात् । "कण्ठो ध्वनौ सन्निधाने ग्रीवायां मदनद्रुमे" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० १०१ ] । कण्ठम्–समीपम् ।

८ 'तथा स गां चक्रि–' गाम्–भुवम् ।

९ 'रूपरूपिणी'–प्रशस्तरूपवती ।

---

1 मा० प्र० स० श्लो० ४९ चतुर्थपादः । अत्र तु 'मिच्छ-सदृशम्' इति लेखकप्रमादः ।

2 मा० प्र० स० श्लो० ५० चतुर्थपादः ।

3 मा० प्र० स० श्लो० ५१ चतुर्थपादः । माघे 'महर्दिवं दिवः' इति पाठः ।

4 मा० प्र० स० श्लो० ५२ चतुर्थपादः ।

5 मा० प्र० स० श्लो० ५३ चतुर्थपादः ।

6 मा० प्र० स० श्लो० ५४ चतुर्थपादः । माघे 'धिकन्धरम्' इति अखण्डम् ।

7 मा० प्र० स० श्लो० ५५ चतुर्थपादः ।

8 मा० प्र० स० श्लो० ५६ चतुर्थपादः ।

9 मा० प्र० स० श्लो० ५७ चतुर्थपादः ।

शुचिस्वभावैर्जगतीं तमोहरैरलञ्चकारास्य वधूरहस्करः[1] ॥ ५९ ॥
स्वबन्धुकर्णोत्पलयुग्ममन्तिके निवेश्य तस्या वदनानुजीविना ।
निबद्धवेणीतमसः प्रसादनैर्न नर्मसाचिव्यमकारि नेन्दुना[2] ॥ ६० ॥
मुखश्रियाऽस्यास्तुलितं विधुं विधिर्बभञ्ज पूर्णं न पुनर्व्यचूर्णयत् ।
अयं ततः पुष्करदन्तिनो यथा विषाणमद्यापि पुनः प्ररोहति[3] ॥ ६१ ॥
विलासलीलाकलनाय तस्थिवानजस्रमस्याः सविधेऽप्सरोजनः ।
सखीमिषात् तद्विरहोष्मणाऽऽतुराः प्रकम्पनेनानुचकम्पिरे सुराः[4] ॥ ६२ ॥
तयाऽऽस्यपाणिक्रममङ्घ्रिमाक्रमैर्जितश्रि पद्मं महिकाश्रुनिर्भरम् ।
व्यनक्ति भृङ्गैरसुखैर्ज्वलत्क्रुधा तनूनपाद्धूमवितानमाधिजैः[5] ॥ ६३ ॥
पयोधर-श्रोणिभरश्रियाऽनया निर्भर्त्सितं कुम्भयुगं रयेण नः ।
दिगन्तमाप्तैरिति सज्जलज्जया चिराय याथार्थ्यमलम्भि दिग्गजैः[6] ॥ ६४ ॥
अजिह्मकृद् ब्रह्म तदङ्गसङ्गतं पुनात्यतुच्छोच्छ्रितवालमन्वयम् ।
किमद्भुतं यच्छ्रवणाद्धुवेक्षणैः कुलैर्न भेजे फणिनां भुजङ्गता[7] ॥ ६५ ॥
प्रवेणिवादादधरीकृतः स्वयो वचःप्रपञ्चैरमृतं तयोचितम् ।
भुवो भरार्तैर्न तथापि भोगिभिः कुलैर्न भेजे फणिनां भुजङ्गता[8] ॥ ६६ ॥
[ पाठान्तरम् ]

श्रुतिद्वयीदर्शनतः स्फुरद्रुचि द्वयं दृशोर्नाटयतः स्मराश्रयम् ।
कलत्ररत्नस्य कलाः किलाखिलाः पुरेऽस्य वास्तव्यकुटुम्बितां ययुः[9] ॥ ६७ ॥
उडूनि मुक्तास्रजि चित्रके गुरुर्विधुः खगः कुण्डलयोः कृतस्थिती ।
सुरा भजन्तः किमु कामिनीमणेः पुरेऽस्य वास्तव्यकुटुम्बितां ययुः[10] ॥ ६८ ॥
[ पाठान्तरम् ]

अथाश्रयत् कोऽपि सुरः स्फुरत्प्रभो भवाय गर्भं शुभदोहदोद्भवः ।
तदाश्रयेऽस्याः शुचिपाण्डुरं भृशं वपुर्जलार्द्रोपवनैर्न निर्ववौ[11] ॥ ६९ ॥
असूत सा पोषवलक्षपक्षजे त्रयोदशेऽह्न्यङ्गजरत्नमद्भुतम् ।

---

१ 'तमोहरै–' तमः पापम् तिमिरं वा ।

२ '–कारास्य वधूरहस्कर;' अस्य व्यवहारिणः वधूः च पुनः अहस्करः शुचिस्वभावैर्जगतीं अलंचकार । उभयोर्निर्दोषत्वध्वनिः । 'च'कारोऽध्याहार्यः ।

३ 'अनुजीविना'–भृत्येन ।

४ 'निबद्धवेणीतमसः' तमो राहुः ।

५ 'पयोधर'–स्तनः ।

६–'श्रोणि'–नितम्बः ।

७ 'नः' अस्माकम् ।

८ 'यच्छ्रवणाद्धुवेक्षणैः' ध्रुवनेत्रकथनं तेषां कर्णे एव नेत्रत्वात् ।

९ 'भुजङ्गता' वक्रता ।

१० 'दृशोर्नाटयतः' दृशोर्द्वयम् आकर्णान्तविश्रान्तम् । छायार्थे यः श्रुतेः शास्त्रस्य द्वयं पश्यति तस्य रुचिः स्फुरति ।

११ 'पुरेऽस्य' पुरे शरीरे ।

---

1 मा० प्र० स० श्लो० ५८ चतुर्थपादः ।
2 मा० प्र० स० श्लो० ५९ चतुर्थपादः ।
3 मा० प्र० स० श्लो० ६० चतुर्थपादः ।
4 मा० प्र० स० श्लो० ६१ चतुर्थपादः ।
5 मा० प्र० स० श्लो० ६२ चतुर्थपादः ।
6 मा० प्र० स० श्लो० ६४ चतुर्थपादः ।
7 मा० प्र० स० श्लो० ६३ चतुर्थपादः ।
8 मा० प्र० स० श्लो० ६३ चतुर्थपादः ।
9 मा० प्र० स० श्लो० ६६ चतुर्थपादः ।
10 मा० प्र० स० श्लो० ६६ चतुर्थपादः ।
11 मा० प्र० स० श्लो० ६५ चतुर्थपादः ।

नृपादयोऽप्युत्सवकर्म चक्रिरे सदाभिमानैकधना हि मानिनः[१][1] ॥ ७० ॥
क्रमेण जन्मस्य[२] महे निवर्त्तिते स वासुदेवाह्वयमादधे शिशुः ।
विधूत्य चिच्छक्तिमसौ तमोऽवधेर्विलङ्घ्यलङ्कां[३] निकषा हनिष्यति[2] ॥ ७१ ॥
स लाल्यमानोऽश्चित[४]पञ्चधात्रिणा[५] तथा क्रमेणावयवानपूपुषत् ।
अशिश्रियद् विश्वकलाश्रियो यथा प्रतीयते सम्प्रति[६] सोऽप्यसः परैः[3] ॥ ७२ ॥
तदेव देवाग्रिमजन्म[७]जन्मसत्-वपुर्विशेषश्च गिरां श्रियां च सः ।
रवेः प्रभेव प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि[4] ॥ ७३ ॥
बभूव भूवल्लभचेतसां प्रियः स्मरस्वरूपोऽपि स धर्मधर्मधीः ।
सदर्थभाक् चन्द्ररुचिर्यशोभरैरसंशयं सम्प्रति तेजसा रविः[5] ॥ ७४ ॥
कुमारमद्रेस्तनयेव[८] सादरं तमङ्कमारोप्य जनन्यथोत्सुका ।
निरीक्षमाणावयवान् स सद्वयो-वितीर्णवीर्यातिशयी(यान् ?) हसत्यसौ[6] ॥ ७५ ॥
प्रकाममालिङ्ग्य निचुम्ब्य मूर्ध्न्यवक् विवाहकर्म क्रियते तवाङ्गभूः ।
प्रमोदनीयाः सुहृदोऽनया दिशा[९] व्यापादनीया हि सतामसाधवः[7] ॥ ७६ ॥
तनय ! नय विनोदशर्म नस्त्वं वितनु सनर्म सदोरसो[१०] रसार्द्रः ।
रुचिरुचिरचलेक्षणाकुचाग्र[११]ध्रुवपरिरम्भनिपीडनक्षमंत्वम्[8] ॥ ७७ ॥

स्वीयैस्तद्वचनाऽग्रहेऽपि सहसा वीवाहसत्याकृतेः
प्रारब्धेऽतिमहोत्सवे प्रभवति श्रेयस्करे कर्मणि ।

---

१–'धना हि मानिनः' मानिनः ज्ञानिनः ।

२ 'क्रमेण जन्मस्य' जन्मशब्दः अकारान्तः उणादौ ।

३ 'वासुदेवाह्वयमादधे शिशुः' 'विलङ्घ्यलङ्कां निकषा' असौ वासुदेवः चिच्छक्तिं विधूत्य अवधेर्विलङ्घि निस्सीमम्, तमः पापम् राहुं वा हनिष्यति । किंभूतां चिच्छक्तिम् ? अरङ्काम् उग्राम्—दीप्ताम् निकषा पार्श्वे बाल्येऽपि अस्मिन् भवे । यद्वा अलम्–अत्यर्थम्, काञ्चिद् अनिर्वचनीयाम् ।

४ 'लाल्यमानोऽश्चित–' अश्चितम् प्रशस्तम् ।

५ 'पञ्चधात्रिणा' पञ्चानां धात्रीणां समाहारः पञ्चधात्रि–तेन ।

६ 'सम्प्रति सोऽप्यसः' यथा सम्प्रति तत्क्षणमेव दृष्ट्वा नायं स इति लोकैर्ज्ञायते इत्यनेन रमणीयता 'असः' इति । "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः" इति वचनात् ।

७ 'देवाग्रिमजन्म–' सुरसत्कपूर्वभवबद्धम् ।

८ 'कुमारमद्रेस्तनयेव' कुमारम् स्कन्दम् ।

९–'नया दिशा' दिशा रीत्या ।

१० 'सदोरसो रसार्द्रः' सदा उरसः–वक्षसः ।

११ 'रुचिरुचिरचलेक्षणाकुचाग्र–' रुचिरुचिरचलेक्षणाकुचाग्रध्रुवपरिरम्भनिपीडनक्षमत्वं वितनु कुरु, उरसः वक्षसः । यद्यपि जनन्या इदं वचो न घटते, तेन जननीपदेन धात्री प्राह्या ।

---

1 मा० प्र० स० श्लो० ६७ चतुर्थपादः ।

2 मा० प्र० स० श्लो० ६८ चतुर्थपादः । माघे 'विलङ्घ्य लङ्काम्' इति पदविभागः । अत्र तु 'विलङ्घि अलङ्काम्–अरङ्काम्'–अथवा 'अलम् काम्' इति पदच्छेदः । अत्र र-ल्योरैक्यं ज्ञेयम् ।

3 मा० प्र० स० श्लो० ६९ चतुर्थपादः ।

4 मा० प्र० स० श्लो० ७२ चतुर्थपादः । अत्र माघस्य ७२ श्लोकगतम् 'प्रकृतिः सुनिश्चला' इति तृतीयचरणमपि ।

5 मा० प्र० स० श्लो० ७० चतुर्थपादः ।

6 मा० प्र० स० श्लो० ७१ चतुर्थपादः । माघे तु '–वीर्यातिशयान्' इति पाठः ।

7 मा० प्र० स० श्लो० ७३ चतुर्थपादः । माघे 'विपादनीया हि' इति पाठः ।

8 मा० प्र० स० श्लो० ७४ चतुर्थपादः । माघे–'कुचाग्रद्रुतपरिरम्भ–' इति पाठः ।

ऐन्द्रः केकिकलापभृद्बलरिपोः छायां सृजन्नञ्जसा
व्योम्नीव भ्रकुटिच्छले न वदने केतुश्चकारास्पदम्[1] ॥ ७८ ॥

॥ इति श्रीदेवानन्दे महाकाव्ये दिव्यप्रभापरनाम्नि माघसमस्यायां ऐंकाराङ्के महोपाध्यायश्रीमेघविजयगणिविरचिते कथानायक-उत्पत्तिवर्णननामा प्रथमः सर्गः ॥ श्री ॥ १ ॥

---

## द्वितीयः सर्गः ।

उद्विवाहिषया मात्राभ्यर्थितः स भवाप्तभीः ।
जैनीं दीक्षामुपादित्सुरासीत् कार्यद्वयाकुलः[2] ॥ १ ॥
अखण्डमण्डनश्रीणां सपिण्डाऽचण्डरोचिषाम् ।
सम्पृक्तानां विवाहार्थमथासावासदत् सदः[3] ॥ २ ॥
स पितृव्योऽग्रजन्मा च बभौ भूविघ्नभेदिनी ।
रहःस्थले ज्वलत्येवमसौ नरशिखित्रयी[4] ॥ ३ ॥
भ्रातस्तात ! मनोभावा दीक्षां गोचरयन्ति मे ।
सुखंमन्या वने जन्य ! पौरुषेयवृता इव[5] ॥ ४ ॥
श्रुत्वाऽस्यैवं वचः स्थैर्यात् ताभ्यामूहे सविस्मयम् ।
सद्यः संयुक्तमात्रा च त्रिकूटशिखरोपमा[6] ॥ ५ ॥
मातुर्भ्रातुश्च दृग्भावैर्विभाव्यान्तरभावनाम् ।
तं पितृव्यः कृताक्षेपमाचचक्षे विचक्षणः[7] ॥ ६ ॥
वीक्ष्या दीक्षा तटस्थित्या वत्स ! नान्तर्निमज्जनैः ।
ऋषिकुल्येव सिद्धानां शुद्धवर्णा सरस्वती[8] ॥ ७ ॥
अविमृष्टमशक्यार्थं नाद्रियन्ते मनस्विनः ।
वनौकसः प्रशस्यं किं नाटकीयस्य वस्तुनः[9] ॥ ८ ॥

---

१ 'ऐन्द्रः केकिकलाप–' ऐन्द्रः केतुर्ध्वजः व्योम्नि बलरिपोः शक्रस्य वदने छायां सृजन् आस्पदं चकार । किंभूते वदने ? न भ्रकुटिच्छले प्रसङ्गे इत्यर्थः—भ्रकुट्याः छलं स्खलितं यत्र तस्मिन्-ईदृशे न । "छलं छद्मस्खलितयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ४७५ ] ।

२ 'उद्विवाहिषया'—परिणिनायिषया ।

३–'सदत् सदः' सदः सभाम् ।

४ 'स पितृव्यो–' स बालः ।

५ 'रहःस्थले'—एकान्ते ।

६ 'वने जन्य !' "जन्यो जामातृवत्सले । जनके जननीये च" इति अनेकार्थः । [ है० अने० सं० कां० २ श्लो० ३५२–३५३ ] ।

७ 'त्रिकूटशिखरोपमा' त्रिकूटशिखराणि इव—मात्रा ताभ्यां च—त्रिभिः न चेले इत्यर्थः ।

८ 'शुद्धवर्णा सरस्वती' गङ्गा दीक्षाऽपि ऋषिकुल्योग्या शुद्धवर्णा श्वेताम्बरसत्का, गङ्गापक्षे निर्मला । सिद्धानां सरस्वतीव सरस्वती–वाणी ।

---

1 मा० प्र० स० श्लो० ७५ चतुर्थपादः । माघे '–छलेन' इति तृतीयान्तम् ।

2 मा० द्वि० स० श्लो० १ चतुर्थपादः ।

3 मा० द्वि० स० श्लो० २ गतं द्वितीयचरणम् अत्र चतुर्थम् ।

4 मा० द्वि० स० श्लो० ३ चतुर्थपादः ।

5 मा० द्वि० स० श्लो० ४ चतुर्थपादः ।

6 मा० द्वि० स० श्लो० ५ चतुर्थपादः ।

7 मा० द्वि० स० श्लो० ६ चतुर्थपादः ।

8 मा० द्वि० स० श्लो० ७ चतुर्थपादः ।

9 मा० द्वि० स० श्लो० ८ चतुर्थपादः ।

भुक्त्वा ततश्चिरं भोगं स्मेरदृग्भिः स्मराकरम् ।
क्रियाः क्रिया जरन्नुच्चैरिज्यायै तपसः सुत[१] ![1] ॥ ९ ॥
श्रुत्वेत्यूचे स तद्वाचं मदनद्रुमसारणीम् ।
तात ! किं नैव दुःखाय वर्त्स्यन्तावामयः स[२] च[2] ? ॥ १० ॥
आयुर्वायुरिवाऽस्थेयश्चिकुराः[३] सम्पदङ्कुराः ।
शस्त्रीव स्त्रीभवः काममतो दुःखाकरोति माम्[3] ॥ ११ ॥
भवन्तोऽप्यनुमन्यन्तां ग्रहीष्ये सौख्यदं व्रतम् ।
कः साम्ग्र्यामवाप्तायां सन्दिग्धे कार्यवस्तुनि ?[4] ॥ १२ ॥
किं पुनर्वार्तिकैर्भाष्यैः सूत्रवत् सर्वतो मुखम् ।
तत्त्वमेव वदन्त्यार्याः प्रकृत्या मितभाषिणः[5] ॥ १३ ॥
ततोऽश्रुसेकाज्जाड्यार्त्तेनेव किञ्चिद् विवक्षया ।
अकम्पि मातुरोष्ठेन बिम्बचुम्बनचञ्चुना[४][6] ॥ १४ ॥
वत्स ! व्रतवचः शून्यवाद्युपन्यासवन्मम ।
प्रतिभाति नयैतां तद् गिरमुत्तरपक्षताम्[7] ॥ १५ ॥
भर्तुर्वियोगे भामिन्या दिक् सूनुर्मातुरातुरे ।
करोति यः स्नुषाऽऽलोकपरिपूतपुटे दृशौ[५][8] ॥ १६ ॥
आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम् ।
कुरु त्वं भूरिसौरभ्यां वनमालां मुखानिलैः[9] ॥ १७ ॥
आक्रीडेः[६] क्रीडया स्त्रीभिरङ्गभूरङ्गभूतरोः[७] ।
प्रसवानीव धेह्यङ्गसङ्गिनीः स्वेदविप्रुषः[८][10] ॥ १८ ॥
त्वद्विवाहोऽस्तु दायाद[९] ! जन्मतद्द्वारकर्मभिः ।
सानुबन्धां स्रजं द्वारे विदधच्चूतपल्लवीम्[१०][11] ॥ १९ ॥

---

१ 'तपसः सुत !' तपसः व्रतस्य, इज्यायै यज्ञाय, क्रियाः क्रियाः सुत हे ! ।

२ –'वामयः स च' स भोगः ।

३–'स्थेयश्चिकुराः' चिकुराः चपलाः ।

४ 'बिम्बचुम्बनचञ्चुना' बिम्बतुल्येन । चुम्बनं प्रीत्या, सा प्रीतिः सुहृद्भावे इति लक्षणया तुल्यत्वमित्यर्थः ।

५ 'स्नुषाऽऽलोक–' वध्वा दर्शनेन ।

६ 'आक्रीडेः क्रीडया' आक्रीड उद्यानम् ।

७–'रङ्गभूरङ्गभूतरोः' हे अङ्गभूः ! अङ्गभूतरोः स्मरतरोः ।

८–'विप्रुषः' बिन्दवः ।

९ 'दायाद !' "दायादौ पुत्र-बान्धवौ" इति । [ है० अने० सं० कां० ३ श्लो० ३२५ ]

१०–'चूतपल्लवीम्' आम्रपल्लवमालाम् । माथुरदेशीयभाषया चूतपल्लवी ।

---

1 मा० द्वि० स० श्लो० ९ चतुर्थपादः । माघे तु 'सुतः' इति भेदः ।

2 मा० द्वि० स० श्लो० १० चतुर्थपादः ।

3 मा० द्वि० स० श्लो० ११ चतुर्थपादः । माघे–'मदो दुःखाकरोति' इति पार्थक्यम् ।

4 मा० द्वि० स० श्लो० १२ चतुर्थपादः ।

5 मा० द्वि० स० श्लो० १३ चतुर्थपादः ।

6 मा० द्वि० स० श्लो० १४ चतुर्थपादः । माघे तु–'चुञ्चुना' इति पाठः ।

7 मा० द्वि० स० श्लो० १५ चतुर्थपादः ।

8 मा० द्वि० स० श्लो० १६ चतुर्थपादः ।

9 मा० द्वि० स० श्लो० १७ चतुर्थपादः ।

10 मा० द्वि० स० श्लो० १८ चतुर्थपादः ।

11 मा० द्वि० स० श्लो० १९ चतुर्थपादः । माघे तु–'चौतपल्लवीम्' इति भिन्नः पाठः ।

आमुष्मिक[१]कृते सूनो ! नैहिकीं त्यज सम्पदम् ।
नरो हि नरकः शीलं [२]कृतानुव्याधमुद्वमन्[1] ॥ २० ॥
प्रदोषोऽङ्कस्थसूर्यत्वक् कुक्षिस्थेन्दुनिबद्धधीः ।
ग्रहैर्जोहस्यते नूनमुदंशुदशनांशुभिः[2] ॥ २१ ॥
इति प्रसू[३]वचोवातैर्मन्दरा[४]गः स नाचलत् ।
चक्रेऽवक्रं तपः कृत्य-क्रिया केवलमुत्तरम्[3] ॥ २२ ॥
आमुष्मिकसुखस्यांशोऽप्यैहिकया नातिशय्यते ।
सम्पदा पूर्णये[५]द्धोऽग्निः त्विषा नात्येति पूषणम्[4] ॥ २३ ॥
धर्मः पद्म इवोद्बुद्धः शुद्धहंसाभिनन्दनः ।
सेव्यो भव्यैर्जनन्यैवं प्रवाचः कृतिनां गिरः[5] ॥ २४ ॥
धर्माद् रसादिव[६] स्वल्पादपि [७]कल्याणसाधनम् ।
इति सूत्रस्य सद्वाण्यो भाष्यभूता भवन्तु मे[6] ॥ २५ ॥
श्रेयसः[८] श्रेयसः श्रेणी गिरेरिव सरिद् भवेत् ।
पापादापद्भवो ज्ञातुमिति दुर्मेधसोऽप्यलम्[7] ॥ २६ ॥
अनुपार्जितपुण्यस्य जन्मान्तर्गडुजन्मिनः ।
निमित्ताद[९]पराद्धेषोर्धानुष्कस्येव वल्गितम्[8] ॥ २७ ॥
मुक्त्यङ्गनानुरागाय विहाय व्रतपञ्चकम् ।
असमः शमिनामन्यो नास्ति मन्त्रो मही[१०]भृताम्[9] ॥ २८ ॥
तत्राप्यार्यं व्रतं तुर्यं पावनं [११]दुरुपावनम् ।
जगज्जैत्रस्मरादिभ्यः परेभ्यो भेदशङ्कया[10] ॥ २९ ॥
ब्रह्मोष्णरश्मेर्बालार्चिश्चक्रवर्तिप्रवृत्तयः ।
तत्पूर्णतेजः स्तोतुं कैर्वाचस्पत्यं प्रतन्यते ?[11] ॥ ३० ॥
निस्तोषं योषि[१२]दाश्लेषाद् मन्थनां द्रविणक्षयम् ।

---

१ 'आमुष्मिककृते' आमुष्मिकः परभवः ।
२ 'कृतानुव्याधमुद्वमन्' कृतः अनुव्याधः संपर्को यस्य तत्—विहितस्वीकारम् । अनुव्याधो वा पश्चात्तापः ।
३ 'इति प्रसू-' प्रसूः माता ।
४–'मन्दरागः स नाचलत्' मन्दो रागो यस्य । पक्षे मन्दरो यः—अगः पर्वतः मेरुः ।
५ 'पूर्णयेद्धोऽग्निः' इद्धो दीप्तः ।
६ 'रसादिव' रसात् पारदात् ।
७ 'कल्याणसाधनम्' कल्याणं मोक्षः स्वर्णं च ।
८ 'श्रेयसः' पुण्यात् । 'श्रेयसः' मङ्गलस्य ।
९ 'अपराद्धेषोः' च्युतशरस्य ।
१० 'महीभृताम्' क्षमाभृताम् ।
११ 'दुरुपावनम्' दुःखेन समीपे रक्षणीयम् ।
१२ 'योषिदाश्लेषात्' समुद्रस्त्रियो नद्यः तासां नित्यसंगात् ।

---

1 मा० द्वि० स० श्लो० २० चतुर्थपादः ।
2 मा० द्वि० स० श्लो० २१ चतुर्थपादः । माघे '-मुदग्रदशनांशुभिः' इति पाठः ।
3 मा० द्वि० स० श्लो० २२ चतुर्थपादः ।
4 मा० द्वि० स० श्लो० २३ चतुर्थपादः । अत्र माघे च समानार्थं समग्रमुत्तरार्धम् ।
5 मा० द्वि० स० श्लो० २५ चतुर्थपादः ।
6 मा० द्वि० स० श्लो० २४ चतुर्थपादः ।
7 मा० द्वि० स० श्लो० २६ चतुर्थपादः ।
8 मा० द्वि० स० श्लो० २७ समग्रमुत्तरार्धम् ।
9 मा० द्वि० स० श्लो० २८ चतुर्थपादः ।
10 मा० द्वि० स० श्लो० २९ चतुर्थपादः ।
11 मा० द्वि० स० श्लो० ३० चतुर्थपादः । माघे तु 'प्रतायते' इति भिन्नम् ।

प्राप्नोति पुरुषो नूनं दृष्टान्तोऽत्र महार्णवः[1] ॥ ३१ ॥
मूलं धर्मतरोर्ब्रह्म कूलं भवपयोनिधेः ।
येन लुब्धेन नालम्बि न वर्द्धयति तस्य ता[१][2] ॥ ३२ ॥
[२]श्यामासक्तरुचिः कामोल्लासाद् राजापि च क्षयी ।
[३]सुवृत्तशीलो निर्दोषस्तत्रोदाहरणं रविः[3] ॥ ३३ ॥
बालस्याऽबालगीःसारैरेवं बुद्धा प्रसूरपि ।
पार्थक्येन मृदि न्यस्तमुदकं नावतिष्ठते[४][4] ॥ ३४ ॥
[५]उच्चैःकुलगिरौ स्वस्था सिंहीव स्यामहं न किम् ।
यज्जन्यस्त्वं प्रशस्यश्रीः सैंहिकेयोऽसुरद्विषाम्[६][5] ॥ ३५ ॥
चक्रे प्राचीव मित्रेण त्वयाऽहं पुत्र ! निस्तमा ।
पुत्रौ क्रोडष्णिहौ स्यातां सहजप्राकृतावपि[6] ॥ ३६ ॥
[७]प्रतीक्ष्यः [८]पृथुकोऽपि स्यात् पुण्यधीर्नान्यथा महान् ।
पुण्यनैपुण्यमर्च्यत्वे लक्ष्यं लक्षणमेतयोः[7] ॥ ३७ ॥
धन्यस्त्वं योऽजयद् बाल्ये महामोहमहीश्वरम्[९] ।
कृष्णायितः स तन्मूलं महद् वैरतरोः श्रियः[8] ॥ ३८ ॥
धन्यस्त्वं [१०]वासुदेवोऽसि महामोहमहीश्वरम् ।
जित्वा त्यजन् मूलमेता महद् वैरतरोः श्रियः[9] ॥ ३९ ॥
[ पाठान्तरम् ]

तत् प्रव्रज मया सार्द्धं त्वद्दते मां [११]स बाधते ।
प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव[10] ॥ ४० ॥
एवं मातृगिरः शृण्वन् स्थिरसूः स्थिरमूहिवान् ।
धर्मे त्वरा हितं स्थैर्यमलमश्रेयसे यतः[11] ॥ ४१ ॥

---

१ 'ता' ता लक्ष्मीः । "ता सा श्रीः कमला" इति कोषः

२ 'श्यामासक्त–' "श्यामा स्त्री मुख्य ( मुग्ध ? ) यौवना" इति अनेकार्थध्वनिमञ्जरिः [श्लो० ९६ श्लोकाधि०] श्यामा रात्रिः ।

३ 'सुवृत्तशीलो' वृत्तम् आचरितम्, शीलम् स्वभावः । 'निर्दोषः' दोषा रात्रिः ।

४ '–तिष्ठते' अवपूर्वस्थाधातोः आत्मनेपदम् ।

५ 'उच्चैःकुल–' वंशपर्वते ।

६ '–द्विषाम्' असुरद्विषाम् देवानां प्रशस्यश्रीः ।

७ 'प्रतीक्ष्यः' पूज्यः ।

८ 'पृथुकः' बालः ।

९ '–महीश्वरम्' नृपम् ।

१० 'वासुदेवो–' वासुदेवनाम यथार्थं नागवशीकरणात् तस्य, श्रियस्त्यक्ताः ।

११ 'स' महामोहः ।

---

1 मा० द्वि० स० श्लो० ३१ चतुर्थपादः ।

2 मा० द्वि० स० श्लो० ३२ चतुर्थपादः । माघे 'ता' स्थाने 'ताम्' इति भिन्नं पदम् । माघे 'ताम्' इति द्वितीयान्तम्, अत्र तु 'ता' इति प्रथमान्तम् ।

3 मा० द्वि० स० श्लो० ३३ चतुर्थपादः ।

4 मा० द्वि० स० श्लो० ३४ चतुर्थपादः ।

5 मा० द्वि० स० श्लो० ३५ चतुर्थपादः । माघे '–ऽसुरद्रुहाम्' इति भिन्नता ।

6 मा० द्वि० स० श्लो० ३६ चतुर्थपादः ।

7 मा० द्वि० स० श्लो० ३७ चतुर्थपादः ।

8 मा० द्वि० स० श्लो० ३८ चतुर्थपादः ।

9 मा० द्वि० स० श्लो० ३८ चतुर्थपादः ।

10 मा० द्वि० स० श्लो० ३९ तृतीय–चतुर्थपादौ अत्रापि तावेव ।

11 मा० द्वि० स० श्लो० ४० चतुर्थपादः ।

अथ प्रतस्थे तीर्थानि नन्तुं निजजनैः समम् ।
स्थिरस्य वार्तां संयोज्य स सुतश्रवसः सुतः[1] ॥ ४२ ॥
तस्य तीर्थनमस्यार्थं प्रस्थितस्य वयः[२] शुभाः ।
प्रदक्षिणाक्रियायै स्माऽऽशेरते[३] तेऽभिमारुतम्[2] ॥ ४३ ॥
अहंपूर्विकयेतीव द्रुमाः पुष्पैरवाकिरन् ।
विलम्बमर्चितुं धीरोऽविराध्यं[४] तं सहेत कः ?[3] ॥ ४४ ॥
तत्पार्श्वस्था द्रुमा वल्लीकान्तां श्लिष्टा रविप्रभाम् ।
आवव्रुश्छदनैः प्राप्तवैयात्यं[५] सुरतेष्विव[4] ॥ ४५ ॥
स्वयं नेत्रश्रिया न्यङ्कून्[६] जितान् नाम्न्यातपादिभिः ।
तस्याऽपश्यद् वने दृश्यान् जननी क्लेशकारिणः[७][5] ॥ ४६ ॥
शीतवातास्तमानर्चुर्न्यस्यन्तो वर्णपङ्कवत् ।
भालेऽम्बुजानां सामोददेहिनस्तद्वरं रजः[6] ॥ ४७ ॥
नामं नामं स तीर्थानि स्वयं तीर्थोपमां दधे ।
न कुर्वन्ति महात्मानः संज्ञायै जन्म केवलम्[7] ॥ ४८ ॥
अथ श्रीमान् मुनीशोऽभूत् श्रीहीरविजयः प्रभुः ।
आसीद् यस्मिन् महः[८] कीर्तिरुभयं तद् महस्विनि[8] ॥ ४९ ॥
पुष्पदन्ताविवाऽऽयोज्य[९] धात्राऽयं निर्ममे प्रभुः ।
गिरा[१०] सृजँस्तपस्तेजस्त[११]न्म्रदिम्नः स्फुटं फलम्[9] ॥ ५० ॥
श्रीतपागच्छसम्राजमिन्दिरैनं यदाश्रयत् ।
ह्रियेवासीत्[१२] ततः कृष्णो लघुर्बहुतृणं[१३] नरः[१४][10] ॥ ५१ ॥

---

१ 'स सुतश्रवसः' राज्ञः कर्णस्य वार्तां संयोज्य—राजानमापृच्छ्य इत्यर्थः । "सुतः पुत्रे नृपे" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० २०५ ] ।

२ 'वयः' पक्षिणः ।

३ 'आशेरते' आशयं चक्रुः प्रदक्षिणाक्रियायै ।

४ 'अविराध्यम्' पूज्यम् ।

५ '–वैयात्यम्' वियातो धृष्टः तद्भावो वैयात्यम् ।

६ 'न्यङ्कून्' मृगविशेषान् ।

७ 'क्लेशका–' नाम्न्याऽऽतपादिभिः क्लेशकारिणः ।

८ 'महः' तेजः । 'तद्' जगत्प्रसिद्धम् ।

९ 'पुष्पदन्ता–' हीः चन्द्रः, रविः सूर्यः, तयोः जयो यत्र स ही–रवि–जयः तेजसा कीर्त्या च ।

१० 'गिरा' वाण्या, म्रदिम्नः मार्दवस्य, फलं स्फुटं कुर्वन् ।

११ '–स्तेजस्तद्' तपस्तेजः तनोति इति तपस्तेजस्तत् ।

१२ '–वासीत्' गोविन्दः लज्जया कृष्णः श्यामः, च पुनः लघुः वामनः ।

१३ 'बहुतृणम्' तृणकल्पः आसीत् । कल्पार्थे 'बहुच्' प्रत्ययः ।

१४ 'नरः' "नरः कृष्णेऽर्जुने च" इति कोषः [ है० अने० सं० कां० २ श्लो० ४२३ ]

---

1 मा० द्वि० स० श्लो० ४१ चतुर्थपादः । माघे तु 'स श्रुतश्रवसः सुतः' इति पाठः ।
अत्र तु चित्रकाव्यत्वेन 'श्रुत–' इत्यस्य रेफो लुप्तः, शकारश्च सकारो गण्यते इति न समस्यापादभेदः ।

2 मा० द्वि० स० श्लो० ४२ चतुर्थपादः । माघे तु 'शेरते' इति क्रिया ।

3 मा० द्वि० स० श्लो० ४३ चतुर्थपादः । माघे तु 'विराध्यन्तम्' इति अखण्डम्, क्रिया च 'क्षमेत' इति ।

4 मा० द्वि० स० श्लो० ४४ चतुर्थपादः ।

5 मा० द्वि० स० श्लो० ४५ चतुर्थपादः । माघे तु समस्तः सः ।

6 मा० द्वि० स० श्लो० ४६ चतुर्थपादः ।

7 मा० द्वि० स० श्लो० ४७ चतुर्थपादः ।

8 मा० द्वि० स० श्लो० ४८ चतुर्थपादः । माघे 'मनस्विनि' ।

9 मा० द्वि० स० श्लो० ४९ चतुर्थपादः ।

10 मा० द्वि० स० श्लो० ५० चतुर्थपादः ।

निस्त्रिंशस्त्रिजगत्रासी यस्तेजः स्कन्दवैरिणाम् ।
प्रत्यूष इव नव्यश्रीस्तपनो जातवेदसाम्[1] ॥ ५२ ॥
तस्याऽकब्बरभूजानेर्बोधिदानाद् यदीयका ।
दिग्दन्तिदन्तावालम्ब्य कीर्तिर्धामधिरोहति[2] ॥ ५३ ॥
प्रोद्दीपिते प्रतापेऽस्य कुपक्षाः क्षीणतां ययुः ।
शशाः किं यत्र विध्वस्तमृगपूगो[२] मृगाधिपः[3] ॥ ५४ ॥
सौभाग्यभाग्याभ्युदयं प्रभोः स्तोतुं क्षमेत कः ।
पूर्णं सुवर्णशैलेन्द्रं कोऽम्भसा परिषिञ्चति ?[4] ॥ ५५ ॥
उद्वेल्लद्भाग्यसौभाग्यवल्लीं पल्लविनीं जने ।
कविर्न स्तोत्ररूपेण कोऽम्भसा परिषिञ्चति ?[5] ॥ ५६ ॥
प्रभोः क्व कीर्तिपाथोधिः सुधाद्याः क्वैकदेशिनः ।
सादृश्यं यान्ति न क्वापि सर्पिषस्तोयबिन्दवः[6] ॥ ५७ ॥
श्रीमान् विजयसेनाख्यस्तत्पट्टे सूरिराड् बभौ ।
क्षणाद् येनान्तरा क्षिप्ता दूष्यास्ते[३] शत्रुसञ्ज्ञिताः[7] ॥ ५८ ॥
स्वशक्त्युपचये केचिदस्य सूरेः सुहृष्टयः ।
परेऽप्युपेत्य पादाब्जसेवाहेवाकितां दधुः[8] ॥ ५९ ॥
लिलङ्घयिषतो लोकान् अलङ्घ्यानलघीयसः ।
विधिरष्टश्रवा जज्ञे श्रोतुमस्य गुणानिव[9] ॥ ६० ॥
कीर्त्याभोगः श्रुताभोगः[४] सदाभोगः[५] शुभश्रियः ।
तादात्म्यभाक् प्रभौ तस्मिन् बुद्धेर्भोग इवात्मनि[10] ॥ ६१ ॥
निर्दम्भविद्यादम्भोलिभिन्नदुर्भावभूभृता ।
सूरीन्द्रेण शमैर्जिग्ये सुदमो दमघोषजः[६][11] ॥ ६२ ॥
उर्वीं सुपर्विणीं[७] कुर्वन् श्रीराजनगरे गुरुः ।
अन्येद्युरराययौ योगपूर्णस्तस्योत्सवाय सः[12] ॥ ६३ ॥

---

१ '-कब्बर-' अकप् अचलो वरो यस्य स-अकप्+वर-अकब्बरः ।

२—'पूगो' "पूगः समूहः" [ अनेकार्थध्व० श्लो० १३४ अर्धश्लोकाधि० ]

३ 'दूष्या-' दूषणार्हाः ।

४ '-आभोगः' विस्तारः ।

५ '—आभोगः' ज्ञानम् ।

६ '-दम-' दमघोषो नाम पूर्वऋषिः तस्मात् जात इव लुप्तोपमा ।

७'सुपर्वि-' सोत्सवाम्, सदेवाम् ।

---

1 मा० द्वि० स० श्लो० ५१ चतुर्थपादः ।

2 मा० द्वि० स० श्लो० ५२ चतुर्थपादः ।

3 मा० द्वि० स० श्लो० ५३ चतुर्थपादः । माघे तु '-मृगयूथो मृगाधिपः' इति ।

4 मा० द्वि० स० श्लो० ५४ चतुर्थपादः ।

5 मा० द्वि० स० श्लो० ५४ चतुर्थपादः ।

6 मा० द्वि० स० श्लो० ५५ चतुर्थपादः ।

7 मा० द्वि० स० श्लो० ५६ चतुर्थपादः ।

8 मा० द्वि० स० श्लो० ५७ प्रथमपादः । माघेऽपि स एव प्रथमपादः ।

9 मा० द्वि० स० श्लो० ५८ पूर्वार्धम् । माघेऽपि तदेव पूर्वार्धम् ।

10 मा० द्वि० स० श्लो० ५९ चतुर्थपादः ।

11 मा० द्वि० स० श्लो० ६० चतुर्थपादः ।

12 मा० द्वि० स० श्लो० ६१ चतुर्थपादः ।

सूरिं विवन्दिषोः पुंस्त्रीसंघस्याभिगमाद् वने ।
व्यभाद् विभातवद् योगस्तेजस्-तिमिरयोः कुतः[1] ॥ ६४ ॥
समौक्तिकस्रजां सूरिं नेमुषां भूस्पृशां श्रियः ।
ऊहुः सुमनसां भारैर्वामनीभूतभूरुहः[2] ॥ ६५ ॥
प्रभुं प्रवेशयामास श्राद्धवर्गः समृद्धिभाक् ।
महोत्सवैः सहोत्साहं पुरीं माहिष्मतीद्विषम्[3] ॥ ६६ ॥
स्थिरात्मजोऽपि तत्रैत्य जगत्तीर्थं[३] तमानमत् ।
न कः कल्पद्रुमं प्राप्य सर्वस्वार्थं समीहते ?[4] ॥ ६७ ॥
प्रारेभे च विभुर्व्याख्यां स श्रेयः कुरुतां जनः ।
स्वर्गापवर्गयोर्यो हि सर्वः स्वार्थं समीहते[5] ॥ ६८ ॥
प्राप्य तां विद्युतः सम्पद्वरां चापल्यमाहताम् ।
मा प्रमादीर्जनः स्वादी मधुबिन्दोरिवाश्रवैः[6] ॥ ६९ ॥
इत्याद्याः श्रीगुरोर्वाचश्चित्रदाश्चित्रदेवताः ।
सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव[7] ॥ ७० ॥
निपीय गास्ताः सूरीन्दोर्धर्माम्भोधिविवर्द्धनीः ।
सवित्री स्वशिशोर्वक्तुं प्रस्तावमदिशद् दृशा[8] ॥ ७१ ॥
प्राञ्जलिः स्थिरजन्माऽथ गुरुं विज्ञपयन्निति ।
उत्थाय तमसश्छेदे जगादाग्रे गदाग्रजम्[9] ॥ ७२ ॥
मह्यं देयं बुधाऽऽदेयं व्रतानां पञ्चकं महत् ।
गुरो ! त्वमिङ्गितज्ञोऽसि खलूक्त्वा खलु वाचिकम्[10] ॥ ७३ ॥
यद्यपि स्वपुरे गत्वैवोचितं तत् तथाऽप्यहो ।
तव वाचाऽशीतकत्वमुपैति मम जल्पतः[11] ॥ ७४ ॥
प्रारेभेऽथास्य दीक्षायै सम्भूय स्वजनैर्घनैः ।

---

१ 'कुतः' पृथिव्याः ।
२ 'माहिष्म'—माहिष्मतीस्पर्द्धिनीम्-तत्तुल्याम् इत्यर्थः ।
३ 'जग–' जगतः पूज्यत्वात् यद्वा जगत् जङ्गमं तीर्थम् ।
४ 'सर्वस्वा–' स्वस्य धनस्य अर्थाः कार्याणि यस्मात् तम्–कल्पद्रुमम् ।
५ '–श्रवैः' इन्द्रियादिभिः ।
६ 'गदाग्रजम्' तमसः छेदे गदाग्रजं विष्णुम्, अग्रे उत्थाय जगाद ।
७ 'खलूक्त्वा' खलु निश्चितम्, वाचिकं वार्तिकम्, खलूक्त्वा न कार्यम् ।
८ 'अशीत–' अनालस्यम् ।

---

1 मा॰ द्वि॰ स॰ श्लो॰ ६२ चतुर्थपादः ।
2 मा॰ द्वि॰ स॰ श्लो॰ ६३ चतुर्थपादः ।
3 मा॰ द्वि॰ स॰ श्लो॰ ६४ चतुर्थपादः । माघे तु 'माहिष्मतीं द्विषः' इति भेदः ।
4 मा॰ द्वि॰ स॰ श्लो॰ ६५ चतुर्थपादः । 'सर्वः स्वार्थं समीहते' इति माघपाठः ।
5 मा॰ द्वि॰ स॰ श्लो॰ ६५ चतुर्थपादः समानः ।
6 मा॰ द्वि॰ स॰ श्लो॰ ६६ माघस्य प्रथमः पादः स एव अत्रापि प्रथमः । माघे 'विद्युताम्' इति भेदः । 'प्राप्यताम्' इति क्रियापदम् ।
7 मा॰ द्वि॰ स॰ श्लो॰ ६७ उत्तरार्धं समग्रम् ।
8 मा॰ द्वि॰ स॰ श्लो॰ ६८ चतुर्थपादः ।
9 मा॰ द्वि॰ स॰ श्लो॰ ६९ चतुर्थपादः ।
10 मा॰ द्वि॰ स॰ श्लो॰ ७० चतुर्थपादः ।
11 मा॰ द्वि॰ स॰ श्लो॰ ७१ चतुर्थपादः ।

आरध्वजैस्लाघ्यमानैर्गेयस्येवं विचित्रता[1] ॥ ७५ ॥
तच्चित्रकृत् पुरन्ध्रीभिः पुरं गृह्याभिरन्वितम् ।
तथा परिष्कृतं येन प्रबन्धो दुरुदाहरः[2] ॥ ७६ ॥
द्राघीयसीमपि घनामनन्यगुणभूषिताम् ।
नार्यः प्रसारयन्ति स्म चित्रां वाचं पटीमिव[3] ॥ ७७ ॥
उच्चैर्दुकूलकेतूनां पङ्क्तिस्तत्पुरसद्मनाम् ।
जज्ञे जयाशिषां तत्र वक्तुर्गुणनिकेव सा[4] ॥ ७८ ॥
सर्वत्र तद्गृहिद्वारे स्मेरपुष्पस्रजां व्रजैः ।
गौर्जहासोल्लसद्धासं जिगीषोरात्मसंपदः[5] ॥ ७९ ॥
दीक्षामण्डपमासाद्य सिक्ताः पुष्पस्रजां रसैः ।
सङ्कीर्णत्वेऽपि मनुजा जानते जातु न श्रमम्[6] ॥ ८० ॥
चक्रे चन्द्रोदयैरन्तर्नभोमौक्तिकतारकम् ।
तथार्केण यथा द्वारे स्थीयते बहिरश्मवत्[7] ॥ ८१ ॥
हल्लीसकैः पणस्त्रीणां विस्मिताः पुत्रिकामिषाः ।
आरभन्तेऽल्पमेवाऽङ्गाः नृत्यं स्वर्गाङ्गनाजनाः[8] ॥ ८२ ॥
कृतजेमनवारा नो कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियः स्वीयाः कल्पद्रुमा इव[9] ॥ ८३ ॥
अधः प्रियालसालस्य हाजानामनि पाटके ।
यावत् सङ्घवरा हृष्टास्तिष्ठन्ति च निराकुलाः[10] ॥ ८४ ॥
नावधीद् धीवरः कोऽपि देशावधि तिमिं तदा ।
दानैस्तुष्टो न चाभ्यर्णे शयालुर्मृगयुर्मृगम्[11] ॥ ८५ ॥
अत्रान्तरेऽथ तत्रागात् सूरीन्दुर्यस्य सूरिषु ।
उदयश्री रवेः शश्वदादित्येष्विव कल्प्यते[12] ॥ ८६ ॥

---

१ '-स्येव' इव-अव्ययं पादपूरणे, यद्वा गीतस्य विचित्रतावत् सर्वा विचित्रता भोजन-वसनादिषु नानालम् आरेभे ।

२ 'पटी'-पटीम्-दीक्षासमये चित्रां प्रसारयन्ति इति आचारः । वाक्पक्षे पटी उपमा, पटीपक्षे वाग् उपमा ।

३ 'चन्द्रोद-' चन्द्रोदयैः वितानैः उच्चलात् नभः अन्तर् मध्ये चक्रे ।

---

1 मा० द्वि० स० श्लो० ७२ चतुर्थपादः ।

2 मा० द्वि० स० श्लो० ७३ चतुर्थपादः ।

3 मा० द्वि० स० श्लो० ७४ चतुर्थपादः ।

4 मा० द्वि० स० श्लो० ७५ चतुर्थपादः । माघे 'गुणनिकैव' इति भेदः ।

5 मा० द्वि० स० श्लो० ७६ चतुर्थपादः ।

6 मा० द्वि० स० श्लो० ७७ चतुर्थपादः ।

7 मा० द्वि० स० श्लो० ७८ चतुर्थपादः ।

8 मा० द्वि० स० श्लो० ७९ यः प्रथमः पादः स एव अत्र तृतीयः पादः ।

9 मा० द्वि० स० श्लो० ७९ यः तृतीयः पादः स एव अत्र तृतीयः पादः । यश्च माघगत ७९ श्लोकस्य द्वितीयः पादः स एव अत्रापि द्वितीयः ।

10 मा० द्वि० स० श्लो० ७९ चतुर्थपादः ।

11 मा० द्वि० स० श्लो० ८० चतुर्थपादः । '-मृगान्' इति माघे ।

12 मा० द्वि० स० श्लो० ८१ चतुर्थपादः । 'कल्पते' इति माघे ।

त्यजतोऽलङ्कृतीः सर्वाः स्थिरसूनोर्गुरोर्दृशा ।
नेशुरेनांसि कामायोः फणीन्द्रा इव शात्रवः[1] ॥ ८७ ॥
प्राची-रव्योरिवानूषः[१] प्रसू-सून्वोर्विभासतोः ।
दीक्षावेषात् ततः स्मोच्चैः फलत्युत्साहपादपः[2] ॥ ८८ ॥
बुद्धिशस्त्रप्रकृत्यङ्गो घनसंवृतिकञ्चुकः ।
चारेक्षणः[२] स चारित्राद् रेजे राजेव नीरजाः[3] ॥ ८९ ॥
तपःशुक्लदशम्यां तं प्राव्राजयत सोत्सवम् ।
सूरीन्द्रः प्रभया जेता रसभागविदः[३] कवेः[4] ॥ ९० ॥
विद्याविजय इत्याख्यां सूरिश्चक्रे यथार्थदृक् ।
स्थाने न मोहः क्वापि स्याद् रसभागविदः कवेः[5] ॥ ९१ ॥
अशिक्षत स भिक्षूणामयनं विनयाश्रयम् ।
अप्रश्रितो[४] विपन्मूलं प्राप्ते काले गदो यथा[6] ॥ ९२ ॥
शुश्रूषया गुरोरेष कृत्स्नशास्त्ररसं पपौ ।
दशाकर्ष इव स्नेहं दशया ह्यन्तरस्थया[7] ॥ ९३ ॥
नैष्ठिको[५] दैष्टिको[६]त्कृष्टः स विद्याविजयो मुनिः ।
अविरुद्धं क्रियाज्ञान-द्वयं विद्वानपैक्षत[8] ॥ ९४ ॥
भूयोऽन्तिषन्मणीभर्तुरनेनैव कलाभृता ।
उल्लासोऽब्धेरिवर्षीणां तथा नेतुर्महीभृतः[७][9] ॥ ९५ ॥
जुष्टेश्वरेक्षणार्चिष्मद्[८] गङ्गातीरे तपस्यतः ।
राज्ञः कलाभृतस्ताराः प्रयान्ति परिवारताम्[10] ॥ ९६ ॥
इतीव तप्यतस्तीव्रं तपस्तस्य स्वयं गुणाः ।

---

१ '-नूषः' प्रभातकालाद् अनु इत्यनेन रक्तभात्यागः श्वेतपरिधानं सूचितम् ।
२ '-रेक्षणः' चारे ईर्यया गतौ ईक्षणे यस्य । राजपक्षे चाराः गूढपुरुषाः ।
३ '-भागविदः' प्रभया धिया, कवेः कवीनां जेता-ज्ञानवान् । 'कवेः' इति जात्या एकवचनम् । रसाः शृङ्गारादयः तेषां सांकर्येऽपि भागान् वेत्ति तस्य । कवेः शुक्रस्य जेता । रसो जलम्, तस्य भागान् लभते जलचारित्वात् शुक्रस्य ।
४ '-प्रश्रितः' अविनीतः । विनीतः प्रश्रितः ।
५ 'नैष्ठि-' नैष्ठिकब्रह्मचारी । "नैष्ठिकसुन्दर ! त्वया"-इति कुमारकाव्ये [ पञ्चमसर्गे श्लो॰ ६२ ]
६ 'दैष्टि-' दैष्टिकः शास्त्रवेत्ता दैवपरश्च ।
७ '-हीभृतः' ऋषीणां महीभृतः भूपस्य । तथा तेन प्रकारेण, अब्धेः सागरस्य ऋषीणां 'नेतुः' प्रापयितुर्वृद्धिम् इति शेषः ।
८-'र्चिष्मद्' क्रियाविशेषणम्-सेवितहरनेत्रदहनं यथा स्यात् तथा तपस्यतः ।

---

1 मा॰ द्वि॰ स॰ श्लो॰ ८८ चतुर्थपादः ।
2 मा॰ द्वि॰ स॰ श्लो॰ ८९ चतुर्थपादः ।
3 मा॰ द्वि॰ स॰ श्लो॰ ८२ प्रथमद्वितीयौ पादौ, अत्रापि तौ एव । माघे 'बुद्धिशस्त्रः' इति भिन्नम् ।
4 मा॰ द्वि॰ स॰ श्लो॰ ८३ चतुर्थः पादः । माघे 'रसभावविदः' इति पाठभेदः ।
5 मा॰ द्वि॰ स॰ श्लो॰ ८३ चतुर्थः पादः ।
6 मा॰ द्वि॰ स॰ श्लो॰ ८४ चतुर्थः पादः ।
7 मा॰ द्वि॰ स॰ श्लो॰ ८५ चतुर्थः पादः । माघे 'दशयाभ्यन्तरस्थया' इति पाठः ।
8 मा॰ द्वि॰ स॰ श्लो॰ ८६ चतुर्थः पादः । माघे 'विद्वानपेक्षते' इति ।
9 मा॰ द्वि॰ स॰ श्लो॰ ८७ चतुर्थः पादः ।
10 मा॰ द्वि॰ स॰ श्लो॰ ९० चतुर्थः पादः ।

प्रादुरासन्निर्विकारं शब्दा इव विहायसः[1] ॥ ९७ ॥
अथाकब्बरभूभर्ता गुरुमाजूहवन्मुदा ।
यः सर्वसूरिमालासु नायको[१] नायकायते[2] ॥ ९८ ॥
तद्दृष्टेर्भूभृदाचष्टे हृष्टो धर्मानुयोजनम् ।
सूरिर्वचांस्युत्ततार स्थाष्णूनि[२] बलवन्ति च[3] ॥ ९९ ॥
श्रेयो दयामयं श्रेयो वाङ्मयेषु प्रतिष्ठितम् ।
जन्तोर्घात-घृणे स्यातां निदानं क्षयसम्पदः[4] ॥ १०० ॥
गङ्गा मान्या प्रतिष्ठादावित्याद्युपदिदेश सः ।
जयन्नेकपदे भट्टान् य उदात्तः स्वरानिव[5] ॥ १०१ ॥
जितकाशी[३] ततः सूरिर्विजहार धरातले ।
वृन्दं प्रबोधयँस्तेजः—समूहः स महीभुजाम्[6] ॥ १०२ ॥
दत्वा विद्वत्पदं विद्या-विजयायोहिवान् गुरुः ।
मत्पट्टेऽयं श्रियाऽपुष्प[४]-बाणः सन्धानमेष्यति[7] ॥ १०३ ॥
ध्यानाध्यक्षः सुरोऽप्यूचे पट्टोदयनगेऽर्कवत् ।
अयं सुधीस्तपोवार-बाणः सन्धानमेष्यति[8] ॥ १०४ ॥
अथास्ति स्तम्भतीर्थाख्या नगरी स्वैर्महोभरैः ।
स्वर्देशांस्तन्वती व्यस्त-प्रदोष[५]मनुगामिनः[9] ॥ १०५ ॥
तत्रायात् सोत्सवं सूरि-र्भूरितेजाः स शूरवत् ।
श्यामयन् दुर्मतींस्तप्तान् साग्नीनेधानिवानिलः[10] ॥ १०६ ॥
तत्र सोमाग्रजः श्रेष्ठी श्रीमल्लो भर्भरी[६]भंजन् ।
पुण्यश्रियेव पाथोधिर्महानद्या नगापगाः[11] ॥ १०७ ॥
समं सगोत्रैः सोऽन्येद्युः सूरिं व्यज्ञापयत्तराम् ।
ज्ञान-क्रियाभ्यां सर्वेऽनु-गन्तारस्त्वा[७]मँतः परे[12] ॥ १०८ ॥

---

१ 'नायको' हारमध्यमणिः ।

२ 'स्थाष्णूनि' साधकानुमानसहितानि । विपक्षे बाधकतर्कसाधूनि ।

३ 'जित–' जिताहवः ।

४ 'बाणः' श्रिया कान्त्या पुष्पबाणः स्मरः । पुष्पं रागः, बाणः द्वेषः, तद्रहितः—अपुष्पबाणः ।

५ 'व्यस्त–' व्यस्तप्रदोषं यथा स्यात् तथा—यत्र पुरे संध्यासमयो नास्ति ।

६ 'भर्भरी'–भर्भरीशब्दः श्रीपर्यायः औणादिकः । [ है॰ धातुपा॰ ग॰ ९ धा॰ २७ पृ॰ २४१ ]

७ '–त्वा–त्वाम् अनुगन्तारः ।

---

1 मा॰ द्वि॰ स॰ श्लो॰ ९१ चतुर्थः पादः ।

2 मा॰ द्वि॰ स॰ श्लो॰ ९२ चतुर्थः पादः ।

3 मा॰ द्वि॰ स॰ श्लो॰ ९३ चतुर्थः पादः । माघे 'स्थास्नूनि' इति भेदः । व्याकरणरीत्या तु 'स्थाष्णूनि' इति कथं साधु स्यात् ?

4 मा॰ द्वि॰ स॰ श्लो॰ ९४ चतुर्थः पादः ।

5 मा॰ द्वि॰ स॰ श्लो॰ ९५ चतुर्थः पादः ।

6 मा॰ द्वि॰ स॰ श्लो॰ ९६ चतुर्थः पादः । माघे 'महीभृताम्' इति भेदः ।

7 मा॰ द्वि॰ स॰ श्लो॰ ९७ चतुर्थः पादः ।

8 मा॰ द्वि॰ स॰ श्लो॰ ९७ चतुर्थः पादः ।

9 मा॰ द्वि॰ स॰ श्लो॰ ९८ चतुर्थः पादः । माघे—'समनुयायिनः' इति भेदः ।

10 मा॰ द्वि॰ स॰ श्लो॰ ९९ चतुर्थः पादः ।

11 मा॰ द्वि॰ स॰ श्लो॰ १०० चतुर्थः पादः । माघे 'नगापगा' इति एकवचनम् ।

12 मा॰ द्वि॰ स॰ श्लो॰ १०१ चतुर्थः पादः ।

हर्षाच्चिकीर्षुरुद्धर्षमहं तेनान्तिषन्निजः ।
पट्टे स्थाप्योऽतिवृष्ट्यादेः प्रथमेन त्वयारिणा[1] ॥ १०९ ॥
स्वपट्टेऽस्थापयत् सूरिर्विद्यादिविजयं ततः ।
सत्पुत्रे सति नो भारं धर्मराजो विवक्षते[2] ॥ ११० ॥
विजयाद् देव इत्याख्यां सूरयोऽस्य वितेनिरे ।
स्वयं श्रयन्तः कीर्तीर्वा सिन्धवो नगनिम्नगाः[3] ॥ १११ ॥
सूरिणा पददानेन श्रीमल्लेनोत्सवैर्नवैः ।
मोदिताः सुहृदः सद्योऽसुहृदो विमनीकृताः[4] ॥ ११२ ॥
मुनीषुरसभू १६५७ वर्षे शुद्धे राधकृतौ ४ हनि ।
प्राभूत् स सूरिर्भव्यानामिष्टिं कर्तुमलंतराम्[5] ॥ ११३ ॥
आदिदेश प्रभुश्चार्वीं देशनां सप्रथां तथा ।
यथा जेगीयते भव्यैः क्षोभिताम्भोधिवर्णना[6] ॥ ११४ ॥
मार्गणेभ्यो यथाभीष्टं श्रेष्ठिना स्पर्शनं ददे ।
वाचनादेरधश्चक्रे क्षोभिताम्भोधिवर्णना[7] ॥ ११५ ॥
सत्साधर्मिकवात्सल्यं श्रीमल्लेन विनिर्ममे ।
मित्रज्ञातिपरीवार–पितृष्वस्रे प्रतिश्रुतम्[8] ॥ ११६ ॥
न्यस्ताः कुङ्कुमहस्ताश्च सर्वत्र कुसुमस्रजः ।
प्रासरत् स्त्रीजनस्याशीर्वागेका वाग्मिनः सतः[9] ॥ ११७ ॥
तीर्थैकस्थपतिं तीर्थं भेजानस्तं प्रभुं जनः ।
एनसां कोऽभवद् भव्यो नान्तायाऽऽलम्भवानपि[10] ॥ ११८ ॥
बभौ सूरिस्तपःशूरमहसा सहसा महान् ।
कुर्वन्नन्तःस्थितस्याविस्तलं विद्विषदम्भसः[11] ॥ ११९ ॥

---

१ 'विव–' वोढुं वाञ्छति ।
२ '–४हनि' चतुर्थ्याम् ।
३ 'स्पर्शनं' दानम् ।
४ '–ष्वस्रे' पितृष्वसुः उपलक्षणेन सर्वे संबन्धिनः ।
५ 'प्रतिश्रुतम्' प्रतिज्ञातमिव ।
६ 'तीर्थं–' "तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रा-ऽवतारयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० २१३ ]
७–'स्थपतिम्' "अपत्येऽधिपतौ तक्षिण स्थपतिर्निचये क्षये" इति विश्वः [ विश्वलो० श्लो० १८५ त-तृतीय० ]–[ है० अने० सं० कां० ३ श्लो० ३०० ]
८ '–ऽऽलम्भ–' आरम्भवान् ।

---

1 मा० द्वि० स० श्लो० १०२ चतुर्थः पादः ।
2 मा० द्वि० स० श्लो० १०३ चतुर्थः पादः ।
3 मा० द्वि० स० श्लो० १०४ चतुर्थः पादः ।
4 मा० द्वि० स० श्लो० १०५ चतुर्थः पादः ।
5 मा० द्वि० स० श्लो० १०६ चतुर्थः पादः । माघे 'इष्टं कर्तुम्' इति भेदः ।
6 मा० द्वि० स० श्लो० १०७ चतुर्थः पादः । माघे 'क्षुभिताम्भोधिवर्णना' इति पाठभेदः ।
7 मा० द्वि० स० श्लो० १०७ चतुर्थः पादः ।
8 मा० द्वि० स० श्लो० १०८ चतुर्थः पादः ।
9 मा० द्वि० स० श्लो० १०९ चतुर्थः पादः ।
10 मा० द्वि० स० श्लो० ११० चतुर्थः पादः ।
11 मा० द्वि० स० श्लो० १११ चतुर्थः पादः ।

अनुत्सूत्रपदन्यासा सद्वृत्तिः सनिबन्धना ।
राजनीतिः सूरिराजः शब्दविद्येव दिद्युते[1] ॥ १२० ॥
अजातदोषैर्दोषज्ञैः कनकाद्रिजयादिकैः ।
विनेयैरस्फुरत् सूरिस्तारकैरिव चन्द्रमाः[2] ॥ १२१ ॥
ख्याताः कनकविजया लावण्यविजयाः परे ।
वाचकाः श्रीप्रभोर्हृष्टाः शासनैः सामवायिकाः[3] ॥ १२२ ॥
अन्यदाऽऽजूहवत् सूरीन् श्रीजहांगीरसाह्वयः ।
उपेयिवांसि कर्तारस्तद्यशांस्यधिकान्यथ[4] ॥ १२३ ॥
सोत्सवं सूरिरप्येतत् पुरीमजातशात्रवीम् ।
श्रियं श्रयन् श्राद्धजनैः प्राप्नोति स्म परिष्कृताम्[5] ॥ १२४ ॥
तथाऽवादि नृपपृष्टैर्धर्मार्थं सूरिभिर्वचः ।
राजन्यकान्युपायज्ञैर्यथा मुमुदिरेतराम्[6] ॥ १२५ ॥
अथ तं भूभृदाऽऽचख्यौ हृष्टस्तत्तपसा विभो ! ।
विश्वानि चक्रिरे श्लोकैरेकार्थानि चरैस्तव[7] ॥ १२६ ॥
महातपा इति क्षोणी-भर्ताऽस्याख्यां तदाभ्यधात् ।
ततः कुपक्षाः क्षीणाशाः स्वयं मत्सरिणः परे[8] ॥ १२७ ॥
य इहात्मविदो विपक्षमध्ये सहसं वृद्धियुजोऽपि भूभुजः स्युः ।
नलिनैर्मलिनैरिवाकराद् वै पृथगस्माद्चिरेण भाविता तैः[9] ॥ १२८ ॥
मुनिपतौ निपतौल्यभृति क्षितौ जनिभृतो निभृतोऽग्रभवाम्बुधौ ।
घन इवोदयमाश्रयति स्वयं शलभतां लभतामसुहृद्गणः[10] ॥ १२९ ॥

---

१ '–स्फुरत्' "स्फुर दीप्ति–ऐश्वर्ययोः" धातुः ।

२ 'य इहात्म–' इत्यादि । 'इह' लोके, 'आत्मविदः' साधोः, 'भूभुजः' राज्ञः श्रीसूरेः, 'ये' नराः, 'विपक्षमध्ये' संभूय इति शेषः, 'पृथग्' 'स्युः' 'तैः' 'अचिरेण' 'मलिनैः' भाविता । 'कस्मात् कैरिव ?' 'आकरात्' पद्माकरात्, पृथग्भूतैः 'नलिनैः' यथा मलिनैर्भूयते । किम्भूताः भूभुजः ? 'सहसम्' सोल्लासं यथा स्यात् तथा । यद्वा किम्भूताः ये ? नराः 'सहसम्' सोल्लासं वृद्धिभाजोऽपि ये 'अस्माद्' गुरोरेव वृद्धिं प्राप्ताः पृथग्भूतास्ते नराः सरसः पद्मा इव शीघ्रं मलिना विपक्षा भविष्यन्ति इति भावः ।

३–'निप'–निपो घटः ।

४ 'शलभताम्' शरभताम् ।

---

1 मा० द्वि० स० श्लो० ११२ श्लोकस्य समग्रं पूर्वार्धम्, अत्रापि पूर्वार्धम् । माघे 'सन्निबन्धना' इति भेदः । अस्यैव श्लोकस्य माघे 'शब्दविद्येव नो भाति' इति तृतीयं चरणम् ।

2 मा० द्वि० स० श्लो० ११३ प्रथमचरणम् अत्रापि प्रथमचरणतया न्यस्तम् । माघे 'अज्ञातदोषै–' इति भेदः ।

3 मा० द्वि० स० श्लो० ११३ चतुर्थचरणम् अत्र चतुर्थचरणम् ।

4 मा० द्वि० स० श्लो० ११४ प्रथमचरणम् अत्र तृतीयचरणतया ।

5 मा० द्वि० स० श्लो० ११४ द्वितीयचरणम् अत्र द्वितीयचरणतया । माघे 'पुरीमाजातशात्रवीम्' इति पाठभेदः ।

6 मा० द्वि० स० श्लो० ११४ तृतीयचरणम् अत्र तृतीयचरणतया ।

7 मा० द्वि० स० श्लो० ११४ चतुर्थचरणम् अत्र चतुर्थचरणतया ।

8 मा० द्वि० स० श्लो० ११५ चतुर्थचरणम् ।

9 मा० द्वि० स० श्लो० ११६ तृतीयचरणं विहाय अत्र त्रीण्यपि चरणानि । माघे 'सह संवृद्धियुजोऽपि' इति पदविभागः ।

10 मा० द्वि० स० श्लो० ११७ चतुर्थपादः ।

कृतकुवलयमोदस्वीयपादप्रसादैस्त्रिजगदपि पुनानः शम्भुसृष्टप्रतिष्ठः ।
व्यहरदवनिपीठेऽप्यैन्दवीं[1] नीतिमङ्कस्थलनियतनिषण्णश्रीः श्रुतां शुश्रुवान् सः[1] ॥ १३० ॥

॥ इति महोपाध्यायश्रीमेघविजयगणिविरचिते श्रीदेवानन्दकाव्ये दिव्यप्रभापरनाम्नि ऐङ्काराङ्के माघ-समस्यायां नायकाभ्युदयवर्णननामा द्वितीयः सर्गः ॥ २ ॥

---

5

# तृतीयः सर्गः ।

कौ[2] बेरदिग्भागमपास्यमा गेमागस्त्यमुष्णांशुरिवावतीर्णः ।
अपेतयुद् धाभिनि वेशसौम्यो हरिर्हरिप्रस्थमथ प्रतस्थे[2] ॥ १ ॥

जगत्पवित्रैरपि तन्नपादैः स्प्रष्टुं जगत्पूज्यमयुज्यताऽऽर्कैः[3] ।
यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभरांबभूवे[3] ॥ २ ॥

---

१ '-ऐन्दवीं नीतिमङ्कस्थ-' ऐन्दवीं नीतिम्-अङ्गीकृतवान् । "अङ्को भूषा-रूपक-लक्ष्मसु" [ है० अने० सं० कां० २ श्लो० १ ] इति अनेकार्थः ।

२ [ कौ । बेरदिग्भागम् । अपास्यमा । गेम् । आगस्त्यम् । अपेतयुद् । धाभिनि । वेशसौम्यो । इति पदविभागः ] [ अर्थ-श्चैषामेवम् ]-स 'हरिः' इन्द्रः स्वामी, 'हरिप्रस्थम्' पर्वततटं प्रति प्रतस्थे । किम्भूतं [ हरिप्रस्थम् ? ]

'बेरदिग्भागम्' उश्च आ च वा, ताभ्यां युक्ता इश्च लश्च दश्च इ-ल-दाः ते सन्ति अस्मिन् इति [ वा+इलद+इन्-वेलदी ] वेलदी स चासौ 'ग्' गकारः, तेन भाति ईदृशः अः अकारः तम् गच्छति प्राप्नोति तत् वेलदिग्भागम्-इलादुगम्-इत्यर्थः ।

पुनः किम्भूतम् [ इलादुगम् ? ] 'गेम्' 'रम्' रकारं गच्छति गेम्-इलादुर्गनाम्ना प्रतीतम् ।

'अपास्यमा' अम् अर्हन्तम्-सिद्धम्, पाति रक्षति-अपः आस्यमा मुखचन्द्रो यस्य । मास्-सकारान्तः चन्द्रवाची ।

'अपेतयुद् अश्च पा च अपौ तयोः ईः लक्ष्मीः यस्य ईदृक् तः तकारः तेन यौति मिश्रीभवति-अपेतयुत् ।

'धाभिनि' न विद्यते भीः यस्य अभिः, स चासौ नीः नायकः, धो धनदः-तद्वद् अभिनीर्यत्र तद् धाभिनि हरिप्रस्थम् ।

'वेशसौम्यो' वा अथवा ईशश्चासौ सौम्यश्च ।

पक्षे 'बेरदिग्भागम्' बेरं शरीरम्, तस्य दिग् देशः-जन्मभूमिः, तत्र भान्ति ईदृशा अगाः पर्वतास्तरवो वा यत्र-[ बेर+दिग्+भ+अग ] बेरदिग्भागम् ।

'आगस्त्यम्' आगः अपराधः अन्यायः तं त्यजति इति 'ड' प्रत्यये आगस्त्यम् । सौम्यः हरिः मुनीन्द्रः ।

३ [ आर्कैः । तन्नपादैः । आतपत्रम् । बृहत्पार्वणचन्द्रचारु । इति विभागः ]

'आर्कैः' अरीणां समूहः आरम्, तत् करोति आरयति णिचि क्विपि आर्, स एव आर्कैः-प्रतिपक्षसंघः ।

'तन्नपादैः' स एव भगवान् नपादः पूज्यपादः येषां तैः-तन्न-पादैः । "नकारो जिन-पूज्ययोः" इति कोषः [ एकाक्षरकोश-श्लो० २२-२३ ] "नो नाथेऽपि" इति विश्वशम्भुः ।

'जगत्' इति श्लोकस्य अखिलार्थश्चायम्-

आर्कैः प्रतिपक्षसंघः स्वयम् अयुज्यत-कर्मकर्तरि रूपम् । तेन कारणेन तस्य आतपत्रं मुनिगणः बिभरांबभूवे-तस्य गच्छः संभृतः, कैः जगत्पवित्रैर्मुनिभिः, किं० मुनिभिः-स एव भगवान् नपादः पूज्यपादो येषां तैः-तन्नपादैः । यद्वा परगणानां नपादाः पूज्यपादास्तैः । किं कर्तुम् ? जगत्पूज्यं स्प्रष्टुम्-वन्दितुम् ।

'आतपत्रम्' तपं त्रायन्ते तपत्राः मुनयः, आवत् तपत्रा यत्र तत् आतपत्रं गणः कुलं वा । यद्वा तपाऽभावः अतपम् ततः त्रस्यन्ति 'ड' प्रत्यये अतपत्रा मुनयः तेषां समूहः आतपत्रम् । किम्भूतम् ?

'बृहत्पार्वणचन्द्रचारु' बृहन्ति पार्वणानि धर्मकार्याणि येषां ते चन्द्राः चन्द्रशाखिनो मुनयः तैः रम्यम् । बृहत् पार्वणचन्द्र-चारु-पार्वणचन्द्रे चारु निर्मलम् ।

---

1 मा० द्वि० स० श्लो० ११८ चतुर्थपादः । माघे '-निषण्णश्रीश्रु-' इति भेदः ।

2 मा० तृ० स० १ श्लोकः, समस्तोऽपि श्लोकः केवलमत्र पदच्छेदभेदः ।

3 मा० तृ० स० २ श्लोकः अखण्डोऽपि, केवलं पदविभागे भेदः ।

मृणा लसूत्रामलमन्तरेणस्थितश्चलचामरयोर्द्वयं सः ।
भेजेऽभितः पा तु कसिद्धसिन्धोरभूतपूर्वां श्रियमम्बुराशेः[1] ॥ ३ ॥
चित्राभिरस्योपरि मौलिभाजां भाभिर्मणीनामनणीयसीभिः ।
नीराजनेवाऽजनि सज्जनौघैर्विनिर्मिते कर्मणि पूजनायाः[2] ॥ ४ ॥
पदे पदे नम्रनृपावतंसप्रत्युप्तगारुत्मतरत्नभासा ।
भर्तुर्विहर्तुश्चरणाम्बुयोनेर्यवाङ्कुरश्रीरनुनीयते स्म[3] ॥ ५ ॥
गुरुश्चलंश्चारुचरित्रपात्रैः परीवृतो नीवृदुपासकैश्च ।
बंहीयसा दीप्तिवितानकेन जिगाय गङ्गाऽर्कसुताप्रसङ्गम्[4] ॥ ६ ॥
कृपालतामङ्कुरयन् मनोन्तश्चचाल तेषामपि भूभुजां सः ।
यैर्बर्हिरूपं विदधेऽङ्गभाजां विक्षोभजास्रुक्लपितैरिवाऽसौ[5] ॥ ७ ॥
उभौ यदि व्योम्नि पृथक्प्रवाहावमर्त्यसिन्धोर्मिलितौ भवेताम् ।
तेनोपमीयेत विभोः प्रवेशे सार्थानुगाभ्युद्गतसङ्घयोगः[6] ॥ ८ ॥
पुरः प्रवेशे दिवसस्य साक्षाद् दध्रे मणिर्दीधितिदीपिताशः ।
माङ्गल्यमुक्तास्रजि नायकत्वं मूर्ध्नि ध्वजस्यार्जुनकुम्भशोभाम्[7] ॥ ९ ॥
मुक्तामयं पादयुगे नतानां भाति स्म दामाऽऽप्रपदीनमस्य ।
अङ्गुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चैः प्रेम्णा पयस्तत्परिपावनाय[8] ॥ १० ॥
पुरन्दरेणापि पुरः क्षमीन्दोः कल्याणनाम्नाऽभिगमाय चक्रे ।
गजव्रजो राजिकुथैः पयोजैर्यमस्वसुश्चित्र इवोद्वाहः[9] ॥ ११ ॥
प्रसाधितस्याथ मधुद्विषोऽभूत् लक्ष्मीः सहक्षा करिणां कुलस्य ।

---

१ मृणा । लसूत्रा । आम । लम् । अन्तर्-एणस्थितः । च । आम । रयोर्द्वयम् । अभितः । पा । कसिद्धसिन्धोः । अम्बुराशेः । इति पदविभागः ]

मृणा हिंसा, लम् लोपनम्, आम जगाम-प्राप । [ किम्भूता मृणा ? लसूत्रा-लोपनं सूत्रं यस्याः सा-लोपनसूत्रा-लोपकारिणी-सर्वसंहारिणी ] "अम द्रम हम्म मीमृ गम्लं गतौ"

'अन्तर् एणस्थितः' अन्तर् चित्ते एणस्थः चन्द्रः शान्तिजिनो वा जातः अस्मिन् इति एणस्थितः ।

'च आम रयोर्द्वयम्' आम प्राप । रयोः लयो-लक्ष्म्योः, द्वयम्-युगलम् । "लं लोपनम्" [ एकाक्षरकोश-श्लो० २९-३१ ] "ला लक्ष्मीः" इति च विश्वशम्भुः ।

'अभितः' भं भयम् जातं यस्यासौ भितः-न भितः अभितः ।

'पा' स्वामी ।

'कसिद्धसिन्धोः' कानाम्-आत्मनां सिद्धः सिन्धुः संसाररूपो यस्मात् स तस्य ।

२ अम्बुराशेः सागरपक्षस्य-[ सागरान्तमुनिशब्दप्रसिद्धस्य यथा 'चन्द्रसागरमुनि' इत्यादिकस्य ] पा स्वामी अभूतपूर्वां श्रियम्-अश्रियं भेजे ।

३ 'असौ' करवाले ।

---

1 मा० तृ० स० ३ श्लोकः अक्षरशः अत्र न्यस्तः पदविभक्तिरन्यथा । माघे तु '-ऽभूतपूर्वां रुचमम्बुराशेः' इति भेदः ।

2 मा० तृ० स० श्लोक ४, अत्र अस्य श्लोकस्य पूर्वार्धं पूर्वार्धतया उपन्यस्तम् ।

3 मा० तृ० स० श्लो० ५ द्वितीयचरणमत्र द्वितीयतया ।

4 मा० तृ० स० श्लो० ६, अस्य तृतीयचरणमत्र तृतीयचरणतया ।

5 मा० तृ० स० श्लो० ७ चतुर्थचरणम् ।

6 मा० तृ० स० श्लो० ८ प्रथमपादः अत्र प्रथमपादतया । अन्यदपि साम्यं दृश्यते ।

7 मा० तृ० स० श्लो० ९ द्वितीयचरणमत्र द्वितीयचरणतया ।

8 मा० तृ० स० श्लो० १० द्वितीय-तृतीयचरणौ अत्रापि तथैव ।

9 मा० तृ० स० श्लो० ११ चतुर्थः पादः । "-श्चित्र इवोद्भारः" इति पाठभेदो माघे ।

वियत्प्रयुक्तक्रमपुष्करस्य वराहदेहेन महीं बिभीर्षोः[1] ॥ १२ ॥
अनन्तनागाभरणस्य चाग्रस्थलस्थितश्रीललनस्य तस्य ।
न पार्वती श्रीर्बिभिदे भवाद्धा विष्णोरिवागात् करिणां व्रजस्य[2] ॥ १३ ॥
प्रवृत्तिसिन्धोः पुलिने ललन्त्या भृङ्गावलेस्ताण्डवमण्डपौ वं ।
प्रकाशकार्कश्यगुणौ दधानाः कुम्भाविभाश्चेलुरभि क्षमीन्द्रम्[3] ॥ १४ ॥
ते नागजाऽभ्यक्तवराङ्गभागा नागा विरेजुश्चलिता इवागाः ।
येषां गतेर्नागपतिः शुचेऽभूद् नितान्तमाक्रान्त इवाङ्गनानाम्[4] ॥ १५ ॥
यां यां प्रियः प्रैक्षत कातराक्षीं तत्कुम्भदृश्वा स्तनसाम्यशंसी ।
सा सा ह्रिया नम्रमुखी सुमुक्तास्रजो मणिं दर्शयति स्म तस्मै[5] ॥ १६ ॥
तस्याऽतसीसूनसमानभासो गर्जत्पयोदेन समस्य मूर्त्या ।
न हास्तिकस्योज्ज्वलकिङ्किणीभिर्बलाहकश्रेणिरुचिर्न चक्रे[6] ॥ १७ ॥
कुम्भस्थलस्थापितरौप्यकुम्भ-भ्राम्यन्मयूखावलिमण्डलेन ।
गौराङ्गगर्वाद् गजयूथनाथा मदेन शक्रद्विपमन्वकार्षुः[7] ॥ १८ ॥
आधोरणैः स्वाङ्गविभूषणान्तः-सङ्क्रान्तकान्ताचलहक्कसहस्रैः ।
नित्यं हरेः सन्निहिता निकामं सहस्रनेत्री व्यभिचार्यते स्म[8] ॥ १९ ॥
प्रफुल्लसप्तच्छदसन्धिगन्धिरनन्यसाधारणतां दधानः ।
चकार लाजोत्किरणं किमुच्चैर्गजव्रजः पुष्करसीकरेण[9] ॥ २० ॥
स्पृशंश्च नासाऽवयवैर्धरित्रीं व्यूहो द्विपानां धरणीधवस्य ।
राज्यश्रियो भद्र इति प्रतीतेर्नाम्नापि तस्यैव स नन्दकोऽभूत्[10] ॥ २१ ॥
न नीतमन्येन नतिं कदाचिद् धराधवः सादिबलं बलीयः ।
बलाङ्गकोत्फुल्लवनश्रि सार्द्धमादाय सूरीन्दुमभिप्रतस्थे[11] ॥ २२ ॥
बिभर्ति यामैन्दवबिम्बभासाऽकृष्णार्णवाभ्यर्णचरैकहंसः ।

---

१–'पुष्करस्य' कृष्णपक्षे चरणकमलम् । पक्षे पुष्करं शुण्डाग्रम् ।

२–'नागाभरणस्य' कृष्णपक्षे अनन्तः शेषनागः । हरपक्षे बहुसर्पभूषणस्य । नागाः करिणोऽपि ।

३–'ललनस्य' ललना स्त्री हस्तिनी च ।
"स्फुटिक-मरकतश्रीहारिणोः प्रीतियोगात्
तदवतु वपुरेकं काम-कंसद्विषोर्वः ।
भवति गिरिसुताया नित्यमम्भोधिजायाः
सदृशमहसि कण्ठे यत्र सीमाविवादः" ॥ [ अयं श्लोकः, 'अनन्तनागा'-इत्यादिश्लोकभावेन साम्यं बिभर्ति ]

४ 'व' उपमायाम्

५–'मुक्तास्रजो' मुक्तास्रग्दर्शनात् मम स्तनशोभानिर्जितौ कुम्भौ मुक्तादण्डं ददतुः-मुक्ताः स्तनयोराभरणानि बभूवुः इति भावः ।

६–'त्फुल्लवन–' बसन्तेन उत्फुल्लं यद् वनम् तद्वत् श्रीर्यस्य तत् ।

७ '–न्दवबिम्ब–' चन्द्रभासा उज्ज्वलो यः अर्णवः ।

---

1 मा० तृ० स० श्लो० १२ प्रथमपादोऽत्र प्रथमपादतया ।
2 मा० तृ० स० श्लो० १३ द्वितीयपादो द्वितीयपादतया ।
3 मा० तृ० स० श्लो० १४ तृतीयपादोऽत्र तृतीयपादतया ।
4 मा० तृ० स० श्लो० १५ चतुर्थपादः ।
5 मा० तृ० स० श्लो० १६ प्रथमपादोऽत्र प्रथमपादतया । माघे 'कातराक्षी' इति भेदः । अत्रत्यं तृतीयचरणमपि १६ श्लोकगतद्वितीयचरणेन सह साम्यं बिभर्ति ।
6 मा० तृ० स० श्लो० १७, अस्य प्रथमपादोऽत्र प्रथमपादतया ।
7 मा० तृ० स० श्लो० १७, द्वितीयपादोऽत्र द्वितीयपादतया ।
8 मा० तृ० स० श्लो० १८, अस्य तृतीयचरणमत्र तृतीयतया ।
9 मा० तृ० स० श्लो० १९ द्वितीयपादो द्वितीयपादतया ।
10 मा० तृ० स० श्लो० १९ चतुर्थचरणमत्र चतुर्थतया ।
11 मा० तृ० स० श्लो० २०, अस्य प्रथमचरणमत्र प्रथमतया ।

स सूरिराट् तामुदुवाह शोभामभ्यापतत्सादिबलान्तिकस्थः[1] ॥ २३ ॥
विवन्दिषुः सूरिपदारविन्दं महीधवः सैन्धव[१]मारुरोह ।
महारथः पुष्यरथं रथाङ्गी[२] साक्षादिवोक्षाणमिव त्रिनेत्रः[2] ॥ २४ ॥
नृपेऽधिरूढे क्रमतः प्लुतानि चाकार धाराचतुरस्तुरङ्गः ।
सव्याक्षिदृष्टो हरिणा विहायस्तलं विविक्षन्निव पन्नगारिः[3] ॥ २५ ॥
यियासतस्तस्य महीध्ररन्ध्रभिदां पटीयान् पटहप्रणादः ।
गन्धर्वराजा[३]मधिमण्डलाङ्कं प्रोत्साहयामास नटप्रवृत्तिम्[4] ॥ २६ ॥
अजन्यजर्यं[४] नृपवाजिराजां धत्रीं धरित्र्याः फणिना ततोऽधः ।
तत्क्लान्तिमेते चलपुच्छवातैरुत्क्षिप्य पांशुं शमयाम्बभूवुः[5] ॥ २७ ॥
गजैः सवीतै[५]स्तुरगैर्विनीतैर्युतानि संसक्तभटाऽयुतानि ।
क्रियाफलानीव सुनीतिभाजं बलानि भूनायकमन्वयुस्तम्[6] ॥ २८ ॥
जनैरहंपूर्विकया प्रणुन्नधुरीणभावात् पतिते सुवर्णे ।
पिष्टेऽरिणां[६] रेणुकणाः सुवर्णक्षोदद्युतश्चुक्षुदिरे रथौघैः[7] ॥ २९ ॥
न लङ्घयामास महाजनानां शिरांसि रेणुः करिणां मदार्द्रः ।
यतीशितुः किन्तु पदप्रसादाद् धरातलस्योद्धुषणं[७] शशंस[8] ॥ ३० ॥
नतत्रिको[८]त्साहरसेन वाहा मुहुर्यदुच्चिक्षिपुरग्रपादौ ।
विरेजुरुच्चैःश्रवसं तदुच्चैर्विजेतुकामा इव सम्मुखीने[9] ॥ ३१ ॥
क्रमात् पुरानिर्मितसख्यसौख्यान् सह[९] प्रवृद्धान् भुवनप्रसिद्धान् ।
प्रक्रीडितान् रेणुभिरेत्य तूर्णं ननाम सूरीनवनीदिनेशः[10] ॥ ३२ ॥
चतुर्विधः सङ्घजनोऽप्यनंसीदपूर्ववत् तानपि पूर्वदृष्टान् ।
अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति[11] ॥ ३३ ॥
उपेयुषो वर्त्म निरन्तराभिरस्तोकलोकस्य नतिक्रियाभिः ।
प्रतीक्ष्यमाणोऽथ गुरुः सुधर्मलाभाशिषा पूर्जनमभ्यनन्दत्[12] ॥ ३४ ॥

---

१ 'सैन्धव–' अत्रायं भावः–पूर्वं राजा गजेऽधिरूढः पश्चात् गुरौ दूराद् दृष्टे विनयाद् अश्वेऽधिरूढः ।
२ 'रथाङ्गी' चक्री ।
३ 'गन्धर्वराजाम्' अश्वरत्नानाम् ।
४ 'अजर्यम्' सौहार्दम्–अजनि ।
५–'वीतै'–"यातमङ्कुशवारणम् । निषादिनां पादकर्म यतं वीतं तु तद् द्वयम्" ॥ इति कोषः ।
६ 'अरिणा' चक्रेण ।
७–'द्धुषणं' रोमोद्गमम् ।
८ '–त्रिको–' "अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम्" ।
९ 'सह' इति सर्वत्र योगः–सह प्रवृद्धान्, सह भुवनप्रसिद्धान्, सह रेणुप्रक्रीडितान् ।

---

1 मा० तृ० स० श्लो० २१ द्वितीयपादो द्वितीयतया ।
2 मा० तृ० स० श्लो० २२ तृतीयपादोऽत्र तृतीयतया ।
3 मा० तृ० स० श्लो० २३ चतुर्थपादः ।
4 मा० तृ० स० श्लो० २४ अविकलं पूर्वार्धं पूर्वार्धतया । माघे '–रन्ध्रभिदापटीयान्' इति भेदः ।
5 मा० तृ० स० श्लो० २५ द्वितीयपादोऽत्र द्वितीयतया ।
6 मा० तृ० स० श्लो० २६ तृतीयचरणमविकलं तृतीयचरणतया, चतुर्थं तु माघे 'सैन्यानि सोमान्वयमन्वयुस्तम्' इति ।
7 मा० तृ० स० श्लो० २७ चतुर्थपादः ।
8 मा० तृ० स० श्लो० २८ प्रथमपादोऽत्रापि प्रथमपादः ।
9 मा० तृ० स० श्लो० २९ द्वितीयपादो द्वितीयतया । माघे '–रग्रपादान्' इति ।
10 मा० तृ० स० श्लो० ३० तृतीयचरणमत्र तृतीयतया ।
11 मा० तृ० स० श्लो० ३१ उत्तरार्धमत्राविकलमुत्तरार्धतया ।
12 मा० तृ० स० श्लो० ३२ प्रथमचरणमत्र प्रथमचरणतया ।

परिष्कृतत्वेन दिशः पिशङ्गीर्या कुर्वती काञ्चनभूमिभासा ।
दिनोदयस्य श्रियमाश्रितानां यतीश्वराणां पुरतः शशंस[1] ॥ ३५ ॥
प्रविश्य तस्यां पुरि पौरनन्दी गणाग्रणीस्तां वसतिं पुपाव ।
अनिर्विदा[1] या विदधे विधात्रा भुवो विभूषेव भुविर्जयाय[2] ॥ ३६ ॥
पुरी सनाथा प्रभुणा जनानां गतागतैर्वृद्धिमतीव चक्रे ।
सनेमिनीं[3] द्वारवतीं सखीं तां छायेव या स्वर्जलधेर्जलेषु[4] ॥ ३७ ॥
रथाङ्गभर्त्रेऽभिनवं वराय हरिर्यथा द्वारवतीं ससर्ज ।
तथैव मन्ये गुरवे ध्रुवेण विनिर्मिता नर्मवती पुरीयम्[4] ॥ ३८ ॥
पयोधिना[5] तुङ्गतरङ्गरङ्गच्छटोच्छलच्छङ्खकुलाकुलेन ।
पुरी दधौ साम्यमहो महौघे तदाभिनृत्यत्तुरगिप्रवृत्त्या[5] ॥ ३९ ॥
निनंसया सङ्गतपौरनारीस्नानैस्तडागोऽत्र तदा तरङ्गैः ।
लोलैरलोलद्युतिभाञ्जि मुष्णन् रत्नानि रत्नाकरतां जगाहे[6] ॥ ४० ॥
हल्लीसकैः प्राप्तपरिश्रमाणामुपेयुषीणां पुलिनेऽङ्गनानाम् ।
सरोऽविलम्बादिव मानमत्र विस्तारयामास तरङ्गहस्तैः[7] ॥ ४१ ॥
यत्सालमुत्तुङ्गतया विजेतुं शशाक न स्वःप्रभुवैजयन्तः ।
तत्र न्यवात्सीन्नरनाथमन्त्री वणिक्षु सभ्यः सहजूर्महेभ्यः[8] ॥ ४२ ॥
चतुःसमामर्दविसन्धगन्धः[6] प्राकारभित्त्या सहसा[7] निषिद्धः ।
निर्गत्य यत्सौधगवाक्षमार्गे प्रादुर्विचक्रे चरितं गृहस्य[9] ॥ ४३ ॥
अथान्यदासौ गुरुमाह मन्ये त्वदुद्भवादेव शिवाय देवैः ।
आराधितोऽद्धा[8] मनुरप्सरोभिः प्रसादितोऽसूत कुलाग्रिमं ते[10] ॥ ४४ ॥
त्वत्पूर्वजाः केचिदिहैव पूर्वं जातास्त्रिवर्गाचरणैः सुराच्याः ।
यद्योषितः स्फाटिकसौधमूर्ध्नि नभोगता देव्य इव व्यराजन्[11] ॥ ४५ ॥
कान्तेन्दुकान्तोपलकुट्टिमेषु त्वत्पूर्वजानामिह मन्दिरेषु ।

---

१ 'अनिर्विदा' या पुरी निर्वेदः स्वावमाननम् तद्रहितेन सोत्साहेन कृता ।

२ 'भुविर्'–स्वर्ग–

३ '–नेमि–' समासान्तविधेः अनित्यत्वाद् न कप् ।

४ '–जलधेर्जलेषु' या जलधेर्जलेषु स्वः स्वर्गस्य छाया इव प्रतिबिम्बमिव अस्ति तां द्वारवतीं सखीं चक्रे–लक्षणया तुल्या आसीत् ।

५ 'पयोधिना' समुद्रेण समम् ।

६ 'चतुःसमा'–''कर्पूरा-ऽगरु-कक्कोल-कुङ्कुमैस्तु चतुःसमम्''

७ 'सहसा' इत्यव्ययं नानार्थे अव्ययानामनन्तार्थत्वात् । गन्धः कर्ता ।

८ 'आराधितोऽद्धा' देवैः आराधितः अप्सरोभिः प्रसादितः । अद्धा निश्चितम् ।

---

1 मा० तृ० स० श्लो० ३३ द्वितीयचरणमत्र द्वितीयचरणतया । माघे '–नवप्रभासा' इति ।

2 मा० तृ० स० श्लो० ३४ तृतीयचरणमत्र तृतीयचरणतया ।

3 मा० तृ० स० श्लो० ३५ चतुर्थपादः ।

4 मा० तृ० स० श्लो० ३६ प्रथमचरणमत्र प्रथमतया ।

5 मा० तृ० स० श्लो० ३७ द्वितीयपादो द्वितीयतया ।

6 मा० तृ० स० श्लो० ३८ उत्तरार्धमत्र अविकलमुत्तरार्धतया, केवलं माघीय 'अवाप' स्थाने अत्र 'जगाहे' क्रिया ।

7 मा० तृ० स० श्लो० ३९ चतुर्थपादः ।

8 मा० तृ० स० श्लो० ४० प्रथमचरणमत्र प्रथमतया । माघे 'यच्छाल–' इति भेदः ।

9 मा० तृ० स० श्लो० ४१ द्वितीयपादो द्वितीयतया ।

10 मा० तृ० स० श्लो० ४२ तृतीयपादो तृतीयतया ।

11 मा० तृ० स० श्लो० ४३ चतुर्थपादः ।

छाया विरेजुर्विलसद्वधूनां शरीरभाजः कमला इवैषाम्[1] ॥ ४६ ॥
तवागमादेव ततो विशेषाज्जालागताभ्योऽधिगृहं गृहिण्यः ।
इहोच्छलद्भूरिसुमावलीभ्यः प्रकाशमभ्यस्य दृशोर्दिशन्ति[2] ॥ ४७ ॥
त्वद्दृष्टिसम्भावनयाश्रयालीं पीयूषयूषात्मतयेव शुभ्राम् ।
चक्रुर्युवानः प्रतिबिम्बिताङ्गाः स्ववेषवर्णैर्विविधामिहाद्य[3] ॥ ४८ ॥
अथात्र शिष्ये स्वपदप्रतिष्ठां प्रणीय नः प्रीणय चित्तनिष्ठाम् ।
महः क्रियान्मेऽस्य गृहे स्वबिम्बैः[१] सजीवचित्रा इव रत्नभित्तीः[4] ॥ ४९ ॥
गुरोर्गिरः श्रुत्युदितप्रसक्तेस्तदा स्मिता पाण्डुकपोलकाभ्याम् ।
बिम्बे सवर्णे[२]ऽपि सुवर्णलिप्त-स्तम्भेषु भेजे नवदर्पणश्रीः[5] ॥ ५० ॥
शुकाङ्ग[३]नीलोत्पलनिर्मितानां स्रजां विलेसुः प्रतिसद्म राज्यः ।
कटाक्षमाला इव पर्वलक्ष्म्यास्तथेति साधु प्रभुणाऽभ्युपेते[6] ॥ ५१ ॥
मणीमयेष्वङ्गणकेषु धाम्नां लिप्तेषु भासा गृहदेहलीनाम् ।
अन्तःस्थिताऽपीन्दुमुखी तदाऽऽसीद्[४] अभ्यागतेवार्थिजनाय दातुम्[7] ॥ ५२ ॥
तत्रोत्सवस्य श्रवणामृतेन नाभूत् पुरी सा श्रवणेन तूर्णम् ।
यस्यामलिन्देषु न चक्रुरेव लोकाः स्वधाम्नां प्रतिकर्म नर्म[8] ॥ ५३ ॥
अस्याः स्वसेवास्ति पुरी द्वितीया पार्श्वेऽद्वितीया खलु साबलीति ।
न वेद यस्यां मणिकुट्टिमत्वात् मुग्धाङ्गना गोमयगोमुखानि[9] ॥ ५४ ॥
गोपानसीषु क्षणमास्थितानां दिदृक्षयाऽभ्येत्य दिवो वधूनाम् ।
जालेषु लीलालसमानुषीणां मुखेन सख्यं समुदेत्यमुष्याम्[10] ॥ ५५ ॥
नृत्यप्रलोभाद् वलभीस्थितानामालम्बिभिश्चन्द्रकिणां कलापैः ।
जातातपत्रप्रभया प्रभुत्वं या व्यञ्जयामास पुरी पुरीणाम्[11] ॥ ५६ ॥
स्फुरत्करैरप्यकरैर्विलास-व्यासक्तरामैरपि चाऽविरामैः ।
रेजे विचित्रैरपि या सचित्रैर्गृहैर्विहारैरपि हारिहारैः[12] ॥ ५७ ॥
अथैत्य तस्यां[५] पुरी सूरिमन्त्र-दिध्यासयाऽधत्त स धारणां ताम् ।
अन्तर्निलीनेन्द्रियवृत्तिरेनं यस्यां जनः कृत्रिममेव मेने[13] ॥ ५८ ॥

---

१ 'स्वबिम्बैः' स्वेषां सगोत्राणां बिम्बैः संक्रान्तैः ।
२ 'सवर्णे–' गुरोः सुवर्णवर्णत्वात् बिम्बे सवर्णे समानेऽपि स्मितेन ईषत्पाण्डुकपोलकाभ्यां पाण्डुत्वात् सुवर्णलिप्तस्तम्भेषु नवदर्पणश्रीर्भेजे ।
३ 'शुकाङ्ग–' शुकाङ्गवन्नीलानि यानि उत्पलानि ।
४ 'तदाऽऽसीद–' तदा तस्मिन् समये आसीत् ।
५ 'यस्याम्' धारणायाम् ।

---

1 मा० तृ० स० श्लो० ४४ प्रथमपादः प्रथमतया ।
2 मा० तृ० स० श्लो० ४५ द्वितीयपादो द्वितीयतया ।
3 मा० तृ० स० श्लो० ४६ तृतीयपादः तृतीयतया ।
4 मा० तृ० स० श्लो० ४६ चतुर्थपादः ।
5 मा० तृ० स० श्लो० ४७ चतुर्थपादः । माघे तु 'मणिदर्पणश्रीः' इति भेदः ।
6 मा० तृ० स० श्लो० ४८ प्रथमपादः प्रथमतया ।
7 मा० तृ० स० श्लो० ४८ द्वितीयपादो द्वितीयतया ।
8 मा० तृ० स० श्लो० ४८ तृतीयपादः तृतीयतया ।
9 मा० तृ० स० श्लो० ४८ चतुर्थपादः चतुर्थतया ।
10 मा० तृ० स० श्लो० ४९ प्रथमपादः प्रथमतया ।
11 मा० तृ० स० श्लो० ४९ द्वितीयपादो द्वितीयतया ।
12 मा० तृ० स० श्लो० ५० तृतीयपादः तृतीयतया ।
13 मा० तृ० स० श्लो० ५१ चतुर्थपादः ।

क्षितिप्रतिष्ठोऽपि मुखारविन्दैर्धितद्युतोष्णांशुरिवाऽप्रधृष्यः ।
ज्वलत्तपोज्योतिरसौ समाधिं दधज्जिगाय द्युसदीशतेजः[1] ॥ ५९ ॥
तदेयुषीर्दे[1]ववधूर्विलासै रागं विविक्ता इव वर्द्धयन्तीः ।
योगाद् गुरुं क्षोभयितुं न दक्षा बबाधिरे धीरकटाक्षलक्षाः[2] ॥ ६० ॥
रम्भाः स्मरं भावयितुं मनोन्तर्मधुं व्यधुस्तेन मणीचकानाम् ।
मधूनि वक्त्राणि च कामिनीनामन्योन्यमामोदविवादमीयुः[3] ॥ ६१ ॥
प्रियैः प्रियैर्वैचसां विलासैः स्त्रियः प्रसन्ना विहिता रतान्तः ।
सख्याः शुकस्ता[2]न्निवदंस्तदान्ते-वासित्वमाप स्फुटमङ्गनानाम्[4] ॥ ६२ ॥
छन्ने[3]ष्वपि स्पष्टतरेषु यत्र पिकानुवादान्मणितेषु सख्यः ।
प्रत्यायिताः सङ्गमरङ्गसौख्यं भेजुः स्वयं जातफलाः कलानाम्[5] ॥ ६३ ॥
वासांसि लज्जावधये धृतानि स्वच्छानि नारीकुचमण्डलेषु ।
करप्रयोगस्य भियेव नूनं नाविघ्नयंस्तत् प्रियदृष्टिपातान्[6] ॥ ६४ ॥
रतप्रवृत्तौ शतधा बभूवुः क्व वोन्नतानां तनुभिर्निरोधः [ इति वा पाठः ] ।
लतामिलच्छाखिषु तत्प्रवृत्ति-ह्रीरक्षणायेव वधूधृतानि ।
आकाशसाम्यं दधुरम्बराणि रतश्रमाम्भःपृषदाऽऽर्द्रितानि[7] ॥ ६५ ॥
अविक्रियं चेति मधुक्रियाभिस्तमैक्ष्य रम्भाः प्रणिधानशुद्धम् ।
स्वविभ्रमं विभ्रममेव जज्ञुर्न नामतः केवलमर्थतोऽपि[8] ॥ ६६ ॥
यस्यामजिह्मा महतीमपङ्कां भक्तिं वितेनुर्गणधारिणोऽपि ।
सूरेः क्रमाच्छासनदेवताऽऽविर्ब[6]भूव सा भक्तिवशात् सहर्षा[9] ॥ ६७ ॥
भवादृशा ध्यानधिया स्वयोगसीमानमत्यायतयोऽत्यजन्तः ।
स्मरन्ति मे श्रीप्रभवस्ततोऽहं धन्येति साऽऽभाष्य गुरूननंसीत्[10] ॥ ६८ ॥
यदर्थमुद्यत्तपसा त्वयाहं स्मृता तदाज्ञापय देव ! सद्यः ।
जनैरजातस्खलनैर्न जातु भवादृशैर्ध्येयमिहार्थवन्ध्यम्[11] ॥ ६९ ॥

---

१–'वधू–' २–३ द्वितीयाबहुवचनम् । देववधूः कटाक्षलक्षा बबाधिरे–उपतापाय जाता इति भावः । किम्भूताः कटाक्षलक्षाः ? धीराः अनिमेषत्वात् ।

२ 'तान्' वचोविलासान् ।

३ इतः चत्वारि अपि पदानि समस्यन्ते अधिकारबहुलानुरोधात् ।

४–'मजिह्मा' अवक्राः आर्जवसहिताः ।

५–'मपङ्काम्' अपापाम् ।

६–'विर्बभूव' प्रत्यक्षा अभूत् ।

७–'त्यायतयो–' अतिआयतयः अतिशोभनोत्तरकालाः । "अतिरतिक्रमे च" [ ३।१।४५ ] इति तत्पुरुषसमासः । शोभनो राजा अतिराजा ।

८–'स्खलनै'–निरतीचारैः ।

---

1 मा॰ तृ॰ स॰ श्लो॰ ५२ प्रथमपादः प्रथमतया । माघे '–रविन्दैर्' इति ।

2 मा॰ तृ॰ स॰ श्लो॰ ५३ द्वितीयपादो द्वितीयतया ।

8 मा॰ तृ॰ स॰ श्लो॰ ५४ उत्तरार्धमुत्तरार्धतया, केवलम् अक्षरभेदः ।

4 मा॰ तृ॰ स॰ श्लो॰ ५५ चतुर्थपादः ।

5 मा॰ तृ॰ स॰ श्लो॰ ५६ प्रथमपादः प्रथमतया ।

6 मा॰ तृ॰ स॰ श्लो॰ ५६ द्वितीयः पादो द्वितीयतया ।

7 मा॰ तृ॰ स॰ श्लो॰ ५६ तृतीयः पादः तृतीयतया ।

8 मा॰ तृ॰ स॰ श्लो॰ ५६ चतुर्थः पादः चतुर्थतया ।

9 मा॰ तृ॰ स॰ श्लो॰ ५७ प्रथमः पादः प्रथमतया । माघे '–मपङ्काः' इति ।

10 मा॰ तृ॰ स॰ श्लो॰ ५७ द्वितीयः पादो द्वितीयतया ।

11 मा॰ तृ॰ स॰ श्लो॰ ५७ तृतीयः पादः तृतीयतया ।

को यौवराज्यश्रियमर्हतीति श्रुत्वा गुरोर्वाचमुवाच देवी ।
समेऽपि शिष्या उचिता हि यैर्न द्वये[१]ऽप्यमुच्यन्त विनीतमार्गाः[1] ॥ ७० ॥
परस्परस्पर्द्धिपरार्ध्यरूपा जितेन्द्रिया ज्ञप्तिगुरुस्वरूपाः ।
शिष्यास्तवैतेषु गुणैः प्रधानः श्रीपाठकोऽसौ कनकाभिधानः[2] ॥ ७१ ॥
कलाः[२] कलाः सर्वकलाङ्गनासु पौरस्त्रियो यत्र निधाय वेधाः ।
स्वकोशमध्यादिव तत् ततस्ता यथार्हमादाय जगत्सु युङ्क्ते[3] ॥ ७२ ॥
स्थानेऽस्य दीक्षैव यदेतदर्हां कन्यां विधातुं विदुषो[३] न वेधाः ।
श्रीनिर्मितिः प्राप्तघुण[४]क्षतैकवर्णस्वरूपाऽस्य जरत्तरस्य[५][4] ॥ ७३ ॥
शङ्के ततः किं जनरञ्जनाय श्रियं स नव्यामिव योजयित्वा ।
प्रत्याददानः स्वघुणप्रणीतवर्णोपमावाच्यमलं ममार्ज[5] ॥ ७४ ॥
क्षुण्णं यदन्तःकरणेन वृक्षास्तदेव दिव्याः प्रतिसाधयन्ति ।
इतीव मन्ये गुरुचिन्तितोऽर्थः समर्थितः शासनदेवतोक्तैः[6] ॥ ७५ ॥
यच्चेतसाऽचिन्ति धनादि सालाः फलन्ति कल्पोपपदास्तदेव ।
गुरुः प्रसत्त्येह परत्र भोगानाभोग[६]रूपान् दिशति ह्यचिन्त्यान्[7] ॥ ७६ ॥
क्रमात् समाधेरुपरम्य सम्यक् सूरेरिलादुर्गपुरि प्रवेशे ।
अध्यूषुष[७]स्तामभवन् जनस्य मनोमुदः स्वर्गसदोऽपि वन्द्याः[८][8] ॥ ७७ ॥
पद्मप्रतिष्ठास्पदवेदिकायां विस्तारयामास जनाश्रयान्तः ।
स श्रेष्ठिमुख्यः सहजूर्मणीभिर्याः सम्पदस्ता मनसोऽप्यगम्याः[9] ॥ ७८ ॥
कला दधानः सकलाः स्वभाभिरुद्भासयन् सौधसिताभिराशाः ।
तन्मण्डपे मौक्तिकरत्नराशिश्चकार नीचैर्भगणं द्विधाऽपि[९][10] ॥ ७९ ॥
सुदुर्लभां सोदर[१०]वल्लभामप्यभङ्गसौभाग्यभरेण पार्श्वात् ।

---

१ 'द्वये-' लौकिक-लोकोत्तररूपभेदात् ।

२ 'कलाः' पाठकस्य नागर्यः-प्रधानाः मुख्याः । अन्यकलास्तु ग्रामीणवनिताः

३ 'विदुषो' विदुषशब्दः औणादिकः पाण्डित्ये ।

४ 'प्राप्तघुण-' प्राप्तं घुणक्षतैकवर्णस्वरूपं यया सा ।

५ 'जरत्तरस्य' इत्यनेन जरायां शिल्पिनः शिल्पक्रियाक्षमत्वज्ञापनं घुणाक्षरन्यायसमर्थनं च ।

६ 'आभोग-' विस्ताररूपान् ।

७ 'अध्यूषुष-' ताम् इलादुर्गनाम्ना 'ईडर' इति प्रसिद्धां पुरीं वासेन आश्रितस्य ।

८ 'वन्द्याः' प्रशस्याः स्तवनीयाः ।

९ 'द्विधाऽपि' उच्चत्वेन कान्त्या च इति द्विधा ।

१० 'सोदर-' सोदरवल्लभां लक्ष्मीम् । चन्द्रपक्षे सोदरां भगिनीम्, प्रियाम् इष्टाम्-ततो विशेषणसमासः ।

---

1 मा० तृ० स० श्लो० ५७ चतुर्थः पादः चतुर्थतया ।

2 मा० तृ० स० श्लो० ५८ प्रथमः पादः प्रथमतया ।

3 मा० तृ० स० श्लो० ५८ द्वितीयः पादः द्वितीयतया । माघे 'विधाय' इति ।

4 मा० तृ० स० श्लो० ५८ तृतीयः पादः तृतीयतया । माघे 'श्रीनिर्मितिप्राप्त-' इति ।

5 मा० तृ० स० श्लो० ५८ चतुर्थः पादः चतुर्थतया ।

6 मा० तृ० स० श्लो० ५९ प्रथमः पादः प्रथमतया ।

7 मा० तृ० स० श्लो० ५९ द्वितीयः पादः द्वितीयतया । माघे "-स्तदेव" इति ।

8 मा० तृ० स० श्लो० ५९ तृतीयः पादः तृतीयतया । माघे 'अध्यूषुषो यामभवन् जनस्य' इति ।

9 मा० तृ० स० श्लो० ५९ चतुर्थः पादः चतुर्थतया ।

10 मा० तृ० स० श्लो० ६० पूर्वार्ध पूर्वार्धतया ।

यां रेवतीजानिरियेष हातुं न रोहिणेयो न च रोहिणीशः[1] ॥ ८० ॥
बाणाहवव्याहतशम्भुशक्तेर्व्यक्तेऽपि दाशार्हपतेः प्रियात्वे ।
तदोपभुङ्क्ते स्म पयोधिपुत्रीं तां दीनदानैर्वणिजां वरेण्यः[2] ॥ ८१ ॥
मासादितः प्राप्य महीमहेन्दोरासत्तिमासाद्यऽजनार्दनस्य ।
दयोदयायैष यथेष्टदानैः श्रेष्ठी समुद्धोषयति स्म ढक्काम्[3] ॥ ८२ ॥
परस्परं तत्क्षणवीक्षणार्थ-मिलद्वधूनां वदनेन्दुभासा ।
शरीरिणा जैत्रशरेण यत्र स्मरेण रेमे रमणेषु कामम्[4] ॥ ८३ ॥
लीलावतीनां कलगीतनादं श्रुत्वान्तराऽऽस्वादविमुद्रिताक्षः ।
नटेश्वरोऽभूत् किमतस्तदानीं निःशङ्कमूषे मकरध्वजेन[5] ॥ ८४ ॥
निषेव्यमाणेन शिवैर्मरुद्भिर्जनाश्रये तेन घने जनेन ।
नाबोधि बाधाऽऽतपसंप्रवृत्ता क्व कामचारे यदि वाऽऽतपः स्यात्[6] ॥ ८५ ॥
संसत् सुधर्मा सममादितेयैरध्यास्यमाना हरिणा चिराय ।
इहावतीर्णा किमिति व्यमृक्षत् साक्षाज्जनस्तत्र गुरावुपेते[7] ॥ ८६ ॥
मुक्तादिदानेषु समुत्किरन्तस्तदा वदान्या नगरे विरेजुः ।
उद्रश्मिरत्नाङ्कुरधाम्नि सिन्धावुन्मुक्तमुक्ता इव वीचिमार्गाः[8] ॥ ८७ ॥
कस्तां पुरं स्तोतुमलं महेऽस्मिन् सविस्मयं स्मेरतरे स्मयेन ।
अध्यासितामार्हतजन्मवृत्तावाह्वास्त मेरावमरावतीं या[9] ॥ ८८ ॥
स्निग्धाञ्जनश्यामरुचिः सुवृत्तो दन्दह्यमानाऽगुरुवर्त्तिधूमः ।
वदान्यभावाद् वणिजोऽधरस्य पयोधरस्यागममाशशंस[10] ॥ ८९ ॥
श्रीवर्द्धमानप्रभुशासनश्रीवध्वा इवाऽध्वंसितवर्णकान्तेः ।
विदिद्युते वक्त्रसहस्रपत्रमिवोच्चकैर्मण्डपमण्डलेशः[11] ॥ ९० ॥
श्रीवाचको ह्यष्टरसेन्दुसंवत् [१६८२] राधाग्रषष्ठ्यां कनकाभिधानः ।
विशेषको वाँ विशिशेष यस्याः सौभाग्यमुच्चैर्गणभृत्पदव्याः[12] ॥ ९१ ॥

---

१ 'रेवती–' रेवती जाया यस्य "जायाया जानिः" [ ७।३।१६४ ]

२ '–आसत्ति–' आ इति अव्ययम् ईषदर्थे । आ ईषत् आसत्तिं नृपस्य प्राप्य अजनार्दनस्य मारिनिषेधस्य ढक्कां पटहं वादयति स्म । किंभूतः श्रेष्ठी ? सादी अश्वारूढः–राजप्रसादलब्धाऽश्ववान् । यद्वा आसादि सादिनम् अवधीकृत्य अश्वारोहोऽपि जीवरक्षक इत्यर्थः ।

३ 'शिवैः–' सुखकारिभिः ।

४ 'मेरौ' आगताम् ।

५ '–अधरस्य' दातृत्वेन हीनवादीकृतस्य ।

६ 'वा' इति अव्ययम्–उपमायाम् ।

---

1 मा० तृ० स० श्लो० ६० उत्तरार्धम् उत्तरार्धतया । माघे 'रोहिणेयो' इति ।

2 मा० तृ० स० श्लो० ६१ प्रथमः पादः प्रथमतया ।

3 मा० तृ० स० श्लो० ६१ द्वितीयः पादः द्वितीयतया । माघे '–मासाद्य जनार्दनस्य' इति पदविभागः ।

4 मा० तृ० स० श्लो० ६१ तृतीयः पादः तृतीयतया ।

5 मा० तृ० स० श्लो० ६१ चतुर्थः पादः चतुर्थतया ।

6 मा० तृ० स० श्लो० ६२ प्रथमः पादः प्रथमतया । माघे 'निषेव्यमाणेन' इति ।

7 मा० तृ० स० श्लो० ६२ द्वितीयः पादः द्वितीयतया ।

8 मा० तृ० स० श्लो० ६२ तृतीयः पादः तृतीयतया ।

9 मा० तृ० स० श्लो० ६२ चतुर्थः पादः चतुर्थतया ।

10 मा० तृ० स० श्लो० ६३ प्रथमः पादः प्रथमतया ।

11 मा० स० तृ० श्लो० ६३ द्वितीयः पादः द्वितीयतया ।

12 मा० स० तृ० श्लो० ६३ तृतीयः पादः तृतीयतया

तस्याः सितच्छत्रितदेवसूरेरेतावतैवानुमिता विभूषा ।
अधाद् यदस्या विजयादिसिंहः श्रियं त्रिलोकीतिलकः स एव[1] ॥ ९२ ॥
तामीक्षमाणः सपुरं[१] पुरस्ताद् महैस्तदा सान्द्रतमां समज्याम् ।
शुभे मुहूर्ते गुरुणाऽभिषिक्तोऽनूचानचन्द्रः स रुचिं चिचाय[2] ॥ ९३ ॥
तामीक्षमाणः सपुरं पुरस्तात् पौरैर्निपीतां स्वगुरूपनीताम् ।
स्फीतां श्रियं सूरिरमंस्त शस्तं फलेग्रहित्वं गुरुभक्तिवल्लेः[3] ॥ ९४ ॥
स्वयं स्वयम्भूरमणस्य पूर्वं प्रापत् प्रतोलीमतुलप्रतापः ।
प्रभोः स्वशिष्यप्रभयाऽनुयातः स्वकान्तकीर्तेरिव वर्त्मदर्शी[4] ॥ ९५ ॥
अभ्यर्चिता सभ्यजनैर्मणीभि[२]र्द्वयी बभासे गुरुशिष्ययोः सा ।
वज्रप्रभोद्भासिसुरायुधश्रीर्जितो यथेन्द्रः प्रणयन्नुपेन्द्रम्[5] ॥ ९६ ॥
श्रीसिंहसूरेर्गुरुदत्तगच्छाधिपत्यधूर्भारधुरीणमूर्तेः ।
आज्ञा समाज्ञा सममाविरासीद् या देवसेनेव परैरलङ्घ्या[6] ॥ ९७ ॥
प्रजा इवाङ्गादरविन्दनाभेः सुधामुधाकारिवचःप्रपञ्चाः ।
श्रीसिंहसूरेर्वदनान्निरीयुर्लोकम्पृणाः[३] सत्त्वघृणातृणाब्दाः[7] ॥ ९८ ॥
प्रजास्ततोऽथ प्रसृताः[४] कृतेऽर्थे शम्भोर्जटाजूटतटादिवाऽऽपः ।
जयेति[५]वाचो जगतीं पुनानाः नानाव्ययैस्तोषमयैर्धनानाम्[8] ॥ ९९ ॥
पुरेऽत्र कांश्चिद्दिवसान् व्यतीत्य प्रभोर्विहर्तुं वनमाश्रितस्य ।
मुखादिवाथ श्रुतयो विधातुर्नन्तुं नगर्या निरगुर्जनौघाः[9] ॥ १०० ॥
प्रस्थानमाकर्ण्य महीमहेशो नतेः कृते सत्वरगत्वरेऽस्य ।
सेना रसनाऽऽकुलिता इवान्तःपुरान्निरीयुर्मधुजिद्ध्वजिन्यः[६][10] ॥ १०१ ॥
मरुस्थलं प्राप्तुमना धनाढ्यैरन्वीयमानः स नृपैस्तथागात् ।
संमेनिरे येन जनाः किमेताः पुरान्निरीयुर्मधुजिद्ध्वजिन्यः[७][11] ॥ १०२ ॥
श्लिष्यद्भिरन्योऽन्यमुखाग्रसङ्गसरङ्गचित्रार्पणदीप्तभालैः ।

---

१ 'सपुरम्' नगर्या समम् । देहेन समम् ।

२ '–मणीभि–' पञ्चप्रकाररत्नैः–स्वर्ण–रूप्य–विद्रुम–मुक्ता–ताम्राणि पञ्चरत्नानि ।

३ '–लोकम्पृणाः' लोकसंतर्पकाः । 'लोकम्पृण' इति [ ३।२। ११३ ] निपातः ।

४ 'प्रसृताः' प्रजा मण्डपाद् निःसृताः ।

५ 'जये–' जय जय इति वाक् यासां ताः ।

६ 'मधुजिद्–ध्वजिन्यः' मधुजित् कृष्णः तेन चिह्निताः ध्वजवतीः–ध्वजे कृष्णरूपमिति ।

७ 'मधुजिद्–ध्वजिन्यः' धर्मोद्धरणकारित्वाद् वैष्णव्यः सेनाः किमेताः पुराद् निरीयुः ।

---

1 मा० स० तृ० श्लो० ६३ चतुर्थः पादः चतुर्थतया ।

2 मा० स० तृ० श्लो० ६४ प्रथमः पादः प्रथमतया । माघे 'स पुरम्' इति विभागः

3 पूर्ववत्

4 मा० स० तृ० श्लो० ६४ द्वितीयः पादः द्वितीयतया

5 मा० स० तृ० श्लो० ६४ तृतीयः पादः तृतीयतया ।

6 मा० स० तृ० श्लो० ६४ चतुर्थः पादः चतुर्थतया ।

7 मा० स० तृ० श्लो० ६५ प्रथमः पादः प्रथमतया ।

8 मा० स० तृ० श्लो० ६५ द्वितीयः पादः द्वितीयतया ।

9 मा० स० तृ० श्लो० ६५ तृतीय पादः तृतीयतया ।

10 मा० स० तृ० श्लो० ६५ चतुर्थः पादः चतुर्थतया । माघे तु 'मुरजिद्ध्वजिन्यः' ।

11 पूर्ववत्

गुरोर्निशम्यागमनं कुमारैः संवर्द्धिताः स्वस्वपुरे पुरेशाः[1] ॥ १०३ ॥
आपूर्यमाणोत्तमतूर्यनादैः स्खलत्खलीनं हरिभिर्विलोलैः ।
संयोज्य सैन्यं च मुदाऽभिजग्मुः संदेशतोऽस्मादथ देशमुख्याः[2] ॥ १०४ ॥
देशान्नरेशाः प्रमदाभिवेशात् तथा रथाश्वेभभरेण चेलुः ।
परस्परोत्पीडितजानुभागाः नागाद् यथा तत्र तिलोऽपि भूमिम्[3] ॥ १०५ ॥
स्मरध्वजानां ध्वनिभिर्ध्वजानां चलाश्चलैर्जातभियां हरीणाम् ।
धारोद्धुरत्वात् सरलाध्वगत्या दुःखेन निश्चक्रमुरश्ववाराः[4] ॥ १०६ ॥
निरन्तरालेऽपि विमुच्यमाने मार्गे नृपाद्यैः पुरतश्चलद्भिः ।
पदं दधानो गुरुरीर्ययैव प्रतिस्थलं तीर्थमधत्त देशम्[5] ॥ १०७ ॥
श्रद्धावतासावनुगम्यमानो दूरं पथि प्राणभृतां गणेन ।
ग्रामादनुग्रामविहाररीत्या सीरोहिकां प्राप मुनिप्रजापः[6] ॥ १०८ ॥
विवन्दिषाऽभ्युद्गतसङ्घलोकैः समं निषेव्यैरभिरूपरूपैः ।
तेजोमहद्भिस्तमसीव[१] दीपैः प्रावेशि तस्यां वशिनां[२] वनीपैः[7] ॥ १०९ ॥
तेजोऽग्रिमैर्[३]वास्तवभाविपौरैर्निमीयमाणेषु महेषु तत्र ।
कियाननेहाः सक्तुपैर्गणीन्द्रद्विपैरसंबाधमयाम्बभूवे[8] ॥ ११० ॥
शनैरनीयन्त रयात् पतन्तो देवांह्रिपद्मे वणिजः प्रणन्तुम् ।
निजैर्निशायां विविधैरुपायैः प्रबोध्य धामाधिकधर्मलुब्धाः[9] ॥ १११ ॥
क्रमादमुष्या मुनिमुख्ययाने रथाः क्षितिं हस्तिनखादखेदैः ।
नीता विना यत्नमपीभ्यरथ्यैस्तथैकबालाकलनादलुब्धैः[10] ॥ ११२ ॥
प्रत्युद्ययौ श्रीजयमल्ल[४]राजः स्पर्द्धानुधावद्बलसङ्घराजः ।
सयत्नसूताऽऽयतरश्मिभुग्नग्रीवाश्वभास्वद्रथभूषिताध्वा[11] ॥ ११३ ॥
वश्याऽस्य सोमालकरैश्चचालाऽचलानुरागादिव कृष्यमाणा ।
समं समुद्यद्भिरनो[५]ऽनुबन्धाद् ग्रीवाग्रसंसक्तयुगैस्तुरङ्गैः[12] ॥ ११४ ॥
बलोर्मिभिस्तत्क्षणहीयमानवनेषु[६] नेषुर्भ्रमरा निवासम् ।

१ '–तमसीव' सीरोहीनगरस्य पर्वतवनवेष्टितत्वेन तमसः उपमा ।
२ 'वशिनामधीशैः' इति वा पाठः
३ 'तेजोऽग्रिमै–' तेजः तेजःपालनामा मन्त्री, अग्रिमः मुख्यः येषां तैः । वास्तवः तात्त्विकः भावोऽस्ति एषाम् ।
४–'जयमल्ल'–जयमल्लनामा मन्त्री तस्य राजा अथवा तस्य अधिकतेजस्त्वात् सं एव राजा ।
५ 'अनो'–अनस् शकटम् ।
६–'तत्क्षणहीयमान'–तस्मिन् क्षणे उत्सवे, हीयमानेषु गम्यमानेषु ।

1 मा० स० तृ० श्लो० ६६ प्रथमः पादः प्रथमतया ।
2 मा० स० तृ० श्लो० ६६ द्वितीयः पादः द्वितीयतया ।
3 मा० स० तृ० श्लो० ६६ तृतीयः पादः तृतीयतया ।
4 मा० स० तृ० श्लो० ६६ चतुर्थः पादः चतुर्थतया ।
5 मा० स० तृ० श्लो० ६७ प्रथमः पादः प्रथमतया ।
6 मा० स० तृ० श्लो० ६७ द्वितीयः पादः द्वितीयतया ।
7 मा० स० तृ० श्लो० ६७ तृतीयः पादः तृतीयतया । माघे 'तमसेव' इति पाठः । माघटीकाकृता 'तमसि' इत्यपि पाठो निरदेशि परन्तु 'तमसा' इत्येव पाठः साधीयान् इति समर्थितम् ।
8 मा० स० तृ० श्लो० ६७ चतुर्थः पादः चतुर्थतया ।
9 मा० स० तृ० श्लो० ६८ प्रथमः पादः प्रथमतया ।
10 मा० स० तृ० श्लो० ६८ द्वितीयः पादः द्वितीयतया ।
11 मा० स० तृ० श्लो० ६८ तृतीयः पादः तृतीयतया ।
12 मा० स० तृ० श्लो० ६८ चतुर्थः पादः चतुर्थतया ।

चलद्गजास्यस्खलदानपानगोष्ठीषु निष्ठां दधतः पटिष्ठाम्[1] ॥ ११५ ॥
मत्तद्विपेन्द्राश्वशताङ्गवृन्दै रथ्या भुजाया वलयैरिवास्याः ।
देशश्रियो वेषविशेषभूषां तदाऽभ्यपुष्यज्जयमल्लराजः[2] ॥ ११६ ॥
लताभिराकीर्णसुमानि गृह्णत्युर्वीभृतो नामयति द्विधाऽस्मिन् ।
प्रायेण निष्क्रामति चक्रपाणौ दिक्चक्रमाक्रान्तमभूत् क्रमेण[3] ॥ ११७ ॥
जातैजनाभिस्त्रिदशाङ्गनाभिर्जगत् समादातुमिवोद्यतेऽस्मिन् ।
प्रायेण निष्क्रामति चक्रपाणौ भिया प्रियाः स्वे परिरेभिरे द्राक्[4] ॥ ११८ ॥
धराभिसाराय रयाद्धयानां खुरक्षतैर्दीपितमन्मथेव ।
प्रायेण निष्क्रामति चक्रपाणौ रेणुच्छलाच्छादयति स्म भानुम्[5] ॥ ११९ ॥
सौभाग्यशोभां दधति क्षमायास्तस्मिन्नुदीतारुणचूर्णपुञ्जैः ।
प्रायेण निष्क्रामति चक्रपाणौ द्यौर्भानुचक्षुस्त्रपया न्यमीलत्[6] ॥ १२० ॥
महान् महोऽभूत् स गुरुप्रवेशे प्रत्यालयोत्तम्भितकेतुसेतुः ।
गतागतैर्यत्र जनस्य तस्यां नेष्टं पुरो द्वारवतीत्वमासीत्[7] ॥ १२१ ॥
पुरः स्फुरत्स्वर्णगिरिस्तदानीं जालंधराह्वानभृतः क्षमीन्दोः ।
क्षितीन्दुतन्त्रैर्युगपत्प्रवेशो नेष्टं पुरो द्वारवतीत्वमासीत्[8] ॥ १२२ ॥
पारेजलं नीरनिधेरपश्यन् दिशामधीशा जयमल्लराजः ।
सिद्धाङ्गनाभिर्ननु गीयमानं भृशं यशः श्रीगुरुभक्तिगौरम्[9] ॥ १२३ ॥
पारेजलं नीरनिधेरपश्यन् निजाभिषेके हरिवेश्मभूषाम् ।
सस्मार देवः समयं तमेव साहश्यमाशास्य पुरः पुरोऽस्याः[10] ॥ १२४ ॥
विभोर्निदेशान्नृपतिः स साक्षाद् मुरारिरानीलपलाशराशीन् ।
रसालजान् वन्दनकोत्सवैषी प्रसारयामास चतुष्पथेषु[11] ॥ १२५ ॥
कर्पूरपूर्णैर्मृगनाभिचूर्णैः संवास्य पत्रे रचिता अपीह ।

---

१ 'द्विधा'–राजानः पर्वताश्च ।

२ 'चक्रपाणौ' चक्रं कटकं पाणौ हस्ते यस्य मण्डिलात् । चक्रपाणौ वासुदेवे लुप्तोपमा । चक्रं चक्रलक्षणं रेखारूपं पाणौ यस्य–एतेन भाग्यसूचा ।

३ 'चक्रपाणौ' चक्रपेषु चक्रवर्तिषु अणुर्लघुः ब्रह्मदत्तः तत्र–लुप्तोपमा ।

४ 'द्वारवतीत्व'–द्वारं गोपुरम्–तद्वत्त्वम्, यद्वा द्वारिकात्वं इष्टं न आसीत्, काकुः अपि तु इष्टमेव–इयं द्वारिका–एवेति भावः ।

५ 'द्वारवतीत्व–' एतन्नगरशोभया द्वारवतीत्वं विलक्षणं न इष्टं प्रियम् ।

६ 'सिद्धा'–सिद्धा देवविशेषाः ।

७ 'हरिवेश्म–' "स्तम्बभूर्विष्णुगेहम्" [ है० अभि० कां० ४ श्लो० ४५ ] इति स्तम्भतीर्थ–नाम ।

---

1 मा० स० तृ० श्लो० ६९ प्रथमः पादः प्रथमतया ।

2 मा० स० तृ० श्लो० ६९ द्वितीयः पादः द्वितीयतया । माघे 'रथ्याभुजायाः' इति ।

3 मा० स० तृ० श्लो० ६९ तृतीयः पादः तृतीयतया ।

4 पूर्ववत् ।

5 पूर्ववत् ।

6 पूर्ववत् ।

7 मा० तृ० स० श्लो० ६९ चतुर्थः पादः चतुर्थतया ।

8 पूर्ववत् ।

9 मा० तृ० स० श्लो० ७० प्रथमः पादः प्रथमतया ।

10 पूर्ववत् ।

11 मा० तृ० स० श्लो० ७० द्वितीयः पादः द्वितीयतया । माघे 'पलाशराशीः' इति ।

द्रुमावलीरुत्कलिकासहस्रसौरभ्यलोभान्न जहुर्द्विरेफाः[1] ॥ १२६ ॥
समुन्मिलत्सज्जनदुग्धसिन्धौ नितम्बिनीविद्रुमराजिभाजि ।
रेजुर्मरुच्चञ्चलधूपधूमाः प्रतिक्षणोत्कूलितशैवलाभाः[2] ॥ १२७ ॥
लक्ष्मीभृतोऽम्भोधितटाधिवासान् प्राच्यानुदीच्यानथ दाक्षिणात्यान् ।
स्थलाचलेभ्यो वणिजोऽभ्युपेतान् स भोजयामास नियोगिराजः[3] ॥ १२८ ॥
धनानि वर्षन् बहुधा सुधाभुग्-द्रुमानसौ नीरदनीलभासः ।
मन्त्री विजिग्ये फलितांस्तदेते ह्रियेव भूमिं प्रणमन्ति सद्यः[4] ॥ १२९ ॥
निजे निवेश्यासनि सिंहसूरिं शिष्यं गुरौ वन्दनकं ददाने ।
लतावधूसम्प्रयुजोऽधिवेलं तस्थुर्जनाश्चित्रितभूरुहाभाः[5] ॥ १३० ॥
अथ प्रभुः स्थापितसिंहसूरीन् कांश्चित् तदेवार्पितवाचकाङ्कान् ।
आशास्य शिष्यानधिकश्रियस्तान् बहूकृतान् स्वानिव पश्यति स्म[6] ॥ १३१ ॥
आश्लिष्टभूमिं रसितारमुच्चैर्मन्थाचलेनोन्मथितं पयोधिम् ।
तिरश्चकार ध्वनिधीरताभिस्तदा गुरुर्धर्मकथास्तथाख्यत्[7] ॥ १३२ ॥
सुधासरः श्रीविबुधैर्निषेव्यं लोलद्भुजाकारबृहत्तरङ्गैः ।
गुरुस्वरूपं समवाप्य तापः प्रापद् विनाशं न जनस्य कस्य ?[8] ॥ १३३ ॥
दिदृक्षया मन्त्रिवदान्यताया धावन्तमन्तर्धनिनं सुदूरात् ।
फेनायमानं पतिमापगाना-मवारयत् किं कृपणस्वभावः ?[9] ॥ १३४ ॥
दाने ददानेऽर्थिनमर्थितार्थ-भरेण खिन्नं करकम्पनेन[3] ।
निषेधयन्तं पथि फेनितास्य-मसावपस्मारिणमाशशङ्के[10] ॥ १३५ ॥
पीत्वा जलानां निधिनाऽतिगाढ्याद् लसद्गुणानां[4] गुरुवाक्सुधां ताम् ।
वृष्टं सुवर्णं जयमल्लराजा पार्श्वेऽभवत् स्वर्णगिरिस्तदङ्कः[11] ॥ १३६ ॥
पूज्यक्रमाम्भोरुहभक्तिभावाद् वृद्धिं गतेऽप्यात्मनि नैव मान्तीः ।
धियां निधिः प्राप्तमुदस्तदाऽऽविश्चक्रे स्फुरद्रूप्यकभावनाभिः[12] ॥ १३७ ॥

---

१ 'द्रुमान्–' द्रुमाणां मेघतुल्यताख्यापनेन परोपकारित्वम् अतीवधन्यत्वं च ।

२ 'लतावधू–' लतया कस्तूर्या संस्कृता वधूः लतावधूः–मध्यपदलोपः । लतावत् वधूभिः संयुक्ताः अधिवेलं मुहूर्तवेलामधिकृत्य जनानां सांकर्यात् दर्शनान्तरायो मा भूत् इति दिदृक्षया स्त्रीभिः पतयः संगृहीताः ।

३ 'करकम्पनेन' पूर्वं दत्तदाना याचका गृहं प्रति चलिताः पुनर्दानाय आहूताः 'अस्माकमतः परं धनेन अलम्' इति आशयेन करचालनेन निषेधं चक्रुः न पुनर्वाचा–धनेन मुखपूरणात् ।

४ 'लसद्गुणा–' लसद्गुणानां जलानां निधिना समुद्रेण ।

---

1 मा० तृ० स० श्लो० ७० तृतीयः पादः तृतीयतया । माघे 'घनावलीरुत्कलिका'–इति । वेङ्कटेश्वरमुद्रिते माघपाठे 'वनावलीरुत्कलिका–' इति ।

2 मा० तृ० स० श्लो० ७० चतुर्थः पादः चतुर्थतया ।

3 मा० तृ० स० श्लो० ७१ प्रथमः पादः प्रथमतया ।

4 मा० तृ० स० श्लो० ७१ द्वितीयः पादः द्वितीयतया ।

5 मा० तृ० स० श्लो० ७१ तृतीयः पादः तृतीयतया ।

6 मा० तृ० स० श्लो० ७१ चतुर्थः पादः चतुर्थतया ।

7 मा० तृ० स० श्लो० ७२ प्रथमः पादः प्रथमतया ।

8 मा० तृ० स० श्लो० ७२ द्वितीयः पादः द्वितीयतया । माघे 'लोलद्भुजाकारबृहत्तरङ्गम्' इति । वेङ्कटेश्वरमुद्रिते माघपाठे 'लोलद्भुजाकारबृहत्तरङ्गम्' इति ।

9 मा० तृ० स० श्लो० ७२ तृतीयः पादः तृतीयतया ।

10 मा० तृ० स० श्लो० ७२ चतुर्थः पादः चतुर्थतया ।

11 मा० तृ० स० श्लो० ७३ प्रथमः पादः प्रथमतया ।

12 मा० तृ० स० श्लो० ७३ द्वितीयः पादः द्वितीयतया ।

एवं विभुं पुण्यविभूतिमत्रा-ऽनुभूय मध्येमरुदेशमाप्तम् ।
क्षिप्ता इवेन्दोः सरुचोऽधितीरं शिष्या गुणौघैरभिजग्मुरीशम्[1] ॥ १३८ ॥
तदेव दैवाज्जलदातिवृष्ट्या मरुर्नदीमातृकतां जगाहे ।
क्षिप्ता इवेन्दोः सरुचोऽधितीरं हंसावलीराकलयन्नतोऽगात्[2] ॥ १३९ ॥
प्रतिस्थलं धन्वनि धन्वभृद्भिर्भूपैः स सम्मान्य कृतप्रवेशः ।
संवर्द्धितः पौरकनीविमुक्ता मुक्तावलीराकलयाञ्चकार[3] ॥ १४० ॥
साटोपमूर्वीमनिशं नदन्तो धर्मोपदेशेषु मरौ विहृत्य ।
पवित्रयन्तः कतिचित् समान्ते जग्मुर्गणीन्द्रा गिरिमेदपाटम्[4] ॥ १४१ ॥
आदाय सिन्धोर्जलदा धरित्रीं यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तदम्भसां सञ्चयपात्रभूते व्यालोकयत् ते सरसी वशी सः[5] ॥ १४२ ॥
समीयुषः सङ्घजनस्य यानि म्लानैर्मिथः सङ्घटनाच्युतानि ।
तान्येकदेशान्निभृतं पयोधेर्भ्रान्त्यैव रत्नानि समाश्रयंस्ते[6] ॥ १४३ ॥
तटेष्वटद्वारणवाजिराजि-श्रीसौरभेयीजलबिम्बितानि ।
तान्येकदेशान्निभृतं पयोधेः साम्यं सरस्योः प्रकटं विचक्रुः[7] ॥ १४४ ॥
श्रीमज्जगत्सिंहमहीमहेन्द्र-विवन्दिषाभ्यागमने गजेन्द्रान् ।
सूरिर्मदैः सिक्तभुवोऽङ्गभाजः सोऽम्भांसि मेघान् पिबतो ददर्श[8] ॥ १४५ ॥
उद्धृत्य मेघैस्तत एव तोयमह्नाय भूमिः परिपूर्यते स्म ।
सुस्वादुता स्यात् कथमन्यथाऽस्मिन्-अम्भोधराम्भोनिवहे विहेतुः[9] ॥ १४६ ॥
शास्त्रैर्दृढीकृत्य दयासमर्थ-मर्थं मुनीन्द्रैरिव सम्प्रणीताः ।
तथा कथास्तस्य नृपस्य वश्यक्रियासु निष्ठाः सहसोपदिष्टाः[10] ॥ १४७ ॥
आनायनिक्षेपनिषेधमत्र सन्धाय सूरेरुपदेशरूपात् ।

---

१ 'क्षिप्ता इवेन्दोः' गुणौघैः क्षिप्ताः प्रेरिता इव इन्दोः चन्द्रशाखीयोपाध्यायादेः शिष्याः
'सरुचः' रुचिशाखीयमुनियुक्ताः
'अधितीरम्' समीपम् । अधिकं तीर्यते अनेन अधितीरो गुरुस्तं वा ।

२ 'हंसाव-' द्वितीयकाव्येऽपि हंसावलीः हंसशाखीयमुनीनां श्रेणीः पश्यन् । 'क्षिप्ताः' इत्यादि प्राग्वत् ।

३ 'साटोपमू-' साडम्बरं भुवम् ।

४ 'गिरिमेद-' गिरिभिः उपलक्षितः मेदपाटदेशः–मध्यपदलोपसमासः ।

५ 'कदेशान्' एकदा समकालम्, ईशान् गुरून् सम्मुखागतस्य संघस्य । 'ईशान्' इति [ समीयुषः ] इत्यस्य क्वसुप्रत्ययस्य कर्म ।

६ 'निभृतम्' निभृतं निश्चितं यथा स्यात् तथा । निभृतं राशीभवनं वा ।

७ '–ते' ते द्वे सरसी कर्मभूते रत्नानि समाश्रयन्

८ 'सरस्योः' पींछोला–उदयसागरयोः तडागयोः ।

९ 'इव संप्र-' इवशब्दोऽत्र भिन्नक्रमः–संप्रणीता इव नवाः कृता इव ।

१० 'आनाय-' "आनायो मत्स्यबन्धनम्" ।

११ '–उपदेश–' प्रशस्तोपदेशात् ।

---

1 मा० तृ० स० श्लो० ७३ तृतीयः पादः तृतीयतया । माघे 'स रुचोऽधिवेलम्' इति पृथक् पृथक् ।

2 पूर्ववत् ।

3 मा० तृ० स० श्लो० ७३ चतुर्थः पादः चतुर्थतया ।

4 मा० तृ० स० श्लो० ७४ प्रथमः पादः प्रथमतया ।

5 मा० तृ० स० श्लो० ७४ द्वितीयः पादः द्वितीयतया ।

6 मा० तृ० स० श्लो० ७४ तृतीयः पादः तृतीयतया ।

7 पूर्ववत् ।

8 मा० तृ० स० श्लो० ७४ चतुर्थः पादः चतुर्थतया ।

9 मा० तृ० स० श्लोक ७५ प्रथमः पादः प्रथमतया । माघे 'उद्धृत्य' इति ।

10 मा० तृ० स० श्लो० ७५ द्वितीयः पादः द्वितीयतया ।

आलोकयामास हरिः पतन्तीर्भक्त्या तदंह्र्योर्जनता जगत्याः[1] ॥ १४८ ॥
व्युत्क्रम्य मासांश्चतुरः पुरेऽस्य गच्छन्तमार्यं तमनुव्रजन्तीः ।
न रक्षितुं ताः[2] क्षितिपः शशाक नदीः स्मृतीर्वेदमिवाम्बुराशिम्[2] ॥ १४९ ॥
विक्रीय दिश्यानि धनान्युरूणि संलब्धलाभा वणिजो द्विधाऽपि ।
पुरीव चक्रुर्विपिनेऽस्य सेवां क्व भोगलाभो न हि भाग्यभाजः[3] ॥ १५० ॥
स्थित्वा स्वदेशे[3]ऽब्दयुगं शमीन्दुर्दैप्यानसावुत्तमलाभभाजः ।
चिकीर्षुराह्वातुमितान् सुराष्ट्रां चचाल नन्तुं विमलाचलेन्द्रम्[4] ॥ १५१ ॥
शत्रुञ्जये श्रीपरमादिदेवं नत्वाऽब्धितीरं प्रभुराप्तवांश्च ।
तरीषु तत्रत्यमफल्गु भाण्डं निक्षिप्य सङ्घोऽप्यभिजग्मिवांश्च[5] ॥ १५२ ॥
अज्झाहरे श्रीजिनमाश्वसेनिं तथोन्नते हीरगुरोः क्रमाब्जे ।
प्रणम्य तत्रैत्य स बोधिबीजं सांयात्रिकानावपतो[4] ददर्श[6] ॥ १५३ ॥
उत्पित्सवोऽन्तर्नदभर्तुरुच्चैर्द्वीपाख्यपुर्याः प्रमदान्निवासाः ।
गुरोः प्रणामाय सनागरीका रेजुर्विमाना इव केतुपक्षैः[7] ॥ १५४ ॥
लङ्कापुरी किं विजिताऽनयैव गरीयसा निःश्वसितानिलेन ।
चलोर्मिमालाप्रतिबिम्बदम्भात् सवेपथुर्नीरधिमध्युवास[8] ॥ १५५ ॥
मुक्ताफलैर्वीचिकरान्[5] वितत्य तत्रेश्वरं वर्धयतः पयोधेः ।
पयांसि भक्त्या गरुडध्वजस्य तदुत्सवङ्गीप्सुतयोद्विचेलुः[9] ॥ १५६ ॥
पुरः प्रवेशे शमिनामिनस्य प्रसूनवृष्ट्यादिमहं नृदेवाः ।
चक्रुस्तदीक्ष्योच्छलदूर्मिदम्भाद् ध्वजानिवोच्चिक्षिपिरे फणीन्द्राः[10] ॥ १५७ ॥
तमागतं वीक्ष्य युगान्त[6]बन्धु-भुजं भुजङ्गप्रभुपूजनीयम् ।
संस्थाप्य मासांश्चतुरः क्षमीशं ननन्द सङ्घोऽनघभक्तिकृत्यैः[11] ॥ १५८ ॥
ततः क्रमात् सञ्चलितं यतीन्द्रमुत्सङ्गशय्याशयमम्बुराशिः ।
उर्मीकरैर्देवकपत्तनस्थं भुजिष्यवद् वीजयति स्म वातैः[12] ॥ १५९ ॥

---

१ 'हरिः' जगत्या भुवः हरिः इन्द्रः—जगत्सिंहनामा ।
२ 'ताः' जनताः ।
३ 'स्वदेशे—' स्वेषाम् आत्मीयानां, स्वानां ज्ञातीनां वा देशो गूर्जरत्रा तत्र वर्षद्वयम् ।
४ '—आवपतो—' सम्यक्त्वबीजम् आवपतः प्ररोहयतः ।
५ '—वीचिकरान्' वीचय एव कराः पाणयः तान् ।
६ 'युगान्त—' युगस्य शकटाग्रभागस्य अन्तैर्धर्मैर्दीर्घतादिगुणैर्बन्धुभूतौ भुजौ यस्य सः—तम् ।
७ 'मुत्सङ्ग—' मुदां हर्षाणां संगो यत्र तादृक् शय्या—उपाश्रयः तत्र स्थितम् ।

---

1 मा० तृ० स० श्लो० ७५ तृतीयः पादः तृतीयतया ।
2 मा० तृ० स० श्लो० ७५ चतुर्थः पादः चतुर्थतया ।
3 मा० तृ० स० श्लो० ७६ प्रथमः पादः प्रथमतया ।
4 मा० तृ० स० श्लो० ७६ द्वितीयः पादः द्वितीयतया ।
5 मा० तृ० स० श्लो० ७६ तृतीयः पादः तृतीयतया ।
6 मा० तृ० स० श्लो० ७६ चतुर्थः पादः चतुर्थतया । माघे '—नावपतोऽभ्यनन्दत्' इति ।
7 मा० तृ० स० श्लो० ७७ प्रथमः पादः प्रथमतया ।
8 मा० तृ० स० श्लो० ७७ द्वितीयः पादः द्वितीयतया ।
9 मा० तृ० स० श्लो० ७७ तृतीयः पादः तृतीयतया ।
10 मा० तृ० स० श्लो० ७७ चतुर्थः पादः चतुर्थतया ।
11 मा० तृ० स० श्लो० ७८ प्रथमः पादः प्रथमतया ।
12 मा० तृ० स० श्लो० ७८ द्वितीयः पादः द्वितीयतया ।

देवागमे देवकपत्तनाख्यमुत्सङ्गशय्याशयमम्बुराशिः ।
गर्जन्मृदङ्गध्वनिसन्निधानैरनर्तयच्चञ्चलकेतुहस्तम्[1] ॥ १६० ॥
अथाभ्युपेतं बहुबुद्धिधाम्नामुत्सङ्गशय्याशयमम्बुराशिम् ।
श्रीवीरशब्दाद्विजयं स्वशिष्यं पस्पर्श हस्ताम्बुरुहा शमीशः[2] ॥ १६१ ॥
अदूष्यवैदुष्यधरं तमैक्ष्य स्तुवन् कलाभ्यासगुरुं तदीयम् ।
प्रत्युज्जगामेव गुरुप्रमोद-मेदस्वलैस्तुष्टमनास्तदङ्गैः[3] ॥ १६२ ॥
सूरिः सरस्वानिव तं कलाभिस्तूर्णं प्रपूर्णं समवेक्षमाणः ।
सोमं प्रकृत्येव समुल्ललास प्रसारितोत्तुङ्गतरङ्गबाहुः[4] ॥ १६३ ॥
उत्सङ्गिताम्भःकणिको नभस्वान् इवर्षिराजोऽप्रतिबन्धचारी ।
वीरेण तेनान्तिषदाऽनुगम्यः सन्तापमुर्व्या द्विविधं जहार[5] ॥ १६४ ॥
प्रभोः स गाम्भीर्यगुणैर्यशस्वानुदन्वतः खे[३] दलवान् ममार्ज ।
अहर्निशं सेवनया [४]रजांसि नूनं विनेयो विनयैरनूनः[6] ॥ १६५ ॥
शिष्यः प्रतीरे चरतः स विद्वानुदन्वतः खेदलवान् ममार्ज ।
सूरेर्विहारे तपतस्तपांसि बाह्यांस्तथाऽभ्यन्तरगान् विधेयैः[7] ॥ १६६ ॥
स्थिते गुरौ स्थानवतः प्रसुप्ते सुप्तस्य निर्देशदिशैव मार्गम् ।
तस्यानुवेलं व्रजतोऽतिवेलं तपस्यतः श्रीवर्धमाने मुमुक्षोः[8] ॥ १६७ ॥
अहर्निशं बोधधरस्य वैया-वृत्त्यादिकृत्येषु निदेशवृत्तेः ।
तस्या[६]नुवेलं व्रजतोऽतिवेलं-मीर्यासमित्यास यशःप्रकाशः[9] ॥ १६८ ॥
प्रतिस्थलं मण्डलतीर्थभावं समर्थयन्तं जलधेः समीरः ।
[९]सुखः सिषेवे श्रमणाधिपं तम्-एलावनास्फालनलब्धगन्धः[10] ॥ १६९ ॥

---

१ '–मुत्सङ्ग–' उत्सङ्गः क्रोडः स एव शय्या तत्र स्थितम् ।

२ '–धाम्नामुत्सङ्ग'–बुद्धिधाम्नां समुद्रम् । उत्सङ्गे शयौ करौ उत्सङ्गशयौ, तौ यस्य स्तः तद् उत्सङ्गशयि जिनबिम्बम्–तत्र आशयो यस्य सः तम्–जिनबिम्बध्यायिनम् ।

३ 'खे दल–' खे धने दरवान् सभयः–गतधनस्पृहः । यद्वा खे ज्ञातौ दलवान् बहुज्ञातिः इत्यर्थः ।

४ 'रजांसि' पापलक्षणानि ।

५ 'विधेयः' "विधेयो विनयस्थः स्यात्" इति हैमः [ है० अभि० कां० ३ श्लो० ९६ ]

६ '–अनुवेलम्' ईर्यासमित्या व्रजतः ।

७ –'अतिवेल'–अतिबेरं शरीरातिक्रमेण तपस्यन्तम् । "बेरं शरीरम्" कोषे । [ है० अने० सं० कां० २ श्लो० ४४८ ]

८ व्रजतः तस्य अतिवेलं समुद्रवेलातिक्रमेण तथा यशः–प्रकाशः आस दिदीपे "अस गति–दीप्ति–आदानेषु" धातुः ।

९ 'सुखः' सुखयति इति सुखः । "पचाद्यच्" ।

---

1 पूर्ववत् ।

2 पूर्ववत् । केवलम्–माघे '–राशिः' इति ।

3 मा० तृ० स० श्लो० ७८ तृतीयः पादः तृतीयतया ।

4 मा० तृ० स० श्लो० ७८ चतुर्थः पादः चतुर्थतया ।

5 मा० तृ० स० श्लो० ७९ प्रथमः पादः प्रथमतया । माघे '–कणको' इति ।

6 मा० तृ० स० श्लो० ७९ द्वितीयः पादः द्वितीयतया । माघे 'खेदलवान्' इति समस्तम् ।

7 पूर्ववत् । 'खेदलवान्' इति माघवत् ।

8 मा० तृ० स० श्लो० ७९ तृतीयः पादः तृतीयतया । माघे 'व्रजतोऽधिवेलम्' इति ।

9 पूर्ववत् ।

10 मा० तृ० स० श्लो० ७९ चतुर्थः पादः चतुर्थतया । माघे 'एलालतास्फा–' इति ।

उत्तालतालीवनसम्प्रवृत्त-निर्यास[१]पानान्नृपतीन्निषिध्य ।
अन्वीयमानः सबलं गुरुस्तैर्-जनप्रबोधाय भुवि व्यहार्षीत्[1] ॥ १७० ॥
अब्धेरहम्पूर्विकया तरङ्गाः समीरसीमन्तितकेतकीकाः ।
नन्तुं प्रवृत्ता इव तीरदेशे प्रेम्णा व्यलोक्यन्त यतिक्षितीशैः[2] ॥ १७१ ॥
उत्सारितैरुच्चतरैस्तरङ्गैर्मुक्तामणीदेवमणीचकौघैः ।
आसेदिरे लावणसैन्धवीनां प्रसादनानां विधयस्तदेभिः[२][3] ॥ १७२ ॥
वीरस्य[३] तस्य प्रशमानुकम्पा-वबोधभक्त्यादिगुणान् निशम्य ।
स्वर्[४]जन्मतोऽस्योज्जगिरे[५] बिडौजश्-चमूचरैः कच्छभुवां[६] प्रदेशाः[4] ॥ १७३ ॥
सङ्घानुगच्छद्घनतूर्यनाद-स्पर्द्धोद्धतध्वानवतः पयोधेः ।
सरित्प्रसङ्गैः सुभगा निगूढाश्-चमूचरैः कच्छभुवां[७] प्रदेशाः[5] ॥ १७४ ॥
लवङ्गमालाकलितावतंसाः श्रीसूरिराजानुगसङ्घलोकाः ।
तीर्थेषु यात्रार्चनदानकृत्यैर्-बभुर्[८]घनस्य प्रतिमल्लरूपाः[6] ॥ १७५ ॥
सुधा इवाब्धेर्वसुधावतीर्णास्ते नालिकेरान्तरपः पिबन्तः ।
श्रीदेवसूरेरनुयायिभावाद् नरा द्युसद्मान इव व्यराजन्[7] ॥ १७६ ॥
मुक्तावलीभूषितकण्ठदेशा लज्जा[९]प्रसूनैर्धृतकर्णपूराः ।
आस्वादिताऽऽर्द्रक्रमुकाः समुद्रात् प्रियौचितीः प्रापुरनङ्गवत्यः[8] ॥ १७७ ॥
विहृत्य सिन्धोः सविधे तदेवं गन्तुं प्रवृत्ता गिरिदुर्ग[१०]मीशाः ।
श्रुत्वान्तरे सङ्घजनस्य तस्मादभ्यागतस्य प्रतिपत्तिमापुः[9] ॥ १७८ ॥
तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
परिविदितागमस्य सततं रहितस्य सदा शुभागमैः[११] ।

---

१ –'निर्यास–' –रस–
२ '–एभिः' गुरुभिः सेवाप्रकारा आसेदिरे प्राप्ताः ।
३ 'वीरस्य' तस्य जन्मतः ।
४ 'स्वर्' स्वर्गे ।
५ '–उज्जगिरे' गीताः बिडौजश्चमूचरैः देवैः ।
६ 'कच्छभुवाम्' कच्छनाम्नो देशस्य भूमीनां प्रदेशाः ।
७ 'कच्छभुवां' वनभूमीनाम् ।
८ '–घनस्य प्रति–' घनाघनः श्यामः तद्वत् लवङ्गावतंसैः तेऽपि लोकाः श्यामतया प्रतिमल्लाः ।
९ 'लज्जा–' लाजमर्यादा नाम वनस्पतिविशेषः समुद्रतीरे एव भवति ।
१० 'गिरिदुर्ग–' गिरिदुर्गं गिरिनारायणनामतीर्थम् **गिरिनार** इति भाषा ।
११ 'शुभागमैः' शुभाः प्रशस्ताः अगमा वृक्षाः तैः ।

---

1 मा० तृ० स० श्लो० ८० प्रथमः पादः प्रथमतया ।
2 मा० तृ० स० श्लो० ८० द्वितीयः पादः द्वितीयतया ।
3 मा० तृ० स० श्लो० ८० तृतीयः पादः तृतीयतया ।
4 मा० तृ० स० श्लो० ८० चतुर्थः पादः चतुर्थतया ।
5 पूर्ववत् ।
6 मा० तृ० स० श्लो० ८१ प्रथमः पादः प्रथमतया ।
7 मा० तृ० स० श्लो० ८१ द्वितीयः पादः द्वितीयतया । माघे 'नारिकेल–' इति ।
8 मा० तृ० स० श्लो० ८१ तृतीयः पादः तृतीयतया ।
9 मा० तृ० स० श्लो० ८१ चतुर्थः पादः चतुर्थतया । माघे 'प्रतिपत्तिमीयुः' इति भेदः ।

बहुकमलाकरैन्द्रकलितस्य जनस्य गुरुप्रभावतश्-[1]
चिरविगतश्रियो जलनिधेश्च तदाऽभवदन्तरं महत्[1] ॥ १७९ ॥

॥ इति श्रीदेवानन्दमहाकाव्ये दिव्यप्रभापरनाम्नि ऐङ्काराङ्के माघसमस्यार्थे श्रीतपागच्छीयमहोपाध्यायश्रीमेघविजयगणिविरचिते युवराजस्थापन-मरुधर-मेदपाट-सुराष्ट्राविहारवर्णनानानापादसमस्याङ्कितस्तृतीयः सर्गः ॥ ३ ॥

---

## चतुर्थः सर्गः ।

॥ श्रीशङ्खेश्वरपार्श्वनाथाय ऐँ नमः ॥

अथ प्रभातप्रभया विभिन्नं निशास्तमिस्रं ग्रहकान्तिमिश्रम् ।
प्राप्याश्रितं दुर्गमिवोग्ररत्नम् असौ गिरिं रैवतकं ददर्श[1] ॥ १ ॥
शृङ्गैरभङ्गैः सुभगं निजाङ्क-व्यालीनपीनद्रुलतावलीनाम् ।
मा घर्मबाधास्त्विवति सूर्यरश्मीन् पुनः पुना रोद्धुमिवोन्नमद्भिः[2] ॥ २ ॥
सेवे शिवाभूर्भुवि[3] तीर्णकामो वितीर्णकामो भगवान् सदा यम् ।
कृतालये[4] कोमलताभिरामं लताभिरामन्त्रितषट्पदाभिः[4] ॥ ३ ॥
श्रीनेमिनाथं जिनमानिनंसुर् न मानिनं सुस्थरुचिः स शैलम् ।
तमुच्चयौ सङ्कुलताभिरामं लताभिरामन्त्रितषट्पदाभिः[5] ॥ ४ ॥
[ पाठान्तरम् ]
सहस्रसङ्ख्यैर्मनुजैः स सत्रा-ऽधिरुह्य नेमीश्वरमस्य शृङ्गे ।
ननाम वक्त्रांशुजितेषराका-निशाकरं साधुहिरण्यगर्भम्[6] ॥ ५ ॥
स्पृष्टस्फुटस्फाटिकचैत्यमेष तुष्टाव तं नेमिनमञ्जनाभम् ।
कैलासवेश्मानमिभाजिनेन विभक्तभस्मानमिव स्मरारिम्[7] ॥ ६ ॥
ददर्श देवं महितुं गतानां विद्याधराणां महितुङ्गतानाम्[7] ।

---

१ –'कमलाकरै–' कमलाकरा वणिजः ।
–'ऐन्द्र–' ऐन्द्रम् इन्द्रसमूहः, यद्वा इन्द्रः स्वामी भगवान् स एव इति स्वार्थे अणि ऐन्द्रः तेन सहितस्य ।
२ '–प्रभावत–' गुरुणा प्रभावान् गुरुप्रभावान् तस्य ।
३ 'तीर्णकामो' तीर्णः मुक्तः कामः स्मरः येन । पक्षे दत्ताभिलाषः ।
४ 'कृतालये' लताभिः कृताश्रये ।
५ '–आमन्त्रितषट्पदाभिः' आमन्त्रितम् अभ्यस्तम्, षट्पदं नाम भ्रमरविलसितं रतं यासु ताः–ताभिः । यद्वा षट्पदे छन्दोविशेषे आमन्त्रिताः स्तुताः ताभिः । आहिताग्न्यादिवत् परनिपातः ।
६ 'साधुहिरण्य–' साधूनां धातारम् शिवमार्गविधेर्विधानात् ।
७ 'महितुङ्गतानाम्' स गुरुः, विद्याधराणां राजिं ददर्श ।

---

1 मा० तृ० स० श्लो० ८२ प्रथमः पादः प्रथमतया, चतुर्थः पादः चतुर्थतया ।
2 मा० च० स० श्लो० १ चतुर्थः पादः चतुर्थतया । माघे 'रैवतकम्' इति ।
3 मा० च० स० श्लो० २ चतुर्थः पादः चतुर्थतया । माघे 'पुनः पुना' इति ।
4 मा० च० स० श्लो० ३ चतुर्थः पादः चतुर्थतया ।
5 मा० च० स० श्लो० ३ चतुर्थः पादः चतुर्थतया ।
6 मा० च० स० श्लो० ४ चतुर्थः पादः चतुर्थतया । माघे 'साधु' इति पृथक् पदम् । इषराका–आश्विनपूर्णिमा शारदी पूर्णिमा ।
7 मा० च० स० श्लो० ५ चतुर्थः पादः चतुर्थतया ।

स राजिमुत्पिञ्जलजातपत्रैर्विहङ्गमानां [१]जलजातपत्रैः[1] ॥ ७ ॥
सरोजिनीपत्रलवाऽऽदरेण दृष्टोज्झिता चित्रलवा दरेण ।
राजी सशोभाऽजलजा-ऽऽतपत्रैर्विहङ्गमानां जलजा-तप[२]त्रैः[2] ॥ ८ ॥
शिरःस्फुरत्केतुसुधाशिसिन्धून् कपोतपोतस्थितिनीलकण्ठान् ।
गिरिं जगाहे स गुरुर्विहारान् रुद्राननन्तानिव धारयन्तम्[3] ॥ ९ ॥
तद्यात्रयाऽऽत्मानमसौ पवित्रम् आधाय तस्माद् विजहार सूरिः ।
याम[३]स्य पश्यन् विषयप्रधानं शुचीर[४]पः शैवलिनीर्दधानम्[4] ॥ १० ॥
रामा[५]भिरामाभिकदर्शनीयं [६]वत्सादिवत् सादिजनैरनूनम् ।
शस्या[७]नि शस्यानि च [८]दुष्किरात-रक्षोभिरक्षोभितमुद्वहन्तम्[5] ॥ ११ ॥
लाभादिलाऽभादिह रत्नमुक्ता-राज्या सुराज्याऽऽशु तमाप येन ।
देवो [९]नृदेवोऽनृतनुद् विनोदं रक्षोभि[१०]रक्षोभितमुद्वहन्तम्[6] ॥ १२ ॥
तद्राजधान्यां नगरे नवीने तस्थौ गुरुर्यत्र विहारपङ्क्तेः ।
भवन्ति नैव स्तुवतां जनानाम्-उच्छ्रायसौदर्यगुणा मृषोद्याः[7] ॥ १३ ॥
क्रमाद् गणिर्वीर इह प्रभूणां दृष्टया गुणोघैर्ववृधे तथालम् ।
यथा स्युरस्याग्रभुवां मुनीनाम्-उच्छ्रायसौन्दर्यगुणा मृषो[११]द्याः[8] ॥ १४ ॥
तस्याः पुरश्चारुपयोधिवेला-दुकूलभाजस्तुलना कथं स्यात् ।
एकापणादेव समेत्य यस्यां जग्राह रत्नान्यमितानि लोकः[9] ॥ १५ ॥
कान्ताननेभ्योऽन्यपदे सरस्यां[१२]-ऽऽरमज्जनानां चिरमज्जनानाम् ।

---

१ महि उत्सववत् तुङ्गं तानं गीतलयो यस्याः ताम् । किम्भूतानाम् ? विहंगैः पक्षिभिः मा उपमानं येषां ते-तेषाम् । महितुं पूजितुम्, जलजातानि कमलानि तेषां पत्रैः । किम्भूतैः पद्मपत्रैः ? उत्-अतिशयेन पिञ्जराणि पिङ्गानि नवानि पत्राणि येषु तैः पत्रैः ।

२ 'तपत्रैः' तपं तपगणं त्रायन्ते तपत्रा गुरवः तैः पक्षिणां श्रेणी दृष्टा । किंभूता ? पद्मिनीपत्रखण्डस्य आदरेण चित्ररवा नानारुता, दरेण भयेन उज्झिता । किंभूता ? आतपत्रैः छत्ररूपैः पद्मपत्रैः सशोभा सश्रीका । किंभूता ? जलजा अजलजा स्थलजा राजी ।

३ 'यामस्य' यामनाम्ना राजा तस्य ।

४ 'शुचीरपः' शुचीः अपः पवित्राणि जलानि तद्रूपाः शैवलिनीः नदीः-शेवालवतीर्वा । यद्वा 'सुचीरपः' सुष्ठु चीरं श्वेतं पाति यः सुचीरपः ।

५ 'रामा-' नार्यः । अभिरामा अभिकाः कामुकाः तैर्दर्शनीयम् ।

६ 'वत्सादिवत्' वत्सादिदेशवत् अश्वारोहैः पूर्णम् ।

७ 'शस्यानि' धान्यानि फलानि वा-उद्वहन्तम्-वर्ष्याणि ।

८ 'दुष्किरात-' भिल्लरूपराक्षसै अक्षोभितम् ।

९ 'देवो नृदे-' देवः नाम्ना नृरूपेण देवः आशु तं देशम्, येन कारणेन तं देशम् आप तेन रत्नमुक्ताराज्या लाभात् इला भूः अभात् । किंभूता ? सुराज्या । किंभूतो देवः ? अनृतनुत् असत्यवारकः ।

१० 'रक्षोभि-' रक्षोभिः पिशाचदेवैः छलप्रहादिना अक्षोभितम्-अनुपद्रुतम् ।

११ 'मृषो-' असत्याः ।

१२ 'आरमज्ज-' आ समन्तात् रमज्जनानाम्, चिरमज्जनानि स्नानानि तेषां योग्ये सरसि ।

---

1 मा० च० स० श्लो० ६ चतुर्थः पादः चतुर्थतया ।

2 मा० च० स० श्लो० ६ चतुर्थः पादः चतुर्थतया ।

3 मा० च० स० श्लो० ७ चतुर्थः पादः चतुर्थतया । माघे 'रुद्राननेकानिव' इति भेदः ।

4 मा० च० स० श्लो० ८ चतुर्थः पादः चतुर्थतया ।

5 मा० च० स० श्लो० ९ चतुर्थः पादः चतुर्थतया ।

6 मा० च० स० श्लो० ९ चतुर्थः पादः चतुर्थतया ।

7 मा० च० स० श्लो० १० चतुर्थः पादः चतुर्थतया । माघे 'उच्छ्रायसौन्दर्य-' इति पाठः ।

8 मा० च० स० श्लो० १० चतुर्थः पादः चतुर्थतया । माघे 'उच्छ्राय' इति ।

9 मा० च० स० श्लो० ११ चतुर्थः पादः चतुर्थतया ।

योग्येऽत्र [१]भृङ्गी रमते विमुक्त-रसाऽऽनमत्तामरसा न मत्ता[1] ॥ १६ ॥
मुक्ताशया प्रावृषि कश्मलेऽपि [२]नदीप्रवाहे घनदीप्रवाहे ।
हंसा जहत्यत्र जलाश्रयाणां [३]रसा नमत्तामरसा न मत्ताः[2] ॥ १७ ॥
यस्यां जगत्प्राणकना[४]र्णकार्थम्-उदङ्कशालासु जलाध्वनाऽऽप्तः ।
भूभर्तुरुद्भासितमूर्तकीर्तेर्-लीलां दधौ राजतगण्डशैलः[3] ॥ १८ ॥
ततश्चतुर्मासकपारणायां श्रीसिद्धशैलं शमिनामथेशाः ।
श्राद्धैः समृद्धैः सह [५]सङ्घसार्थम्-आनिन्यिरे [६]वंशकरीरनीलैः[4] ॥ १९ ॥
निषेवते यत्र जिनेषु मुख्यं सभा सुराणां रसभासुराणाम् ।
[७]नादृष्ट-दृष्टादिरिहाप्यते तत् [८]विपन्नगानामविपन्नगानाम्[5] ॥ २० ॥
छायां ध्रुवां यत्र करोति सान्द्रा [९]रसालराजिः [१०]सुरसालराजि ।
क्लिश्नाति [११]नारीं न तदातपस्य विपन्नगानामवि[१२]पन्नगानाम्[6] ॥ २१ ॥ [ पाठान्तरम् ]
अथाद्रिसन्धेः स्फुटिकानुबन्धे रेजेऽधिकं सङ्घनिवेशबिम्बम् ।
पात्रे गुणाढ्ये प्रकृतेर्यदाहुः सङ्क्रान्तिमाक्रान्तिगुणातिरेकाम्[7] ॥ २२ ॥
दृष्टोऽपि शैलः स मुहुर्मुनीन्दोरपूर्ववद् विस्मयमाततान ।
क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः[8] ॥ २३ ॥
अत्या[१३]यतं तं सहसाधिरोढुं मत्वा [१४]यतं दुश्चरितान्नितान्तम् ।
उत्कं धरं कश्चिदुपेत्य सूरिम्-उत्कन्धरं [१५]दारुक इत्युवाच[9] ॥ २४ ॥

---

१ 'भृङ्गी' नारीमुखेभ्यः अन्यत्र भृङ्गी न रमते । किंभूता भृङ्गी ? विमुक्तानि रसेन आनमन्ति तामरसानि यया सा । मत्ता पुष्टा ।

२ 'नदीप्रवाहे' मौक्तिकलोभेन हंसा जलाश्रयाणां भूमीर्न जहति । नदीश्रोतसि, घनेन मेघेन दीप्तो वाहो वहनं यत्र तस्मिन् । किंभूता हंसाः ? मत्ताः पुष्टाः ।

३ 'रसा–' भूमीः । नमन्ति तामरसानि यासु ताः ।

४ –'नाणकार्थं–' अर्थेन नित्यसमासः ।

५ 'संघ–' संघोऽत्र चतुर्वर्णः तीर्थरूपः साधु–साध्वी–श्रावक–श्राविका–समुदायस्सार्थः तत्प्रसङ्गी अन्यलोकवर्गः ।

६ 'वंशकरीर–' वंशः अन्वयः स एव करीरः कुम्भः तत्र नीलैः नीलरत्नतुल्यैः ।

७ 'नादृष्ट–' अदृष्टं वह्न्यादि । दृष्टं स्व-परचक्रजं भयं न आप्यते ।

८ किंभूतं भयम् ? नगानां विपत्–तरूणां पर्वतानाम् आपत् । अविपदः अदोषाः ससंपदो वा नगा द्रुमा येषु तेषाम् ।

९ 'रसाल–' आम्रपङ्क्तिः ।

१० 'सुरसाल–' सुरसालेन देवतरुणा राजते यः स सुरसालराट् तत्र पर्वते ।

११ 'नारीम्' नगानां शैलानाम् आतपस्य विपत् नारीं न क्लिश्नाति ।

१२ '–अविपन्नगानाम्' अविपन्नं पूर्णं गानं यस्यास्ताम् ।

१३ 'अत्यायतम्' अतिदीर्घं धिया मत्वा ।

१४ 'यतम्' यतं दुश्चरिताद् उपरतम् ।

१५ 'दारुक–' दारूणि के मस्तके यस्य स भारवाही संघसारथिर्वा ।

---

1 मा० च० स० श्लो० १२ चतुर्थः पादः चतुर्थतया ।

2 मा० च० स० श्लो० १२ चतुर्थः पादः चतुर्थतया । माघे 'मत्ता' ।

3 मा० च० स० श्लो० १३ चतुर्थः पादः चतुर्थतया ।

4 मा० च० स० श्लो० १४ चतुर्थः पादः चतुर्थतया ।

5 मा० च० स० श्लो० १५ चतुर्थः पादः चतुर्थतया ।

6 पूर्ववत् ।

7 मा० च० स० श्लो० १६ चतुर्थः पादः चतुर्थतया । माघे 'संक्रान्तिमाक्रान्त–' इति ।

8 मा० च० स० श्लो० १७ संपूर्णोऽयं श्लोकोऽत्र । केवलम्–'मुनीन्दोः' स्थाने माघे 'मुरारेः' इति पाठः ।

9 मा० च० स० श्लो० १८ चतुर्थः पादः चतुर्थतया । अन्यदपि साम्यं वर्तते ।

रत्नांशुभिर्गगनरत्नरुचां सपत्नैर्या चित्रयन्तमवनीं च जलैः पवित्रैः ।
चूडामणीयितजिनप्रथमांह्रिमेनम्-उद्वीक्ष्य को न भुवि विस्मयते नगेशम्[1] ॥२५॥
सुरधनुषि तते तपात्ययर्तावुभयतटस्फुटकाञ्चनोपलोऽसौ ।
कलयति शिखरी विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्[2] ॥ २६ ॥ [ पुष्पिताग्रा ]
गिरिरयं वियताऽधित सङ्गतिं सहरितालसमाननवांशुकः ।
वसुतटीः श्रयतेऽत्र सुरो नटन् सहरिता लसमाननवांशुकः[3] ॥ २७ ॥
निजगिराशिषमाह तवानमत्-सहरितार ! समान ! नवां शुकः ।
लवतु राजगणः कुरुते नतिं सहरितारसमाननवांशुकः[4] ॥ २८ ॥ [ द्रुतविलम्बितम् ]
एवं गिरौ निवसतः स गिरोऽस्य शृण्वन्-आरुह्य शैलमभिनम्य युगादिदेवम् ।
दध्रे पुरोनिहितवीरमुनिः समत्वम्-उत्सङ्गसङ्गिहरिणस्य मृगाङ्कमूर्तेः[5] ॥ २९ ॥
सङ्घस्य तेन चरता धुरि दारुकेण स्वाम्यादिदेश पथि दर्शितभूरिचैत्यः ।
उद्धारलाभमिह तीर्थकृतो गृहस्य मुत्सङ्गसङ्गिहरिणस्य मृगाङ्कमूर्तेः[6] ॥ ३० ॥
देवादेशाल्लक्ष्मणैस्तैः सरामैर्जीर्णोद्धारा निर्मितास्तद्विहाराः ।
चक्रुश्चञ्चत्केतुभिः प्रान्तरार्तस्वर्लोकस्त्रीगात्रनिर्वाणमत्र[7] ॥ ३१ ॥
प्रथमेशितुर्विहितपूजना दीपनैस्तदयुः पदं गृहमणेर्जना दीपनैः ।
दृषदोऽपि यत्र घनगूढचामीकराः सवितुः क्वचित् कपिशयन्ति चामी कराः[8] ॥ ३२ ॥

---

१ '–गगनरत्न–' –सूर्य– ।
२ 'सहरिताल–' सहरिता दिक्सहितेन । 'अल-समान–' अल-अलम्-हरितालम् तेन तुल्यनवकिरणः ।
३ 'वसुतटीः सहरिताः' स्वर्णतटीः सहरिताः सनीलतृणाः । किम्भूतः सुरः ? लसमाननवांशुकः-दीप्रनव्यवसनः ।
४ 'तवानमत्–' हे आनमत्सचन्द्रनक्षत्र ! । समान !–ज्ञानसहित ! । शुकः निजगिरा नवां तव आह वक्ति ।
५ 'सहरितार–' ससुवर्ण-रूप्यतुल्यनववसनः ।
६ 'मुत्सङ्ग–' मुदां संगा यस्माद् यस्य वा ईदृक् संगी सेवकः । मृगः अङ्कश्चिह्नं यस्याम्– ईदृशी मूर्तिर्यस्य–शान्तितीर्थकृतः ।
७ '–लक्ष्मणैः–' इभ्यैः ।
८ 'सरामैः–' सस्त्रीकैः ।
९ 'प्रान्त–' "प्रान्तरम्–दूरशून्योऽध्वा" [ हैं० अभि० कां० ४ श्लो० ५१ ]
१० 'दीपनैः–' कश्मीरजद्रव्यैः ।
११ '–चामीकराः' यत्र पदे स्थाने दृषदोऽपि घनं बहु, गुप्तं स्वर्णं यासु ताः–तादृशः–सन्ति ।
१२ 'कपिशयन्ति' तथा यत्र सूर्यस्य अमी कराः कपिशयन्ति वानरहस्तवद् भान्ति–मन्दप्रकाशा भवन्ति–इत्यर्थः ।

---

1 मा० च० स० श्लो० १९ चतुर्थ पादः चतुर्थतया । माघे 'को भुवि न' इति ।
2 मा० च० स० श्लो० २० उत्तरार्धम् । माघे 'वहति गिरिरयं विलम्बि–' इति शब्द-भेदः । अर्थभेदो न विद्यते ।
3 मा० च० स० श्लो० २१ द्वितीय–चतुर्थपादौ द्वितीय–चतुर्थपादत्वेन ।
4 मा० च० स० श्लो० २१ द्वितीय–चतुर्थपादौ द्वितीय–चतुर्थपादत्वेन ।
5 मा० च० स० श्लो० २२ चतुर्थः पादः चतुर्थतया ।
6 मा० च० स० श्लो० २२ चतुर्थः पादः चतुर्थतया ।
7 मा० च० स० श्लो० २३ चतुर्थः पादः चतुर्थतया ।
8 मा० च० स० श्लो० २४ चतुर्थः पादः चतुर्थतया ।

दहशुः पदं तदिह सारसं गोचितं सुदृशः प्रियैः सपदि सारसङ्गोचितम् ।
सरितोऽपि यत्र जलगूढचामीकराः सवितुः क्वचित् कपिशयन्ति चामी कराः[1] ॥ ३३ ॥
तीर्थादथ प्रचलितः प्रभुराप तीर्थ-द्रङ्गं स तुङ्गगृहशृङ्गगणैरुदीतम् ।
यत्राम्बुयन्त्रविगलज्जलरूपमब्धेर्विष्वक् तटेषु पतति स्फुटमन्तरिक्षम्[2] ॥ ३४ ॥
सौधानां स्फुटिकघटास्फुटाश्मगर्भसन्दर्भैर्वहति ततिः सपद्मरागैः ।
सङ्गोत्थां विधिदुहितुः कलिन्दजाया वैदग्धीमिह सरितः सुरापगायाः[3] ॥ ३५ ॥
पुरेऽत्र दैवात् त्वमुपात्तदेहाऽसमानवप्रे मणिसा नुरागाः ।
जाताः प्रजास्तत् त्वयि देव ! कामं समा नवप्रेमणि सानुरागाः[4] ३६ ॥
इत्थं स मार्गणगणैरभिनूयमानः प्रापाश्रमं दधतमुज्ज्वलभित्तिभागे ।
हेमाम्बुजैर्भसितभासितनोः पुरारेरुद्वह्निलोचनललामललाटलीलाम्[5] ॥ ३७ ॥
स्थितवति च गुरुस्थिताविहेशेऽभ्युदयदशाऽजनि सा जनस्य यस्याम् ।
गृहततिरतिमोदचित्रितोद्यत्-परिणतदिक्करिकास्तटीर्बिभर्ति[6] ॥ ३८ ॥
स्थाने स्थाने तरुणनृणां सङ्गीतैर्गीतैः स्त्रीणां मुदितजने ।
सद्रङ्गे द्रङ्गे रेजुः सरसफलाः शालीनां लीनां श्रेणीमिह तरवो बिभ्राणाः[7] ॥ ३९ ॥
वृष्टेऽम्भोदे सुरभिधने सापीने पीने क्षेत्रे बहलतानालोके ।
लोके रेजुः सजलसरस्यालीनां लीनां श्रेणीमिह तरवो बिभ्राणाः[8] ॥ ४० ॥
भास्वत्सुपर्वविलसज्जननन्दनेन नित्यं सुवर्णवरगोत्रभृता पुरेण ।
जिग्ये तदा श्रमणराजि विदेहवर्षमेतेन भारतमिलावृतवद् विभाति[9] ॥ ४१ ॥
रुचिरचित्रतनूरुहशालिभिर्दिनकरैरिव रश्मिधरैरिह ।
सशरदं जलदर्तुमतीत्य तैर्जनपदेऽतिजगे जगदर्चितैः[10] ॥ ४२ ॥

---

१ 'सारसम्' सरस इदं सारसम् ।
२ 'गोचितम्' गोभिर्जलैः चितं पुष्टम् ।
३ 'सारसङ्गो-' प्रियैः सारः श्रेष्ठो यः संगः तस्य उचितम् ।
४ 'कपिशयन्ति' यत्र सरितः नद्यः सूर्यस्य कराः कपिशिताः कुर्वते-नदीः पिङ्गलास्तन्वन्ति सूरांशवः ।
५ 'विधि-' सरस्वत्याः ।
६ 'कलि-' यमुनायाः ।
७ 'सुराप-' गङ्गायाः ।
८ 'पुरे' "पुरेऽत्र देवात् त्वकमङ्गयुक्त्याऽ-" इति पाठान्तरे मूर्तिमत् मणिसानुः रत्नशृङ्गम् आगाः । "सानुः पुंनपुंसके" ।
९ '-समान-' किंभूते पुरे ? असमानवप्रे अतुल्यप्राकारे ।
१० 'मणिसा' उपात्तदेहा मूर्तिमती त्वं मणिसा-रत्नलक्ष्मीः ।
११ 'नुरागाः' नुः मनुष्यस्य, अत्र पुरे आगाः आगतः ।
१२ 'समाः' सकलाः ।
१३ '-भसित-' भं नक्षत्रम् तद्वत् सितस्य ।
१४ 'सापीने-' आपीनम् ऊधः तेन सहिते ।
१५ '-आलीनां' सखीनां श्रेणिम् लीनाम्-आश्रिताम् बिभ्राणाः पोषयन्तः ।
१६ 'श्रमण-' श्रमणराजि विभाति सति-भासमाने सति ।
१७ 'भारत-' भारतं विदेहवर्षं जिग्ये । किंभूतं भारतम् ? इलया आवृतवत्-भुवा परिवृतवत् । "क्तवतु" प्रत्ययः ।

---

1 पूर्ववत् ।
2 मा० च० स० श्लो० २५ चतुर्थः पादः चतुर्थतया । माघे 'स्फुटमन्तरीक्षम्' ।
3 मा० च० स० श्लो० २६ चतुर्थः पादः चतुर्थतया ।
4 मा० च० स० श्लो० २७ द्वितीय-चतुर्थपादौ समस्यात्वेन ।
5 मा० च० स० श्लो० २८ चतुर्थः पादः चतुर्थतया ।
6 मा० च० स० श्लो० २९ चतुर्थः पादः चतुर्थतया ।
7 मा० च० स० श्लो० ३० चतुर्थः पादः चतुर्थतया । माघे 'लीनामालीमिह' इति भेदः ।
8 पूर्ववत्
9 मा० च० स० श्लो० ३१ चतुर्थः पादः चतुर्थतया ।
10 मा० च० स० श्लो० ३२ प्रथमः पादः प्रथमतया ।

जिगमिषुर्मुनिराडथ दक्षिणां दिशमसौ शमसौहृदभृज्जनैः ।
अनुययेऽश्वरथेन पुरःसृतावयवैरिव जङ्गमतां गतैः[1] ॥ ४३ ॥
कुशेशयैर्यत्र जलाशयोषिता मुदा रमन्ते कल[१]भा विकस्वरैः ।
ययौ तमध्वानमयं सुयोषितामु[२]दारमन्ते कल[३]भाविकस्वरैः[2] ॥ ४४ ॥
चमूषु येषां कनकैः समन्विता मुदा रमन्ते कलभाः विकस्वरैः ।
नृपास्तमिभ्यैः पथि गीत[४]मन्विता मु[५]दा रमं ते कल[६]भाविकस्वरैः[3] ॥ ४५ ॥
श्रीसूरतौ नृपतिसद्मनि वार्द्धिपक्षैर्वादे विभुं जयरमा परमाभिववे ।
तल्लक्ष्म साम्प्रतमपि व्रतिराजयोऽत्र स्थानं परैरपरिभूतममू[७]ंभजन्ते[4] ॥ ४६ ॥
जयश्रिया भूषितमत्र देवं विनिद्रनेत्रैः प्रविलोकयन्त्यः ।
बभुः स्त्रियः स्मेरमणीचकैर्वा[८] मधुव्रतव्रातवृतैर्व्रतत्यः[5] ॥ ४७ ॥
पुरि तोषमत्र परमापुरितो जनतास्त्रिसन्ध्यमुनिराज[९]नताः ।
सरस[१०]त्वमेव यदियात् सरसः पवनश्च धूतनवनीपवनः[6] ॥ ४८ ॥
दिवसा व्यतीयुरचिरादिव सा सुषमाऽऽस यामिह दधौ [११]सुषमा ।
नितरां च तां नु जनयन्नितरां पवनश्च धूतनवनीपवनः[7] ॥ ४९ ॥
विद्वद्भिरागमपरैर्विवृतं कथञ्चिद् ग्रन्थं शशास भगवान् कुमतव्यपोहम् ।
सम्यग्गणर्षभजनस्तमधीत्य [१२]मत्या गूढार्थमेष निधिमत्र गणं बिभर्ति[8] ॥ ५० ॥
सूरीशे प्रचलति दक्षिणां जनौघैः सङ्कीर्णे पथि पदवन्दनाय निन्ये ।
प्राणेशः कथमपि पाणिना निजस्त्रीमुत्तुङ्गस्तनभर(भङ्ग?)भीरुमध्याम्[9] ॥ ५१ ॥
[१३]पथे जिहानः स विभुर्ददर्श वनं तताऽनेकतमालतालम् ।

---

१ 'कलभा-' कलभाः, करभा वा

२ '-उदारमन्ते' अन्ते समीपे, उदारम् अध्वानं ययौ

३ 'कलभावि-' कलाः मधुराः, भविकाज्जाता भाविका मङ्गलशब्दाः तेषां स्वरैः ।

४ 'पथि गीत-' ते नृपाः तं गुरुम् अन्विताः । किंभूतं गुरुम् ? इभ्यैः पथि मार्गे गीतं वर्णितम् ।

५ 'मुदा रमं' हर्षेण, रमं मनोज्ञम्-जारीमङ्गलगीतरम्यम् ।

६ 'कल-' कलः भावो येषु अस्ति ते कलभाविनः स्वार्थे के कलभाविकाः तादृक्स्वरैः ।

७ '-अमू'-व्रतिराजयः-मुनिश्रेणयः ।

८ '-वा' इवार्थे ।

९ '-राजनताः' अत्र पुरि जनताः परं तोषम् आपुः । किंभूताः जनताः ? त्रिकालं सूरिं नताः ।

१० अत्र अन्योक्तिः-यत्र सरसः पवन इयात् तत्र सरसत्वमेव भवेत् ।

११ 'सुषमा' नु वितर्के इतरां नवीनाम् सुषमां जनयन् । यां सुषमां शोभां सुषमा प्रथमारकः दधौ सा सुषमा आस ।

१२ 'मत्याः' मत्याः निधानम् गूढार्थं बिभर्ति पुष्णाति ।

१३ 'पथे' 'पथ'शब्दः अकारान्तः बृहद्वृत्तौ [ सिद्धहेमचन्द्राख्यशब्दानुशासनस्य ] तद्धिते ।

---

1 मा० च० स० श्लो० ३२ चतुर्थः पादः चतुर्थतया ।

2 मा० च० स० श्लो० ३३ तृतीयपादं विना सर्वं समानम् ।

3 मा० च० स० श्लो० ३३ द्वितीय-चतुर्थपादौ समस्यात्वेन ।

4 मा० च० स० श्लो० ३४ चतुर्थः पादः चतुर्थतया । माघे 'स्थानं परैरनभिभूतममूर्वहन्ति' इति भेदः । 'वहन्ति' स्थाने 'भजन्ति' इत्यपि माघपाठः ।
वार्द्धिपक्षैः-सागरगच्छानुयायिभिः मुनिभिः । वार्धिः—सागरः ।

5 मा० च० स० श्लो० ३५ चतुर्थः पादः चतुर्थतया ।

6 मा० च० स० श्लो० ३६ चतुर्थः पादः चतुर्थतया ।

7 पूर्ववत् । आस-दिदीपे-असी दीप्तौ भौवादिक उभयपदी । लिखितादर्शे-'नवमीपवनः' इति प्रतिभाति ।

8 मा० च० स० श्लो० ३७ प्रथम-चतुर्थपादौ समस्यात्वेन । माघे 'निधिमत्रगणम्' इति भेदः ।

9 मा० च० स० श्लो० ३८ चतुर्थः पादः चतुर्थतया । माघे-'भरभङ्गभीरुमध्याम्' इति । अत्र आदर्शे 'भङ्ग' शब्दो न लिखितः ततश्च छन्दोभङ्गो भाति, अत्र लिपिकारप्रमादः ।

न पुष्पिताऽत्राधिगते मुनीन्द्रावनन्तताने कतमा लताऽलम्[1] ॥ ५२ ॥

[illegible]मचतुराश्चतुराह्वयाद्यास्तत्सङ्घभक्तिमनुयोजनमादधानाः ।
मार्गे वितेनुरचलस्य तपस्विभर्तुर्नार्योऽनुरूपमधिवासमधित्यकासु[2] ॥ ५३ ॥

पुरमवरङ्गसाहितनयेन कृतस्थिति विभुराप संहितनयेन युतम् ।
ध्रुवदिवसं च यत्र सरसा सरसामिह विदधाति धौतकलधौतमही[3] ॥ ५४ ॥

चातुरीत्याख्यया श्रेयसा कान्तया दानशीलादिना श्रेयसाऽकान्तया ।
भक्तयाऽसौ शिवासन्नतापाङ्गया सेव्यतेऽनेकया सन्नतापाङ्गया[4] ॥ ५५ ॥

तत्र स्थिते गणधरे कतिचिद् दिनानि नित्यं महेभ्यविहितोत्सवसान्द्रदेशात् ।
[illegible] नोत्सहन्ते[5] ॥ ५६ ॥

तस्मिन्नित्थं गच्छति काले बहुलाभे शुक्रेऽचालीच्चातुरिकाप्रेरणयासौ ।
सारैः पादैर्निर्मलरूपे घनमार्गे छायामच्छामृच्छति नीलीसलिलस्य[6] ॥ ५७ ॥

सा [illegible] मुनिसङ्घमुदीरन् [illegible]
साहिरोमन [illegible] यतमानम्[7] ॥ ५८ ॥

श्राद्धततिः [illegible] तं सारतरा गमनाऽऽयतमानम् ।
वाहनिका गजराजिविरूढा साऽरतरागमनायतमानम्[8] ॥ ५९ ॥

---

१ 'अत्र' वने 'अधिगते' प्राप्ते मुनीन्द्रौ गुरौ 'अनन्तताने' बहुविस्तारे । अत्र वने कतमा लता न पुष्पिता ? अपि तु सर्वाः ।

२ 'अधित्यकासु' बगलाणदेशे पर्वतोपरिस्थितेषु [illegible] भूमिषु ।

३ 'अवरङ्ग-' अवरङ्गनाम्ना साहिपुत्रेण कृता स्थितिः वसतिः यस्य तत् ।

४ 'संहित-' सम्यग्पुष्टनीत्या युतम् ।

५ 'सरसा' यत्र सरसा मही सरसा सजला दिनं ध्रुवं सदा दधाति ।

६ [illegible] दः ।

७ 'श्रेयसा' मङ्गलरूपेण । 'कान्तया' श्रिया ।

८ 'श्रेयसा' धर्मेण । 'कान्तया' मनोज्ञया । यद्वा 'अकान्तया' दुःखम् तस्य अन्तो यस्याः सा तया ।

९ 'शिवा-' शिवो मोक्षः तदासन्नतायाम् अपाङ्गः कटाक्षो [illegible]ः तया ।

१० 'सन्न-' गततापशरीरया ।

११ 'बहुलाभे' कार्तिकतुल्ये शुक्रे ज्येष्ठे मासि । [illegible] लाभो धर्मस्य यत्र ।

१२ 'सारैः' सूरिसंबद्धैः सूर्यसंबद्धैर्वा ।

१३ 'घनमार्गे' नभसि ।

१४ -'ऋच्छति' शत्रन्तम् ।

१५ 'सारतरागमनाः' अरतरागं यद् मनः तत्सहितः [ स+अरतराग+मनाः-सारतरागमनाः ] 'यतमानम्' यतनया चलन्तम् ।

१६ 'सारतरा-' [illegible] अतिश्रेष्ठवृक्षम् [ सारतर+अगम्-सारतरागम् ] 'अनायतमानम्' आयतो दीर्घः, मानो गर्वः तद्र-हितम् ।

१७ 'सारतरा' धनबला । गमने-गतौ । आयतमानम्-यत्नं कुर्वाणम्-गमने आ समन्तात् यत्नभाजम् ।

१८ 'सा अरतरागमना यतमानम्' सा श्राद्धततिः, अरतरागमना-रते रमणे रागः-रतरागः । अरतरागं मनः यस्याः सा । यतमानम्-यतो बद्धः मानः-अहंकारो येन तं गुरुम्-मानस्य जेतारम् । यद्वा 'सारतराऽऽगमना' श्राद्धततिः-सारतरम् अतिश्रेष्ठं आगमनं संमुखीनरीत्या यस्याः सा सारतरागमना-श्रावकाणां ततिः ।

---

1 मा० च० स० श्लो० ३९ द्वितीय-चतुर्थपादौ समस्यात्वेन ।

2 मा० च० स० श्लो० ४० चतुर्थः पादः चतुर्थत्वेन ।

3 मा० च० स० श्लो० ४१ चतुर्थः पादः चतुर्थत्वेन ।

4 मा० च० स० श्लो० ४२ चतुर्थः पादः चतुर्थत्वेन ।

5 मा० च० स० श्लो० ४३ चतुर्थः पादः चतुर्थत्वेन । माघे-'स्वनश्रुति'-इति भेदः ।

6 मा० च० स० श्लो० ४४ चतुर्थः पादः चतुर्थत्वेन । मत्तमयूरवृत्तम् ।

7 मा० च० स० श्लो० ४५ द्वितीय-चतुर्थपादौ समस्यात्वेन ।

8 पूर्ववत् ।

नत्वा जनः प्रभुमिति स्तुतिमाततान देवागमेन भवतो जनता ननन्दुः ।
तद् वर्ण्यते किमिह यत् सर[१]सीष्वपीमा व्याकोशकोकनदतां दधते नलिन्यः[1] ॥ ६० ॥
निजमण्डलाभ्युदयिनीर्घनागमे कमलाकरः सपदि दर्शनाय ते ।
अभिमन्त्रयत्युत तरङ्गभृद्व[२]यो-विरुतेन वत्सलतयैव निम्नगाः[2] ॥ ६१ ॥
पुरमिदमुदिते[३]शमरु[४]क् कनकौघैः सा[५]रसं च [६]मुदिते समरु[७]क् ।
इह पाकपिशङ्ग[८]लतारजसा रोधश्चकास्ति कपिशं गलता[3] ॥ ६२ ॥
पुरमु[९]खमहिमांशु[१०]समं [११]हरिचीरैः कानने च महिमा[१२]सु समम् ।
इह शाकपिशङ्गलतारजसा रोधश्चकास्ति कपिशं गलता[4] ॥ ६३ ॥
मधुकरवि[१३]टपानमिता ननु मुक्त्वा योषितोऽत्र विटपाऽनमिताः ।
ददृशुरनिभृतं सहसा[१४] वनराजीसंश्रिता मुनिभृतं सहसा[5] ॥ ६४ ॥
इत्थं जनैः स गणभृत् पथि वर्ण्यमानः सद्रत्नतोरणमुपाश्रयमाविवेश ।
पूषेव शारदघनाभ्रमदभ्रशुभ्रमूर्ध्वप्रसारितसुराधिपचापचारु[6] ॥ ६५ ॥
स्थितवति गणपे महे महेभ्यकमलदृशो भृशमुज्जगुर्यशांसि ।
प्रतिदिनमधिसंस्थिता निवासान् शिखरशिलाशिखिशेखराने[१५]मुष्य[7] ॥ ६६ ॥
सवधूकाः सुखिनोऽस्मिन्ननवर[१६]तममं दराग[१७]तामरस[१८]दृशः ।
तत्सेवां नाभ्यमुञ्चन्ननवरतममन्दरागताऽ[१९]मरसदृशः[8] ॥ ६७ ॥
वर्षासु नित्यनवदानजिनार्चनादेः पुण्ये प्रसर्प्पति महे नगरी तदाऽभात् ।

---

१ 'सरसी–' सरसीषु अपि इमा नलिन्यः प्रबुद्धपद्मपुष्पतां दधते ।

२ '–वयो–' पक्षिशब्देन । 'निम्नगाः' नदीः अभिमन्त्रयति–आमन्त्रयति ।

३ 'पुरमिद–' इदं पुरं कनकौघैः कपिशम् '–उदितेशम्–' उदितस्वामिकम् ।

४ 'अरुक्' रोगरहितम् ।

५ 'सारसम्' सरसः तटं रजसा कपिशम् ।

६ 'मुदिते'–हर्षिते ।

७ 'समरुक्' तुल्यकान्ति ।

८ 'पाकपिशङ्गलता' पाकेन परिपक्वतया पिशङ्गा या लता सा पाकपिशङ्गलता ।

९ 'पुरमुखम्'–प्रतोली ।

१० 'अहिमांशुसमम्' अचन्द्रसमानम् ।

११ 'हरिचीरैः' स्वर्णवस्त्रैः ।

१२ 'कानने च महिमासु' वने उत्सवेषु समम्–सदृशं भाति ।

१३ 'मधुकरविटपानमिता–' मद्यहस्तविटपान् मुक्त्वा वनराजीसंश्रिताः अमिता बह्वः योषितः मुनिभृतं गणनाथं योषितः ददृशुः अनिभृतं यथा स्यात् तथा औत्सुक्येन–एतेन स्वैरिण्योऽपि धर्मपरा जाता इति भावः ।

१४ 'सहसा' हासेन सहिता–हर्षवत्यः ।

१५ 'अमुष्य' नगरस्य

१६ 'अस्मिन् ननवरतममं' सुखिनः नराः सनारीकाः अत्र नगरे तस्य गुरोः सेवां न अभ्यमुञ्चन् । कथम् ? यथा स्यात् तथा न नवे रते रमणे ममं ममत्वं यत्र तत् ननवरतममम् । नञ्प्रतिरूपक 'न' इत्यव्ययेन समासः ।

१७ 'दरागता–' दरम् ईषत् आगतां प्राप्तां गुरोः सेवाम् ।

१८ '–अरसदृशः' किंभूताः सुखिनः ? अरसाः अलसाः दृशो येषां ते अलसदृशः गुरुदर्शनविस्मयात् ।

१९ '–अमन्दरागताऽमरस–' अत एव अनवरतं नित्यम् अमन्दरागतया निबिडप्रेमभावेन अमरतुल्याः ।

---

1 मा० च० स० श्लो० ४६ चतुर्थः पादः चतुर्थत्वेन ।

2 मा० च० स० श्लो० ४७ चतुर्थः पादः चतुर्थत्वेन ।

3 मा० च० स० श्लो० ४८ उत्तरार्धमुत्तरार्धतया । माघे 'परिपाकपिशङ्ग–' इति भेदः ।

4 पूर्ववत् ।

5 मा० च० स० श्लो० ४८ प्रथमः पादः प्रथमतया ।

6 मा० च० स० श्लो० ४९ चतुर्थः पादः चतुर्थतया ।

7 मा० च० स० श्लो० ५० चतुर्थः पादः चतुर्थतया । माघे 'शिखरशिखाः शिखि–' इति पार्थक्यम् ।

8 मा० च० स० श्लो० ५१ समग्रः श्लोकः । माघे उत्तरार्धारम्भे 'नासेवन्ते रसवत्' इति भेदः ।

कान्तेव मण्डपमिषाद् वसनं वितत्य धूपायतीव पटलैर्नवनीरदानाम्[1] ॥ ६८ ॥

वेश्म स्वं कृतवरमण्डपं महेभ्यैर्मार्गादौ[१] तपतपने[२] महेन नीते ।
रत्नानां निचितरुचाऽचकात् पुरेऽस्मिन्-आकाशे रचितमभित्ति चित्रकर्म[2] ॥ ६९ ॥

गृहोच्चवसु[३]धासिततमा तमास्वपि कराकरादिह तदा ।
जिगाय रुचिराऽचिरात् ध्रुवमपामपाय[४]धवला बलाहकततीः[3] ॥ ७० ॥

मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
यां ते रमां प्युरमा यशसाऽधुनान्ये वाञ्छन्ति तामपि समाधिभृतो[५] निरोद्धुम्[4] ? ॥७१॥

सूरेः श्रुतोज्ज्वलयशाः क्षितिपातिसाहिरानम्य यां स्वविषयेऽधित जीवरक्षाम् ।
नैवाधुना तदनुजा गुणरागिणो[६]ऽस्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्[5] ॥७२॥

क्षितिपतिपतिशासनाद् विहाराः व्रतिपतिदेशनया जनैः प्रणीताः ।
तदनु च कनकैर्विमानलक्ष्मीमिह दधति स्फुरिताणुरेणुजालाः[6] ॥ ७३ ॥

नाम्बुदेऽभ्युदयिनि प्रिया प्रियान् स्वानमा[७] नमति काऽऽलिमालया[८] ।
का प्रजा न विनता गुरौ तथाऽस्वानमानमतिकालिमालया[7] ॥ ७४ ॥

तीर्थानि नन्तुमथ तेन पथा चचाल सङ्घः समं स गुरुणा करुणाकरेण ।
यत्राचलेषु झरधौतलताजटालास्तीव्रं महाव्रतमिवात्र चरन्ति वप्राः[8] ॥ ७५ ॥

यद्देशे[११] धृतहरिवर्णनावि-नोदाः पानीयाः सुरसवनागमैर्नरादेः ।
व्यासस्य द्रुपदभुवाऽविनाकृतानां साधर्म्यं दधति गिरां महासरस्यः[9] ॥ ७६ ॥

वसति यत्र जनो विभ[१२]या युतः प्रतिपुरं रिपुभाविभयाऽयुतः ।

---

१ '-मार्गादौ' मृगशिरःप्रमुखमासेषु मासकल्पकरणादौ ।

२ 'तपत-' तपगणभानौ ।

३ 'गृहोच्चवसु-' गृहोच्चभूमिः मेघश्रेणीर्जिगाय इत्यन्वयः ।

४-'अपामपायध-' अपाम् अपाये नाशे धवला ।

५ 'समाधिभृतो-'यां रमां श्रियं ते गुरवः प्रापुः तां समाधिभृतोऽन्ये योगिनोऽपि संग्रहीतुं वाञ्छन्ति यशसा सह ।

६ 'गुणरागिणो-' अस्य समाधिभृतः सूरेः गुणरागिणः तत्साहिपरंपराजाताः अधुनाऽपि तां जीवदयां निषेद्धुं नैव वाञ्छन्ति ।

७ 'स्वानमा' स्वान् अमा सह ।

८ 'काऽऽलिमा-' का आलिमालया सखीश्रेण्या ।

९ '-अस्वानमान-' न विद्यते स्वाने शब्दवचने, माने काय-बहुमाने, मतौ बुद्धयाम् कालिमा कृष्णता तस्या आश्रयो यस्याः सा -भावशुद्धा त्रिधाऽपि ।

१० 'वप्राः' तटानि ।

११ 'यद्देशे' यस्मिन् देशे महासरस्यः व्यासस्य गिरां साम्यं दधति । किंभूताः गिरः ? धृता या हरिवर्णा पीतवर्णा नौः प्रवहणं तस्याम्-नावि नोदाः प्रेरणाः यासु । विभक्तेरलुक् । 'नरादेः' जीवस्य । 'सुरस-' सुरसं यत् वनं जलम् तस्य आगमैः 'पानीयाः' पातुं योग्याः । 'द्रुपद-' द्रूणां पदं स्थानं या भूः पृथ्वी तया अविनाकृताः-युक्ताः ।

पक्षे नरादेः अर्जुनप्रभृतेः सुरसं यद् वनम् अरण्यम् तत्र आगमैः द्रष्टुं योग्याः । 'हरि-' हरिः कृष्णः तस्य स्तुतिविलासधराः यत्र नोदाः प्रेरणाः । 'द्रुपद-' द्रुपदभुवा पाञ्चाल्या युक्तानाम् । तथा 'सुरस-' सुराणां सवनाय स्नानाय आगमाः तैः-इत्यपि । "नरः कृष्णेऽर्जुनेऽपि च" । [ है० अने० सं० का० २ श्लो० ४२३ ]

१२ 'विभया' विभा प्रभा तया-कान्त्या ।

---

1 मा० च० स० श्लो० ५२ चतुर्थः पादः चतुर्थतया ।

2 मा० च० स० श्लो० ५३ चतुर्थः पादः चतुर्थतया ।

3 मा० च० स० श्लो० ५४ चतुर्थः पादः चतुर्थतया । 'कराकरात्'-किरणसमूहात् इति भावः ।

4 मा० च० स० श्लो० ५५ चतुर्थः पादः चतुर्थतया ।

5 पूर्ववत् ।

6 मा० च० स० श्लो० ५६ चतुर्थः पादः चतुर्थतया ।

7 मा० च० स० श्लो० ५७ द्वितीयचतुर्थपादौ समस्यात्वेन ।

8 मा० च० स० श्लो० ५८ चतुर्थः पादः चतुर्थतया ।

9 मा० च० स० श्लो० ५९ चतुर्थः पादः चतुर्थतया ।

ललति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः[1] ॥ ७७ ॥

नत्वा गिरौ पथि जिनं कलिकुण्डपार्श्वंभास्वन्तमम्बुधितटे करहेडपार्श्वम् ।
देवोऽभिनम्य न दधेऽप्रतिबद्धचाररागीव सक्तिमधिकां विषयेषु वायुः[1] ॥ ७८ ॥

सङ्घं भक्त्या कृतजिनमहनं तीर्थे तत्र स्थितमतिचलनैः ।
खिन्नं भेजुर्जलनिधिपवनाः क्रीडायासश्रमशमपटवः[2] ॥ ७९ ॥

उक्षार्थिनालम्भि न जन्मतोऽपि स दानतो येन विषाणिनागः ।
तस्मै ददे सङ्घजनेन तत्र सदानतोयेन विषाणिनागः[2] ॥ ८० ॥

तीर्थान्यथैवमभिनम्य कृतप्रयाणे सङ्घे प्रतिस्वनगरं समयोचिताभिः ।
सेवाविधाभिरयमध्वनि वेद सूरिर्न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि[3] ॥ ८१ ॥

कृतनगरनिवेशं प्रौढशोभाभिरामं श्रमणपदमधीशः शिश्रिये हंसगौरम् ।
ध्वजपटलजटालं बिभ्रदुद्धूतिभावैरधिगतधवलिम्नः शूलपाणेरभिख्याम्[6] ॥ ८२ ॥

प्रभोस्तव वचःश्रुतेर्विमलशीलधानादरादनङ्गविमुखा जनास्तनुभृतां वधानादराः ।
निशम्य वचनं कवेरपि च नात्र कादम्बरं हरन्ति रतये रहः प्रियतमाङ्गकादम्बरम्[7] ॥ ८३ ॥

देव ! तवात्र शीलवचसि श्रुतवति सततं माऽन्यजनस्य दर्शनमिति द्रुततरगमनाः ।
चित्रितमध्यभूषु भवनं दिनमुखसमये काञ्चनकन्दरासु तरुणीरिह नयति रविः[8] ॥ ८४ ॥

पुरि तदिह निगम्या प्रावृडिल्याग्रहेणाऽऽस्थित बहुधनभाजां योगभाजां महेज्यः ।
नभसि नभसि रुद्धे सैन्द्रचापोत्तरीयैर्हलधरपरिधानश्यामलैरम्बुवाहैः[9] ॥ ८५ ॥

॥ इति श्रीदेवानन्दे महाकाव्ये दिव्यप्रभापरनाम्नि ऐङ्काराङ्के माघसमस्यार्थे श्रीतपापक्षीयमहोपाध्यायश्रीमेघविजयगणिविरचिते यमकरम्यश्चतुर्थः सर्गः सम्पूर्णः ॥

---

१ 'वायुः' वायुः इव अप्रतिबद्धरागचारी गुरुः विषयेषु देशेषु अधिकं सक्तिं प्रीतिं न दधे पुपोष–अन्तर्णिगर्थः–लोकानामिति गम्यम् ।

२ 'विषाणि–' येन अर्थिना 'जन्मतः' आरभ्य 'दानतः' 'स' प्रसिद्धः 'उक्षा' वृषभः 'न' 'अलम्भि' प्राप्तः । किंभूतः उक्षा ? विषाणिषु शृङ्गिषु नागः श्रेष्ठः । 'तस्मै' अर्थिने 'सदानतोयेन' दानाञ्जलिजलयुक्तेन 'संघजनेन' 'विषाणिनागः' विषाणी दन्तवान् नागः गजः 'ददे' दत्तः ।

३ 'द्वन्द्व'–द्वन्द्वं शीतातपादि ।

४ '–शीलधानादराद–' विमलशीलधरणस्य आदरात् । 'विमलशीलधानाः' इति भिन्नं पदम् । 'दरात्' भयात् ।

५ 'कादम्बरम्' कादम्बर्याः कषायाः तेषु भवं कादम्बरम् ।

६–'काद् अम्बरम्' प्रियतमाशरीरात् अम्बरं वसनं न हरन्ति । 'रतये' क्रीडायै न पुनः संभोगाय ।

७ 'अन्यजनस्य' दर्शनं मा स्यात्–"असूर्यपश्या राजदाराः" इति न्यायात् ।

८ 'रविः' काञ्चनस्य कन्दलाः अङ्कुराः यासु तासु चित्रितमध्यभूषु द्रुततरगमनाः तरुणीः भवनं नयति रविः ।

---

1 मा० च० स० श्लो० ६० तृतीय–चतुर्थपादौ । माघे 'स्फुरति चानुवनम्' इति क्रियाभेदः ।

2 मा० च० स० श्लो० ६१ चतुर्थः पादः चतुर्थतया ।

3 मा० च० स० श्लो० ६२ चतुर्थः पादः चतुर्थतया ।

4 मा० च० स० श्लो० ६३ द्वितीय-चतुर्थपादौ समस्यात्वेन, केवलम् पदच्छेदभेदः ।

5 मा० च० स० श्लो० ६४ चतुर्थः पादः चतुर्थत्वेन ।

6 मा० च० स० श्लो० ६५ चतुर्थः पादः चतुर्थत्वेन ।

7 मा० च० स० श्लो० ६६ चतुर्थः पादः चतुर्थत्वेन ।

8 मा० च० स० श्लो० ६७ चतुर्थः पादः चतुर्थत्वेन । माघे 'काञ्चनकं दरासु' इति पदविभागः ।

9 मा० च० स० श्लो० ६८ चतुर्थः पादः चतुर्थत्वेन ।

# पञ्चमः सर्गः ।

॥ श्रीशङ्खेश्वरपार्श्वपरमेश्वराय नमः ॥

देवप्रतिष्ठितविधावथ देवचन्द्रः[1] श्राद्धः श्रियो व्यधित याः स्फुटभावं चन्द्रः[2] ।
तन्मण्डपे च शुशुभे तुलनाऽवसाने[3] तासां गिरौ च वनराजिपटं वसाने[1] ॥ १ ॥
सूरेस्तपोभिरमलैर्निहतान्तराये तत्र क्षणे क्षितिपतेरभवत् सहायः ।
पुन्नागवान् कदलिकावलिचारुचैर्लक्ष्मीं दधत् प्रतिगिरेरलघुर्बलौघः[2] ॥ २ ॥
यात्रां जलस्य गुरुणा सह संविधातुं सङ्घे बलेन मिलिते चलिते निजालीः ।
प्रैषीद्दिवेक्षितुमिहानयनाय सर्वाः पृथ्वी रजः करभकण्ठकडारमाशाः[3] ॥ ३ ॥
साडम्बराः सुरविधोः स्वजनाश्ववाराः उत्क्षिप्यमाणचमरालिलसत्कुमाराः ।
रेजुस्तदा प्रतिपदं निजवर्गपूर्णास्तूर्णं पयोधय इवोर्मिभिरापतन्तः[4] ॥ ४ ॥
यात्राभिषेकमहनाञ्जनसत्क्रियासु बिम्बावलेर्ध्वनितत्तूर्यरवैर्विहस्तौ ।
लुब्धौ वधूकलरवैः स्खलनेऽपि नालमन्योन्यतः पथि बताऽबिभितामिभोष्ट्रौ[5] ॥ ५ ॥
एवं वितीर्णविभवं सुकृतेषु रूप्यैः सम्पूज्य भोज्यवसनैः प्रतिलाभयन्तम् ।
तं बहुमन्यत गुरुर्भुवि देवचन्द्रं सर्वः प्रियः खलु भवत्यनुरूपचेष्टः[6] ॥ ६ ॥
नान्दीरवैः सह महीशबलानुगम्ये सङ्घेऽभियाति समहं समचैत्यनत्यै ।
वीक्षोत्सुकाऽपि रभसाज्जनदृष्टिमार्गे विस्रस्तवस्त्रमवरोधवधूः पपात[7] ॥ ७ ॥
श्रीदेवचन्द्रवणिजः सदनात् तदानीं सङ्घस्य भोजनदिने मुदितार्थिसार्थे ।
धूमा महानसभुवो दिवि मेघरूपाश्चक्रीवदङ्गरुहधूम्ररुचो विसस्रुः[8] ॥ ८ ॥
सर्वे वणिग्मणिवरेण सुरेन्दुना ते सम्मानिताः प्रतिगृहं स्वजनाश्ववाराः ।
जग्मुः क्रमात् पथि मुदा हयनर्तनाय शैलस्य दर्दरपुटानिव वादयन्तः[9] ॥ ९ ॥
सम्मान्य रत्नवसनैः क्षितिराजराजा दत्तः सुरेन्दुवणिजे विपणौ तुरङ्गः ।

---

१ 'देवचन्द्रः' देवचन्द्रः याः श्रियः शोभा व्यधित तासां तुलना साम्यं तन्मण्डपे 'च' पुनर् गिरौ शुशुभे ।

२ '–चन्द्रः' "चन्द्रोऽम्बु–काम्ययोः । स्वर्णे सुधांशौ कर्पूरे कम्पिल्ये मेचके च" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ४०६ ]

३ '–अवसाने' अवनम् अवः जीवरक्षा तस्याः सानं दानं यत्र मण्डपे । "षणूयी दाने धातुः" । यद्वा अवसाने अनन्ते–'अवसान'शब्दस्य अवोपसर्गाकारलोपे वसानः अन्तः तन्निषेधे अवसानः अनन्तः ।

४ 'कदलिका–' "कदली वैजयन्त्यां रम्भायां हरिणान्तरे" इति विश्वः । [ विश्व० लान्तव० श्लो० ६७ ]

५ 'पृथ्वी' पृथ्वी सर्वा आशा दिशः ईक्षितुम् आनयनाय रजः प्रैषीत् ।

६ 'सुरविधोः' देवचन्द्रस्य ।

७ 'सुरेन्दुना' देवचन्द्रेण ।

---

1 'स्फुटभावं चन्द्रः' इत्यत्र भावशब्दशिरस्थोऽनुस्वारः अस्य चित्रकाव्यत्वेन अत्र न गण्यते, अतो न छन्दोभङ्गः ।
मा० पं० स० श्लो० १ चतुर्थः पादः चतुर्थतया ।

2 मा० पं० स० श्लो० २ चतुर्थः पादः चतुर्थतया ।

3 मा० पं० स० श्लो० ३ चतुर्थः पादः चतुर्थतया । माघे 'पृथ्वीरजः' इति समस्तम् ।

4 मा० पं० स० श्लो० ४ चतुर्थः पादः चतुर्थतया ।

5 मा० पं० स० श्लो० ५ चतुर्थः पादः चतुर्थतया ।

6 मा० पं० स० श्लो० ६ चतुर्थः पादः चतुर्थतया ।

7 मा० पं० स० श्लो० ७ चतुर्थः पादः चतुर्थत्वेन ।

8 मा० पं० स० श्लो० ८ चतुर्थः पादः चतुर्थत्वेन ।

9 मा० पं० स० श्लो० ९ माघे 'दर्दुरपुटा'—इति ।

प्रीत्योल्लसन्निव समाश्रयणेऽस्य जात्यश्चित्रं चकार पदमर्द्धपुलालयेन[1] ॥ १० ॥
बिम्बाभिषेचनदिदृक्षुनरेन्द्रसान्द्रपश्चाद्वलोद्वलचलत्तुरगप्रणुन्नः ।
पूतः प्रभोरिव पदैर्दिवमाप्तुमिच्छुः पांशुर्दिशां मुखमतुच्छयदुत्थितोऽद्रेः[2] ॥ ११ ॥
सूरिस्ततोऽथ नगरान्नगराजितेऽगात् द्रङ्गेऽवरङ्गपद्भाजि जनैरभाजि ।
तन्न्युञ्छनस्थितिरतस्तदलं विरेजुर्मुक्ताफलप्रकरभाञ्जि गुहागृहा[३]णि[3] ॥ १२ ॥
उत्साहिसाहितनयप्रतिशासनेन रङ्गत्तुरङ्गचतुरङ्गचमूयुजाऽस्मिन् ।
सङ्घेन सार्द्धमयमाश्रयदुच्चचूलं स्वावासभागमुरगाशनकेतुयष्ट्या[4] ॥ १३ ॥
ऐरावतीं तनुरुचं शुचिसम्भवेन बिभ्राणमेनमुदयेन घनायमानम् ।
संवीक्ष्य कोपि न परत्र जनः स्म तेजो-वर्द्धिष्णुमाश्रयमना गतमभ्युपैति[5] ॥ १४ ॥
ज्येष्ठस्थितौ स्थितमदुःस्थितमुग्रलक्ष्मीं संराद्धुमीशमिह धर्ममहोत्सवेषु ।
क्रष्टुं महोदयमिव स्वजनेन दूरादुद्बाहुनाऽऽजुहुविरे मुहुरात्मवर्ग्याः[6] ॥ १५ ॥
विश्वेक्षणंक्षणजरूप्यकदक्षिणाभिर्देशाभिधान्वयविधामभिधारयन्तः ।
श्राद्धास्तदार्थिजनकल्पितदानकल्पैः[१२] कल्पद्रुमैः सह[१३] विचित्रफलैर्विरेजुः[7] ॥ १६ ॥
उन्नीय पुण्यमपनीयमपुण्यमेवं पार्श्वं निनंसुरगमद् गुरुरन्तरिक्षम् ।

---

१ '–पुला–' पुला नाम प्लुताद्यनेकापरनामा हयानां गतिविशेषः ।

२ '–पश्चाद्वलोद्वलच–' "वल धातुः" आत्मनेपदी । पश्चाद् वलते इति पश्चाद्वलः स चासौ उद्वलः अधिकवीर्यः चलन् यस्तुरगः तेन प्रणुन्नः प्रेरितः ।

३ 'गुहा–' गुहावत् गृहाणि गुहागृहाणि । यद्वा 'गुहा' इति भिन्नपदम् ।

४ '–उरगाशन–' गरुडध्वजेन उच्चचूलम् ।

५ 'ऐरावतीम्' ऐरावतो हस्तिमल्लः तत्संबन्धिनीं शरीरकान्तिम् । पक्षे स्वल्परुचिम् । घनपक्षे ऐरावतीं विद्युतम् ।

६ 'शुचि–' "शुचिः शुद्धे सितेऽनले । ग्रीष्मा-ऽऽषाढानुपहते-ष्वुपधाशुद्धमन्त्रिणि शृङ्गारे च" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ५९ ]

७ '–एनम्–' एनं गुरुं वीक्ष्य कोऽपि जनः परत्र 'गतम्' गमनं नाभ्युपैति स्म ।

८ '–आश्रयमना–' आश्रये मनो यस्य स आश्रयमनाः ।

९ 'ज्येष्ठ–' चतुर्मासके ।

१० '–क्षण–' "क्षणः कालविशेषे स्यात् पर्वण्यवसरे महे । व्यापारविकलत्वे च परतन्त्रत्वमध्ययोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० १३३ ]

११ 'देशा–' देशनाम दक्षिणा इति सत्यं कुर्वन्तः ।

१२ '–दानकल्पैः' अर्थिजनेषु कल्पितः कृतः दानकल्पो दानविधिर्यैस्ते–तैः ।

१३ 'सह' इवार्थे ।

---

1 मा० पं० स० श्लो० १० चतुर्थः पादः चतुर्थत्वेन । माघे 'पुलायितेन' इति भेदः ।

पुला नाम प्लुताद्यनेकापरनामा हयानां गतिविशेषः । तदुक्तं हयलीलावत्याम्—

"प्लुतां प्लवङ्गितामाहुर्या धारा पुलनाभिधा ।
पुनरेनां रलोपान्तां पुलामित्याह देशिकः ॥ तल्लक्षणं च तत्रैवोक्तम्—

क्षिपति समविशेषानुत्क्षिपत्यग्रपादान्
प्रसरति पुरतोऽश्वः साधु धारा पुलाख्या ।
विलसति समपादोत्क्षेपणाकुञ्चनानां
करणमिह गतिज्ञाः प्राहुरन्ये पुलाख्याम्" ॥

इत्यादि हयगतिसंबन्धि सविस्तरं वर्णनं माघस्य मल्लिनाथीयटीकातोऽवगन्तव्यम् ।

2 मा० पं० स० श्लो० ११ चतुर्थः पादः चतुर्थतया । माघे 'मुखमतुत्थयदुत्थितो—' इति भेदः । अत्र 'च्छ'–'त्थ' कारयोः लिपिसाम्यमेव पाठभेदनिबन्धनम् । लिखितप्रतौ तु 'अतुच्छयत्' इति स्पष्टं वाच्यते । आचार्यहेमचन्द्रस्तु एनमेव पादं स्वीये धातुपारायणे ( पृ० २८८ ) "पांशुर्दिशां मुखमतुत्थयदुत्थितोऽद्रेः" इत्येव निर्दिशति, अतोऽवगम्यते यत् 'अतुत्थयत्' इति साधुतरम् । लिपिकारप्रमादाच्च 'अतुच्छयत्' इति जातम् । "तुत्थ आच्छादने इति चौरादिको धातुः"—मल्लिनाथटीका ।

3 मा० पं० स० श्लो० १२ चतुर्थः पादः चतुर्थतया ।

4 मा० पं० स० श्लो० १३ चतुर्थः पादः चतुर्थतया ।

5 मा० पं० स० श्लो० १४ चतुर्थः पादः चतुर्थतया ।

6 मा० पं० स० श्लो० १५ चतुर्थः पादः चतुर्थतया ।

7 मा० पं० स० श्लो० १६ चतुर्थः पादः चतुर्थतया ।

गत्वाऽऽतपत्रितफणागणमस्य पद्मं वक्त्रं श्रियः सभयकौतुकमीक्षते स्म[1] ॥ १७ ॥
निन्ये विभुर्मणिमयप्रतिमाः प्रतिष्ठां सङ्घस्तदर्चनमहो स्थितिरुत्तमानाम् ।
व्याप्तौ[3] भ्रुवोऽपि वरदीपनचन्दनानि गण्डस्थलीः शुचितया न चुचुम्बुरासाम्[2] ॥ १८ ॥
कर्पूरपूर्णवरवर्णरसानुलेपैर्देवार्चनाय सुगतागतचञ्चलाक्षीः ।
आलिङ्ग्यन् व्रतिवरा रभसा रसार्द्रगण्डस्थलीः शुचितया न चुचुम्बुरासाम्[3] ॥ १९ ॥

[ पाठान्तरम् ]

अन्योन्यभोजनविधानकृतावधानः सङ्घो न नैकपुरजः प्रतिगन्तुमैच्छत् ।
इभ्यैर्विना वितरणेऽतिशयं स्ववारे संङ्घर्षिणा सह गुणाभ्यधिकैर्दुरासम्[4] ॥ २० ॥
स्थित्वा दिनानि कतिचित् प्रतिजग्मुषोऽस्य सूरेरथो पथि जनैर्मिलिता जनानाम् ।
बर्हानपूर्वनगरान्नगराजसत्कपादा इवाधिबभुरावलयो रथानाम्[5] ॥ २१ ॥
बर्हानपूर्जनकृताग्रहतस्त्वराभिरागन्तुकं सबहुसङ्घगुरुं निशम्य ।
तत्रोत्सवोच्छ्रितपतत्रितदूष्यराजितारावलीविरचनैर्व्यरुचन्निवासाः[6] ॥ २२ ॥
आनन्दनन्दकतयाभिनदत्सु नान्दीनादेषु सम्मदकलैर्धवलैर्वधूनाम् ।
आस्तां जनः क्षणमवापि न चापि रात्रौ निद्रासुखं वसनसद्मसु राजदारैः[7] ॥ २३ ॥
राजन्यराजिगजवाजिविराजिसङ्घनिर्दिश्यमानपदसूरिवरप्रवेशे ।
तद्विस्मयस्मितमुखी विविधक्रियाभिः शांतोदरी युवदृशां क्षणमुत्सवोऽभूत्[8] ॥ २४ ॥
सर्वत्र चित्रशतपत्रमुखीभिरुच्चैर्निर्मीयमाणबहुमङ्गलसंविधानैः ।

१ '–फणा–' "गोविषाणे फणा ज्ञेया भुजंगस्य फणः फणा । फणा जटा फणा तृष्णा फणा मन्थानकुण्डली" ॥ इति अनेकार्थमञ्जरी [ श्लोकाधि० श्लो० ९० ]

२ 'वक्त्रम्' अस्य पार्श्वप्रभोः वक्त्रं पद्ममिव इति लुप्तोपमा ।

३ 'व्याप्तौ' भूव्यापनेऽपि केसरादेः मर्यादानतिक्रमः । प्रतिमानां नैर्मल्यं ज्ञापितम् ।

४ 'शुचि–' ब्रह्मचारी सदा शुचिः ।

५ 'स्ववारे' इभ्यैः स्ववारे स्वसमये विशेषात् दानशौण्डैर्भाव्यमिति भावः ।

६ 'संघर्षिणा' संघश्च ऋषिश्च संघर्षिः । सर्वो द्वन्द्वो विभाषया एकवद् इति ।

७ '–दुरासम्' संघर्षिणा सह वितरणे दाने अतिशयं विना दुःखेन स्थीयते–यदा ते अधिकाधिकं दद्युः तदैव ते सुखिता भवन्ति अन्यथा दुःखिताः स्युः इति तेषां अधिकदानरसिकत्वं ज्ञापितम् ।

८ '–उत्सवोच्छ्रित–' उत्सवेन हेतुना उच्छ्रितानि उन्नीतानि । पतत्रं पक्षः तद्वद् आचरितानि दूष्याणि पटमण्डपाः तेषां श्रेणिः तस्यां तारावलीविरचनैः मुक्ताग्रथनैः । तारावलीनां रज्जुश्रेणीनां विरचनैर्बन्धनैः उड्डयनाय उद्यता इति भावः । "तारा मुक्तादिसंशुद्धौ तरले शुद्धमौक्तिके" इति विश्वः [ विश्व० रान्तव० श्लो० ४१ ] "तारावली रज्जुसंततिः" इति केचित् । "दूष्यं वस्त्रे च तद्गृहे" इति विश्वः [ विश्व० यान्तव० श्लो० २९ ] 'व्यरुचन्' "द्युद्भ्योऽद्यतन्याम्" [ ३।३।४४ हैम० ] इति परस्मैपदम् ।

९ आचार्यहेमचन्द्रस्तु स्वीयदेशीनाममालाटीकायां कृशार्थस्य छातशब्दप्रतिरूपस्य 'छाअ' शब्दस्य विवरणप्रसङ्गे एनं चतुर्थं पादमित्थं निर्दिशति–"छातोदरी युवदृशां क्षणमुत्सवोऽभूत्"–देशीनाममाला वर्ग ३, गाथा ३३ ।

1 मा० पं० स० श्लो० १७ चतुर्थः पादः चतुर्थतया । माघे 'वक्त्रश्रियः' इति भेदः ।

2 मा० पं० स० श्लो० १८ चतुर्थः पादः चतुर्थतया ।

3 पूर्ववत् ।

4 मा० पं० स० श्लो० १९ चतुर्थः पादः चतुर्थतया ।

5 मा० पं० स० श्लो० २० चतुर्थः पादः चतुर्थतया । माघे 'अभिबभुः' इति ।

6 मा० पं० स० श्लो० २१ चतुर्थः पादः चतुर्थतया ।

7 मा० पं० स० श्लो० २२ चतुर्थः पादः चतुर्थतया ।

8 मा० पं० स० श्लो० २३ चतुर्थः पादः चतुर्थतया ।

संवर्धितोच्छ्रितमणीन् गणिनः[१] सुवर्णपूर्णा[२]पणान् विपणिनो[३] वि[४]पणीन् विभेजुः[1] ॥ २५ ॥
मेने जनः[५] प्रभुमवेक्ष्य किमर्कचन्द्रावेतज्जितौ स्वमहसा यशसेति नूनम् ।
अश्वान् रविर्द्रुतगमार्थमनन्तमस्मादन्यः शशं गुणमनल्पमवन्नवाप[2] ॥ २६ ॥
नानामहैः सह सुधर्मविधिप्रबन्धाद् धर्माश्रमं श्रितवति श्रमणे दिनोऽभूत् ।
योषिज्जनेषु दुरिते चरितैस्तपोभिराकर्णपूर्णनयनेषु हते क्षणश्रीः[६][3] ॥ २७ ॥
राष्ट्रान्तरादपि समेत्य गुणैर्गणेन्द्रं कृष्टः प्रकृष्टमनसा सुकृतैकनिष्ठः ।
तत्रावसन् वसनभोज्यधनो[७]पहारैः प्रत्यग्रही[८]च्चिरनिविष्ट इवोपचारैः[4] ॥ २८ ॥
केचिद् दधुर्व्रतविधिं भविनो विनोदैर्दानानि केऽपि ददुरर्थिमुदे यथेष्टम् ।
देवे स्थिते चलतयाऽङ्घिभुवामभोगदोषप्रवादममृजन्न[९]गनिम्नगानाम्[5] ॥ २९ ॥
सा जैनपूजनविधाऽजनि तत्र सत्राऽमात्रोत्सवैः प्रतिदिनं सुगुरूपदेशात् ।
यद्वीक्षणोद्यतवधूर्न दधौ गतानि वल्गद्घनस्तनतटस्खलितानि मन्दम्[6] ॥ ३० ॥
सांवत्सरे व्यधित पर्वणि सर्वसङ्घश्चैत्यानतिं सहगुरुः[१०] पथि यत् पुरस्तात् ।
सिञ्चन्त्यगुर्विततपुष्करसीकरैस्तं मूर्धन्यरत्ननिकरैरिव हास्तिकानि[7] ॥ ३१ ॥
इत्युत्सवैरभिनवैर्विभवैर्व्यतीत्य वर्षा[११] गुरोर्जिगमिषोरनुगृह्य गृह्याः[१२] ।
सार्थे चचाल कमलाऽङ्कवती ससंघ[१३]माक्षिप्त[१४]केतुकुथसैन्यगजच्छलेन[8] ॥ ३२ ॥
उत्फुल्लमल्लिकवनीमुखमल्लिकापूः[१५] पूता निजांह्रिकमलैर्गुरुणा समृद्ध्या ।
सङ्घो ववर्ष स मिथो बहुदानमन्यनागाभियुक्त इव युक्तमहो ! महेभः[9] ॥ ३३ ॥
तत्रत्यसङ्घसहितः स हि तत्त्वदर्शी तीर्थानि नन्तुमथ तत्र पथा तथागात् ।
हस्त्यादिसङ्कुलतयाकुलितो जलौघे रिक्तोदपात्रकरमास्त चिरं जनौघः[10] ॥ ३४ ॥

---

१ 'गणिनः' गणः गच्छः स्वत्वेन येषां ते गणिनः–सूरयः ।

२ 'सुवर्ण–' सुवर्णेन हेम्ना यद्वा सुवर्णेन द्विज-क्षत्रिय-वैश्य-लक्षणेन पूर्णाः आपणा येषु तान् ।

३ 'विपणिनो' विपणी व्यवहारी तस्य विपणिनः । जातौ एकवचनम् ।

४ 'विपणीन्' वणिग्मार्गान् ।

५ 'जनः' जनः एवं मेने—अर्क-चन्द्रौ एतेन जितौ ततः अश्वान् रविः, तदन्यः शशी शशम्—अवन्–रक्षन् अनन्तं व्योम अवाप । अनल्पगुणमिषात् पलायनशिक्षा नीतिशास्त्रे ।

६ 'क्षणश्रीः' दिनः क्षणतुल्यः स्त्रीजनेषु । कस्मिन् सति? चरितैः कृतैः तपोभिः दुरिते हते सति ।

७ '–भोज्य–' वसति–भक्त-पान-भैषजादिभिः ।

८ 'प्रत्यग्रहीच्चि–' तत्र नगरे अवसन्नपि प्रत्यग्रहीत् निषेवे चिरनिविष्ट इव बहुकालोषित इव

९ '–ममृजन्न–' चलतया नगनिम्नगानां नदीतुल्यानामङ्घिभुवां श्रियाम् अभोगदोषप्रवादम् अमृजन्–भुक्ता इति भावः ।

१० 'सहगुरुः' गुरुणा सह सहगुरुः ।

११ 'वर्षा' वर्षाशब्दः ऋतुवाची बहुत्वे ।

१२ 'गृह्याः' शाखापुराणि आसन् ।

१३ 'ससंघ–' संघेन सह यथा स्यात् तथा ।

१४ '–आक्षिप्तकेतु–' आ समन्तात् क्षिप्ताः प्रेरिताः केतवो ध्वजाः, कुथाः करिकम्बलाश्च येषु ईदृशा ये सैन्यस्य गजाः तेषां दम्भेन लक्ष्मीः सार्थे चचाल ।

१५ '–मल्लिकापूः' मलकापुरम् ।

---

1 मा० पं० स० श्लो० २४ चतुर्थः पादः चतुर्थतया । माघे 'पूर्णापणा विपणिनो विपणीर्विभेजुः' इति भेदः ।

2 मा० पं० स० श्लो० २५ चतुर्थः पादः चतुर्थतया ।

3 मा० पं० स० श्लो० २६ चतुर्थः पादः चतुर्थतया । माघे तु समस्तमेतत् पदम् ।

4 मा० पं० स० श्लो० २७ चतुर्थः पादः चतुर्थतया ।

5 मा० पं० स० श्लो० २८ चतुर्थः पादः चतुर्थतया ।

6 मा० पं० स० श्लो० २९ चतुर्थः पादः चतुर्थतया ।

7 मा० पं० स० श्लो० ३० चतुर्थः पादः चतुर्थतया ।

8 मा० पं० स० श्लो० ३१ चतुर्थः पादः चतुर्थतया ।

9 मा० पं० स० श्लो० ३२ चतुर्थः पादः चतुर्थतया ।

10 मा० पं० स० श्लो० ३३ चतुर्थः पादः चतुर्थतया ।

वाचंयमेन्द्रवचनै रचनैर्जिनार्चा-ब्रह्मव्रतोत्सवविधेर्धृतधर्मबोधैः ।
वश्या वधूरपि न हास्यरसप्रसङ्गात् षिङ्गै[१]रगद्यत ससम्भ्रममेवमेका[1] ॥ ३५ ॥
कृत्वाऽन्तरिक्षभगवत्प्रभुपार्श्वयात्रां सूरिर्जगाम परतस्तु तिलिङ्गभागम् ।
नन्तुं मिलन्नु[२]भयतोऽत्र जनस्तमी[३]शनीकाशमाप समतां सितचामरस्य[४][2] ॥ ३६ ॥
श्रीभाग्यनामनगरादभिजग्मिवस्तद्राजन्यसैन्ययुतसङ्घपुरःकरेणुम् ।
सार्थाग्रगामिकरिणाऽभिरणार्थमीशरुद्धोरुदन्तमुशलप्रसरं निपेते[५][3] ॥ ३७ ॥
दानं ददत्यपि जलैः सहसाधिरूढे निम्ने तदर्थिनि[६] पयोमुचि सङ्घलोकात् ।
स्वर्णप्रसार[७]निहतैः फलदादिवाऽघैर्मङ्क्षूदपाति परितः पटलैरलीनाम्[८][4] ॥ ३८ ॥
श्रीकुल्पाकपुरमेत्य गुरुर्ववन्दे माणिक्यमूर्तिमृषभं भुवनाभिषेव्यम् ।
यन्मूर्ध्नि[९] राजति जटाऽऽस्यसरोरुहीव वर्णः पृथग्गत इवालिगणोऽङ्गजः स्वः[१०][5] ॥ ३९ ॥
तत्रामरेन्दु[११]विबुधे धृतवाचकाङ्कैः सूरीश्वरैः सह चलन्नभिगामुकश्च ।
सङ्घौ मिथोऽत्र परिधापनिकाप्रधानावन्योन्यवस्त्रपरिवर्तमिव व्यधत्ताम्[6] ॥ ४० ॥
सचातुरी[१२]कृतमहोत्सवसन्निधानैः सूरिप्रतिष्ठितजिनप्रतिमासमाजः ।
साक्षात्तयेव[१३] विरराज स तीर्थराजो धौताङ्गलग्ननवनीलसरोजपत्रैः[7] ॥ ४१ ॥
तत्र त्रिलिङ्गविषयक्षितिपातिसाहिर्वाचा गुरोः सुरभिमारिमयं न्यवारीत् ।
म्लेच्छेऽज्यवाचमवमत्य सुकृत्यरागादाक्रान्तितो न वशमेति महान् परस्य[8] ॥ ४२ ॥

---

१ 'षिङ्गै-' "षिङ्गः पल्लविको विटः" इति अमरः ।
[ नैतद् वाक्यम् अमरकोशे, किन्तु हेमचन्द्राचार्यरचित अभिधानचिन्तामणौ द्वितीयकाण्ड एवं पाठो दृश्यते-"अथ षिङ्गः पल्लवको विटः"-श्लो० २४५ ]

२ 'मिलन्नु-' जनः चामरवत् उभयपक्षतः मिमील ।

३ '-मीशनीकाश-' ईशो रुद्रः तद्वद् नीकाशः निश्चयो यस्य, तत्तुल्यो वा । "नीकाशो निश्चये तुल्ये" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ७१६ ]

४ '-चामरस्य' "चमरी तु मृगान्तरे" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ५४७ ] चमरीणां समूहः चामरम्, सितं च तच्चामरं च तस्य । ईशे गिरिशतया सितचामरसेवा युक्तैव । तिलिङ्गदेशे ईश्वरस्य अतिमाननात् गुरुं तादृशं दृष्ट्वा चमरीगणवज्जनो नन्तुमाययौ इति भावः ।

५ 'निपेते' सार्थपुरश्चलता हस्तिना संमुखगजस्य अभिरणार्थं युद्धाय संमुखं निपेते । कथम् ? ईशरुद्धोरुदन्तमुशलप्रसरं यथा स्यात् तथा । श्रीभाग्यनगरात् संमुखागतः तथा तन्नगरराजसैन्ययुतो यः संघः तस्य पुरश्चारी हस्ती तम् ।

६ 'तदर्थिनि' अर्थिनि धनवति पयोमुचि मेघे दानं ददति-व्यस्तं रूपकम् ।

७ 'स्वर्णप्रसार-' सुवर्णविस्तारः पक्षे सुष्ठु अर्णः जलम् ।

८ '-रलीनाम्' साधिरूढे उच्चे निम्ने नीचे अघैः पापैः उदपाति वृक्षादिव अलीनां पटलैः ।

९ 'यन्मूर्ध्नि' यस्य भगवतः शिरसि जटा राजति आस्यकमले अलिगण इव ।

१० 'अङ्गजः' तथा अङ्गजः शरीरजन्मा वर्णः पृथक्कृत इव । 'स्वः' इति सः प्रसिद्धः त्यत्-शब्दस्य 'स्यः' इति प्रथमायां रूपं तच्छब्दार्थे । जटाया नीलरूपत्वं भगवन्मूर्तेर्नीलरत्नोपमानेनोपमा ।

११ 'अमरेन्दु-' अमरचन्द्रकवेर्वाचकपदं दत्तम् ।

१२ '-चातुरी-' चतुराँ इति श्राविका ।

१३ 'साक्षात्तयेव' साक्षाद्भावेन-तीर्थराजः जिनस्य साक्षाद्भावेन ।

---

1 मा० पं० स० श्लो० ३४ चतुर्थः पादः चतुर्थतया । माघे '-मेव काचित्' इति

2 मा० पं० स० श्लो० ३५ चतुर्थः पादः चतुर्थतया ।

3 मा० पं० स० श्लो० ३६ चतुर्थः पादः चतुर्थतया । अत्र 'अभिजग्मिवस्तद्राजन्य' इत्यस्य स्थाने व्याकरणदृष्ट्या 'अभिजग्मिवत्तद्राजन्य' इति प्रयोगः साधुः ।

4 मा० पं० स० श्लो० ३७ चतुर्थः पादः चतुर्थतया ।

5 मा० पं० स० श्लो० ३८ चतुर्थः पादः चतुर्थतया । माघे -'गणो गजस्य' इति पाठः । अस्य चित्रकाव्यत्वेन 'अङ्गजः स्वः' अन्यत्वा अनुनासिको विसर्गौ च न गण्यन्ते, अतो न समस्याभेदः ।

6 मा० पं० स० श्लो० ३९ चतुर्थः पादः चतुर्थतया ।

7 मा० पं० स० श्लो० ४० चतुर्थः पादः चतुर्थतया । माघे -'पयोजपत्रैः' ।

8 मा० पं० स० श्लो० ४१ चतुर्थः पादः चतुर्थतया ।

श्रीभाग्यनामनगरी सुगुरावुपेते नित्योत्सवोच्छ्रितचलद्ध्वजराजिवातैः ।
स्वःस्पर्द्धिनीं गिरितटीमलकां निनाय नान्यस्य गन्धमपि मानभृतः सहन्ते[1] ॥ ४३ ॥
दूरादुपेत्य दुरितस्थितिदारिदारैर्युक्तैर्विधाय विधिना विविधार्घदानम् ।
भव्याङ्गिनां[१] गुरुपदाम्बुरुहि व्ययान्नो मम्ले यथागतमगामि कुलैरलीनाम्[2] ॥ ४४ ॥
तत्रोत्सवैरभिनवैर्विभवैः प्रभाव्य जैनं मतं मुनिपतौ चलिते हयेन्द्राः ।
नीताः पथं कथमपि त्वपथेन चेलुर्नैवात्मनीन[२]मथवा क्रियते मदान्धैः[३][3] ॥ ४५ ॥
सूरेरमुष्य पथि पुष्यति चाभिमुख्यं विद्यापुरौ[४]कसि जने सहचारिणीव ।
आतिथ्यतथ्यविधयेऽथ मिथस्तथैकान्नागान् बबन्धुरपरान् मनुजा निरासुः[५][4] ॥ ४६ ॥
सिन्धोस्तटे वनवटेषु पटीकुटीषु सार्थागताभिगतसङ्घजनस्य तस्य ।
[६]चर्चिक्यगन्धरतिनेक्षणदोषमोषात् कण्ठे गुणत्वमलिनां वलयेन भेजे[5] ॥ ४७ ॥
विद्यापुरे भगवदागमनेन सद्यः प्राक् तद्विनिर्णयकृतां गणकाग्रणीनाम् ।
वर्द्धापने बहुधनैः सदनेऽभ्यनन्दि शास्त्रं हि निश्चित[७]धियां क्व न सिद्धिमेति ?[6] ॥ ४८ ॥
स्त[८]म्भं महान्तमुचितं सहसा मुमोच दानं ददावतितरां सरसाग्रहस्तः ।
बद्धापरा[९]णि परितो निगडान्यलावीत् द्राग् बन्दिनां क्षितिपतिः प्रमदात् तदानीम्[7] ॥ ४९ ॥
भद्रोत्तम[१०]स्य कलभ[११]स्य सुकल्पितस्य दानोद[१२]ये परिणतस्य[१३] रतेस्त्रिपथ्याम्[१४] ।
आढ्यस्य शुद्धसम[१५]रोचितभाविनः श्रीः स्वातन्त्र्यमुज्ज्वलम[१६]वाप करेणुराजः[8] ॥ ५० ॥

---

१ 'भव्याङ्गिनाम्' किम्भूतानां भव्याङ्गिनाम्? गुरुपदाम्बुरुहि अलीनाम, तेषां कुलैः समूहैः व्ययात् द्रव्यव्ययकरणात् नो मम्ले न संकुचितम् किन्तु यथागतं सोत्साहम् अगामि ।

२ '–आत्मनीन–' आत्मने हितम् आत्मनीनम् ।

३ 'मदान्धैः' "मदो रेतस्यहंकारे मद्ये हर्षेभदानयोः । कस्तूरिकायां क्षैब्ये च" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ २ श्लो॰ २२८ ]

४ 'विद्यापुरौ–' विद्यापुरे ओकः गृहं यस्य स–तस्मिन् ।

५ 'निरासुः' एकान् कतिचिद् गजान् बबन्धुः अपरान् जलपानार्थं निरासुः । अस्यतेः परोक्षा ।

६ 'चर्चिक्य–' चर्चिक्यं विलेपनम् ।

७ 'निश्चितधिया–' 'विभक्तधना भ्रातरः विभक्ताः' इतिवत् निश्चिता धीरपि निश्चिता इति उपचर्यते । अत एव अत्र गम्यमानार्थत्वात् उत्तरपदस्य अप्रयोगलक्षणो लोपः ।

८ 'स्तम्भम्' 'उचितम्' "स्तम्भः स्थूणा–जाड्ययोः" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ २ श्लो॰ ३०७ ] "उचितं विदिते अभ्यस्ते मिते युक्ते" इत्यपि [ है॰ अने॰ सं॰ कां॰ ३ श्लो॰ २४२ ]

९ 'बद्धापराणि' बद्धः अपरो जनो येषु तानि–उभयोः एकबन्धनरूपाणि ।

१० 'भद्रोत्तमस्य' "भद्रं तु मङ्गले । मुस्तकश्रेष्ठयोः साधौ काञ्चने करणान्तरे । भद्रो रामचरे हस्तिजातौ मेरुकदम्बके ॥ गवि शंभौ" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ २ श्लो॰ ४३१–४३३ ] भद्रैः उत्तमस्य । पक्षे भद्रं मङ्गलम् काञ्चनं वा तेन श्रेष्ठस्य । 'सुकल्पितस्य' सज्जितस्य ।

११ 'कलभस्य' कला मधुरा भा यस्य–सुविचारस्य ।

१२ 'दानोदये' दानम् मदः तस्य उदये ।

१३ 'परिणतस्य' परिणतः तिर्यग्दत्तप्रहारः ।

१४ '–त्रिपथ्याम्' त्रिपदी उत्पादादिः तत्र रतेर्धारणात् । पदो त्रिपदी गात्रबन्धः तस्यां रतेः ।

१५ 'समरो–' "समरो युद्ध–संघयोः" इति अनेकार्थध्वनिमञ्जर्याम् । [ श्लो॰ २१० पादाधि॰ ]

१६ –'अवाप' आढ्यस्य तथा हस्तिनः श्रीः उज्ज्वलं दीप्तं स्वातन्त्र्यमवाप । "उज्ज्वलस्तु विकासिनि शृङ्गारे विशदे दीप्ते" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ ३ श्लो॰ ६२० ]

---

1 मा॰ पं॰ स॰ श्लो॰ ४२ चतुर्थः पादः चतुर्थतया ।

2 मा॰ पं॰ स॰ श्लो॰ ४३ चतुर्थः पादः चतुर्थतया ।

3 मा॰ पं॰ स॰ श्लो॰ ४४ चतुर्थः पादः चतुर्थतया ।

4 मा॰ पं॰ स॰ श्लो॰ ४५ चतुर्थः पादः चतुर्थतया ।

5 मा॰ पं॰ स॰ श्लो॰ ४६ चतुर्थः पादः चतुर्थतया ।
'अलिनाम्' भ्रमरवाचकः 'अलिन्' शब्दः नकारान्तोऽपि ।

6 मा॰ पं॰ स॰ श्लो॰ ४७ चतुर्थः पादः चतुर्थतया ।
वेङ्कटेश्वरमुद्रिते माघे 'शास्त्रं सुनिश्चित–' इति पाठः स एव पाठो मल्लिनाथेन व्याख्यातः ।

7 मा॰ पं॰ स॰ श्लो॰ ४८ प्रथमतः पादत्रयं समस्यात्वेन ।

8 मा॰ पं॰ स॰ श्लो॰ ४८ चतुर्थः पादः चतुर्थत्वेन ।
'परिणतस्य' "तिर्यग्घाती परिणतो गजः"–[ है॰ अभि॰ कां॰ ४ श्लो॰ २८७ ]

श्रीदेवचन्द्र इति जात्यमणिर्वणिक्षु प्रागप्यवर्तत रसात् तरसा न दानात् ।
स्वस्वामिनापि च निषिद्धतथाप्रवृत्तिर्मन्दोऽपि नाम न महानवगृह्य साध्यः[1] ॥ ५१ ॥
तत्कारिताऽर्हतनवाकृतिसत्प्रतिष्ठां कृत्वा निधाय विबुधेन्द्रपदं स वीरे[१] ।
ज्येष्ठस्थितिद्वयविधेरनु कारकोऽभूदिच्छाविहारवनवासमहोत्सवानाम्[2] ॥ ५२ ॥
मार्गेऽथ साह्विवचसा प्रभुमन्वितायां चम्वां तु सङ्घजनकारितभोजनेषु ।
यन्ता बलात् सुहितमाशयति स्म पिण्डं स्नेहच्युतिस्नपितबाहुरिभाधिराजम्[3] ॥ ५३ ॥
नत्वाऽन्तरिक्षजिनपार्श्वपदौ क्रमेण देवर्षिराज इह सङ्घनाग्रहेण ।
बर्हानपूर्वनगरं शुचिमासि जाग्रन्नीलाभ्र[२]पङ्क्तिपरिवेषमिवाधिजग्मुः[4] ॥ ५४ ॥
देवे स्थितेऽनुभवनं नवनन्दिकृत्यदानार्हतार्चनतपःकरणोत्सवेषु ।
सज्जीकृतैर्निशि विपल्ययना अपीयुः संलक्ष्यपल्ययनवध्रपदास्तुरङ्गाः[5] ॥ ५५ ॥
पर्वस्वि[३]हार्हतविहारनवोपहारसङ्गच्छदङ्गधरजङ्गमतोत्तरङ्गः ।
प्रोच्चैर्महेषु सहसाऽभिवहँस्त्रिलोक्या रोमाञ्चतामिव जगाम रजः पृथिव्याः[6] ॥ ५६ ॥
राजन्यजन्यतदजन्यपरंपराभिः क्षुब्धो न सत्त्वजलधिर्जलधीरणाभिः[४] ।
प्राचीनदेवजनुषोऽनुगतेन सूरिः शेषेण तेजस इवोल्लसता रराज[7] ॥ ५७ ॥
मासानतीत्य चतुरोऽस्य पुनर्धरित्री[५]सङ्घाग्रहाज्जिगमिषोरथ तत्प्रयाणे ।
सञ्जग्मिवान् पथि सपल्ययनः शिवाय श्रीवृक्षकी[६] पुरुषकोन्नमिताग्रकायः[७][8] ॥ ५८ ॥
सूरेरनुव्रजनकृज्जनभक्तिकार्ये यः सङ्घनायकतया समयेऽभिषिक्तः ।
तस्मै हरिः क्षितिभृतापि ददे वपुष्मान् उच्चैःश्रवा जलनिधेरिव जातमात्रः[9] ॥ ५९ ॥
चाषोऽचलत् फलभुगस्य तदाऽपसव्यः[८] श्रव्याणि देव्यपि चकार रुतानि सव्या[९] ।
भव्यान्युवाच रुचिवल्गितहेषितेन मिश्रं दधद्दशनवर्बुरशब्दमश्वः[10] ॥ ६० ॥
याने गुरोरनुगमाभिगमैर्नृपाणां सङ्घस्य चानुचलने स्खलनेऽचलायाम् ।

---

१ 'वीरे' वीरविजयकवौ ।

२ '-अभ्र-' "अभ्रं तु त्रिदिवे गगनेऽम्बुदे" इति अनेकार्थः [है० अने० सं० कां० २ श्लो० ३८२] अभ्रम् अभ्रकम् ।

३ 'पर्वसु' चतुर्दश्यादिषु ।

४ 'जलधीरणाभिः' जडधियां सागरपाक्षिकाणां वा ईरणाभिः ।

५ '-धरित्री-' धरित्रीपदेन गूर्जरत्रादेशः ।

६ 'श्रीवृक्ष-' हृद्-वक्त्रावर्ती हयः श्रीवृक्षकी ।

७ '-पुरुषक-' पुरुष एव पुरुषकः तेन उन्नतः ऊर्ध्वावस्थितः अग्रकायः यस्य सः ।

"पश्चिमेनाग्रपादेन भुवि स्थित्वाऽग्रपादयोः ।
ऊर्ध्वप्रेरणया स्थानम्-अश्वानां पुरुषः स्मृतः" ॥

८ 'अपसव्यः' दक्षिणः ।

९ 'सव्या' वामा ।

---

1 मा० पं० स० श्लो० ४९ चतुर्थः पादः चतुर्थत्वेन ।

2 मा० पं० स० श्लो० ५० चतुर्थः पादः चतुर्थत्वेन ।

3 मा० पं० स० श्लो० ५१ चतुर्थः पादः चतुर्थत्वेन । माघे 'स्नेहस्रुति'-इति भेदः ।

4 मा० पं० स० श्लो० ५२ चतुर्थः पादः चतुर्थत्वेन ।

5 मा० पं० स० श्लो० ५३ चतुर्थः पादः चतुर्थत्वेन । माघे '-वर्ध्र-' इति ।

6 मा० पं० स० श्लो० ५४ चतुर्थः पादः चतुर्थत्वेन ।

7 मा० पं० स० श्लो० ५५ चतुर्थः पादः चतुर्थत्वेन ।

8 मा० पं० स० श्लो० ५६ चतुर्थः पादः चतुर्थत्वेन । श्रीवृक्षकी अश्वविशेषः । तल्लक्षणं च—

"वक्षोभवावर्तचतुष्टयं च कण्ठे भवेद् यस्य च रोचमानः ।
श्रीवृक्षकी नाम हयः स भर्तुः श्रीपुत्रपौत्रादिविवृद्धये स्यात्" ॥

इत्यादि सविस्तरं वर्णनं माघस्य मल्लिनाथीयवृत्तितोऽवबोद्धव्यम् ।

9 मा० पं० स० श्लो० ५७ चतुर्थः पादः चतुर्थत्वेन ।

10 मा० पं० स० श्लो० ५८ चतुर्थः पादः चतुर्थत्वेन । माघे 'दशनचर्चुरशब्द—' इति भेदः ।

पुंसोऽर्वता[१]ऽतिचरतः खगरूपमिष्टमश्वेति विद्रुतमनुद्रवता[२]न्यमश्वम्[1] ॥ ६१ ॥
मत्तद्विपे रथवरैः पथि सङ्कुलेऽपि सार्थागतानुगतलोलदृशां नु कश्चित् ।
गीतेषु मोहितमनाः शनकैः स्वमश्वं वल्गा[३]विभागकुशलो गमयाम्बभूव[2] ॥ ६२ ॥
श्रुत्वाऽथ सूरतिजने सरतौ गुरूणां पुर्यागतिं समभियानसमुत्सुकेऽस्मिन् ।
सज्जास्त्वरात्रुटितसंयमना विजह्रुर्दामाश्व[४]नस्खलितलोलपदं तुरङ्गाः[3] ॥ ६३ ॥
उद्वाहिनीभरवहेन सुदूरमार्गक्लान्त्यावहेन निवहे सुदृशां[५] जनानाम् ।
न क्वापि सूरिपदसङ्गमनं विनाऽऽसांचक्रे[६] निमीलद[७]लसेक्षणमौक्षकेण[८][4] ॥ ६४ ॥
नत्वा प्रभुं पथि स सङ्घजनो जहर्ष नार्यो जगुः कलरवं ननृतुर्नटौघाः ।
गर्जा जगर्जुरनुतूर्यनदं नदीनां रोधांसि धीरमुपचस्करिरे[९] महोक्षाः[5] ॥ ६५ ॥
प्रौढोत्सवैः सममथ श्रमणेभराजाऽपाच्यां विहृत्य सयशोजयधर्मकृत्यम् ।
श्रीस्फूर्तिबन्दिरवरे कुधियां विधूय जग्मे जयोद्धुर[१०]विशाऽऽलविषाण[११]मुक्ष्णाम्[6] ॥ ६६ ॥
सर्वत्र पर्वदिनमेव विभावयन्ति देवे स्थितेऽत्र नभसि प्रतिचन्द्रशालम् ।
अश्वीयमुष्णकिरणस्य सुखं यवानामभ्रंलिहानि लिलिहे नवपल्लवानि[7] ॥ ६७ ॥
प्रत्यक्षमेव ननु राजसभस्य नश्यद्दुर्वादिपाक्षिकसपक्षममुष्य शिष्याः ।
वादेन जिग्युरवनीभृदतः प्रकोपात् विप्रं[१२] पुरात् पतगराडिव निर्जगार[8] ॥ ६८ ॥
रूणैः सुवर्णमणिभिर्यदभीष्टदानैः सङ्घेन वृष्टमतिहृष्टहृदा तदानीम् ।

---

१ '-अर्वता-' हयेन ।

२ '-अनुद्रवता-' किंभूतेन अर्वता? अन्यम् अश्वं विद्रुतं दृष्ट्वा इयम् अश्वा तुरङ्गी इति धिया अनुद्रवता ।

३ 'वल्गा'-वल्गा मुखरज्जुः । सा च उत्क्षिप्त-निक्षिप्तादि-भेदैश्चतुर्दशधा । तस्या विभागो विविच्य प्रयोगः, तत्र कुशलः ।

४ 'दामाश्वन'-"दामाश्वनं पादपाशः" इति वैजयन्ती ।

५ 'सुदृशाम्-' सम्यग्दृशाम् ।

६ '-आसांचक्रे' सूरिपादसंगतिं विना क्वापि न आसांचक्रे-अत्युत्सुकताव्यञ्जनम् ।

७ 'निमीलद-' निमीलन्ति अलसानि ईक्षणानि यत्र कर्मणि तत् ।

८ 'औक्षकेण' वृषभसमूहेन ।

९ '-उपचस्करिरे' आलिलिखुः ईर्ष्यार्थे(हर्षार्थे)आत्मनेपदम् ।

१० 'जयोद्धुर-' जयेन उद्धुरा विशः वणिजः सेवका यस्य स तेन-जयोद्धुरविशा गुरुणा ।

११ '-आलविषाणमुक्ष्णाम्' कुधियाम् उक्ष्णाम्-कुमतिषु वृषभाणाम्-आलम् उत्सूत्ररूपं विषाणं विधूय भङ्क्त्वा जग्मे । आलम् अभ्याख्यानम् । "आलं स्यादनर्थ-हरितालयोः" इति अनेकार्थः [ हैं० अने० सं० कां० २ श्लो० ४६३ ]

१२ 'विप्रम्' कश्चन कुमतिसहायं विप्रम् अमुष्य सूरेः शिष्या वादेन जिग्युः अतः तं नृपः पुरात्-नगरात् निर्जगार निष्काशयति स्म । यथा गरुडः विप्रं पुरा पूर्वकाले निर्जगार इति पौराणिकी कथा । अत्र गरुडपक्षे 'पुरात्' इत्यस्य 'त्'कारः अधिकः, परं समस्यायां न दोषाय चित्रेऽनुस्वारवत् ।

---

1 मा० पं० स० श्लो० ५९ चतुर्थः पादः चतुर्थत्वेन । माघे-'द्रवताश्वमन्यम्' इति भेदः ।

2 मा० पं० स० श्लो० ६० चतुर्थः पादः चतुर्थत्वेन ।

"उत्क्षिप्ता शिथिला तथोत्तरवती मन्दा च वैहायसी
विक्षिप्तैककरार्धकन्धरसमाकीर्णा विभक्ता तथा ।
अत्युत्क्षिप्त-तलोद्धृते खलु तथा व्यागूढ-गोकर्णिके
वाहानां कथिताश्चतुर्दशविधा वल्गाप्रभेदा अमी" ॥

इत्यादिः वल्गाभेद-प्रभेदस्वरूपपरिचयो मल्लिनाथीयटीकातोऽवगन्तव्यः ।

3 मा० पं० स० श्लो० ६१ चतुर्थः पादः चतुर्थत्वेन । माघे '-दामाञ्चल[illegible]'—इति भेदो भाति परन्तु न-लयोः समानस्थानत्वेन नात्र समस्याभेदः ।

4 मा० पं० स० श्लो० ६२ चतुर्थः पादः चतुर्थत्वेन ।

5 मा० पं० स० श्लो० ६३ चतुर्थः पादः चतुर्थत्वेन । 'गर्जाः' गजाः । माघे 'धीरमपचस्करिरे' इति भेदः । अत्र 'अपचस्करिरे' इति साधु न तु 'उपचस्करिरे' इति ।

6 मा० पं० स० श्लो० ६४ चतुर्थः पादः चतुर्थत्वेन । माघे '-विशालविषाणमुक्ष्णा' इति भेदः ।

7 मा० पं० स० श्लो० ६५ चतुर्थः पादः चतुर्थत्वेन ।

8 मा० पं० स० श्लो० ६६ चतुर्थः पादः चतुर्थत्वेन । माघे 'पुरा' इति ।

वैतालिका नृपसभे सुकृतस्य तस्य भोगावलीं कलगिरोऽवसरेषु पेठुः[1] ॥ ६९ ॥

सूरेर्विहारकरणादिति गूर्जरत्रा मोहाभ्यमित्रजिनशासनभूस्ततोऽभूत् ।
मूर्तं सुकृत्यचरितैः परितो दुरन्ताऽलक्ष्मीविडम्बि शिबिरं शिवकीर्तनस्य[2] ॥ ७० ॥

अवन्त्या ऐन्द्व्या विमलसलिलैः पाद्यकृदगः
स विन्ध्यः पीताब्धिं मुनिवरमितं दक्षिणदिशः ।
विभोः स्फातिं मां त्वं नय विनयतोऽज्ञापयदिति
बलाक्रान्तः क्रीडद्द्विरदमथितोर्वीरुहरवैः[3] ॥ ७१ ॥

महो बिभ्रत् सौरं विबुधकलितो देवगुरुराट्
दधानोऽसौ चैन्द्रश्रियमिह सदा यद् विहरति ।
खरेवायं देशो नदति गिरिरित्युच्चकनको
बलाक्रान्तः क्रीडद्द्विरदमथितोर्वीरुहरवैः[4] ॥ ७२ ॥ [ पाठान्तरम् ]

॥ इति श्रीदेवानन्दे महाकाव्ये दिव्यप्रभपरनाम्नि ऐङ्काराङ्के माघसमस्यार्थे महोपाध्यायश्रीमेघविजयगणिविरचिते दक्षिणदिग्विजयनामा पञ्चमः सर्गः । श्रीः ॥ ५ ॥

---

## षष्ठः सर्गः ।

॥ ॐ ऐँ ह्रीँ श्रीँ क्लीँ ह्रौँ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥ ऐँ नमः ॥

अथ रिरंसुममुं युगपद्गिरौ नृसुरयोरवधार्य जपक्रमे ।
कमपि धित्सुमवेत्य ससंभ्रमं निजपदे जपदेवतयाऽऽजगे[5] ॥ १ ॥

अथवा–

अथ गणेन्दुरितो दुरितोज्झितः प्रवरगन्धपुरेऽधृत धारणाम् ।

---

१ 'नृपसभे' नृपाणां सभा नृपसभम् तत्र ।

२ 'मोहाभ्यमि–' मोहजयोद्यतस्य जिनशासनराजस्य शिबिरं चमूनिवेशः गूर्जरत्रा बभूव ।

३ 'दुरन्ताऽल–' दुष्टः अन्तो यस्याः ईदृक् अलक्ष्मीः मिथ्यात्वम् तस्या विडम्बि निवारकम् ।

४ 'शिवकीर्तन–' शिवं निरुपद्रवं कीर्तनं स्तुतिर्यस्य तस्य ।

५ 'पाद्य–' पादार्थं पाद्यम् ।

६ 'बलक्रान्तः' बलां महीम् आक्रान्तः व्याप्तः । "बलो हस्ती बलं सैन्ये बलं सत्त्वं बला औषधीः रत्नयोनिः बलो दैत्यो बला लक्ष्मीर्बला मही" इति अनेकार्थध्वनिमञ्जरी [ श्लो॰ ७७ श्लोकाधि॰ ]

७ 'सौरम्' सूरेः इदं सौरम् । पक्षे सूरस्य रवेः सुराणां वा इदम्–सौरम् ।

८ '–कनको' "कनको नागकेसरे धत्तूरे चम्पके काञ्चनार–किंशुकयोरपि" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ ३ श्लो॰ ११ ]

९ 'बलाक्रान्तः' "बलं रूपे स्थामनि स्थौल्य–सैन्ययोः ॥ बोले बलस्तु बलिनि काके दैत्ये हलायुधे" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ २ श्लो॰ ४८८–४८९ ]

१० 'अथ रिरंसुममुम्' अथ अमुं श्रीदेवसूरिं मनुष्य–देवयोः गिरौ वाण्यौ अवधार्य जपविधौ रिरंसुं रन्तुमनसम्, च पुनः कमपि नरं शिष्यम् निजपदे धित्सुं स्थापयितुकामम् अवेत्य ज्ञात्वा जपदेवतया आजगे आगतम् ।

११ 'निजपदे' "पदं विभक्त्यन्ते स्थाने शब्दे वाक्ये–अङ्क–वस्तुनि त्राणे पादे पादचिह्ने व्यवसाये उपदेशे च" इति अनेकार्थः [ है॰ अने॰ सं॰ कां॰ २ श्लो॰ ३२५–३२६ ]

---

1 मा॰ पं॰ स॰ श्लो॰ ६७ चतुर्थः पादः चतुर्थत्वेन । माघे 'भोगावली:' ।

2 मा॰ पं॰ स॰ श्लो॰ ६८ चतुर्थः पादः चतुर्थत्वेन ।

3 मा॰ पं॰ स॰ श्लो॰ ६९ चतुर्थः पादः चतुर्थत्वेन ।

4 पूर्ववत् ।

5 मा॰ ष॰ स॰ श्लो॰ १ प्रथमः पादः प्रथमतया ।

क्वचन योजयितुं निजमुत्तमे भुवि पदं विपदन्त[१]कृतं सताम्[1] ॥ २ ॥
नवपला[२]शपलाशवनं पुरस्तत[३]रसालरसालय[४]नैर्हितम् ।
मुनिजपा[५]य जपा[६]यतमैक्ष्य स हृदि ननन्द न नन्दनतोऽधरम्[2] ॥ ३ ॥
जपरसात् [७]परसात् त्रिदशोऽप्यगात् गतमलं तमलं च परीक्षितुम् ।
व्यधित साधितसालदलायुधः स सुरभिं[८] सुरभिं सुमनोभरैः[3] ॥ ४ ॥
विलुलितालकसंहतिरामृशन् निधुवनश्रमवारि मृगीदृशाम् ।
[९]हरिरपीयत फुल्लनसा मृगैः प्रसवयन् सव[१०]यःककुभावलीम्[4] ॥ ५ ॥
विघटयन्नलिनावलिसम्पुटान् प्रकटयन् मदनानलमुद्भटम् ।
परिमलैर्मुनिराजम[११]नुन्मिलत्कुवलयं बलयन् मरुदाववौ[5] ॥ ६ ॥
तुलयति स्म विलोचनतारकामिह भुवः कुसुमाश्रयणेऽलिनी ।
मिथुनमप्यभवत् तदवेक्षणादनुन[१२]गं तु न गन्तुमिह क्षमम्[6] ॥ ७ ॥
कुसुमकेलिचि[१३]की रसिकः स्त्रिया प्रसवविक्रयिकां करुणाशयः ।
इति जगाद सुमानि जनेऽद्य दा [१४]मलिनि मालिनि? माऽधव[१५]योषिताम्[7] ॥ ८ ॥
स्फुटमिवोज्ज्वलकाञ्चनकान्तिभिर्वनमवेक्ष्य घनं नवचम्पकैः ।
प्रियमिहाऽरमयत् सुरते वधूः [१६]कपिहितं [१७]पिहितं कुसुमाम्बरैः[8] ॥ ९ ॥
तिलकपुष्परजोऽनुरजद् दिशो भृशमराजत राजतरोचिषा ।
असितमप्रियदा[१८]हभवं वृषाक[१९]पिशितं पिशि[२०]तं मदनाग्निना[9] ॥ १० ॥

[ इति ग्रन्थविस्तरभिया प्रथमपादसमस्यात उपरम्यते ]

---

१ 'विपदन्त–' धारणाविशेषणम्–विपदन्तकृतं धारणाम् ।
२ '–पलाश–' पलाशाः–पत्राणि ।
३ '–रसालरसा–' रसालानाम्–आम्राणाम्, रसायां भूमौ ।
४ '–लयनै–' व्यापनैः–व्याप्त्या ।
५ '–जपाय' ऋषीणां जपाय योग्यम् ।
६ 'जपायत–' जपाभिः जातिभिः–जातिकुसुमैः आयतं विस्तीर्णम् ।
७ 'परसात्' परवशः ।
८ 'सुरभिम्' वसन्तऋतुम् ।
९ 'हरिः' वायुः ।
१० 'सवयः–' सपक्षिकां दिक्पङ्क्तिं पुष्पवतीं कुर्वन् ।
११ '–नुन्मिलत्' मुनिराजं च पुनः अनुन्मिलत् संकुचत् कुवलयम् । चकारोऽध्याहारात् बलवन्तं करोति बलयति शतृप्रत्यये बलयन् । पक्षे बलयन् नामयन्–ध्याने प्रह्वीकुर्वन् सूरिम् ।
१२ '–नगं' अनुनगं प्रतिवृक्षम् ।
१३ '–चिकी–' चिकीर्षति इति चिकीः ।
१४ 'मलिनि' किंभूते जने ? मलिनि अर्थात् सशोके ।
१५ '–योषिताम्' हे मालिनि ! अधवयोषितां पुष्पाणि अद्य मा दाः । "धवः पतिर्धवो भीरुर्वृक्षजातेर्धवो मतः" इति अनेकार्थध्वनिमञ्जरी [ श्लो० १३५ अर्धश्लोकाधि० ]
१६ 'कपिहितम्' वनवानरयोग्यम् ।
१७ 'पिहितम्' पुष्पवसनैराच्छादितम् ।
१८ '–दाह–' अप्रियाविरहभूतः ।
१९ '–कपिशितम्' वृषाकपिः शिवः तद्वत् सितम् ।
२० 'पिशितम्' "पिशत् अवयवे" तुदादिः । पिशितम्—विस्तारितम् ।

---

1 मा० ष० स० श्लो० १ चतुर्थः पादः चतुर्थतया ।
2 मा० ष० स० श्लो० २ प्रथमः पादः प्रथमतया ।
3 मा० ष० स० श्लो० २ चतुर्थः पादः चतुर्थतया ।
4 मा० ष० स० श्लो० ३ प्रथमः प्रथमतया ।
5 मा० ष० स० श्लो० ३ चतुर्थः चतुर्थतया ।
6 मा० ष० स० श्लो० ४ प्रथमः प्रथमतया । माघे 'विलोचनतारकाः' इति पाठः ।
7 मा० ष० स० श्लो० ४ चतुर्थः चतुर्थतया । केवलं पदच्छेदभेदः ।
8 मा० ष० स० श्लो० ५ प्रथमः प्रथमतया ।
9 मा० ष० स० श्लो० ५ चतुर्थः चतुर्थतया ।

रविकरैर्नलिनी प्रविबोधिता सरसिजाऽऽस्यममी कथमापपुः ।
इह रुषा परुषा मधुपव्रजानुपरि ते परितेपुरतो भृशम्[1] ॥ ११ ॥
कमलकोमलकोशपदात् तदा कृतरवा तरवारिवदुल्वणा ।
स्मरनृपस्य हृताध्वगचेष्टितध्वनिरगा[१]न्निरगान्मधुपावलिः[2] ॥ १२ ॥
विविधवा[२]ग्विधया सुधयाऽऽशुगा धृतरसा तरसा[३] प्रियसङ्गमे ।
तमनुकूलयति स्म हृदि [४]स्मयच्छिदुरयाऽदुरया[५]चितमङ्गना[3] ॥ १३ ॥
मृगदृशामपि नैव मुनीश्वराः शिखरिधीरतया[६] रतयाचनैः ।
सुषमया[७] सुरभेः सुरभेदके-श्वरजिताऽरजिता[८] वशमाययुः[4] ॥ १४ ॥
विभुरभून्न विचालयितुं सुरो जपरतेः परतेजसमीश्वरम् ।
व्यमुचदम्बुमुचां घटयोच्चकैरनृतयाऽ[९]नृतया वनपादपः[१०][5] ॥ १५ ॥
जलधिमुच्छलितं च्छलितव्रतः स विरचय्य पुरः सुर इत्यवक् ।
व्रज[११] विभोऽब्धितटे लहरी वहन्नवलते वलतेऽभिमुखं तव[6] ॥ १६ ॥
विरम दुश्चरणाचरणादतो भज नवप्रमदाः प्रमदालसाः ।
तव किमद्भुतरूपरवौ यथा मम न सौ[१२]मनसौ मनसो मुदे[7] ॥ १७ ॥
[१३]सुर इति प्रभुमादिशति क्षणादथ सुशासनशासनदेवता ।
पुरत एव वपुर्लतया[१४] प्रिया वलिभया[१५]ऽऽलिभयादिव सस्वजे[8] ॥ १८ ॥

---

१ '-अगात्-' अगं वृक्षम् अतति इति अगात् [ अग+अत्=अगात् ]

२ '-वाग्विधया' किंभूतया सुधया ? विविधवाक्प्रकारया ।

३ 'तरसा' शीघ्रम् ।

४ 'स्मय-' स्मयः अहंकारः तस्य छेदे समर्थया ।

५ '-अदुरया-' दुर् दुष्टा, आ लक्ष्मीः-दुरा न दुरा अदुरा तया चितं व्याप्तं तम्-अदुरया-चितम्—नायकम् । यद्वा न दुष्टः अयो भाग्यं यस्य तेन आचितं व्याप्तम्—अदुरयाचितम् [अ+दुर्+अय+आचित-]

६ '-रिधीरतया-' धिया बुद्ध्या रतं धीरतम्, शिखरिणि धीरतं यस्याः सा तया सुषमया ।

७ 'सुषमया' किंभूतया ? सुरभेर्वसन्तस्य सुषमया शोभया, सुराणामपि भेदको जेता ईश्वरः तस्य जिता-जयकारिण्या ।

८ '-अरजिता' रजस्वन्तं करोति रजयति, णौ मत्वर्थलोपे क्तप्रत्यये रजिता न रजिता अरजिताः-अलिप्ताः । यद्वा 'न वशमाययुः' काकुः वशं प्राप्ताः तदा वसन्तशोभया अरम्-अत्यर्थं जिताः-अरजिताः ।

९ '-अनृतयाऽनृतया' अनृतया असत्यया विकुर्वितया, अनृतया अप्राप्तया [ ऋत=प्राप्त । अन्-ऋत-अनृत ]

१० 'वनपादपः' वनं जलं पातीति वनपो वरुणः, ततः अपः वारीणि व्यमुचत् अम्बुमुचां घटया ।

११ 'व्रज विभो !' हे विभो ! अब्धितटे व्रज । किंभूते ? वहन्नवलते, लहरी तव अभिमुखं वलते—तत्र रत्नसद्भावाल्लोभेन क्षुभ्यतु । यद्वा भयसंदीपनम्—अयं समुद्रः आयाति तटं याहि इति भावः ।

१२ 'सौमनसौ' यथा मम सौमनसौ देवसंबन्धिनौ रूप-रवौ मनसो मुदे भवतः तथा तव किं न मुदे ?

१३ 'सुर' सुरे देवे प्रभुम् इति आदिशति सति शासनदेवता पुरत एव वपुर्लतया सस्वजे स्वशरीरेण आगत्य मिमीले—शरीरेण मिलिता साक्षाद् बभूव इत्यर्थः ।

१४ 'वलिभया' किंभूतया वपुर्लतया वलिभया त्रिवलीयुक्तया ।

१५ '-आलिभया-' आलिः अनर्थः तद्भयादिव एवं गुरुं विरुद्धवचनैर्निमन्त्रयन् अनर्थं सुरः प्राप्स्यति इति । "आलिः सख्यावलीसेत्वनर्थेषु" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ४६४ ]

---

1 मा० ष० स० श्लो० ६ चतुर्थः चतुर्थतया ।

2 मा० ष० स० श्लो० ७ चतुर्थः चतुर्थतया ।

3 मा० ष० स० श्लो० ८ चतुर्थः चतुर्थतया । माघे-'चितमङ्गनाः' इति पाठः ।

4 मा० ष० स० श्लो० ९ चतुर्थः चतुर्थतया । जिता' इति भेदः ।

5 मा० ष० स० श्लो० १० चतुर्थः चतुर्थतया ।

6 मा० ष० स० श्लो० ११ चतुर्थः चतुर्थतया ।

7 मा० ष० स० श्लो० १२ चतुर्थः चतुर्थतया ।

8 मा० ष० स० श्लो० १३ चतुर्थः चतुर्थतया । माघे—'अलिभया-' ।

सुरगिरेरपि धैर्यगुरुं गुरुं बत किमादिशसि भ्रमसम्भ्रमात्।
रजति यो न हरेः प्रियया स किं कलकलो[१]ऽलकलोल[२]दृशाऽन्यया[1] ॥ १९ ॥
अजगणद् गणशो न सुराङ्गनास्तरुणतारुणताभृदयं पुरा।
जरसि पश्यति किं स मनोभुवा विधुरिता धुरि[३] ताः कुकुर[४]स्त्रियः[2] ॥ २० ॥
इति निवार्य सुरार्यमणं दिवो मृगदृशाऽस्य[५] जगे गुणसङ्गतिः।
कलगिरा यदुपश्रुतिभिर्लयात्[६] किमु मुहुर्मुहुर्गतभर्तृकाः[3] ॥ २१ ॥
अहिपतेर[७]वशाऽऽर वशा रसाज्जपनिलीनमना नमनाशया।
परिजनस्य निवार्य धरागतावधिगमं धिगमङ्गलमश्रुणः[८][4] ॥ २२ ॥
श्रुतसुरी भुवनत्रितयेश्वरी श्रियमिति प्रवदन्त्यचिरादगात्।
न समु[९]पैम्यधुनेत्युदिता शनैरवितथा वितथाः सखि! मा गिरः[5] ॥ २३ ॥
अवगमर्त्यगणो गणवासवं जप[१०]विधेयविधेयमिहादिश।
विनयतो नयतोयधिरप्यतः स्वरमृतैरमृतैरिव निर्ववौ[6] ॥ २४ ॥
प्रभविता भविताऽयि पदे नु मे क इह पट्ट[११]भृदित्युदितेऽमुना।
ऋतुभुजा[१२] तु भुजार्जितसद्यशोध्वनिभृता निभृता[१३]क्षरमुज्जगे[7] ॥ २५ ॥
जयति वीरपदाद् विजयः सुधीः सम[१४]यिनामयि! नाथ! रविः स यः।
समुनियोग[१५]नियोगतपःक्रमैरुदवहद् दवहव्य[१६]भुजः श्रियम्[8] ॥ २६ ॥
परमते रमते खलु यन्मतिः प्रवचने वचनेऽपि च यः पटुः।

---

१ 'कलकलो–' कला मधुरा अजीर्णा कला यस्य सः।

२ '–अलकलोल–' अलकैः पक्ष्मकेशैः लोले दृशौ यस्याः सा तया–मानुष्या न रजति हरेः प्रियया शच्या श्रिया वा।

३ 'धुरि' धुरि इति प्रथमं पश्यत्यपि न तर्हि तद्भोगवार्ता का?

४ 'कुकुरस्त्रि–' कु कुत्सितम् कुलं देहः विण्मूत्रमयत्वात् यासां ताः। "कुलं कुलगणे देहे गेहे जनपदेऽन्वये" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ४६९ ]

५ '–अस्य' प्रभोः।

६ 'लयात्' "लयस्तूर्यत्रयीसाम्ये संश्लेषण-विलासयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ३७० ] लक्षणया मूर्च्छया।

७ 'अहिपतेः–' धरणेन्द्रस्य वशा स्त्री रसाद् अवशा शीघ्रम् आर प्राप।

८ '–अश्रुणः' पृथिव्याम् आगमने विरहात् अश्रुणः अधिगमं परिजनस्य निवार्य अमङ्गलं धिग् इति।

९ 'समुपैमि–' 'हे सखि! अहं संप्रति न समुपैमि' इति शनैः उदिता गिरः अवितथाः सत्याः मा वितथाः कार्षीः—शीघ्रमेव आगच्छ इति।

१० 'जप–' जपस्य विधेयो विनयः तस्य विधेयं कार्यं कथय। अतः देववाक्याद् नयपयोधिः निर्ववौ—निर्वृतिं सुखं प्राप स्वः स्वर्गस्य अयाचितैः अमृतैः अमृतैः पीयूषैरिव।

११ 'पट्ट–' "पट्टश्चतुष्पथे पीठे राजादेः शासनान्तरे" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ९१ ]

१२ 'ऋतुभुजा' देवेन।

१३ 'निभृताक्षर–' निर्णीतवर्णम्।

१४ 'समयिना–' समयिनां सिद्धान्तविदाम् रविः। "समयः शपथे भाषा-संपदोः काल-संविदोः। सिद्धान्ताचारसंकेतनियमावसरेषु च" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ५०२-५०३ ]

१५ '–योगनियोग–' मुनीनां योगा उपधानानि, नियोगः आज्ञा, तपश्च तेषां क्रमैः।

१६ 'दवहव्य–' दवानलहव्यभुजः।

---

1 मा० ष० स० श्लो० १४ चतुर्थः चतुर्थतया।
2 मा० ष० स० श्लो० १५ चतुर्थः चतुर्थतया।
3 मा० ष० स० श्लो० १६ चतुर्थः चतुर्थतया।
4 मा० ष० स० श्लो० १७ चतुर्थः चतुर्थतया।
5 मा० ष० स० श्लो० १८ चतुर्थः चतुर्थतया।
6 मा० ष० स० श्लो० १९ चतुर्थः चतुर्थतया।
7 मा० ष० स० श्लो० २० चतुर्थः चतुर्थतया।
8 मा० ष० स० श्लो० २१ चतुर्थः चतुर्थतया। माघे '–दवहव्यवहश्रियम्' इति भेदः।

विरतिधीरतिधीर! विवक्ष्यति शुचिरसौ चिर[१]सौरभसम्पदः[1] ॥ २७ ॥
नवमतिर्वमति स्म न सद्रुचिं जनि[२]कृती निकृती[३]र्न दधावयम् ।
घनवशं न वसन्तदिने वने भ्रमदलौ मदलौल्यमुपाददे[2] ॥ २८ ॥
सपदि मूर्ध्नि सहैव सुधाभुजां कविविधोर्विविधोक्तिकृतामिति ।
सरसचन्दनरेणुरनुक्षणं विचकरे च करेण वरोरु[४]भिः[3] ॥ २९ ॥
अथ गतेषु सुरेषु जगद्गुरुं जपतपोमहसाऽर्कमिवोद्धुरम् ।
समभिवन्दितुमिभ्यततिः श्रुतस्वसमया समयाज्जग[५]तीधरम्[4] ॥ ३० ॥
अहमदा[६]र्दणहिल्लकपत्तनाद् जनपदाज्जनताचलने नरः ।
सुहृदमन्वयितुं पितृवारणे न चकमे च क[७]मेकरसं रहः[5] ॥ ३१ ॥
रथग[८]तिः स्तनितानि वदान्यतां पथि जनो जगृहे प्रसरत्कुथम्[९] ।
द्विपगणस्य घनस्य धनुर्भृतः शबलिमा बलिमानमुषो वपुः[6] ॥ ३२ ॥
पथि रथेषु चलत्सु समीरणैः प्रकटिता पिहिता पटमण्डपैः ।
नववधूरभितः किमु[१०] शारदैरचिररोचिररोचत वारिदैः[7] ॥ ३३ ॥
व्युप[११]रतं परतन्त्रविधेर्लयात् तमधिगम्य गुरुं जनता नता ।
पुरमपि स्थितये सदने क्षणैर्विधुरब[१२]न्धुरबन्धुर[१३]मैक्षत[8] ॥ ३४ ॥
सधनरत्न[१४]मुखव्यवहारिणामिह महाग्रहतो विहगेक्षणे ।
मुनिपतेरनुकूलतया ववौ जनमनोन[१५]मनो घनमा[१६]रुतः[9] ॥ ३५ ॥

---

१ 'चिरसौरभ–' हे अतिधीर! असौ सुधीः सूरीणां समूहः सौरम् तस्य भा यासु ताः भाश्च ताः संपदश्च विवक्ष्यति परिणेष्यति। चिरं सौरभसंपदः चिरसौरभसंपदः "चिरस्पष्टपट्टः" इत्यादिवत् समासः।

२ 'जनिकृती' जनेर्जन्मनः कृती दक्षः।

३ 'निकृती–' मायाः। 'मदलौल्यम्' मदेन चापल्यम्–मनोविकारम्।

४ 'वरोरुभिः' सुधाभुजां देवानाम् वरोरुभिः स्त्रीभिः कविविधोः वीरस्य मूर्ध्नि सरसचन्दनरेणुः विचकरे विकीर्णः।

५ 'जगती–' जगती क्षमा तद्धारकम्।

६ 'अहमदा–' पदैकदेशे पदसमुदायोपचारात् अहमदाबादनगरात्।

७ 'कमेक' कम्–सुहृदम्–मित्रम् अन्वयितुम्–अनुयातुं न चकमे–न इयेष।

८ 'रथगतिः' रथगतिः घनस्य स्तनितानि जगृहे, जनः वदान्यतां दातृत्वं जगृहे। तदा घनस्य शबलिमा गजगणस्य वपुर्जगृहे। किंभूतस्य गजगणस्य? बलिमानमुषः।

९ 'प्रसरत्कुथम्' करिकम्बलयुक्तम्।

१० 'किमु' किमु वितर्के नववधूः अरोचत अथवा शारदैर्वारिदैः पिहिता विद्युत्।

११ 'व्युपरतम्' निवृत्तम्।

१२ '–विधुरबन्धुः–' जनता क्षणैः उत्सवैः विधुरबन्धुः व्याकुलस्वजना पुरमपि अबन्धुरं भीमम् ऐक्षत।

१३ '–अबन्धुरम्–' यद्वा अपाम् अन्धवः कूपाः तैः राजते–अबन्धुरम्। यद्वा "बन्धुरा पण्ययोषायाम्" [ है० अने० सं० कां० ३ श्लो० ५७५ ] इति वचनात् तद्रहितं सुशीलम्।

१४ '–धन-रत्न–' धनजीसहितरत्नमुख्यव्यवहारिणाम्।

१५ 'जनमनोनमनो–' जनमनः नमयति–प्रह्वयति–तत्परं करोति इति जनमनोनमनः।

१६ 'घन–' "घनो मन्दो घनं नित्यम्" इति मञ्जरी।

---

1 मा० ष० स० श्लो० २२ चतुर्थः चतुर्थतया।
2 मा० ष० स० श्लो० २३ चतुर्थः चतुर्थतया।
3 मा० ष० स० श्लो० २४ चतुर्थः चतुर्थतया।
4 मा० ष० स० श्लो० २५ चतुर्थः चतुर्थतया।
5 मा० ष० स० श्लो० २६ चतुर्थः चतुर्थतया।
6 मा० ष० स० श्लो० २७ चतुर्थः चतुर्थतया।
7 मा० ष० स० श्लो० २८ चतुर्थः चतुर्थतया।
8 मा० ष० स० श्लो० २९ चतुर्थः चतुर्थतया।
9 मा० ष० स० श्लो० ३० चतुर्थः चतुर्थतया।

चरमतीर्थकृतश्चरणाम्बुजप्रहितपत्त्रगिरामिव बोधनैः ।
नृपतिवाद्यततिर्न्यगदन्महाध्वनिजयान्निजया स्वनसम्पदा[1] ॥ ३६ ॥
अथ स साहिबदेतनयोऽतनोत् पटुपटैर्नवमण्डपमुच्चकैः ।
इह रतिर्बहुमार्जनया नृणां नवनवा वनवायुभिरादधे[2] ॥ ३७ ॥
शमिततापमपोढमहीरजः प्रथमबिन्दुभिरम्बुमुचोऽम्भसाम् ।
प्रविरलैरचलाङ्गणमङ्गनाजनसुगं न सुगन्धि न चक्रिरे[3] ॥ ३८ ॥
प्रशमितं रजसा शमितं जनैः प्रमुदितं सुदृशामुदितत्विषा ।
अजिरमम्बुरुहैर्मनुजाः सभाँ-जनसुगं न सुगन्धि न चक्रिरे[4] ॥ ३९ ॥
सदखईत्यभिधेयमहेभ्यभूरचितचारुदुकूलजनाश्रये ।
घनघनौघविघट्टनया दिवमरतिसूरतिशून्यदशाऽऽश्रयत्[5] ॥ ४० ॥
निरुपमौक्तिकमौक्तिकपङ्क्तिभृद्धरिवितानवितानकभाजितम् ।
तदधुनापि भियैति दिवोऽम्बुधौ कृशशिखं शशिखण्डमिव च्युतम्[6] ॥ ४१ ॥
सरसभुक्तिसुयुक्तविधौ दधौ स कलधौतमयीः पृथुपात्त्रिकाः ।
वसुहिताः सुहिताः पयसा जना विदधिरे दधिरेऽणुविडम्बनाम्[7] ॥ ४२ ॥
सकलसङ्घविशां परिधापने तदधिवासनया सनयागतैः ।

---

१ 'महाध्वनिजयान्' राजमार्गे जयारावान् ।

२ 'नवनवा' "प्रकारे गुणवचने च" इति द्विर्भावः । ("प्रकारे गुणवचनस्य"–८।१।१२ इति पाणिनीयसूत्रम्) कर्मधारयवद्भावात् विभक्तेर्लुक् ।

३ '–अम्बुमुचो–' अम्बुमुचः जलवाहका जनाः 'सिक्का' इति भाषाप्रसिद्धाः ।

४ 'अचलाङ्गणमङ्गना' अचलाङ्गणम् । अङ्गनाजनसुगं चक्रिरे । सुष्ठु गच्छति इति सुगः अङ्गनाजनः सुगो यत्र तत्–अङ्गनाजनसुगम् । अम्भसां प्रथमबिन्दुभिः न सुगन्धि इति न किन्तु सुगन्धि ।

५ 'प्रशमितम्' 'प्रशमितम्' इत्यत्र स्वार्थे ण्यन्तत्वम् ।

६ 'सुदृशा–' सुदृशां सम्यक्त्ववताम् स्त्रीणां वा उदितत्विषा प्रमुदितं विकसितम् ।

७ 'सभाजनसुगम्' "सभाजन प्रीति-सेवनयोः" दर्शनेऽपि चुरादिः ।

८ 'सदखई–' सन् सत्पुरुषः–अखईसुतः वर्धमाननामा ।

९ 'घनौघ–' घनस्य संघस्य घनौघेन भृत्येन वाद्यप्रकारेण वा विघट्टना संमर्दः तया नभः शून्यमिव जातम्–देवानाम् अत्र आगमनेन स्वर्गोऽपि शून्यः । "घनः सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे । संघे मुस्ते" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० २५८ ]

१० 'अरतिसू–' अरतिं सूते इति अरतिसूः । ईदृशी शून्यदशा दिवमाश्रयत् ।

११ 'निरुपमौक्तिक–' उपमाया औक्तिकानि वाक्प्रपञ्चरूपाणि तानि अतिक्रान्तानि ईदृशानि मौक्तिकानि ।

१२ '–वितानवितानक–' वितानाश्चन्द्रोदयाः तेषां वितानकं विस्तारः समूहो वा ।

१३ '–भाजितम्' कान्त्या जितम् ।

१४ 'च्युतम्' दिवः च्युतं शशिखण्डम् अधुना भिया अम्बुधौ एतीव यातीव–चन्द्रोदयानां भया कान्त्या जितं शशिखण्डं भिया भयेन समुद्रे यातीव ।

१५ 'वसुहिताः' वसूनां धनानां योग्याः । दुग्धेन भृताः दधिरेणुविडम्बनाः तिरस्क्रियाः ।

१६ यद्वा दधि राति दत्ते यस्तत्र दधिरे, अणुः अल्पा या विडम्बना ताम्–संप्रति दधि न प्राप्तम् ।

१७ 'तदधिवासनया' गन्धमाल्यादिना यः संस्कारः सः–अधिवासना तया ।

१८ 'सनयागतैः' नयेन नीत्या आगतम्–आगमनं तत्सहितैः ।

---

1 मा० ष० स० श्लो० ३१ चतुर्थः चतुर्थतया । माघे '–ध्वनिजया निजया' इति भेदः ।

2 मा० ष० स० श्लो० ३२ चतुर्थः चतुर्थतया ।

3 मा० ष० स० श्लो० ३३ चतुर्थः चतुर्थतया ।

4 मा० ष० स० श्लो० ३३ चतुर्थः चतुर्थतया ।

5 मा० ष० स० श्लो० ३४ तृतीयः पादः तृतीयतया । माघे 'दिवः' इति ।

6 मा० ष० स० श्लो० ३४ चतुर्थः चतुर्थतया ।

7 मा० ष० स० श्लो० ३५ चतुर्थः चतुर्थतया ।

प्रतिहतैकमलैः सितिमा[१]प्यहो शुभरजो भरजोऽलिभिराददे[1] ॥ ४३ ॥
निजरजः पटवासमिवाकिरत् तरुणतोरणनीरजधोरणिः ।
विबुधवीरशिरस्युदय[२]प्रभानियतिकाऽऽयतिकार्यनिवेदिनी[2] ॥ ४४ ॥
पुरमुदञ्चितकेतुकरां सखीं दिवमिवाऽऽह्वयितुं कृतसत्क्रियाम् ।
अमहयत् कुसुमैर्न किमुष्मणामनवनी[३] नवनीपवनावलिः[3] ॥ ४५ ॥
व्यरचि चित्रपटैरतिचित्रकृत् स चतुरैरभिषेचनमण्डपः ।
दृढविधेयधियोऽपि यमीक्षितुं ववलिरे वलिरेचितमध्यमाः[4] ॥ ४६ ॥
निधिवियन्नगभूमितवत्सरे[४] धवलमाधवदिक्तिथिवासरे ।
तदभिषेकमहेऽभिहिते जनैरननृते[५] ननृते नवपल्लवैः[६][5] ॥ ४७ ॥
विबुधवीरवराय निजं[७] पदं रसमये समये गुरवो ददुः ।
कलगिरा जगुरेणदृशां गणास्तमथ मन्मथमन्थरभाषिणम्[८][6] ॥ ४८ ॥
विजयतः प्रभनामगुरोर्गिरा प्रविदधच्छरदामयुतं जयम् ।
त्वमिह नाथ! भुवं सुकृतैर्नृणामपरथाऽऽप रथावयवायुधः[९][7] ॥ ४९ ॥
घुसृणचन्दनचूर्णविलेपनोत्सवशिरा[१०] वशिराट्[११] स नवः सभाम् ।
भुवमबोधयदर्थिभृशा[१२]हतक्षमघनामघना[१३]शनकीर्तनः[8] ॥ ५० ॥
जगति नैशमशीतकरः करैर्हसति सान्द्रतमस्सु सहायवान्[१४] ।
इति विनीतकवेर्वरवाचकपदमदादमदा[१५]ऽसुमतां गुरुः[9] ॥ ५१ ॥
विदलिता कमला कमलालयाऽमृतरुचा ह्युदयेन तमक्षिपत् ।

---

१ 'सितिमा–' अलिभिः अपि धवलता धृता तर्हि नृणां धवलत्वे किं चित्रम्? इति 'अपेः' भिन्नक्रमयोजितस्यार्थः ।

२ '–उदयप्रभा–' उदयस्य भाविसूरिपदस्य या प्रभा तस्या नियतिः निश्चयो यत्र ईदृक् आयतिकार्यम् तस्य ज्ञापिका ।

३ '–अनवनी' उष्मणां तापानाम् अनवनी अरक्षिका [ अन्+अवनी ]

४ 'निधि–' सं० १७०९ वर्षे वैशाखसितदशमीतिथौ ।

५ '–अननृते' न विद्यते अनृतम् अलीकं दूषणं यत्र ।

६ 'नवपल्लवैः' पल्लवोऽत्र विस्तरः । "पल्लवः किशले बले । विटपे विस्तरे" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ६९८ ] यद्वा पल्लवैः गीतपदलेशैः ।

७ 'निजम्' "निजमात्मीय–नित्ययोः" इति वैजयन्ती ।

८ 'मन्मथ–' मन्मथस्य मन्थं भङ्गं राति दत्ते–मन्मथमन्थरम्–ईदृग् भाषते इत्येवंशीलम् ।

९ 'रथावयवा–' अपरथा प्रकारान्तरेण रथावयवः चक्रम् तदायुधः चक्री कृष्णो वा भुवम् आप प्राप ।

१० 'उत्सवशिरा' उत्सवः अत्र इच्छाप्रसरः । "उत्सवोऽमर्षे महे इच्छाप्रसर उत्सुके" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ६८९ ]

११ 'वशिराट्' सूरिः ।

१२ 'अर्थिभृशा–' अर्थिभिः भृशम् आहतानि–गन्धर्वैर्वादितानि क्षमाणि तालवीनि घनानि यस्यां सा ताम्–अर्थिभृशाहतक्षमघनां सभाम् ।

१३ '–अघना–' पापनाशनस्तवनः ।

१४ 'सहाय–' ग्रहतारकादिसहायसहितः ।

१५ '–अमदासु–' मदरहितप्राणिनां पूज्यः ।

---

1 मा० ष० स० श्लो० ३६ चतुर्थः चतुर्थतया । माघे–'राददे' ।
2 मा० ष० स० श्लो० ३७ प्रथमः प्रथमतया ।
3 मा० ष० स० श्लो० ३७ चतुर्थः चतुर्थतया ।
4 मा० ष० स० श्लो० ३८ चतुर्थः चतुर्थतया ।
5 मा० ष० स० श्लो० ३९ चतुर्थः चतुर्थतया ।
6 मा० ष० स० श्लो० ४० चतुर्थः चतुर्थतया । माघे '–भाषिणः' इति ।
7 मा० ष० स० श्लो० ४१ चतुर्थः चतुर्थतया ।
8 मा० ष० स० श्लो० ४२ चतुर्थः चतुर्थतया ।
9 मा० ष० स० श्लो० ४३ प्रथमः प्रथमतया ।

सपदि सौरमहो[१] वद नाम्बुजं न महतामहताः[२] क्वचनाऽरयः[1] ॥ ५२ ॥
घनवतां नवताण्डवकारिणां ध्वनिलयान्निलया मुरजावलेः ।
जलधर[३]भ्रमनृत्यकृतक्रमस्वरमयूरमयू[४] रमणीयताम्[2] ॥ ५३ ॥
अनुपदं नु पदं सुगुरौ श्रिते परविभा रविभासुरभूषणैः ।
असिचयैः सिचयैरिव मान्मथैः रुरुचिरे रुचिरेक्षण[५]विभ्रमाः[3] ॥ ५४ ॥
अनवमं नवमङ्गलमाश्रिते स्वजनभोजनभोगरसार्पणे ।
समधुरा[६] मधुरा निदधे सुधानिरसनै[७] रसनैरवृथार्थता[८][4] ॥ ५५ ॥
जगति सद्गुरुकीर्तिभिरुज्ज्वले न रुचिता रुचिता किल मौक्तिकी[९] ।
तदरतेरिव हृद्विवरं दधौ परिभवोऽरिभवो हि सुदुःसहः[5] ॥ ५६ ॥
उपवनात् पवनाश्च ववुः शुभाः सुषमया[१०] स्वमयाद् विशदप्रभाम् ।
भृशमये ! समयेऽत्र रसाश्रये न कमलं कमलम्भयदम्भसि[6] ॥ ५७ ॥
चरमतीर्थ[११]कृतोऽजनि नामभृत् तदपराह्वयसूरिपदोत्सवे ।
श्रुत[१२]तदीरितकोमलगीतकः समनृणाम[१३]नृणामतनोद् दशाम्[7] ॥ ५८ ॥
भवनमेव न मे गुरुरेतु किं वरवधू[१४]रवधूततयेतिगीः ।
उपगतेऽस्य रुचिं निपपौ घनध्वनि[१५]मिषेऽनिमिषे[१६]क्षणमग्रतः[8] ॥ ५९ ॥
इति यतिक्षितिपालपदोत्सवे वसुकृतैः सुकृतैर्जनितं यशः ।
कुलगिरौ जगुरुन्मददेवताः सततगास्ततगानगिरोऽलिभिः[१७][9] ॥ ६० ॥
निजपदे स्वविनेयनिवेशनादनुययावथ सूरतिचन्दिरे ।

---

१ 'सौरम्–' सूरेः इदं सौरम् । पक्षे प्रभाते सूर्यतेजः चन्द्रम् अक्षिपत् । 'हे जन !' इति अध्याहारात् त्वं वद ।

२ 'महताम्' महताम् अरयः क्वचन अहता न ।

३ 'जलधर–' जलधरस्य भ्रमेण नृत्ये कृतो यः क्रमेण स्वरो येस्ताहशा मयूरा यत्र तत् ।

४ '–अयुः' अयुः प्रापुः रम्यताम्–रमणीयताम् ।

५ 'रुचिरेक्षण–' स्त्रियः ।

६ 'समधुरा' तुल्यविभागेन मधुरा रुचिरा ।

७ 'सुधानि–' सुधाया निरसनं पराकरणं येभ्यस्तैः । 'रसनै–' "रसनं ध्वनिते स्वादे" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ३९४ ]

८ '–अवृथार्थता' यथार्थता अशनैर्भोजनैर्निदधे ।

९ 'मौक्तिकी' मौक्तिकी रुचिता कान्तिभावः न शोभिता । अत एव अरतेः दुःखात् हृद्विवरं छिद्रं धत्ते स्म ।

१० 'सुषमया' शोभया ।

११ 'चरमतीर्थ–' चरमार्हन्नाम जन्मनि वर्धमान–नाम इत्यर्थः तस्यैव जिनस्य अपरनाम 'वीर' इति, तन्नाम्नः सूरिपदोत्सवे ।

१२ 'श्रुत–' श्रुतानि तस्य सूरेः ईरितानि उक्तानि गीतानि येन सः ।

१३ 'समनृणाम्' सर्वनराणाम् 'अनृणाम्' ऋणरहिताम् ।

१४ 'वरवधू–' किंभूता वरवधूः ? इतिगीः इतीति किम् ? किं गुरुर्मे भवनं न एतु ।

१५ 'घनध्वनि–' घनानां ध्वनिस्पर्धने उपगते प्रत्यासन्ने अस्य गुरोः कान्तिं निपपौ सादरं ददर्श । "मिषं व्याजे स्पर्धने च" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ५५५ ]

१६ 'अनिमिषे–' न निमिषति इति अनिमिषम् ईदृक् ईक्षणं यत्र कर्मणि ।

१७ 'अलिभिः' अलिभिः अम्भोरसैः ततगानगिरः देवताः । "अलिः सुरापुष्पलिहोरम्भोरसेऽम्लवेतसे" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ४६३ ] अलिभिरिव इति लुप्तोपमा ।

---

1 मा० ष० स० श्लो० ४३ चतुर्थः चतुर्थतया ।

2 मा० ष० स० श्लो० ४४ चतुर्थः चतुर्थतया ।

3 मा० ष० स० श्लो० ४६ चतुर्थः चतुर्थतया ।

4 मा० ष० स० श्लो० ४७ चतुर्थः चतुर्थतया ।

5 मा० ष० स० श्लो० ४५ चतुर्थः चतुर्थतया ।

6 मा० ष० स० श्लो० ४८ चतुर्थः चतुर्थतया ।

7 मा० ष० स० श्लो० ४९ तृतीयः तृतीयतया । माघे 'गीतक' इति विसर्गविहीनम् ।

8 मा० ष० स० श्लो० ४९ चतुर्थः चतुर्थतया ।

9 मा० ष० स० श्लो० ५० चतुर्थः चतुर्थतया ।

यतिपतिः प्रविभाव्य ऋतौ पुरःशरदि नीरदिनीर्यदवो दिशः[1] ॥ ६१ ॥
शुचिरयादिनमप्यधितापयन् प्रथमतोऽथ मतो न घनाद् भुवः ।
इह वनी रतयेऽस्य शिरीषजां हरिवधूरिव धूलिमुदक्षिपत्[2] ॥ ६२ ॥
स्मितमिव स्फुटयन्नवमल्लिकां शुचिरयं चिरयन् दिवसानभात् ।
तदभिनन्दनमाशु रजःकणैर्दिवि तता विततान शुकावलिः[3] ॥ ६३ ॥
प्रकृतपुष्करहंसचिरस्थितिः कृशरसां सरसां प्रणयन् भुवम् ।
तुलयति स्म यतिस्मयभेदनः स शरदं शरदन्तुरदिग्मुखाम्[4] ॥ ६४ ॥ [ ग्रीष्मः ]
नभसि साम्भसि सान्द्रघनाघने सहरिता हरितापहृति क्षितिः ।
भरमपारमपाऽध्वधरस्पृशामतनुताऽतनुतापकृतं दृशोः[5] ॥ ६५ ॥
वरतनो रतनोदकलागुरुर्घनवनीनवनीपकरः कथम् ।
मृदुतरो दुतरोरघनानिलः सतुहिनस्तु हिनस्तु वियोगिनः[6] ॥ ६६ ॥
स्वनवतो नवतोयधराद् वधूर्नसहसा सहसा तडितां प्रियम् ।
भृशमनाशमनाः स्वयमाश्रयत् न सहसा सहसा कृतवेपथुः[7] ॥ ६७ ॥ [ इति वर्षाः ]
शरदभाद् रदभासिहसच्छ्रिया धवलया वलयायितपङ्कजैः ।
धृतरुचा तरुचारुसुपल्लवैर्मृदुतया दुतयाधरलेखया[8] ॥ ६८ ॥
रतरसात् तरसाऽत्र निरंशुकादयिता दयिता दयिताग्रहात् ।

---

१ 'पुरःशरदि' पुरः–अग्रे शरद् यस्य तत्र–वर्षाकाले ।
२ 'नीरदिनी–' मेघवतीः ।
३ 'यदवो' 'यत्' इति अव्ययम् । अवति रक्षति अवः–रक्षकः पचाद्यचि रूपम् ।
४ 'शुचि–' शुचिः आषाढः अयात्–प्रापत् ।
५ 'घनाद्' घनात् प्रथमतः पूर्वम् इनं सूर्यम् स्वामिनं वा तापयन् ।
६ 'हरिवधूः–' हरेः सूर्यस्य वधूरिव वनी वनसमूहः अस्य इनस्य रतये सुखाय शिरीषजां शीतलां कोमलां धूलिं चिक्षेप ।
७ 'चिरयन्' चिरं कुर्वन् ।
८ 'तदभिनन्दन' तस्य आषाढस्य अभिनन्दनं वर्धापनम् ।
९ 'शुका–' शिरीषपुष्पराजिः । "शुकं ग्रन्थिपर्णेऽरलू–शिरीषपुष्पयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० १९ ]
१० 'पुष्कर–' गगने । '–हंस–' सूर्यः । पक्षे पुष्करं कमलम्, हंसः मरालः । प्रकृता पुष्करे गगने हंसेन सूर्येण चिरस्थितिर्यत्र ।
११ 'कृशरसाम्' शुष्काम् । पक्षे तिलान्नस्य सा लक्ष्मीर्यस्यां सा ताम् । "तुल्यौ तिलान्ने कृसरत्रिसरौ" इति हैमः । [ हैम–अभिधानचिन्तामणौ कां० ३ श्लो० ६२ ]
१२ 'स–' आषाढः शरदं शरदृतुं तुलयति स्म ।
१३ 'सहरिता' सतृणा ।
१४ 'हरिता–' हरिः सूर्यः तस्य तापहृति मेघे ।
१५ 'अपाध्वधरस्पृशाम्' विरहिणीनाम् । 'अतनु–' स्मरः । अतनुत इति क्रिया ।
१६ 'दुतरोर–' दुता उपतप्ताः रोराः दरिद्राः यस्मात् सः । "टुदु उपतापे धातुः"–स्वादिः ।
१७ 'नसहसा' हसेन हास्येन सह सहसा–न सहसा नसहसा शोकयुक्ता । नञ्प्रतिरूपेण 'न' इति अव्ययेन समासः ।
१८ 'भृशमनाश–' भृशम् अनाशम्–आशारहितं मनो यस्याः सा ।
१९ '–आश्रयत्' सा स्त्री तडितां सहसा बलेन 'कृतवेपथुः' कृतकम्पा स्वयमेव प्रियमाश्रयत् न तु बलेन । सहसा शीघ्रं वा ।
२० 'दुतया–' प्राप्तया । "दुं गतौ धातुः"–भ्वादिः ।
२१ '–अयिता' अयिता निर्गता । "अय गतौ धातुः" ।

---

1 मा० ष० स० श्लो० ५१ चतुर्थः चतुर्थतया ।
2 मा० ष० स० श्लो० ५२ चतुर्थः चतुर्थतया ।
3 मा० ष० स० श्लो० ५३ चतुर्थः चतुर्थतया ।
4 मा० ष० स० श्लो० ५४ चतुर्थः चतुर्थतया ।
5 मा० ष० स० श्लो० ५५ चतुर्थः चतुर्थतया । माघे 'दृशाम्' इति ।
6 मा० ष० स० श्लो० ५६ चतुर्थः चतुर्थतया ।
7 मा० ष० स० श्लो० ५७ चतुर्थः चतुर्थतया ।
8 मा० ष० स० श्लो० ५९ चतुर्थः चतुर्थतया ।

ह्रियमिता यमिता[1]ऽपि पयोमुचा निवसितेन[2] सितेन सुनिर्ववौ[1] ॥ ६९ ॥
नव[3]सुधा वसुधाभरणं विधोः कल[4]मजालमजातरसक्षयम् ।
सिततमाः[5] ततमान[6]भृता प्रियं वनितयाऽनितया[7] न विषेहिरे[2] ॥ ७० ॥ [ इति शरत् ]
कमलिनीमलिनीकरणे सहे[8] कुसुमितासु मितासु वनीष्वपि ।
सुकरणै[9]करणैः स्म रसं श्रियः स्मरमयं रमयन्ति विलासिनः[10][3] ॥ ७१ ॥
सरलतारलताः परिकम्पयन् मदनवेदनवेगवतीर्व्यधात् ।
हिमहता महता तरसा प्रियैर्वियुवतीर्[11]युवतीः शिशिरोऽनिलः[4] ॥ ७२ ॥
बलवतो लवतोऽपि महः क्षयं नयति संयति[12] संगमनं जने ।
रविरतोऽविरतो[13] जडसन्निधौ न हि महाहिमहानिकरोऽभवत्[5] ॥ ७३ ॥ [ इति हेमन्तः ]
नरमणे ! रमणे तपसि[14] श्रिया सह स ना हसनाय समीरितः ।
अरुणभो[15]ऽरुणभोग्य[16]रजश्चयो द्युतिरयं[17] तिरयन्नुदभूद् दिशः[6] ॥ ७४ ॥
मदमिते[18] दमिते स्वगुणैर्मयि त्यज रसाज्वरसा न बिभेषि किम् ? ।
वचनयाचनया निशि भेजिरे घनमतो नमतोऽनुमतान्[19] प्रियाः[7] ॥ ७५ ॥
निजगदुः कुसुमेन वशीकृताः स्मरनृपस्य जयं दलता[20]लिनः ।
रतिकराः स्वरुतैरनुकात्मनां[21] सपदि कुन्दलताद्[22]लतालिनः[8] ॥ ७६ ॥
प्रवदतः स्वसुमेन दधौ भृशं वरयशांसि तपोदलताऽलिनः[23] ।

१ 'यमिता–' बद्धा मेघेन वृष्ट्या च बद्धाऽपि ।

२ 'निवसितेन' अभ्रैर्निवसितेन इव सुनिर्ववौ–सुखं प्राप । 'इव' अव्ययाभावे लुप्तोपमा ।

३ 'नवसुधा' विधोश्चन्द्रस्य नवा या सुधा तया भुवो भरणम् । 'नवसुधा' इति भिन्नं पदम् । बहुवचनान्तम् ।

४ 'कलम–' कलमक्षेत्रम् ।

५ 'सिततमाः' विधोर्नवसुधाः सिततमाः शुभ्राः, पुनः किम् ? वसुधाभरणम् ।

६ 'ततमान–' विस्तीर्णमानवत्या ।

७ प्रियम् अनितया अप्राप्तया वनितया एतानि वस्तूनि न विषेहिरे ।

८ 'सहे' सहः मार्गशीर्षमासः ।

९ 'सुकरणै–' सु–सुष्ठु, करणानि कामासनानि तद्रूपाद्वैतयुद्धैः ।

१० 'विलासिनः' रसिकान् रमयन्ति स्म । रसं स्मरमयम् । द्विकर्म्यम् ।

११ '–वियुवतीः' प्रियैर्वियुक्ताः युवतीः ।

१२ 'संयति' युद्धे ।

१३ '–अविरतो–' अविरतः । विशेषेण रतो वा ।

१४ 'तपसि' माघे । "तपाः शिशिर–माघयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ५६७ ]

१५ 'अरुणभो–' रक्तकान्तिः ।

१६ 'अरुणभोग्य–' "अरुणोऽर्केऽनूरु–पिङ्गयोः । संध्यारागे बुधे कुष्टे निश्शब्दाऽव्यक्तरागयोः" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० १८१ ]

१७ 'द्युतिरयम्' करवेगम् चकाराध्याहारात् दिशः तिरयन् ।

१८ 'मदमिते' इते प्राप्ते मयि मदं त्यज ।

१९ 'अनुमतान्' प्रियान् प्रियाः नार्यः ।

२० 'दलता' विकस्वरेण । अलिनः भृङ्गाः ।

२१ '–अनुकात्मनाम्' कामिनाम् ।

२२ 'कुन्दलता–' कुन्दलताया दले तालिनः करास्फोटकृतः ।

२३ 'तपोद–' तपोदलतालिनः तपाः शिशिरः स एव दलं हस्त्यादिसाधनम् तद्भावः तेन अलति शोभते ईदृक् राजा, तस्य वरयशांसि प्रवदतः । "अली भूषण–पूर्णता–निषेधेषु धातुर्भ्वादिः"

1 मा० ष० स० श्लो० ५८ चतुर्थः चतुर्थतया । माघे 'निवसितेव' इति भेदः ।

2 मा० ष० स० श्लो० ६० चतुर्थः चतुर्थतया ।

3 मा० ष० स० श्लो० ६१ चतुर्थः चतुर्थतया ।

4 मा० ष० स० श्लो० ६२ चतुर्थः चतुर्थतया । माघे 'शिशिरानिलः' ।

5 मा० ष० स० श्लो० ६३ चतुर्थः चतुर्थतया । अकाराप्रश्लेषे विरतः ।

6 मा० ष० स० श्लो० ६४ चतुर्थः चतुर्थतया ।

7 मा० ष० स० श्लो० ६५ चतुर्थः चतुर्थतया ।

8 मा० ष० स० श्लो० ६६ चतुर्थः चतुर्थतया ।

नवमृदङ्गधिया दलतालिनः[1] समधुकुन्दलता दलताऽलिनः[2] ॥ ७७ ॥ [ इति शिशिरः ]

अथ वसन्तः—

दधुरधिकरुषं[3] स्त्रियो न रागं मतनुतरतये वसं ता न कः ।
नवसुरभिसुमस्रजाऽन्यथैवमतनुत रतयेव[4] सन्तानकः[5] ॥ ७८ ॥ [ प्रभावृत्तम् ][6]
कोपनाऽपि[7] न पिकध्वनिमारादक्षमिष्ट मधुवासरसारम् ।
रन्तुमैहत वरेण निपीय दक्षमिष्टमधु वासरसाऽरम्[8] ॥ ७९ ॥ [ स्वागता ]
प्रस्थातुकामेऽथ पुरी मुनीनां[9] प्रभावनीकेतनवैजयन्तीः[10] ।
सार्थागमं बोधयितुं नु तेने प्रभावनी[12] केतनवैजयन्तीः[11] ॥ ८० ॥ [ उपजातिवृत्तम् ]
तनुमन्वधिपं[13] रजो यियासोः परितस्तार रवेरसत्यवश्यम् ।
त्वरया जनसन्ततेः खराधे[14] परितस्ताररवे रसत्यवश्यम् ॥ ८१ ॥
शुचिघर्मणि[15] वारिकणैर्विलसद्रुचिरं कमनीयत रागमिता[16] ।
पथि तज्जनतासु पयोजमुखी रुचिरं कमनीयतरं[17] रागमिता ॥ ८२ ॥ [ तोटकम् ]
नगरेऽहमदाह्वये यतीन्द्राः सहसाऽयन्त नदीपपाटलाभे[18] ।
गुरुसङ्गमजैः क्षणैर्जनैस्तैः सह सायन्तनदीपपाटलाभे[19] ॥ ८३ ॥ [ औपच्छन्दसिकम् ]

---

१ 'नवमृद-' नवमृदङ्गबुद्ध्या 'दलतालिनः' दले तालिनः तालक्रियासाम्यवन्तः । अथवा दलेषु तलन्ति प्रतिष्ठन्ते इति दलतालिनः । "तल प्रतिष्ठायां धातुः" । "दलम् अर्धम्, दलं पर्णम्, दलं हस्त्यादिसाधनम्" इति मञ्जरी [ श्लो० १४० अर्धश्लोकाधि० ] "तालः कालक्रियामाने हस्तमान-द्रुमेदयोः ॥ करास्फोटे करतले च" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ४७९-४८० ]

२ 'समधुकुन्दलता' अलिनः भ्रमरान् दधौ पुपोष, केन? ससुमेन कुसुमेन दलता विकस्वरेण ।

३ 'दधुर-' याः स्त्रियः अधिकरुषं दधुः, न रागं मतनुतरतये दधुः ताः स्त्रियः वशं कः न अतनुत, कया नवसुरभिपुष्पलतया । क इव? संतानक इव लतया स्त्रियः वशं करोति ।

४ 'रतया' लतया हारेण कस्तूर्या वा "लता कस्तूरी" अनेकार्थे [ है० अने० सं० कां० २ श्लो० १८८-१८९ ]

५ 'संतानकः' कल्पवृक्षः ।

६ 'प्रभा-' "वसुयुगविरतिर्ननौ रौ प्रभा" ।

७ 'कोपना-' कोपनाऽपि स्त्री पिकध्वनिं न सेहे । वसन्तदिने श्रेष्ठम् इष्टमधु निपीय दक्षं यथा स्यात् तथा रन्तुम् अरम् अत्यर्थम् ऐहत ।

८ 'वासरसा' वासे वासगृहे रसो यस्याः सा ।

९ 'मुनीनाम्' मुनीनां प्रभौ प्रस्थातुकामे पुरी केतनेषु गृहेषु पताकाः तेने ।

१० '-अनीकेतनवा-' अनीकेन सेनाया इतः अवाप्तः नवः स्तुतिर्यया सा ।

११ 'एजयन्तीः' चलन्तीः पताकाः ।

१२ 'प्रभावनी' प्रभायाः अवनी प्रभावनी-कान्तेर्भूः-स्थानम् ।

१३ 'तनु-' अधिपम् अनुयियासोर्जनसंततेः रजः रवेः तनुं परितस्तार असतीवत् अवश्यं सर्वतः परिसर्पत् ।

१४ 'खराधे' खरः तित्तिरः तदादौ रसति शब्दं कुर्वाणे । "तित्तिरः खरकोषे गर्दभो वा"

१५ 'शुचि-' आषाढतापे ।

१६ 'रागमिता' मार्गे रागं लोहितिमानम् इता प्राप्ता । "इण् गतौ-" अदादिः ।

१७ 'कमनीय-' कमनीयतरं बहुश्रेष्ठम्, अगं तरुम्, इता । "इं गतौ" भ्वादिः ।

१८ 'नदीप-' नदीपः समुद्रः तस्य पाटो विस्तारः तस्य लाभो यत्र-समुद्रवद्विस्तृते ।

१९ 'सायंतन-' संध्याभवद्दीपवत् पाटला श्वेतरक्ता आभा यत्र ।

---

1 मा० ष० स० श्लो० ६६ चतुर्थः चतुर्थतया ।

2 मा० ष० स० श्लो० ६७ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

3 मा० ष० स० श्लो० ६८ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

4 मा० ष० स० श्लो० ६९ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

5 मा० ष० स० श्लो० ७० द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

6 मा० ष० स० श्लो० ७१ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

7 मा० ष० स० श्लो० ७२ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

इह वीक्ष्य देवमुदितं रसभासाऽसमयाऽवनौ घनमदभ्रमराणि ।
शिखिभिर्जनस्य सुमनांसि ननन्दुः समयाऽऽवनौघनमदभ्रमराणि[1] ॥ ८४ ॥

[ कुटिलकवृत्तम् ]

नात्रेतिरासीदुदये मुनीन्दोः समुद्धृताशङ्कमनीचकाशे ।
महैर्महद्भिर्वसुधा सुधान्यैः समुद् धृताशं कमनी चकाशे[2] ॥ ८५ ॥

सुधयेव सुसाधिताऽथवा किमभिनद् धारसमा न सा रसेन ।
गुरुगीर्न नृणां द्विधाऽपि तापमभिनद्धा रसमानसारसेन[3] ॥ ८६ ॥ [ औपच्छन्दसिकम् ]

रेमे नुन्ना यों मधुमत्ता बहुरङ्गैः कामे कान्ते सारसिकाकाकुरुतेन ।
इष्टे देवे ब्रह्मणि भोगात् स्म निवृत्तिं कामेकान्ते सा रसिका का कुरुते न[4] ॥ ८७ ॥

[ मत्तमयूरवृत्तम् ]

स्पष्टीकृते पट्टुनटेन चमत्कृतेन्द्रकेशे रते स्मरसहाः सवतोषितेन ।
क्षैणेन चात्र निशि जागरणेषु रागे के शेरते स्म रसहासवतोषितेन[5] ॥ ८८ ॥

[ वसन्ततिलका ]

---

१ 'रसभासा' वीर्यकान्त्या । 'असमया' अतुल्यया । 'अवनौ' भूमौ ।

२ 'घन-' घनं निबिडम्, अदभ्रं बहुलम्, 'अराणि' क्रिया ।

३ 'शिखिभिः' शिखिभिः श्रावकैः अराणि जयजयारवश्चक्रे ।

४ 'अवनौघ-' समया समीपे अवनस्य रक्षणस्य ओघे प्रवाहे नमन्ति प्रह्वीभवन्ति च तानि-अभ्रमेण तत्त्ववार्तया राजन्ते इति-अभ्रमराणि विशेषणेन "नाम नाम्ना" [ ३-१-१८ हैम० ] इति समासः ।

५ 'समुद्धृता-' समुद्धृता दूरीकृता आशङ्का भयं संकोचो वा यत्र कर्मणि ।

६ 'अनीच-' न विद्यते नीचः वातनहनः ? काशो रोगो यत्र तस्मिन् अनीचकाशे ।

७ 'समुद् धृताशं कमनी' उत्सवैः समुत् सप्रमोदा । धान्यैः धृताशम् उद्धृतदिक् यथा स्यात् तथा । 'कमनी' अभिरूपा । 'वसुधा' भूः । 'चकाशे' दिदीपे ।

८ 'सुधया' अमृतेन ।

९ 'धारसमा' मेघतुल्या । धारो जलधरः "धारो मेघः" अनेकार्थे [ है० अने० सं० कां० २ श्लो० ४२१ ]

१० 'गुरुगीः' सा प्रसिद्धा गुरुगीः द्विधाऽपि नृणां तापं न न अभिनत् काकुः । गुरुगीः सुधया साधिता इव ।

११ 'किम-' किमिति विकल्पे सारसेन चन्द्रेण अभिनद्धा व्याप्ता । किंभूतेन ? रसे शृङ्गारादौ मानं बहुमानं यस्य तेन समासात् 'रसमानसारसेन' । "सारसः चन्द्रः" इति अनेकार्थे [ है० अने० सं० कां० ३ श्लो० १५४ ]

१२ 'या' या स्त्री सारसिकानां 'सारू' इति प्रसिद्धानां सारसपक्षिकान्तानाम् यद्वा कामिनां काकुरुतेन वक्रोक्तिवचसा ।

१३ 'कामे' स्मररूपे कान्ते रेमे ।

१४ 'सारसिका-' "सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः" इति यादवः ।

१५ 'कामेका-' सा नारी कां भोगनिवृत्तिं न कुरुते स्म । 'एकान्ते' एकान्ते केवलस्वरूपे देवे साक्षाद् ब्रह्मणि दृष्टे कां निवृत्तिं नाऽकार्षीत् ।

१६ "एकः केवलः । अन्तः स्वरूपम्" इति अनेकार्थे [ है० अने० सं० कां० २ श्लो० २ तथा १५५ ]

१७ 'पट्टुनटेन' पट्टुनटेन रते रमणे, किंभूते रते ? 'चमत्कृतेन्द्रकेशे' चमत्कृतेन्द्रवरुणे । "केशः वरुणः" अनेकार्थे [ है० अने० सं० कां० २ श्लो० ५३३ ]

१८ "षुंगट् अभिषवे" "अभिषवः कण्डनं पीडनं मज्जनं स्नानमपि" [ है० अने० सं० कां० ४ श्लो० ३०३ ] तेन तोषितेन-'सवतोषितेन' । स्वार्थे ण्यन्तत्वात् तुष्टेन ।

१९ 'क्षैणेन' तथा क्षैणेन रागे धवलगाने स्पष्टीकृते के स्मरसहाः शेरते स्म ।

स्त्रीपक्षे सवः प्रसवः पुत्रादिः तेन तुष्टेन । निशि उषितेन रसेन हासवता-[ रसहासवता+उषितेन ] स्मरणं स्मरः स्मृतिः तां सहन्ते स्मरसहाः पण्डिताः-ज्ञानिनः-चतुराः ।

---

1 मा० ष० स० श्लो० ७३ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

2 मा० ष० स० श्लो० ७४ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

3 मा० ष० स० श्लो० ७५ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

4 मा० ष० स० श्लो० ७६ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

5 मा० ष० स० श्लो० ७७ द्वितीय-चतुर्थौ द्वितीय-चतुर्थतया ।

गुरुयशोधवलावलिमङ्गना रसकलामलपल्लवलीलयाँ ।
श्रुतिमदादिव तन्नृते वनैरसकलामलपल्लवलीलया[1] ॥ ८९ ॥ [ द्रुतविलम्बितम् ]
साचार्यचन्द्रमसि शान्तरसानुयुक्ते ज्येष्ठस्थितेरनु हितं तरसा नु युक्तेः ।
धन्येन गौरिति नतैन्द्रगिराविहर्तुं बिभ्रत्यनोदि समयूरगिरा विहर्तुम्[2] ॥ ९० ॥

इति श्रीदेवानन्दे महाकाव्ये दिव्यप्रभापरनाम्नि ऐङ्काराङ्के माघसमस्यार्थे महोपाध्याय-श्रीमेघविजयगणिविरचिते पट्टधरस्थापन–षड्ऋतुवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

---

## सप्तमः सर्गः ।

॥ ॐ ह्रीँ श्रीँ क्लीँ अर्हं ॐ शङ्खेश्वरपार्श्वपरमेश्वराय नमः ॥ ऐँ नमः ॥

अथ समयमवेत्य वन्दनायाः कुरु गुरुराज ! महेन पावनं नः ।
सफलय सुदृशां मनोरथालीं भवति महत्सु न निष्फलः प्रयासः[3] ॥ १ ॥
इति धनवचसोऽनुमन्तरीशे भुवि कुसुमानि शरा इवाभिपेतुः ।
रतिवरयितुरुद्भटस्य यस्य न कुसुमपञ्चकमप्यलं विषोढुम्[4] ॥ २ ॥
व्यरचि रुचिभराश्रितं दुकूलैः पटुतरदूष्यमदूष्यमिभ्यराजा ।
ह्रियमिह वरचित्रपुत्रिकाणां न्यदधत विभ्रमसम्पदोऽङ्गनासु[5] ॥ ३ ॥
इह विपणिगृहापणेषु भित्तेः शुचिसिचयास्तरणैः कृते पिधाने ।
नवकुतुकदिदृक्षया स्पृशन्त्या भुजलतिका मुहुरस्खलत् तरुण्याः[6] ॥ ४ ॥
निजयुवतिजनांस्तदाऽऽजुहाव महति महे धनजीमहेभ्यसिंहः ।
नटनमिव दधौ वदंस्तदीयो ध्वनिमधिकं कलमेखलाकलापः[7] ॥ ५ ॥
परिमिलति जने घने क्षणेऽस्मिन् स्थिततरलोचनयोर्नृदेववध्वोः ।

---

१ '–अङ्गना' अङ्गना गुरोः यशोधवलानि गीतविशेषाः तेषाम् आवलिम् अलपत् ।

२ 'रसकलाम्' मधुराम् ।

३ 'लवलीलया' लवली लताभेदः तद्वत् लयः विलासो यस्याः सा । "लयस्तूर्यत्रयीसाम्ये संश्लेषण–विलासयोः" इनि अनेकार्थः [ है० अने० सं० कां० २ श्लो० ३७० ]

४ 'असकला–' अखण्डाः–नवाः, अमलाः निर्मलाः ।

५ 'युक्तेः' तरसा बलेन । 'नु' वितर्के ।

६ 'गिरौ-इहर्तुम्' इह लोके विहर्तुं हितं योग्यम् ऋतुं बिभ्रति सति नतम् ऐन्द्रं यम् ईदृशो गिरिः पूज्यः तस्मिन् । "गिरिः पूज्यः" अनेकार्थे [ है० अने० सं० कां० २ श्लो० ३९९ ] धन्येन धनजीनाम्ना इति गौः वाक् अनोदि प्रेरिता । ज्येष्ठस्थितेः चतुर्मासकस्य अनु पश्चात् । 'समयूरगिरा' मयूरयुक्तसरस्वत्या–तत्तुल्येन कामे कान्ते [ श्लो० ८७ ] इत्यादिवत् प्रयोगः । यद्वा मयूरगीः षड्जस्वरः तेन सहितेन–लभकृत्स्वरवादिना ।

७ 'सुदृशाम्' सम्यक्त्वभाजाम् ।

८ '–दूष्य–' "दूष्यं वस्त्रे च तद्गृहे च" इति विश्वः [ श्लो० २९ यद्वितीय ]

९ 'वरचित्र–' वरचित्रपुत्रिकाणां विभ्रमसंपदः स्त्रीषु ह्रियं न्यदधत ।

---

1 मा० ष० स० श्लो० ७८ द्वितीय–चतुर्थौ द्वितीय–चतुर्थतया ।

2 मा० ष० स० श्लो० ७९ चतुर्थः चतुर्थतया । माघे 'बिभ्रत्यचोदि' इति पाठभेदः ।

3 मा० स० स० श्लो० १ चतुर्थः चतुर्थतया ।

4 मा० स० स० श्लो० २ चतुर्थः चतुर्थतया ।

5 मा० स० स० श्लो० ३ चतुर्थः चतुर्थतया ।

6 मा० स० स० श्लो० ४ चतुर्थः चतुर्थतया ।

7 मा० स० स० श्लो० ५ चतुर्थः चतुर्थतया ।

भुवि पदमवदङ्घ्रिदां वि[१]मुञ्चत् स्वरसमसक्त[२]मलक्तकच्छलेन[1] ॥ ६ ॥
सुरयुवतिरिहाख्यदेहि नारि ! कलय विमानसमां रमां स्थलेऽस्मिन् ।
सुकृतभरभवे भुवि[३]र्भवे त्वमनृतगिरं गुणगौरि ! मा कृथा[४] माम्[2] ॥ ७ ॥
अतनुत धनजीप्रिया धनश्रीः प्रणयगिरा निजसङ्गभुक्तिभक्तीः ।
स्मरत न सुदृशो[५]ऽत्त दत्त साधाविति च तथापि [६]सखीषु मेऽभिमानम्[3] ॥ ८ ॥
गुरुरपि विजयप्रभं गणेन्द्रं स्वपदनिवेशित[७]वन्दितं तमूचे ।
चिरमिह मम पट्टधारिलक्ष्मीर्भवति भवत्वसुहृ[८]ज्जनः स कामः[4] ॥ ९ ॥
प्रतिपदनटनेषु तूर्यनादे प्रणदति काऽपि सखीं यियासुमाह ।
गुरुयुगमयि ! दर्शया[९]ऽऽलि ! पुण्ये भव मम मानिनि ! जीविते दयालुः[5] ॥ १० ॥
प्रमुदितधनजीभ्यदत्तदानैर्नवनेपथ्यविभूषणस्तदार्थी ।
न भवति पतिरित्यनादृतां स्त्रीं किल कथमप्यनुकूलयाञ्चकार[6] ॥ ११ ॥
प्रतिजनं[१०]महमुद्रिकाप्रदाने पथि निबिडे स्म मिथः स्त्रियौ ब्रुवाते ।
कथमथ मम सङ्गतिः श्रमार्तेः स्तनजघनोद्वहने तवापि चेतः[7] ॥ १२ ॥
इति धृतगुरुवन्दनाद्भुतश्रीरतिशयवान् स्वगुणैस्तदागणेयैः ।
अभिनवगणभृद् द्विधाऽपि [११]मार्गे न्यधित मिमान इवावनिं पदानि[8] ॥ १३ ॥
चिरयसि न समं मयैषि नन्तुं त्वकमपरां तु समीहसेऽस्तु सा ते ।
गुरुयुगमगमत् पुरोऽनुगम्य प्रियं[१२]मिति कोपपदेन काऽपि सख्याः[9] ॥ १४ ॥
अथ गुरुयुगलस्य तत्र शाखापुरगमने पथि विस्तृतेऽम्बरेऽन्यत् ।
पुनरपि कृतसंवरं वितत्यै स्थलभुवि कन्दुक[१३]विभ्रमं बभार[10] ॥ १५ ॥

१ 'विमुञ्चत्' विमुञ्चत् स्वरसं न्यस्यत् ।

२ 'असक्त–' देवपक्षे भुवि असक्तम्–अलग्नम् । नरपक्षे असक्तं नित्यम् ।

३ 'भुविर्भ–' देवभवे ।

४ 'मा कृथा–' देवावतारे असत्यवाचं मा कृथाः ।

५ 'सुदृशो–' हे सुदृशः । यूयम् अत्त भक्षयत, साधौ दत्त दानम् ।

६ 'मेऽभिमानम्' कुरुत सखीषु मेऽभिमानम् । अजल्पनादिकं मा स्मरत ।

७ 'स्वपद–' पूर्वं स्वपदे निवेशितः पश्चाद् वन्दितः–इति समासः ।

८ '–असुहृज्जनः' सः प्रसिद्धः कामः असुहृदः जना यस्य ईदृग् अस्तु–निष्प्रसरोऽस्तु । यद्वा असुहृत् प्राणहारी–हिंसकः सः 'कामः' के मस्तके आमः रोगः तत्सहितोऽस्तु ।

९ 'आलि !' हे आलि ! अयि–इति संबोधने गुरुयुगं दर्शय पुण्ये धर्मरूपे जीविते दयालुर्भव ।

१० 'प्रतिजन–' जनं जनं प्रति–प्रतिजनं महामुद्रादानैः ।

११ 'मार्गे' लौकिके लोकोत्तरे मार्गे प्रवचने पदानि क्रमन्यासाः सिद्धान्तपदानि वा । 'मिमानः' अवनिमानं प्रत्यक्षतो गणनरीत्या वा ।

१२ 'प्रिय–' प्रियम्–धवम् अनुगम्य ।

१३ 'कन्दुक–' पदन्यासस्थाने एकं वस्त्रं विस्तारितम्–द्वितीयं पुनर्वितत्यै प्रस्तारणाय–कृतसंवरं धृतं तत् कन्दुकवत् रुरुचे ।

1 मा॰ स॰ स॰ श्लो॰ ६ चतुर्थः चतुर्थतया ।

2 मा॰ स॰ स॰ श्लो॰ ७ चतुर्थः चतुर्थतया ।

3 मा॰ स॰ स॰ श्लो॰ ८ चतुर्थः चतुर्थतया । माघे 'मेऽभिमानः' ।

4 मा॰ स॰ स॰ श्लो॰ ९ चतुर्थः चतुर्थतया । माघे 'सकामः' इति अखण्डम् ।

5 मा॰ स॰ स॰ श्लो॰ १० चतुर्थः चतुर्थतया ।

6 मा॰ स॰ स॰ श्लो॰ ११ चतुर्थः चतुर्थतया ।

7 मा॰ स॰ स॰ श्लो॰ १२ चतुर्थः चतुर्थतया ।

8 मा॰ स॰ स॰ श्लो॰ १३ चतुर्थः चतुर्थतया ।

9 मा॰ स॰ स॰ श्लो॰ १४ चतुर्थः चतुर्थतया । माघे 'सख्या' इति ।

10 मा॰ स॰ स॰ श्लो॰ १५ चतुर्थः चतुर्थतया । माघे '–तटभुवि' इति ।

इह घनजनसङ्कुलप्रदेशे युवतिरनीयत नायकेन नन्तुम् ।
कथमपि पुरतो विगृह्य तस्या मृदुममृदुव्यतिबद्धमेकबाहुम्[1] ॥ १६ ॥
निवसितकुचपार्श्वतः प्रगल्भा व्यनमदुपेत्य जनान्तरेऽपि सूरीन् ।
पथि जनमपसारयन्त्यभीकं[१] कुचमितरं तदुरः[२]स्थले निपीड्य[2] ॥ १७ ॥
अनुगतनवसूरिणा स साकं सकलपुरेषु महोत्सवैर्विहृत्य ।
अहिमदपुरि सूरिरब्दम्[३]आप्य पदमथ मन्मथमन्थरं[४] जगाम[3] ॥ १८ ॥
स्थितवति च गुरौ पुरेऽत्र दाने तपसि जिनार्चनशीलसन्निधाने ।
व्रतनियमविधौ सधर्म[५]योगात् प्रियमबला सविलासमन्वियाय[4] ॥ १९ ॥
अनुजनककसिपु[६]प्रदानपूर्वमभिनवनन्दिमहैस्तदोपधानम् ।
निशि विनिहितजागरेषु गानैः स्वभुज[७]लताविभवेन काचिदूहे[5] ॥ २० ॥
स्थितिमिह विजयप्रभस्स सूरिर्नगरवरान्तरधत्त वेदमासान् ।
दृढचरणगुणैर्जयन् मुनीशान् विषम[८]वितीर्णपदं बलादिवाऽन्यान्[6] ॥ २१ ॥
दृढचरणगुणैर्दधत् समाज्ञा[९] विषमवितीर्णपदं बलादिवाऽन्यां[१०]ः
[ इति वा पाठान्तरम्–उत्तरार्द्धे ]
तपसि जपविधौ क्रियाविवेके शुचिचरणे समये[११] द्विधाऽपि बोधे ।
गुरुमतिशयवांस्तथा स हीरप्रतिमतयाऽनुययावसंशयानः[7] ॥ २२ ॥
पुरनगरवरान्तरालरथ्यागुरुयुगवाक्यरसौघवाहिनीनाम्[१२] ।
सरित इव गतागतैर्वधूनां प्रणदितहंसक[१३]भूषणा विरेजुः[8] ॥ २३ ॥
अधृत रतधृतेर्निवृत्तिवर्म गुरुवचसा बहुशो जनो विजित्य ।

१ '–अभीकम्' कामिनम् ।

२ 'तदुरः–' तथैव प्रीतिजननेन मार्गप्राप्तेः–इति आशयः ।

३ '–अब्दम्–' अब्दं मेघं मेघागमम् ।

४ 'मन्मथ–' कामसूचकम् यद्वा मन्मथस्य मन्थं ध्वंसं राति दत्ते तत् । "मन्मथः कामचिन्तायां पुष्प–चाप–कपित्थयोः" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ३११ ] "मन्थरः सूचके कोशे मन्दे पृथौ मथि" इति अनेकार्थः [ है० अने० सं० कां० ३ श्लो० ५८३ ]

५ 'सधर्म–' समानधर्माणां संबन्धात् ।

६ '–कसिपु–' भोजन–वसनप्रदानपूर्वम् ।

७ 'स्वभुज–' स्वभुजोपार्जितधनेन ।

८ 'विषम–' विषमे दुष्करे तपःप्रमुखे वितीर्णं दत्तं कृतं पदं स्थानं व्यवसायो वा यत्र कर्मणि ।

९ 'समाज्ञाः' कीर्तीर्दधानः ।

१० '–अन्याः' असदृशाः–अपूर्वाः "अन्योऽसदृशेतरयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ३३६ ]

११ 'समये' समयः सिद्धान्तः कालश्च ।

१२ 'वाहिनी–' वाहिनीपक्षे शब्दितहयघुर्घुरालंकाराः । "ओघः प्रवाहः संघातो द्रुत-नृत्त-परंपराः उपदेशे" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ५२ ]

१३ '–हंसक–' हंसकं नूपुरम्, पक्षे हंसाः । "हंसोऽर्के मत्सरेऽच्युते । खगाश्वयोगिमन्त्रादिभेदेषु परमात्मनि ॥ निर्लोभ–नृपतौ प्राणवाते श्रेष्ठेऽमतः स्थिते" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ५८१–५८२ ] तथा वधूनां गुरुयुगवाक्ये रसो यस्य स चासौ ओघः सार्थस्तस्य वाहिनीनाम्–गम्भीणाम्–गतागतैः ।

1 मा० स० स० श्लो० १६ चतुर्थः चतुर्थतया । माघे 'व्यतिविद्ध–' इति ।

2 मा० स० स० श्लो० १७ चतुर्थः चतुर्थतया ।

3 मा० स० स० श्लो० १८ चतुर्थः चतुर्थतया ।

4 मा० स० स० श्लो० १९ चतुर्थः चतुर्थतया ।

5 मा० स० स० श्लो० २० चतुर्थः चतुर्थतया ।

6 मा० स० स० श्लो० २१ चतुर्थः चतुर्थतया । माघे 'बलादिवाऽन्या' इति । अत्र लिखितादर्शे 'विषमवितीर्णपदंबलाऽदिवा'- इत्येवं पदच्छेदः कृतः । तदनुसारी अर्थो न ज्ञायते ।

7 मा० स० स० श्लो० २२ चतुर्थः चतुर्थतया ।

8 मा० स० स० श्लो० २३ चतुर्थः चतुर्थतया ।

मधुपिकरुतलक्षणत्रिलोकीव्यधपटुमन्मथचापनादशङ्काम्[1] ॥ २४ ॥
गुरुनमनतदुक्तिपानयोगात् नगरजने मुदितेऽन्तरुत्सवेन ।
बहिरपि बहुधान्यभूर्नु नृत्यमतनुत नूतनपल्लवाङ्गुलीभिः[2] ॥ २५ ॥
अथ परमगुरुस्ततो विहृत्य विमलगिरिं समवाप्य सोऽप्यधीशम् ।
कुसुमितवनकैतवात् परागैः समुपहरन् विचकार कोरकाणि[3] ॥ २६ ॥
अलभत सहचारिरायचन्द्रप्रमुखजनोऽपि नृपेश्वरातिथेयीम् ।
प्रतिपदमसकृत् तदुत्तमानामनुगमने खलु सम्पदोऽग्रतस्थाः[4] ॥ २७ ॥
दिवि सुरतरवो ह्रिया बभूवुर्भ्रमरमिषान्मलिनास्तु रायचन्द्रे ।
नृपपुरजनसङ्घभोज्यदानैर्दधति परिस्फुटमर्थतोऽभिधानम्[5] ॥ २८ ॥
मुनिविभुरभिनम्य मारुदेवमतिचरणं पुरतोऽस्य चालुलोच ।
स्वसमयविधिना ततस्तमः स्वं प्रसभमनीयत भङ्गमङ्ग ! नाना[6] ॥ २९ ॥
अभिगतसहगामिसङ्घलोकैर्विहितमहं पुरमुन्नतं गतस्य ।
गुरुपदनमने प्रभो रसालः शिरसि मुदेव मुमोच पुष्पवर्षम्[7] ॥ ३० ॥
समयमिह विमृश्य देवसूरिरनशनमुच्चगिरोच्चचार कल्यः ।
तदवगमनतो जनेन दैवात् विगतदयं खलु खण्डितेन मम्ले[8] ॥ ३१ ॥
दिनमतिविरसं दिशोऽपि धूम्रा जगदपि खिन्नमजन्ययोगैः ।
वियति घनरजोऽमिलद् धरोच्चैस्तनतटरोधि तिरोदधेंऽशुकेन[9] ॥ ३२ ॥
अवतरदमराध्वतो विमानं झटिति ददर्श दिशः प्रभासमानम् ।
सुरयुवतियुतं जनालिरुच्चैर्विपुलतरोन्मुखलोचनावलम्बम्[10] ॥ ३३ ॥
त्रिदिवमधिगमेन पावय त्वं मुनिनृप ! भूः प्रतिबोधितेति वाचः ।
त्रिदशमृगदृशोऽवतीर्य नेमुः स्फुटतरलक्ष्यगभीरनाभिमूलाः[11] ॥ ३४ ॥
मधुरतरगिरा जगौ सुरस्त्री व्यतनुत मौक्तिकवर्द्धनानि काचित् ।

---

१ '-शङ्काम्' "शङ्का स्यात् संशये भये" [ है० अने० सं० कां० २ श्लो० १७ ] इत्यपि ।

२ '-नु' वितर्के ।

३ 'विचकार' विकाशयामास ।

४ 'स्वम्' 'अङ्ग' इति संबोधने । नाना अनेकप्रकारम् स्वं स्वकीयम् तमः पापम् भङ्गम् अनीयत ।

५ 'कल्यः' नीरुक्-रोगरहितः ।

६ 'विगतदयम्' यथा स्यात् तथा दैवात् खण्डितेन छिन्नेनेव मम्ले संकुचितम् ।

७ '-अजन्य-' अजन्यः उत्पातः ।

८ 'अंशुकेन' सूर्येण "अंशुः सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ५३० ]

९ 'अवलम्बम्' उच्चैः अवलम्बम् ।

---

1 मा० स० स० श्लो० २४ चतुर्थः चतुर्थतया ।

2 मा० स० स० श्लो० २५ चतुर्थः चतुर्थतया ।

3 मा० स० स० श्लो० २६ चतुर्थः चतुर्थतया ।

4 मा० स० स० श्लो० २७ चतुर्थः चतुर्थतया ।

5 मा० स० स० श्लो० २८ चतुर्थः चतुर्थतया ।

6 मा० स० स० श्लो० २९ चतुर्थः चतुर्थतया । माघे '-मङ्गनानाम्' इति ।

7 मा० स० स० श्लो० ३० चतुर्थः चतुर्थतया ।

8 मा० स० स० श्लो० ३१ चतुर्थः चतुर्थतया ।

9 मा० स० स० श्लो० ३२ चतुर्थः चतुर्थतया ।

10 मा० स० स० श्लो० ३३ चतुर्थः चतुर्थतया ।

11 मा० स० स० श्लो० ३४ चतुर्थः चतुर्थतया । माघे '-नाभिमूला' इति ।

गुरुनिहितदृगाऽऽनतोत्तरीयग्रहणपदं न चिरं विलम्ब्य काचित्[1] ॥ ३५ ॥
अथ किल कथिते सखीभिरत्र[१] क्षणमवधूत्य भुविर्निवासिनीभिः ।
गुण-विधु-हय-भू-मिताब्दयोगे (१७१३) स गुरुरधाद् दृढमासनं समाधेः[2] ॥ ३६ ॥
शुचिश्[२]शुचिभव (११) तिथ्यहर्मुखेऽगात् स्मृतपरमेष्ठिपदः स्वरेष देवः ।
व्यरचि च शिबिका जनेन गुर्वी प्रतिपदसंयमिताशुकावृताङ्गी[3] ॥ ३७ ॥
गुरुवपुषि निवेशितेऽथ तस्यामरुददलं जनता घ्नती स्ववक्षः ।
बहुलकरुणया[३]ऽलुठद् मुमूर्च्छे किमपि रसेन रसान्तरं भजन्ती[4] ॥ ३८ ॥
अगुरुमलयजार्जुनाभ्रपूर्णज्वलितचितौ तनुमैक्ष्य(?) किं नु[४] जीवन् ।
स्वरयमिति सुरी जगौ प्रसह्य स्फुटमपि भूषयति स्त्रियस्त्रपै[५] व[5] ॥ ३९ ॥
मृगमदघनसारचन्दनाढ्याऽप्यरुणसिचा पिहिता चिताङ्गनेव ।
न कमिह नवमोहमा[६]शु निन्ये स्फुटमपि भूषयति स्त्रियस्त्रपैव[6] ॥ ४० ॥
अहह दहति गात्रमत्र वह्नौ ज्वलितमभूद् भुवनं शुचा किमन्यत् ।
अवहितमनसा जनैर्न सूरेः प्रणिदधिरे दयि[७]तैरनङ्गलेखाः[८][7] ॥ ४१ ॥
कतिपयदिवसैर्विहारमुच्चै रुचिरमचीकरदत्र रायचन्द्रः ।
द्रुतमहनि शुभेऽस्य तेन केतोः कृतभुजमूलमबन्धि मूर्ध्नि माला[8] ॥ ४२ ॥
अथ गुरुविरहार्तमाह सङ्घः समयविदं विजयप्रभाख्यसूरिम् ।
अकमधरयं धीर ! तीर्थमन्यैरधिकमधि[११]त्वदने[१२]न मा निपाति[9] ॥ ४३ ॥
पथि पथि सुदृशां[१३] गणो मुखाब्जाद् वचनरसस्य पिपासया त्रिसायम् ।

---

१ 'क्षणम्–' स्वर्वासिसखीभिः उक्ते क्षणम् उत्सवं मत्वा ।
२ 'शुचि–' शुचिः आषाढः तस्य उज्ज्वल–एकादश्याम् ।
३ 'बहुलकरुणया' जातरसेन शोकेन रसान्तरं भूमध्यम् ।
४ 'नु' उत्प्रेक्षायाम् । "स्फुटो व्यक्त–प्रफुल्लयोः" अनेकार्थः [ है० अने० सं० कां० २ श्लो० ९८ ]
५ '–त्रपै' अहं त्रपै–हे स्त्रियः ! अहं लज्जां करवाणि वः युष्मान् प्रसह्य अयं गुरुः किं जीवन् स्वर्गं भूषयति इति सुरी जगौ ।
६ 'नवमोह–' चितापक्षे नवमोहः मूर्च्छा । पक्षे मोहनं वशीकरणम् । अत्र उत्प्रेक्षायां समस्या लाप्या । "त्रपा लज्जा–कुलटयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० २९१ ]
७ '–दयितै–' दया करुणा जाता येषां ते तैः ।
८ 'अनङ्गलेखाः' जगत् 'शुचा' शोकेनेव दग्धं जातम् अन्यत् किमुच्यते अनङ्गलेखाः अङ्गाभावसमाचाराः सावधानतया न ध्याताः । "रेखाऽल्पके छद्मनि आभोगोल्लेखयोः" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० २४ ]
९ '–भुजमूल–' "मूलं पार्श्वाद्ययोरुडौ" [ है० अने० सं० कां० २ श्लो० ४९५ ] "भुजो बाहौ करे" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० ७२ ] कृतानि भुजमूलानि करादीनि यत्र तत्–हस्तबिम्बानि लिखितानि इत्यर्थः । विहारस्य मूर्ध्नि तेन रायचन्द्रेण केतोर्ध्वजस्य माला अबन्धि ।
१० 'अधरय' हे धीर । अकम्–दुःखम् अधरय–पराकुरु ।
११ '–अधित्वत्–' त्वयि अधिकृत्य वर्तते–इति अधित्वत् ।
१२ '–अनेन' अनेन दुःखेन अन्यैः कुमतिभिः तीर्थं मा निपाति तीर्थम् ।
१३ 'सुदृशाम्' सम्यक्त्ववताम्, स्त्रीणां वा गणः नववदन–कमलात् रसस्य पिपासया मधुप इव आजिहीते–आयाति ।

---

1 मा० स० स० श्लो० ३५ चतुर्थः चतुर्थतया । माघे'–ग्रहणपदेन' इति ।
2 मा० स० स० श्लो० ३६ प्रथमः प्रथमतया ।
3 मा० स० स० श्लो० ३६ चतुर्थः चतुर्थतया ।
4 मा० स० स० श्लो० ३७ चतुर्थः चतुर्थतया ।
5 मा० स० स० श्लो० ३८ चतुर्थः चतुर्थतया । माघे 'स्फुटमभिभूषयति' इति । अत्र लिखितादर्शे 'ऐक्ष्य' इति प्रयोगः कथं साधुः ? 'आ+ईक्ष्य–एक्ष्य' स्यात् ।
6 मा० स० स० श्लो० ३८ चतुर्थः चतुर्थतया ।
7 मा० स० स० श्लो० ३९ चतुर्थः चतुर्थतया ।
8 मा० स० स० श्लो० ४० चतुर्थः चतुर्थतया ।
9 मा० स० स० श्लो० ४१ चतुर्थः चतुर्थतया ।

विषयरसमपास्य[१] सम्भृतो[२]ऽसावधरममुं मधुपस्तवाजिहीते[1] ॥ ४४ ॥
रविरिव तदलङ्कुरुष्व सिंहासनमुदयाद्रिमुदीतपुण्यभासा ।
तिमिरमपनय प्रमादजन्यं भवति हि[३] विक्लवता गुणोऽङ्ग नाना[2] ॥ ४५ ॥
ध्वनति नृपतितूर्यधीरघोषे नटति नटे गुरुपट्टमाश्रयत् सः ।
परमगुरुरतोऽतिमुत्[४]जनाल्याऽऽग्रहपरया विविदे[५] विदग्धसख्या[६][3] ॥ ४६ ॥
स्थितवति गुरुपट्टकेऽत्र भट्टारकतरणौ[७] यदभूत् प्रमोदरूपम् ।
हृदि हरिणदृशां तदा प्रनृत्यत्-करवलयक्वणितेन तद् विवव्रे[4] ॥ ४७ ॥
करसरसिजवासमासदत् श्रीः परमगुरोः श्रुतदेवताऽऽश्रयद् गाम्[८] ।
जगति सुभगताऽस्य सर्वतोऽङ्गमकलितचापलदोषमालिलिङ्ग[5] ॥ ४८ ॥
गुरुमतिधृतिकीर्तिभाग्यतेजः-प्रसरमवेक्ष्य मृगीदृशां मुदासीत्[९] ।
हृदि बहिरपि सोन्नतेऽमिताऽऽसामुरसि रसादवतस्तरे स्तनाभ्याम्[6] ॥ ४९ ॥
चतुर इह पुरे व्यतीत्य मासान् विमलगिरिं सह सङ्घमाप सूरिः ।
जनततिरसृजत् स्रजोऽर्चनार्थं न्यपतदथोच्चतरूच्चिचीषयाऽन्या[१०][7] ॥ ५० ॥
प्रभुरपि समहोत्सवं ननाम प्रथमजिनं च तमार्चयत् स सङ्घः ।
शिरसि जिनमिहार्चयायि ! कश्चित् स्वयमिति मुग्धवधूर्मुदास[११] दोर्भ्याम्[8] ॥ ५१ ॥
युवतिकुलमलं जगाविहानु सघुसृणचन्दनपूजं जिनस्य ।
न..नपटुबटुं स्म चाहरन्ती त्वरयति रन्तुमहो जनं मनोभूः[१२][9] ॥ ५२ ॥
कतिपयदिवसान्तरे गुरूणां प्रतिवलने पथि भूमिका[१३]ऽपि लघ्वी ।
अनुपदमशनाय सङ्घमुच्चैरभवदमुश्वति वल्लभेऽतिगुर्वी[10] ॥ ५३ ॥
जलधरसमयेऽन्तरे पयोधेः सुविभवमन्दिरबन्दिरे स्थितेऽस्मिन् ।

---

१ 'अपास्य' त्यक्त्वा अमुम्-अधरं हीनं विषयरसम् ।

२ 'संभृतः-' सावधानः ।

३ 'हि' हि निश्चितम् विक्लवता अगुणः दोषः । 'अङ्ग' संबोधने 'नाना' अनेकप्रकारः ।

४ 'अतिमुत्' पट्टस्थाने आग्रहकारिण्या जनश्रेण्या अतिमुत् हर्षः ।

५ 'विविदे' लब्धः "विद लाभे" धातुः ।

६ 'विदग्ध-' विदग्धानां चतुराणां सखीव सखी तया ।

७ 'भट्टारक-' भगेन ज्ञानादिना तारके पृषोदरादित्वात् साधुः ।

८ 'गाम्' वाणीम् ।

९ 'मुद् आसीत्' मुद् हर्षः । सा मुत् हृदि अमिता मानम् अप्राप्ता बहिरपि आसां स्त्रीणाम् उरसि स्तनाभ्यामुन्नते अवतस्तार-विस्तारमाप ।

१० 'अन्या' काचित् जनततिः ।

११ 'उदास' अयि इति आमन्त्रणे इह शिरसि जिनम् अर्चय इति हेतोर्मुग्धवधूं दोर्भ्याम् उदास उच्चैश्चकार ।

१२ 'भूः' मनोरूपा भूः बटुं रन्तुं रमयितुं जनं लोकं त्वरयति स्म । मनश्चित्तम् आहरन्ती मोहयन्ती ।

१३ 'भूमिका-' भूमिका प्रयाणभूः ।

---

1 मा० स० स० श्लो० ४२ चतुर्थः चतुर्थतया ।

2 मा० स० स० श्लो० ४३ चतुर्थः चतुर्थतया । माघे '-जनानाम्' इति ।

3 मा० स० स० श्लो० ४४ चतुर्थः चतुर्थतया ।

4 मा० स० स० श्लो० ४५ चतुर्थः चतुर्थतया ।

5 मा० स० स० श्लो० ४६ चतुर्थः चतुर्थतया ।

6 मा० स० स० श्लो० ४७ चतुर्थः चतुर्थतया ।

7 मा० स० स० श्लो० ४८ चतुर्थः चतुर्थतया । माघे '-व्रत-रोचिची-' इति ।

8 मा० स० स० श्लो० ४९ चतुर्थः चतुर्थतया ।

9 मा० स० स० श्लो० ५० चतुर्थः चतुर्थतया । माघे 'मनोभूः' ।

10 मा० स० स० श्लो० ५१ चतुर्थः चतुर्थतया ।

सुकृतमिह जनश्चकार तत् किं किमिव न शक्तिहरं स साध्वसानाम्[1] ॥ ५४ ॥
नगरमिदमतीव धर्मयोग्यं धननिचितं कनकं त्वमत्र हीरः[2] ।
इति कुरु गुरुराज ! वार्षिके[3] द्वे भवतु यतः सहशोश्चिराय योगः[2] ॥ ५५ ॥
इति गृहिवचसा द्वितीयवर्षा अपि स निनाय गुरुस्तथैव तत्र[4] ।
मृदुवचनसुधारसैर्जनानां चिरपरिपूरितमेव कर्णयुग्मम्[3] ॥ ५६ ॥
अथ गुरुचलने क्रमात् पुरोऽस्याः सकलजनेऽनुगते प्रसूं सुतोऽवक् ।
कृतयुगमगमत् बतोपतापी शठकलिरेव महांस्त्वयाद् यदत्त[5] ![4] ॥ ५७ ॥
अथ गुरुरगमत् क्रमान्नगर्याः सकलजनानुगतौ पतिं प्रियोचे ।
यदि चलयसि मामम[6] न तन्मे शठ ! कलिरेव महांस्त्वयाऽद्य दत्तः[5] ॥ ५८ ॥

[ पाठान्तरम् ]

वदति जयपदानि भट्टलोके प्रणदति वाद्यगणे प्रभासमायात् ।
गुरुरभिधृततोरणं वधूनां[7] समममसिताम्बुरुहेण[8] चक्षुषा च[6] ॥ ५९ ॥
कृतसुरपुर-जीर्णदुर्गवर्षः[9] स गुरुरगात् पुरबन्दिरेऽस्य लक्ष्म्या[10] ।
सुजनपरदृशोः क्रमात् सुधाभिर्द्वयमपि रोषरजोभिरापुपूरे[7] ॥ ६० ॥
सुकृतभरवहैर्महैः स तत्र शरदमतीत्य ययावुपाब्धिकूलम्[11] ।
तदधिगममुदा पुरे रसाली मृदुकुसुमेऽनयदा[12]ऽहताऽप्यमूच्छेत्[8] ॥ ६१ ॥
अवसरमिममाप्य शुद्धबुद्धिर्वितरणभोजनपौषधांश्च कुर्वन् ।
इह तपसि पुरो गुरोर्निदध्रे[13] सपदि हिरण्मयमण्डनं स पत्न्या[9] ॥ ६२ ॥

---

१ 'साध्वसानाम्' भयानां शक्तिहरं सुकृतं किं किं न चकार स जनः ।

२ 'हीरः' नगरं कनकम् त्वं हि-निश्चितम् ईरकः-धर्मस्य प्रेरकः पक्षे त्वं हीरगुरुः । [ हि+ईरः=हीरः ]

३ 'वार्षिके' द्वे पर्युषणे पर्वणी ।

४ 'तत्र' द्वीपबन्दिरे ।

५ 'यदत्त' [ यद्+अत्त ! ] हे अत्त ! हे मातः ! अत्ता मातृ-वाची तत्संबोधनम् । मातरं पुत्रोऽवक्-हे मातः ! यद् यस्मात् हेतोः कृतयुगम् अयात्—गतम्, महान् वृद्धः शठकलिः प्राप्तः "शठो मध्यस्थपुरुषे धूर्ते धत्तूरकेऽपि च" इति अनेकार्थः [ है० अने० सं० कां० २ श्लो० १०७ ]

६ '–अमा' सह । यदि माम् अमा सह न चलयसि तर्हि मे मह्यम् हे शठ ! त्वया अद्य कलिरेव दत्तः कलहः क्लेशो वा ।

७ 'वधूनाम्' वधूनां चक्षुषा 'च' इवार्थे असिताम्बुरुहेण समं कृततोरणं प्रभासनगरम् । 'चक्षुषा' इति जातौ एकवचनम् ।

८ यद्वा ममो ममत्वम् तेन सह यत् सिताम्बुजं तेन । अमम-निर्मम-इत्यादिवत् प्रयोगः ।

९ '–सुरपुर–' सुरपुरं देवकपत्तनम्, जीर्णदुर्गम् तत्र च कृतचतुर्मासः ।

१० 'लक्ष्म्या' शोभया ।

११ '–कूलम्' कूलं वेलाकूलम् "सत्यभामा भामा" इति न्यायात् पदैकदेशे पदग्रहः ।

१२ '–सुमे नय–' यद्वा नयदैः न्यायकारकैः अहता अवारिता धावन-वल्गन-नर्तनादिभिः इति शेषः ।

१३ 'निदध्रे' इह नगरे पत्न्या करणभूतया तपसि स कश्चिद् शुद्धबुद्धिः गुरोः पुरो हिरण्मयमण्डनं गूंहलीति प्रसिद्धं दधौ ।

---

1 मा० स० स० श्लो० ५२ चतुर्थः चतुर्थतया । माघे 'ससाध्वसानाम्' ।

2 मा० स० स० श्लो० ५३ चतुर्थः चतुर्थतया ।

3 मा० स० स० श्लो० ५४ चतुर्थः चतुर्थतया ।

4 मा० स० स० श्लो० ५५ चतुर्थः चतुर्थतया । माघे 'शठ ! कलिरेष महांस्त्वयाद्य दत्तः' इति ।

5 मा० स० स० श्लो० ५५ चतुर्थः चतुर्थतया ।

6 मा० स० स० श्लो० ५६ चतुर्थः चतुर्थतया ।

7 मा० स० स० श्लो० ५७ चतुर्थः चतुर्थतया ।

8 मा० स० स० श्लो० ५८ चतुर्थः चतुर्थतया ।

9 मा० स० स० श्लो० ५९ चतुर्थः चतुर्थतया । माघे 'सपत्न्याः' इति ।

तदनु जलधिमध्यबन्दिरेऽस्य पुनरपि पर्युषणाद्वयस्य कर्तुः ।
समयमिव विहर्तुमन्यदै[१]ष्यो(?) भ्रमररुतैरुपकर्णमाचचक्षे[1] ॥ ६३ ॥
सुकृतिकृतघनाग्रहं विहाय द्रुतमपि बन्दिरमीशिता मरुद्वत्[२] ।
विमलगिरिमियाद् जिनाघनत्यै न परिचयोऽ[३]मलिनात्मनां प्रधानम्[2] ॥ ६४ ॥
दृढपरिचितबन्दिरस्थसङ्घोऽप्यवलत गच्छपतिं प्रणम्य तस्मात् ।
मुकुलितनयनः सबाष्पवृन्दैर्घनमहतामिव पक्ष्मणां भरेण[3] ॥ ६५ ॥
बहुधनसुदृशां गवा घनौघे[४]ऽकृत वरपर्युषणां स सूरिरत्र ।
सुरयुवतिभिरभ्यनामि[५] खेदादपगतकुङ्कुम[६]रेणुभिः कपोलैः[4] ॥ ६६ ॥
सुकृतरतिजसूस्त्रिया जिनार्चा[७] गुरुरयमानयति स्म सत्प्रतिष्ठाम् ।
अमहयदबला च ताः पयोजैः करकमलैः पुनरुक्तरक्तभाभिः[5] ॥ ६७ ॥
अथ जिगमिषुरेष गूर्जरत्रां प्रथमजिनं प्रणिपत्य सिद्धशैले ।
पथि हरिणदृशामवन्दि वृन्दैः स्तन[८]युगलैरितरेतरं निषण्णैः[6] ॥ ६८ ॥
द्रुततरगमनैर्विधाय यात्रां घनजनसङ्गतसूरिसार्थमाप्य ।
कलमनुचलनेष्वगायि वेगं करिकलभोरुभिरूरु[९]भिर्दधानैः[7] ॥ ६९ ॥
अभिगतघननागरौघसङ्घरथगजवाजिपदातिसान्द्रमार्गम् ।
वनमपि नगरायितं जनानां भृशविनिवेशवशात् पर[१०]स्परस्य[8] ॥ ७० ॥
अथ नगरमहम्मदादिवादं समुपगते मुनिपेऽद्भुते तरुण्यः ।
स्थिरतरनयनैः [११]शचीत्वमापुश्चिरमपि ताः किमुत प्रयासभाजः[9] ॥ ७१ ॥
अभिनयकरणैर्जनाकुलान्तर्गमनवशाच्च गुरोर्नतेस्त्रिसायम् ।
स्रगपि मृगदृशां मणेरधस्तादथ शतशर्करतां जगाम तासाम्[10] ॥ ७२ ॥
परमगुरुगिरा रतेर्निवृत्तेर्नववयसि ग्रहणे तदा विरेजे ।

---

१ '-इष्यो-' वसन्तः ।

२ 'मरुद्वत्' वायुवत् ।

३ '-अमलिना-' उज्ज्वलमनसाम् । बहुशः कृतयात्रत्वात् परिचिते अनादरः इति न ज्ञेयम् "नवं नवं प्रीतिकरम्" इति न्यायात् ।

४ 'घनौघे-' घनौघनामनगरे । 'गवा' वाचा ।

५ 'सुर-' तत्र देवीभिः प्रणतः ।

६ 'रेणुभिः' दूराद् आगमः खेदेन ज्ञाप्यते तेन कश्मीरजलेपैः कपोलैः उपलक्षिताभिः ।

७ 'जिनार्चा' जसूनामश्राविकया कारितप्रतिमाः प्रतिष्ठां गुरुरानयत् ।

८ 'स्तन-' स्तनयुगलैः कृत्वा अन्योऽन्यं मिलितैः । स्त्रीणामति-बाहुल्यव्यञ्जकमेतत् ।

९ 'ऊरुभिः' वेगं दधानैः अनुचलनेषु कलम् अगायि ।

१० 'परस्पर-' अन्योन्यगाढावस्थानात् ।

११ 'शचीत्व-' अद्भुते चित्रे स्थिरदृग्भिः तरुण्यः शचीत्वम्-इन्द्राणीभावमापुः । 'किमुत' इति वितर्के । 'प्रयासभाजः' संकुलत्वात् श्रमप्राप्ता इव ।

---

1 मा॰ स॰ स॰ श्लो॰ ६० चतुर्थः चतुर्थतया । लिखितादर्शे 'अन्यदैष्यो-इत्यस्ति परं 'अन्यदा+इष्यो' इत्यनयोः 'अन्यदैष्यो'-इति कथं स्यात् ?

2 मा॰ स॰ स॰ श्लो॰ ६१ चतुर्थः चतुर्थतया । माघे 'परिचयो मलिना-' ।

3 मा॰ स॰ स॰ श्लो॰ ६२ चतुर्थः चतुर्थतया ।

4 मा॰ स॰ स॰ श्लो॰ ६३ चतुर्थः चतुर्थतया ।

5 मा॰ स॰ स॰ श्लो॰ ६४ चतुर्थः चतुर्थतया ।

6 मा॰ स॰ स॰ श्लो॰ ६५ चतुर्थः चतुर्थतया ।

7 मा॰ स॰ स॰ श्लो॰ ६६ चतुर्थः चतुर्थतया । माघे 'कलभकरोरुभि-' इति ।

8 मा॰ स॰ स॰ श्लो॰ ६७ चतुर्थः चतुर्थतया ।

9 मा॰ स॰ स॰ श्लो॰ ६८ चतुर्थः चतुर्थतया ।

10 मा॰ स॰ स॰ श्लो॰ ६९ चतुर्थः चतुर्थतया ।

प्रियपितृकुलचैत्यकुम्भरूपं कुचयुगमुज्वलमेव कामिनीनाम्[1] ॥ ७३ ॥
ददति वितरणं यथेष्टमिभ्ये युवतितपोमहमाप्य वाद्यघोषैः ।
तदनुमतिकृतेऽन्ययेशवस्त्रं स्तनपिहितप्रियवक्षसा ललम्बे[2] ॥ ७४ ॥
व्रतमधित जिनार्चनानि तेनेऽभिनवमहैश्च दिदेश दानमिष्टम् ।
उपगुरु जनता न किं सुकृत्यं व्यवृणुत वेल्लितबाहुवल्लरीका[3] ॥ ७५ ॥
नगरमिव महोदयैः स बीबीपुरमपि पर्युषणां पुपाव कुर्वन् ।
स्तुतिमणिविततौ सता ततस्ते[3] तरलतया तरुणेन पस्पृशाते[4] ॥ ७६ ॥

इत्थं जैनप्रवचनमिहोद्भाव्य शङ्खेश्वरस्थं
पार्श्वं नन्तुं तपगणगुरुर्जग्मिवान् सङ्घयुक्तः ।
अध्वक्लान्तेर्नवरसयुजां स्मेरपद्माननानां
स्वेदापूरो युवतिसरितां व्याप गण्डस्थलानि[5] ॥ ७७ ॥
अनमदभिनतैन्द्रं पार्श्वविश्वाधिनाथम्
स गुरुररुणतेजा मेघलक्ष्मीं प्रभाव्य ।
महयितुमिममिभ्याः स्वं शुचीचक्रुरद्धि-
र्वनविहरणखेदम्लानमम्लानशोभाः[6] ॥ ७८ ॥

॥ इति समस्या संपूर्णा जातः(ता) ॥

इति श्रीमद्देवानन्दे महाकाव्ये दिव्यप्रभापरनाम्नि ऐङ्काराङ्के माघसमस्यार्थे श्रीतपागच्छे महोपाध्यायश्रीमेघविजयगणिविरचिते श्रीविजयदेवसूरीश्वरनिर्वाणगमन-तत्पट्टप्रभाकरश्रीविजयप्रभसूरीश्वराभ्युदयवर्णननामा सप्तमः सर्गः सम्पूर्णः ॥ [इ]ति श्रेयः ॥ पूर्ण(र्णे) च तस्मिन् ग्रन्थोऽपि सिद्धिमध्यास्त ॥ श्रीरस्तु ॥
॥ कल्याणमस्तु ॥ लेखकपाठकयोः ॥ श्रीः ॥ छ ॥

---

१ 'अन्यया' अन्यया कयाचित् कान्तया तत् तपसः आज्ञायै पतिवस्त्रं गृहीतम् । किंभूतया ? स्तनाभ्यां पिहितं प्रियवक्षो यया आलिङ्गनकारिकया तपसः आज्ञां मह्यं कर्तुं देहि तां विना गन्तुं न युक्तमिति आशयेन ।

२ 'वेल्लित-' जनता किंभूता ? वेल्लिता प्रसारिता बाहुरूपा वल्लरी लता यया सा-धर्मव्यये मुत्कलितहस्ता ।

३ 'ते-' ते द्वे नगरम् बीबीपुरं च स्तवनरत्नमालायां तरलतया मणिभावनया संदर्भिते ग्रथिते तरुणेन नवेन । "तरुणः कुचकुप्ये स्यादेरण्डे यूनि नूतने" इति अनेकार्थः [ है० अने० का० सं० कां० ३ श्लो० ६९५ ] "तरलो भास्वरे चले हारमध्यमणौ षिङ्गे" इत्यपि [ है० अने० का० सं० कां० ३ श्लो० ६४६ ] तत्र सता पण्डितेन ।

४ 'मेघलक्ष्मीम्' पक्षे मेघस्य मम लक्ष्मीं कृत्वा वाचकपददानाम् । अन्योऽपि अरुणतेजाः सूर्यः मेघलक्ष्मीं प्रभावयति वर्धयति "आदित्याज्जायते वृष्टिः" इति श्रुतेः ।

५ 'महयितुम्' इत्थं श्रीभगवन्तं महयितुं पूजयितुम् "मह धातुश्चुरादिः" ।

---

1 मा० स० स० श्लो० ७० चतुर्थः चतुर्थतया ।
2 मा० स० स० श्लो० ७१ चतुर्थः चतुर्थतया ।
3 मा० स० स० श्लो० ७२ चतुर्थः चतुर्थतया ।
4 मा० स० स० श्लो० ७३ चतुर्थः चतुर्थतया ।
5 मा० स० स० श्लो० ७४ चतुर्थः चतुर्थतया ।
6 मा० स० स० श्लो० ७५ चतुर्थः चतुर्थतया ।

## अथ प्रशस्तिः

जयतु विजयलक्ष्म्या पार्श्वविश्वैकभास्वान् अभिमतसुरशाखी सैष शङ्खेश्वराख्यः ।
जयतु विजयदेवश्रीगुरोः पट्टलक्ष्मीप्रभुरिह विजयादिः श्रीप्रभः सूरिशक्रः ॥ ७९ ॥

तत्सेवासक्तचेता अनवरततया प्राप्तलक्ष्मीर्विशिष्य,
शिष्यः श्रीमत्कृपादेर्विजयपदभृतः सत्कवेर्वाचकश्रीः ।
मेघः पद्माप्रसादाद् विशदमतिजुषां श्राव्यकाव्यं चकार,
देवानन्दं सदैन्द्रोज्वलविपुलधिया शोध्यतां शोध्यमत्र ॥ ८० ॥

माघः सान्निध्यकृद् भूयाद् मल्लिनाथैस्तथैक्ष्यताम् ।
हास्येन मम दास्येऽस्मिन् यथाशक्युपजीविते ॥ ८१ ॥

नोद्रेकः कवितामदस्य न पुनः स्पर्द्धा न साम्यस्पृहा,
श्रीमन्माघकवेस्तथापि सुगुरोर्मे भक्तिरेव प्रिया ।
तस्यां नित्यरतेः सुतेव सुभगा जज्ञे समस्याऽद्भुता
सेयं शारदचन्द्रिकेव कृतिनां कुर्याद् दृशामुत्सवम् ॥ ८२ ॥

अस्या न मधुरा वाचो नालङ्कारा रसावहाः ।
पूर्वसङ्गतिरेवास्तु सतां पाणिग्रहश्रिये ॥ ८३ ॥

क्वचिद् वक्रोक्तिसाचिव्यमप्यस्या दोषकृन्न हि ।
सौभाग्यवशतो जह्रे यदर्थं कृतिनामपि ॥ ८४ ॥

मुनि-नयना-श्वे-न्दु-मिते (१७२७) वर्षे हर्षेण सादडीनगरे ।
ग्रन्थः पूर्णः समजनि विजयदशम्यामिति श्रेयः ॥ ८५ ॥

---

शरेन्द्रियाद्रीन्दुमितेऽत्र (१७५५) वर्षे व्यलीलिखत् काव्यमिदं सुशिष्यः ।
श्रीमेरुशब्दाद् विजयज्ञराजां श्रीसुन्दरादिर्विजयाऽभिधानः ॥ १ ॥

युग्मं सम्यग्मङ्गलं सौरमस्मिन् माघेऽवर्णि ज्ञाननित्योदयाय ।
अस्याभ्यासाद् जाड्यनाशात् प्रभावः प्रौढिं धत्तां मेरुवत् श्रीश्च धीराः ॥ १ ॥

एकादशशतश्लोकैः श्लोको लोके समेधताम् । वाचकेऽध्यापके चास्य देयाश्रित्यं समेधताम् ॥२॥
गोपालगिरिदुर्गेऽस्य लेखनं लेखनन्दनम् । वाचकैर्मेघविजयैः कृतं सुकृतहेतवे ॥ ३ ॥

॥ इति ग्रन्थप्रशस्तिः ॥ सम्पूर्णा जातः(ता) ॥

॥ इति श्रेयः ॥ श्रीः ॥

---

१ 'इभ्याः' मेघलक्ष्मीम् अद्भिर्जलैः प्रभाव्य वर्धयित्वा स्वम् आत्मानं शुचीचक्रुः-पवित्रं विदधुः-आषाढीचक्रुरिति वा । मेघलक्ष्मीम्-प्रावृषि आषाढे वा मेघोदयम्-ज्ञात्वा श्रीजिनम् अनंसीत् ।

२ 'समेधताम्' सबुद्धिभावम् ।

३ 'लेख-' लेखा देवाः ।

# देवानन्दमहाकाव्यान्तर्गतानां विशेषनाम्नां संग्रहः ।


**अकब्बर** [ नृपः ] १५,१९

**अखई-भू** [ वर्धमान-नामा श्रेष्ठिसुतः ] ६२

**अजाहर** [ श्रीपार्श्वनाथतीर्थम्–'अजाहरा' इति नाम्ना प्रतीतम् ] ३६

**अजातशात्रवी** [ इन्द्रप्रस्थं नाम नगरम् ] २१

**अणहिल्लकपत्तन** [ 'अणहिलपुर पाटण' नाम्ना प्रतीतम् ] ६१

**अमरेन्दुविबुध** [ अमरचन्द्रकविर्वाचकपदाङ्कितो जैनमुनिः ] ५३, –टि० ११

**अवरंगपद** [ 'औरंगाबाद' नाम्ना प्रसिद्धं नगरम् ] ५०

**अवरंग–साहितनय** [ 'औरंगजेब' नाम्ना ख्यातो नृपपुत्रः ] ४५, –टि० ३

**अहमदाबाद ( अहमद,–अहिमद,–अहमदाबाद )** [ 'अमदाबाद' नाम्ना विश्रुतं नगरम् ] ६१,–टि० ६,६७,७१, ७६

**अंतरिक्ष** [ श्रीपार्श्वनाथतीर्थम्–'अंतरीखजी' नाम्ना ख्यातम् ] ५०,५५

**इलादुर्ग ( इलादिदुर्ग )** [ 'ईडर' नाम्ना ख्यातं नगरम् ] ४,२२ –टि० २,२९

**उदयसागर** [ 'उदयसागर' नामकं सरोवरम् ] ३५ टि० ८

**उन्नतपुर** [ सौराष्ट्रदेशान्तर्गतं 'ऊना' इति ख्यातं नगरम् ] ७२

**कच्छ** [ देशस्य नाम ] ३८

**कनकविजय ( कनक )** [ विजयदेवसूरिशिष्यः ] २१,२९,३०

**करहेड** [ 'करेडा' इति प्रसिद्धं श्रीपार्श्वनाथतीर्थम् ] ४८

**कलिकुंड** [ तन्नाम्ना ख्यातं श्रीपार्श्वनाथतीर्थम् ] ४८

**कल्याण** [ तन्नाम्ना नृपः ] २३

**कुल्लपाकपुर** [ तैलंगदेशप्रसिद्धं श्रीआदिनाथतीर्थम् ] ५३

**कृपाविजय ( कृपा,–कृपादिविजय )** [ ग्रन्थकारस्य गुरुः ] २,२ टि० १०,७७

**गिरिदुर्ग ( गिरिनार,–गिरिनारायण नाम तीर्थम् )** [ गिरनार' इति ख्यातं तीर्थम् ] ३८,३८ टि० १०

**गूर्जरत्रा** [ 'गूजरात' देशः ]३,५७,७६,३६ टि० ३,५५ टि० ५

**गोपालगिरि** [ 'ग्वालियर' नाम्ना ख्यातं नगरम् ] ७८

**गंगा** [ प्रसिद्धा नदी ] १९

**गंधपुर** [ 'गंधार' नाम्ना ख्यातं नगरम् ] ५७

**गूंहली** [ स्वस्तिकवत् विशिष्टः रचनाविशेषः ] ७५ टि० १३

**घनौघ ( नाम नगरे )** [ तन्नामकं नगरम् ] ७६,७६ टि० १४

**चतुर** [ तन्नामा श्रावकश्रेष्ठी ] ४५

**चातुरी ( चतुरिका,–चतुरां )** [ श्रावकश्रेष्ठिनः चतुरस्य पत्नी ] ४५,५३,५३ टि० १२

**चूतपल्लवी** [ आम्रपल्लवमाला माथुरदेशीयभाषया चूतपल्लवी ] ११ टि० १०

**चन्द्रशाखीय** [ 'मुनिचन्द्र' 'सोमचन्द्र' इत्येवं चन्द्रान्तनाम धारिणः चन्द्रशाखीयोपाध्यायादेः शिष्याः ] ३५ टि० १

**जगसिंह** [ तन्नामा राजा ] ३५,३६ टि० १

**जयमल्लराज** [ तन्नामा मन्त्री ] ३२,३२ टि० ४,३३,३४

**जसू** [ जसूनाम श्राविका ] ७६,–टि० ७

**जहांगिरसाहि** [ तन्नामा मोगलवंशीयः क्षितिपतिः ] २१

**जारी** [ जारीमङ्गलगीतरम्यम् ] ४४ टि० ५

**जालंधर** [ तन्नामा राजा ] ३३

**जीर्णदुर्ग** [ 'जूनागढ' इति नाम्ना ख्यातं नगरम् ] ७५,–टि० ९

**जम्बू** [ जम्बूद्वीपः ] २

**तपागच्छ ( तपगण )** [ जैनपरंपरायां प्रसिद्धस्य आम्नायस्य संज्ञा ] १४,४०–टि० २

**तिलिङ्गभाग ( त्रिलिङ्गविषय,–तिलिङ्गदेश )** [ 'तैलंग' देशस्य नाम ] ५३,५३ टि० ४

**तेजःपाल** [ नामा मन्त्री ] ३२ टि० ३

**दक्षिणा** [ 'दक्षिण' देशनाम ] ५० टि० ११

**देव** [ जामवंशीयो राजा ] ४०,–टि० ९

**देव ( देवर्षिराज,–देवगुरुराट्,–देवसूरि )** [ विजयदेवसूरिः ] ५२,५५,५६,५७,५७ टि० १०

**देवकपत्तन ( सुरपुर )** [ 'देवपाटण' इति प्रसिद्धं नगरम् ] ३६, ३७,७५,–टि० ९

**देवचन्द्र ( सुरविधु,–देवचन्द्र वणिक्,–सुरेन्दु,सुरेन्दु वणिज )** [ तन्नामा वणिक् ] ४९,४९ टि० १–६–७–५५

**देवानन्द** [ प्रस्तुतमहाकाव्यस्य नाम ] ७८

**द्वारिका ( द्वारवती )** [ प्रसिद्धा नगरी ] ३३,–टि० ४

**द्वीप ( द्वीप बन्दिर,–बन्दिर )** [ 'दीव' नाम्ना प्रसिद्धं नगरम् ] ३६,७५ टि० ४,७६

**धनजी ( धन,–धन्य )** [ तन्नामा श्रेष्ठी ] ६१,–टि० १४,६९,७०

**धनश्री** [ धनजी श्रेष्ठिनः पत्नी ] ७०

**नवीन नगर** [ 'जामनगर' नाम्ना ख्यातं पुरम् ] ४०

**नारायण** [ तन्नामा नृपः ] ६

**पद्मा** [ देवीनाम ] ७८

**पुरबन्दिर** [ 'पोरबन्दर' इति प्रसिद्धं नगरम् ] ७५

**प्रभास ( प्रभासनगरम् )** [ 'प्रभासपाटण' नाम्ना ख्यातं नगरम् ] ७५,–टि० ७४

**पींछोला** [ मेदपाटदेशे तन्नामकं सरोवरम् ] ३५ टि० ८

**पुञ्ज** [ तन्नामा नृपः ] ६

**बगलांणादेश** [ 'बागलाण' इति ख्यातः प्रदेशः ] ४५ टि० २

**बन्दिर** [ 'दीव बन्दर' इति ख्यातं नगरम् ] ७४,७६

**बर्हानपूर ( बर्हानपूर्वनगर )** [ 'बुरानपुर' इति ख्यातं नगरम् ] ५१

**बीबीपुर** [ अमदाबाद नगरस्य उपपुरम् ] ७७,७७ टि० ३

**भाग्यनगर** [ तन्नामकं नगरम् ] ५३,–टि० ५,५४

**भानु** [ तन्नामा राजा ] ६

भारत [ भारतं क्षेत्रम् ] २

मरुदेश [ 'मारवाड' नाम्ना प्रसिद्धो देशः ] ३५

मल्लिकापुर ( मलिकापुर ) [ 'मलकापुर' नाम्ना ख्यातं नगरम् ] ५२,-टि० १५

महमूंदिका [ राजमुद्रायुक्तं नाणकम्–भाषायां 'चलणी नाणुं' इति प्रसिद्धम् ] ७०

महातपा [ तपस्विनः श्रीविजयदेवसूरेः राजप्रदत्तं बिरुदम् ] २१

माघकवि [ माघकाव्यादिप्रणेता प्रसिद्धः कविः ] ७८

माधव [ तन्नामा श्रीविजयदेवसूरेः पितामहः श्रेष्ठी ] ७

मारुदेव [ आदिनाथतीर्थंकरः ] ७२

मेघ [ प्रस्तुतकाव्यकर्ता मेघविजयः ] ७७,-टि० ४

मेदपाट [ 'मेवाड' इति ख्यातः प्रदेशः ] ३५,-टि० ४

मेरुविजय [ प्रस्तुतकाव्यलिपिकर्तुः श्रीसुन्दरविजयस्य गुरुः ] ७८

याम [ 'जाम' इति प्रसिद्धो राजवंशः ] ४०,-टि० ३

रत्न [ तन्नामा श्रेष्ठी ] ६१,-टि० १४

राजनगर [ 'अमदाबाद' नाम्ना विश्रुतं नगरम् ] १५

रायचंद्र [ तन्नामा श्रेष्ठी ] ७२,७३,-टि० ९

राष्ट्रकूट [ 'राठोड' इति प्रसिद्धो राजवंशः ] ६

रुचिशाखीय [ 'विद्यारुचि' 'ज्ञानरुचि' इत्येवं रुच्यन्तनामधारिणो मुनयः ] ३५ टि० २

रूपा [ श्रीविजयदेवसूरेर्मातुर्नाम ] ७

रेवतक [ 'गिरनार' इति ख्यातः पर्वतः ] ३९

लाजमर्यादा [ तन्नामा वनस्पतिविशेषः समुद्रतीरे एव भवति ] ३८ टि० ९

लावण्यविजय [ तन्नामा मुनिः ] २१

वत्सादि [ 'वत्स' नामा देशः तदादि ] ४०,-टि० ६

वर्धमान [ भगवान् महावीरः ] ३०

वर्धमान [ श्रेष्ठि-अखईसुतः ] ६२ टि० ८

वार्धिपक्ष [ 'ज्ञानसागर' इत्येवंविधसागरान्तनामधारिणां मुनीनां पक्षः ] ४४

वासुदेव [ श्रीविजयदेवसूरेर्बाल्यनाम ] ९,१३,१६,१८

विजयदेव ( देव,–देवर्षिराज,–देवसूरि ) [ प्रस्तुतकाव्यनायकस्य श्रीविजयदेवसूरेर्नाम ] १,२०,३८,५५,५६,७७

विजयप्रभ [ यः पूर्वं मुनिदशायां विबुधवीरविजयः स एव आचार्यपदं प्राप्य विजयप्रभसूरिः विजयदेवसूरेः पट्टधरः ] ६३,७०,७१,७३,७७

विजयसेन [ श्रीहीरविजयसूरेः पट्टधरः सूरिः काव्यनायकश्रीविजयदेवसूरेः गुरुश्च ] १५

विजयादिसिंह ( सिंहसूरि ) [ यः पूर्वं मुनिदशायां कनकविजयः स एव आचार्यपदं प्राप्य विजयसिंहसूरिः विजयदेवसूरेः पट्टधरः ] ३०,३४

विद्यापुर [ दक्षिणदेशे 'बीजापुर' नाम्ना प्रसिद्धं गगरम् ] ५४,-टि० ४

विद्याविजय ( विद्यादिविजय ) [ आचार्यपदप्राप्तेः प्राक् श्रीविजयदेवसूरेर्नाम ] १८,१९,२०

विमलगिरि ( विमलाचल,–शत्रुंजय,–सिद्धशैल ) [ सौराष्ट्रदेशान्तर्गतं तन्नामकं तीर्थम् ] ३६,४१,७२,७६

वीरविजयकवि ( वीर ) [ तन्नामा जैनमुनिः ] ३७,३८,४०,४२,५५,६०,६३,६४ श्लो० ५८

वेलाकूल ( अब्धिकूल ) [ सौराष्ट्रदेशान्तर्गतं 'वेरावल' नाम्ना प्रतीतं नगरम् ] ७५ टि० ११

शत्रुंजय ( विमलगिरि ) [ तन्नामकं तीर्थम् ] ३६

शाखापुर [ उपपुरं संनिवेशः ] ७०

श्रीमल्ल [ स्तम्भतीर्थवास्तव्यस्य श्रीसोमश्रेष्ठिनः अग्रजः तन्नामा श्रेष्ठी ] १९,२०

शंखेश्वर [ तन्नामकं श्रीपार्श्वनाथतीर्थम् ] ३,७७

सहजू [ तन्नामा श्रेष्ठी ईडरनगरवास्तव्यः ] २६,२९

सादडी [ मारवाडप्रदेशे एतन्नामकं प्रसिद्धं नगरम् ] ७८

सावली [ तन्नामा ग्रामः ] २७

साहिपुरोपवन [ 'साहिंपुर' नामक ग्रामस्य उपवनम् ] ४५

साहिबदेतनय [ 'साहिबदे' नामकस्य कस्यचित् तनयः ] ६२

सिद्धशैल ( विमलगिरि ) [ तन्नामकं तीर्थम् ] ७६

सिद्धिविजय [ ग्रन्थकर्तुः गुरोः श्रीकृपाविजयस्य गुरुः ] ९,-टि० ११

सीरोहिका ( सीरोहीनगर ) [ 'शीरोही' नामकं नगरम् ]

सुरपुर ( देवकपत्तन ) [ 'देवपाटण' नाम्ना प्रसिद्धं नगरम् ] ७५,-टि० ९

सुरविधु ( देवचन्द्र ) [ तन्नामा श्रेष्ठी ] ४९

सुराष्ट्रा [ 'सोरठ' नाम्ना प्रसिद्धः प्रदेशः ] ३६

सूरतिबन्दिर ( सूरति,–स्फूर्तिबन्दिर ) [ 'सुरत' नाम्ना प्रसिद्धं नगरम् ] ४४,५६,६४

सोम [ तन्नामा श्रेष्ठी ] १९

सुन्दरविजय [ अस्य काव्यस्य लिपिकारो जैनमुनिः ] ७८

स्थिर [ श्रीविजयदेवसूरेः पिता ] ७,१४

स्तम्भतीर्थ ( हरिवेश्म ) [ 'खंभात' नाम्ना प्रसिद्धं नगरम् ] १९,३३ टि० ७

स्फूर्तिबन्दिर ( सूरति ) ५६

स्वर्णगिरि [ तन्नामा पर्वतः ] ३३,३४

हरिवेश्म [ स्तम्भतीर्थस्य अपरं नाम ] ३३,-टि० ७

हाजापाटक [ अमदावादमध्ये 'हाजा पटेलनी पोल' इति नाम्ना प्रसिद्धः पाटकः ] १७

हीरविजय ( हीरगुरु,–हीर ) [ श्रीविजयदेवसूरेः प्रगुरुः प्रभावको जैनाचार्यः ] १४,३६,७१,७५,-टि० २